सानन्दगिरिकृत-टीकशाङ्करभाष्यसम्बलित-
तैत्तिरीयैतरेयोपनिषदौ निरानन्द-
ज्ञानकृतटीकशाङ्कर-भाष्यसहित-
श्वेताश्वतरोपनिषच्च ।

THE TAITTARIYA AND AITTAREYA UPANISHADS

WITH THE

COMMENTARY OF SANKARA ACHARYA

AND THE GLOSS OF ANANDA GIRI,

AND THE

SWETASWATARA UPANISHAD

WITH THE COMMENTARY OF SANKARA ACHARYA.

EDITED BY

PANDIT JIBANANDA VIDYASAGARA, B. A.

SUPERINTENDENT OF FREE SANSKRIT COLLEGE.

CALCUTTA

PRINTED AT THE NEW INDIAN PRESS.

1874

तैत्तिरीयोपनिषद्भाष्यम् ।

ॐ यस्माज्जातं जगत्सर्व्वं यस्मिन्नेव विलीयते ।
येनेदं धार्य्यते चैव तस्मै ज्ञानात्मने नमः ॥ १ ॥
यैरिमे गुरुभिः पूर्व्वं पदवाक्यप्रमाणतः ।
व्याख्याताः सर्ववेदान्तास्तान् नित्यं प्रणमाम्यहम् ॥२॥

तैत्तिरीयोपनिषद्भाष्यटीका ॥

श्रीगणेशाय नमः ॥ यत् प्रकाशसुखाभिन्नं यन्मात्रेण प्रकाशितम् । विदितं ब्राह्मणे तत् स्वामदृश्यं ब्रह्म निर्भयम् ॥ १ ॥

यजुर्व्वेदशाखाभेदं तैत्तिरीयकोपनिषदं व्याचिख्यासुर्भगवान् भाष्यकारस्तत्प्रतिपाद्यं ब्रह्म जगज्जन्मादिकारणत्वेन तटस्थलक्षणेन मन्दमतीन् प्रति सामान्येनोपलक्षितं सत्यज्ञानादिना च स्वरूपलक्षणेन विशेषतो विनिश्चितं नमस्कारच्छलेन सङ्क्षेपतो दर्शयति । यस्माज्जातमिति ॥ निमित्तोपादानयोः पञ्चम्याः साधारण्यादुभयविधमपि हेतुत्वमिह विवक्षितम् । कार्य्यविलयस्य प्रकृतावेव नियतत्वात् ॥ विशेषतः प्रकृतित्वमाह । यस्मिन्निति ॥ कार्य्यसाधारणस्य निमित्ते धर्म्मादावपि प्रसिद्धत्वात् साधारणकारणत्वमाह । येनेति । ज्ञानात्मन इति स्वरूपलक्षणसूचनम् ॥ १ ॥ गुरुभक्तेर्विद्याप्राप्तावन्तरङ्गसाधनत्वं ख्यापयितुं गुरून् प्रणमति । यैरिति । पदानि च वाक्यानि च प्रमाणं चानुमानादि तद्विवेचनेन व्याख्याता इति ॥ २ ॥ चिकीर्षितं निर्दिशति । तैत्तिरीयकेति ॥ व्युत्पन्नस्य पदेभ्य एव पदार्थस्मृतिसम्भवात् पदस्मारित-

तैत्तिरीयकसारस्य मयाऽऽचार्यप्रसादतः ।
विस्पष्टार्थरुचीनां हि व्याख्येयं सम्प्रणीयते ॥ २ ॥

नित्यान्यधिगतानि कर्म्माण्युपात्तदुरितक्षयार्थानि काम्यानि च फलार्थिनां पूर्वस्मिन् ग्रन्थे । इदानीं कर्म्मोपादानपरिहाराय ब्रह्मविद्या प्रसूयते । कर्म्महेतुः कामः स्यात् प्रवर्त्तकत्वात् । आप्तकामानां हि कामाभावे स्वात्म-

---

पदार्थसंसर्गस्यैव वाक्यार्थत्वात् सूत्रकारेणोपनिषत्तात्पर्यस्य निरूपितत्वाच्च व्यर्थः पृथग्व्याख्यारम्भ इत्याशङ्क्याह । विस्पष्टार्थेति ॥ मन्दमतीनां खत एव निःश्रेयसपदार्थस्मरणासम्भवादुपनिषद्गतनिःश्रेयसपदार्थानां विशिष्य निःसंशयं ज्ञानं ये रोचयन्ते तेषामुपकारायेत्यर्थः ॥ २ ॥

कर्म्मविचारेणैवोपनिषदो गतार्थत्वादुपनिषत्प्रयोजनस्य निःश्रेयसस्य कर्म्मभ्य एव सम्भवात् पृथग्व्याख्यारम्भो न युक्त इत्याशङ्कामपनेतुं कर्म्मकाण्डार्थमाह । नित्यानीति ॥ अथातो धर्मजिज्ञासेति जैमिनिना धर्म्मप्रश्नेन सिद्धवस्तुविचारस्य पर्य्युदस्तत्वान्नोपनिषदो गतार्थत्वमित्यर्थः । तानि च धर्म्माणि सञ्चितदुरितक्षयार्थानि धर्म्मेण पापमपनुदतीति श्रुतेर्न निःश्रेयसार्थानि । न केवलं जीवतो ऽवश्यकर्त्तव्यानि अधिगतानि फलार्थिनां काम्यानि च । न तान्यपि निःश्रेयसार्थानि । स्वर्गकामः पशुकाम इत्यादिवत् मोक्षकामोऽहः कुर्य्यादित्यश्रवणात् । अतः संसार एव कर्म्मणां फलमित्यर्थः । कर्म्मकाण्डार्थमुक्त्वा तत्राविचारितमुपनिषदर्थमाह । इदानीमिति ॥ कर्म्मणामुपादाने ऽनुष्ठाने यो हेतुस्तन्निवृत्त्यर्थं ब्रह्मविद्या अस्मिन् ग्रन्थे आरभ्यते । अतः सनिदानकर्म्मोन्मूलनार्थत्वादुपनिषदः कर्म्मकाण्डविरुद्धत्वाच्च गतार्थत्वमित्यर्थः ॥ कर्म्मानुष्ठानहेतुनियोगस्तस्य प्रमाणसिद्धत्वाच्च विद्ययेति विरोध इत्याशङ्क्याह । कर्म्महेतुरिति ॥ अस्य इदं साधनमित्येतावच्छास्त्रेण बोध्यते । यस्य यत्राभिलाषः स तत्र प्रवर्त्तते कामत एव । अतो न नियोगस्य प्रवर्त्तकसम्भावनापीत्यभिप्रायः ॥

व्यवस्थानात् प्रवृत्त्यनुपपत्तिः। आत्मकामत्वे चाऽऽप्त-कामता। आत्मा हि ब्रह्म। तद्विदो हि परप्राप्तिं वक्ष्यति। अतोऽविद्यानिवृत्तौ स्वात्मन्यवस्थानं परप्राप्तिः। अभयं प्रतिष्ठां विन्दते। एतमानन्दमयमात्मानमुपस-ङ्क्रामतीत्यादिश्रुतेः। काम्यप्रतिषिद्धयोरनारम्भादारब्धस्य चोपभोगेन क्षयान्नित्यानुष्ठानेन प्रत्यवायाभावादयत्नत एव स्वात्मावस्थानं मोक्षः। अथवा निरतिशयायाः प्रीतेः स्वर्गशब्दवाच्यायाः कर्महेतुत्वात् कर्मभ्य एव मोक्ष इति चेन्न। कर्मानेकत्वात्। अनेकानि ह्यारब्धकर्म-

---

सति कामे प्रवृत्तिरित्यन्वयः॥ उक्तकामाभावे न प्रवृत्तिरिति व्यतिरेकमाह। आप्तेति॥ अभिलषितविषयप्राप्तिः कामनिवृत्तौ हेतुर्न विद्या अतः कथं कर्महेतुपरिहाराय विद्यारम्भ इत्याशङ्क्याह। आत्म-कामत्वे चेति॥ कामितविषयप्राप्त्या कामस्य तात्कालिकोपशममात्रं न तूच्छेदः पुनर्विषयाकाङ्क्षादिदर्शनात्। आत्मकामनापि निरङ्कुशा आत्मैव वस्तु नान्यत्ततोऽस्तीत्येवंरूपा आत्मकामत्वे सति भवति। कामि-तेच्छाभावात्। आत्मनो ह्यद्वयानन्दरूपमजानन्नेव व्यतिरिक्तं विषयं पश्यन् कामयते। ततः कामस्यात्माविद्यामूलत्वादात्मविद्यैव तन्निवृत्ति-हेतुरित्यर्थः॥ भवत्वात्मविद्या कामविरोधिनी कर्महेतुपरिहाराय ब्रह्मविद्या प्रसूयत इति कथमुक्तं तत्राह। आत्मेति॥ आनन्दमयं पर-मात्मानमादाय स्मृतिरुदाहृता एवं तावत्कर्मकाण्डेनागतार्थत्वात् कर्म-ब्योऽसम्भाव्यमाननिःश्रेयसप्रयोजनत्वाच्चोपनिषदो व्याख्यानमं सम्भाव्यं पुनरारम्भवादिनोऽभिप्रायमुद्भावयति। काम्यप्रतिषिद्धयोरिति॥ आ-त्यन्तिकागामिशरीरानुत्पादे स्वरूपावस्थानं निःश्रेयसं शरीरानुत्पादश्च हेत्वभावादेव सेत्स्यति किं ज्ञानार्थोपनिषदारम्भेणेत्यर्थः। मतान्तरमाह। अथवेति॥ यदेव स्वर्गसाधनं ज्योतिष्टोमादि तदेव मोक्षसाधनं निरुति-

फलानि चानेकजन्मान्तरकृतानि विरुद्धफलानि कर्म्माणि सम्भवन्ति । अतस्तेष्वनारब्धकर्मफलानामेकस्मिञ्जन्मनि उपभोगक्षयासम्भवाच्छेषकर्मनिमित्तशरीरारम्भोपपत्तिः कर्मशेषसद्भावसिद्धिश्च । तद्य इह रमणीयचरणाः । ततः कर्मशेषेणेत्यादिस्मृतिशतेभ्यः ।

इष्टानिष्टफलानामनारब्धानां क्षयार्थानि नित्यानीति चेन्न । अकरणे प्रत्यवायश्रवणात् । प्रत्यवायशब्दो ह्यनिष्टविषयः । नित्याकरणनिमित्तस्य प्रत्यवायस्य दुःखरूपस्यागामिनः परिहार्य्यार्थानि नित्यानीत्यभ्युपगमात् । न

शयप्रीतेः स्वर्गपदार्थस्य भोगादन्यत्वासम्भवात्यति शरीरे क्लेशावश्यम्भावादित्यर्थः ॥ एकभविकपक्षमाद्यं मतं प्रत्याख्याति । नेत्यादिना । यद्यपि वर्त्तमाने देहे कार्य्यं प्रतिषिद्धञ्च नारभेत सुसूक्ष्मः तथापि सञ्चितस्यानेकस्य सम्भवाद्वैत्वभावोऽसिद्ध इत्यर्थः । प्रायेणानभिव्यक्तानि सर्व्वाण्येव कर्म्माणि सम्भूय एकं शरीरमारभन्ते तत्र सर्व्वेषामुपभोगेन क्षयितत्वात् सञ्चितं कर्मैव नास्तीति शङ्कानिराकरणायोक्तम् । विरुद्धफलानीति ॥ स्वर्गनरकफलानां ज्योतिष्टोमब्रह्महत्यादीनामेकस्मिन् देहे भोगेन क्षयासम्भवात् प्रायेणास्य सर्व्वाभिव्यञ्जकत्वे प्रमाणाभावाद्बलवता प्रतिबन्धस्य दुर्बलस्यावस्थानं सम्भवतीत्यर्थः ॥ सम्भावनामात्रमेतद्भावे प्रमाणमस्तीत्याशङ्क्याह । कर्मशेषेति ॥ प्रेत्य स्वकर्मानुभूय ततः शेषेण जन्म प्रतिपद्यत इति स्वर्गादवरोहतां कर्मशेषं दर्शयतीत्यर्थः ॥

सञ्चितकर्मसद्भावमङ्गीकृत्य देहान्तरारम्भो न भविष्यतीत्याह । इष्टेति ॥ एतद्भाविनां सिद्धान्तविरुद्धमित्याह । नेति ॥ सुसूक्ष्मानुष्ठितस्य नित्यादेः सञ्चितकर्म्मक्षयार्थत्वाभ्युपगमेऽपि नाभिमतसिद्धिरित्याह । यदि नामेति ॥ यद्योक्तम् । सुसूक्ष्मः कास्यानि वर्जयेदिति तदप्यसति विवेकबले दुर्घटम् । सति बलवति कामोद्भवस्य दुर्निवारत्वादित्याह ।

त्वनारब्धफलकर्मक्षयार्थानि । यदि नामानारब्धकर्मक्षयार्थानि नित्यानि कर्माणि तथाप्यशुद्धमेव क्षेपयेयुर्न शुद्धं विरोधाभावात् । न हीष्टफलकर्मणः शुद्धरूपत्वान्नित्यैर्विरोध उपपद्यते । शुद्धाशुद्धयोर्हि विरोधो युक्तः । न च कर्महेतूनां कामानां ज्ञानाभावे निवृत्त्यसम्भवादशेषकर्मक्षयोपपत्तिः । अनात्मविदो हि कामोऽनात्मफलविषयत्वात् स्वात्मनि च कामानुपपत्तिर्नित्यप्राप्तत्वात् स्वयञ्चात्मा परं ब्रह्मेत्युक्तम् । नित्यानाञ्चाकरणमभावस्य तः प्रत्यवायानुपपत्तिरिति । अतः पूर्व्वोपचितदुरितेभ्यः प्राप्यमाणायाः

न च कर्म्महेतूनामिति ॥ ननु कामो नाज्ञानमूलः । आत्मविदामपि कामदर्शनादित्यत आह । स्वात्मनि चेति ॥ सर्व्व आत्मेति पश्यतां तत्त्वतो विषयाभावादेव कामानुपपत्तिः । रसनादिप्रवृत्तिनिमित्तन्तु कामाभास एव वास्तवाभिनिवेशाभावादित्यर्थः । तेषामर्चिरादिमार्गेण ब्रह्मप्राप्तेः कामना नास्तीति नाशङ्कनीयमित्याह । स्वयञ्चेति ॥ यच्चोक्तमकरणनिमित्तप्रत्यवायपरिहारार्थानि नित्यानीति तत्राह । नित्यानाञ्चेति ॥ आगामि दुःखं प्रत्यवाय उच्यते तस्य भावरूपस्य नाभावो निमित्तम् । पापः पापेनेति श्रुतेः । निषिद्धाचरणनिमित्तत्वाद्दुःखस्येत्यर्थः । अकुर्व्वन् विहितं कर्म्म निन्दितञ्च समाचरन् । प्रसज्जंस्तेन्द्रियार्थेषु नरः पतनमृच्छतीति शतृप्रत्ययादकरणस्यापि प्रत्यवायनिमित्तत्वमवगतमित्याशङ्क्याह । अतः पूर्व्वेति ॥ यदि यथावच्चित्यनैमित्तिकानुष्ठानमभविष्यत्तदा सञ्चितदुरितक्षयोऽभविष्यत् । न चायं विहितमकार्षीदित्यतः प्रत्यवायो भविष्यतीति गिष्टैरिच्छ्यते । यथा विचिकित्सन् श्रोत्रिय इति । ततः शतृप्रत्ययस्यान्यथाव्युत्पन्नत्वाच्च तद्वलादकरणे हेतुत्वमवगन्तुं शक्यत इत्यर्थः । लक्षणहेत्वोः क्रियायाः इति शतृप्रत्ययश्चोभयत्र विधाने सति

व्यवस्थानात् प्रवृत्त्यनुपपत्तिः। आत्मकामत्वे चाऽऽप्त-कामता। आत्मा हि ब्रह्म। तद्विदो हि परप्राप्तिं वक्ष्यति। अतोऽविद्यानिवृत्तौ स्वात्मन्यवस्थानं परप्राप्तिः। अभयं प्रतिष्ठां विन्दते। एतमानन्दमयमात्मानमुपस-ङ्क्रामतीत्यादिश्रुतेः। काम्यप्रतिषिद्धयोरनारम्भादारब्धस्य चोपभोगेन क्षयान्नित्यानुष्ठानेन प्रत्यवायाभावादयत्नत एव स्वात्मावस्थानं मोक्षः। अथवा निरतिशयायाः प्रीतेः स्वर्गशब्दवाच्यायाः कर्महेतुत्वात् कर्मभ्य एव मोक्ष इति चेन्न। कर्मानेकत्वात्। अनेकानि ह्यारब्धकर्म-

---

सति कामे प्रवृत्तिरित्यन्वयः॥ उक्तकामाभावे न प्रवृत्तिरिति व्यतिरेकमाह। आप्तेति॥ अभिलषितविषयप्राप्तिः कामनिवृत्तौ हेतुर्न विद्या अतः कथं कर्महेतुपरिहाराय विद्यारम्भ इत्याशङ्क्याह। आत्म-कामत्वे चेति॥ कामितविषयप्राप्तया कामस्य तात्कालिकोपशममात्रं न तूच्छेदः पुनर्विषयाकाङ्क्षादिदर्शनात्। आत्मकामनापि निरङ्कुशा आत्मैव वस्तु नान्यत्ततोऽस्तीत्येवंरूपा आत्मकामत्वे सति भवति। कामि-तेच्छाभावात्। आत्मनो ह्यद्वयानन्दरूपमजानन्नेव व्यतिरिक्तं विषयं पश्यन् कामयते। ततः कामस्यात्माविद्यामूलत्वादात्मविद्यैव तन्निवृत्ति-हेतुरित्यर्थः॥ भवत्वात्मविद्या कामविरोधिनी कर्महेतुपरिहाराय ब्रह्मविद्या प्रस्तूयत इति कथमुक्तं तत्राह। आत्मेति॥ आनन्दमयं पर-मात्मानमादाय श्रुतिरुदाहृता एवं तावत्कर्मकाण्डेनागतार्थत्वात् कर्म-स्थोऽसम्भाव्यमाननिःश्रेयसप्रयोजनत्वाच्चोपनिषदो व्याख्यानं सम्भाव्यं पुनरारभ्यवादिनोऽभिप्रायमुद्भावयति। काम्यप्रतिषिद्धयोरिति॥ आ-त्यन्तिकागामिशरीरानुत्पादे स्वरूपावस्थानं निःश्रेयसं शरीरानुत्पादश्च हेत्वभावादेव सेत्स्यति किं ज्ञानार्थोपनिषदारम्भेणेत्यर्थः। मतान्तरमाह। अथवेति॥ यदेव स्वर्गसाधनं ज्योतिष्टोमादि तदेव मोक्षसाधनं निरुति-

फलानि चानेकजन्मान्तरकृतानि विरुद्धफलानि कर्माणि सम्भवन्ति । अतस्तेष्वनारब्धकर्मफलानामेकस्मिञ्जन्मनि उपभोगेनक्षयासम्भवाच्छेषकर्मनिमित्तशरीरारम्भोपपत्तिः कर्मशेषसद्भावसिद्धिश्च । तद्य इह रमणीयचरणाः । ततः कर्मशेषेणेत्यादिस्मृतिशतेभ्यः ।

दृष्टानिष्टफलानामनारब्धानां क्षयार्थानि नित्यानीति चेन्न । अकरणे प्रत्यवायश्रवणात् । प्रत्यवायशब्दो ह्यनिष्टविषयः । नित्याकरणनिमित्तस्य प्रत्यवायस्य दुःखरूपस्यागामिनः परिहार्य्यार्थानि नित्यानीत्यभ्युपगमात् । न

शयप्रीतेः स्वर्गपदार्थस्य मोक्षादन्यत्रासम्भवात्सति शरीरे क्लेशावश्यम्भावादित्यर्थः ॥ एकभविकपक्षमाद्यं मतं प्रत्याख्याति । नेत्यादिना । यद्यपि वर्त्तमाने देहे काम्यं प्रतिषिद्धञ्च नारभेत सुसुक्षुः तथापि सञ्चितस्यानेकस्य सम्भवाङ्गेत्वभावोऽसिद्ध इत्यर्थः । प्रायेणानभिव्यक्तानि सर्व्वाण्येव कर्माणि सम्भूय एकं शरीरमारभन्ते तत्र सर्व्वेषामुपभोगेन क्षयितव्यात् सञ्चितं कर्मैव नास्तीति शङ्कानिराकरणायोक्तम् । विरुद्धफलानीति ॥ स्वर्गनरकफलानां ज्योतिष्टोमब्रह्महत्यादीनामेकस्मिन् देहे भोगेन क्षयासम्भवात् प्रायेणास्य सर्व्वाभिव्यञ्जकत्वे प्रमाणाभावाद्बलवता प्रतिबद्धस्य दुर्बलस्यावस्थानं सम्भवतीत्यर्थः ॥ सम्भावनामात्रमेतन्नात्र प्रमाणमस्तीत्याशङ्क्याह । कर्मशेषेति ॥ प्रेत्य स्वकर्मानुभूय ततः शेषेण जन्म प्रतिपद्यत इति स्वर्गादवरोहतां कर्मशेषं दर्शयतीत्यर्थः ॥

सञ्चितकर्मसद्भावमङ्गीकृत्य देहान्तरारम्भो न भविष्यतीत्याह । दृष्टेति ॥ एतद्भाविनां सिद्धान्तविरुद्धमित्याह । नेति ॥ सुसुक्षुणानुष्ठितस्य नित्यादेः सञ्चितकर्म्मक्षयार्थत्वाभ्युपगमेऽपि नाभिमतसिद्धिरित्याह । यदि नामेति ॥ यच्चोक्तम् । सुसुक्षुः काम्यानि वर्जयेदिति तदप्यसति विवेकबले दुर्घटम् । सति बलाज्ञाने कामोद्भवस्य दुर्निवारत्वादित्याह ।

त्वनारब्धफलकर्मक्षयार्थानि । यदि नामानारब्धकर्मक्षयार्थानि नित्यानि कर्माणि तथाप्यशुद्धमेव क्षेपयेयुर्न शुद्धं विरोधाभावात् । न हीष्टफलकर्मणः शुद्धरूपत्वान्नित्यैर्विरोध उपपद्यते । शुद्धाशुद्धयोर्हि विरोधो युक्तः । न च कर्महेतूनां कामानां ज्ञानाभावे निवृत्त्यसम्भवादग्नेषकर्मक्षयोपपत्तिः । अनात्मविदो हि कामोऽनात्मफलविषयत्वात् स्वात्मनि च कामानुपपत्तिर्नित्यप्राप्तत्वात् स्वयञ्चात्मा परं ब्रह्मेत्युक्तम् । नित्यानाञ्चाकरणमभावस्ततः प्रत्यवायानुपपत्तिरिति । अतः पूर्वोपचितदुरितेभ्यः प्राप्यमाणायाः

न च कर्महेतूनामिति ॥ ननु कामो नाज्ञानमूलः । आत्मविदामपि कामदर्शनादित्यत आह । स्वात्मनि चेति ॥ सर्व्व आत्मेति पश्यतां तत्त्वतो विषयाभावादेव कामानुपपत्तिः । रसनादिप्रवृत्तिनिमित्तन्तु कामाभास एव वास्तवाभिनिवेशाभावादित्यर्थः । तेषामर्चिरादिमार्गेण ब्रह्मप्राप्तेः कामना नास्तीति नाशङ्कनीयमित्याह । स्वयञ्चेति ॥ यच्चोक्तमकरणनिमित्तप्रत्यवायपरिहारार्थानि नित्यानीति तदाह । नित्यानाञ्चेति ॥ आगामि दुःखं प्रत्यवाय उच्यते तस्य भावरूपस्य नाभावो निमित्तम् । पापः पापेनेति श्रुतेः । निषिद्धाचरणनिमित्तत्वाद्दुःखस्येत्यर्थः । अकुर्व्वन् विहितं कर्म्म निन्दितञ्च समाचरन् । प्रसज्जंस्चेन्द्रियार्थेषु नरः पतनमृच्छतीति श्रुतप्रत्ययादकरणस्यापि प्रत्यवायनिमित्तत्वमवगतमित्याशङ्क्याह । अतः पूर्व्वेति ॥ यदि यथावन्नित्यनैमित्तिकानुष्ठानमभविष्यत्तदा सञ्चितदुरितक्षयोऽभविष्यत् । न चायं विहितमकार्षीदित्यतः प्रत्यवायो भविष्यतीति शिष्टैर्लक्ष्यते । यथा विचिकित्सन् श्रोत्रिय इति । ततः श्रुतप्रत्ययस्यान्यथाव्युत्पन्नत्वाच्च तद्वलादकरणे हेतुत्वमवगन्तुं शक्यत इत्यर्थः । लक्षणहेत्वोः क्रियाया इति श्रुतप्रत्ययस्योभयत्र विधाने सति

प्रत्यवायक्रियाया नित्याकरणं लक्षणमिति अकुर्वन्विहितं कर्मेति हि शतुर्नानुपपत्तिः। अन्यथा अभावाङ्भावोत्पत्तिरिति सर्वप्रमाणव्याकोपः॥

दृत्यतोऽयतः स्वात्मन्यवस्थानमित्यनुपपन्नम्। यच्चोक्तं निरतिशयप्रीतेः स्वर्गशब्दवाच्यायाः कर्मनिमित्तत्वात्कर्मारब्ध एव मोक्ष इति। तन्न। नित्यत्वान्मोक्षस्य। न हि नित्यं किञ्चिदारभ्यते। लोके यदारब्धं तदनित्यमित्यतो न कर्मारब्धो मोक्षः। विद्यासहितानां कर्मणां नित्यारम्भसा-

---

किमिति हेतुत्वमेव न गृह्यते तत्राह। अन्यथेति॥ अभावरूपस्य कार्यस्य भावरूपमेव कारणमिति प्रत्यक्षादिभिरवगतं यत्प्रत्ययादभावस्य हेतुत्वाभिधाने सर्वप्रमाणविरोधः स्यादित्यर्थः॥

ननु त्वयाप्यकरणस्य प्रत्यवायलक्षणत्वमिष्टम्। भाट्टैश्चानुपलब्धेरभावप्रमितिहेतुत्वमिष्यते। तार्किकैश्च प्रतिबन्धकाभावस्य तत्तत्प्रागभावस्य च तत्तत्कार्यव्यवस्थापकत्वमिष्यते तत्कथं भावस्यैव कारणत्वम्। तदुक्तम्॥ भावो यथा तथाऽभावः कारणं कार्यवन्मतमित्युच्यते॥ अस्माभिस्तावदभावस्य स्वरूपेण कारणत्वं नेष्टं किन्तु तज्ज्ञानस्य प्रत्यवायगमकत्वमिष्टम्। तेन च रूपेण न प्रत्यवायजनकत्वमिष्यते। नित्याकरणज्ञाने प्रत्यवायाभावाप्रसङ्गात्। भाट्टानामपि च केषाञ्चिज्ज्ञातस्य योग्यानुपलब्धेरभावप्रमितिहेतुध्वंसतया तु प्रमितिहेतुत्वेऽभावप्रमायाः प्रत्यक्षत्वापातः। तार्किकाणामपि प्रतिबन्धकाभावस्य कारणत्वेऽन्योन्याश्रयत्वप्रसङ्गान्न प्रामाणिकत्वम्। प्रागभावस्यापि ज्ञातरूपेण जन्यज्ञापकत्वमेव। यस्मादिदं प्राङ्नासीत्तस्मादिदानीं जातमिति। न तु जनकत्वं प्रागभावस्य नियतप्रागभावित्वेन कारणत्वं प्राक्कालस्य स्वदुक्तितापातः। प्रागभावित्वमपि चान्यथासिद्धमित्युक्तं तत्त्वालोके। यस्मादकरणनिमित्तप्रत्यवायपरिहारार्थं न नित्यं कर्म किन्तु कर्मणा पितृलोकः सर्व एते पुण्यलोका

मर्थ्यमिति चेन्न । विरोधात् । नित्यश्चारभ्यत इति विरुद्धं यद्धिनष्टं तदेव नोत्पद्यत इति प्रध्वंसाभाववन्नित्योऽपि मोक्ष आरभ्य एव चेन्न । मोक्षस्य भावरूपत्वात् । प्रध्वंसाभावतोऽप्यारभ्यत इत्यभावस्य विशेषाभावाद्विकल्पमात्रमेतत् । भावप्रतियोगी ह्यभावः ॥ यथा ह्यभिन्नोऽपि भावो घटपटादिभिर्विशेष्यतेऽभिन्न एव घटभावः पटभाव इत्येवं निर्विशेषो भावाभावक्रियागुणयोगाद्द्रव्यादिवद्विकल्प्यते ।

भवन्तीति श्रुतेः पितृलोकप्राप्तिफलम् । तस्माच्च यथोक्तचरितस्य शरीरानुत्पाद इत्याह । अयतत इति ॥ द्वितीयमतमनूद्य दूषयति । यच्चोक्तमित्यादिना ॥ विद्यासहितेनापि कर्म्मणा आरभ्यश्चेन्मोक्षस्तर्ह्यनित्य एव यत्कृतकं तदनित्यमिति व्याप्तिदर्शनादित्युक्तं तत्र व्याप्तिभङ्गं मन्वानः शङ्कते । यद्धिनष्टमिति ॥ भावरूपत्वादिति ॥ यद्भावरूपं कार्य्यं तदनित्यमिति व्याप्तेस्तव च मोक्षस्य निरतिशयप्रीतेर्भावत्वादनित्यत्वं स्यादेवेत्यर्थः । प्रध्वंसाभावस्य कार्य्यत्वमभ्युपगम्य यत्प्रध्वंसातिरिक्तं कार्य्यं तदनित्यमिति व्याप्तिर्व्याख्याता एव । वस्तुतस्तु प्रध्वंसस्य कार्य्यत्वमपि नास्तीत्याह । प्रध्वंसेति ॥ जन्याश्रयत्वं तावत्प्रध्वंसस्य न कार्य्यत्वम् । जन्ये नैरुक्ते भावविकारत्वाभ्युपगमात् । नापि प्रागसतः सत्तासमवायादिलक्षणं तदनभ्युपगमात् । नाप्युत्तरकालयोगः कालेन सम्बन्धाभावात् । अवच्छेदावच्छेदकभावस्य समवायमूलत्वात् सम्बन्धान्तरमूलकत्वादर्थसादुत्तरकालस्य प्रध्वंसावच्छेदकत्वस्वभावश्चेदन्यावच्छेदकत्वस्वभावो न स्यात् । तस्मादभावस्य निर्विशेषकत्वात् कार्य्यत्वं कल्पनामात्रपरमिति भावः । किञ्चाभावस्याभावविशेषपात्रस्वभावत्वाद्भावविरोधित्वाच्च न भावरूपो धर्म्मः सम्भवतीत्याह । भावेति ॥ नन्वभावश्चतुर्विधस्तत्रानित्यः प्रागभावः प्रध्वंसादयस्तु नित्याः ततः कथं निर्विशेषत्वमित्याशङ्क्याह । यथा हीति ॥ भावप्रत्ययस्य एकाकारत्वादेक एव भावाभावच्छेदकभेदाद्भिन्न इव प्रकाशते । तथा निषे-

न हि अभाव उत्पत्त्यादिवद्विशेषणसहभावी। विशेषणवत्त्वे भाव एव स्यात्। विद्याकर्मकर्तृनित्यत्वाद्विद्याकर्मसन्तानजनितमोक्षनित्यत्वमिति चेन्न। गङ्गास्रोतोवत् कर्तृत्वस्य दुःखरूपत्वात्। कर्तृत्वोपरमे च मोक्षविच्छेदात्। तस्मादविद्याकामकर्मोपादानहेतुनिवृत्तौ स्वात्मन्यवस्थानं मोक्ष इति। स्वयञ्चात्मा ब्रह्म तद्विज्ञानादविद्यानिवृत्तिर्मोक्ष इति ब्रह्मविद्यार्थोपनिषदारभ्यते। उपनिषदिति विद्योच्यते। तच्छीलिनां गर्भजन्मजरादिनिशातनात्। तदवसादनाद्वा

धप्रत्ययस्यैकाकारत्वादेक एवाभावोऽवच्छेदकभेदभिन्न इव प्रकाशते। जायते नश्यति चेति क्रियायोगात् सङ्ख्यागुणयोगाद्द्रव्यवदभावो विकल्प्यते न तु तत्त्वतः सविशेष इत्यर्थः॥ इतश्च न तत्त्वतः सविशेष इत्याह। न हीति॥ विशेषणं हि विशेष्यान्वयि प्रसिद्धम्। प्रतियोगिना च विशेषणेन नाभावस्य सहभावोऽस्ति। घटप्रध्वंसस्य नित्यत्वे घटस्यापि नित्यत्वप्रसङ्गात्। घटसहभावित्वे च तदभावत्वव्याघातात् भावाभावयोः सहानवस्थानरूपविरोधाभ्युपगमात्। ततः प्रतियोगिविशेषाद्भावः सविशेषः कार्यत्वादिधर्मवानिति भ्रममात्रमित्यर्थः। एवं प्रध्वंसदृष्टान्तेन शङ्कितं नित्यत्वं परिहृत्य प्रकारान्तरेणाशङ्कां निषेधति। विद्याकर्मेत्यादिना॥ विद्याकर्मणोः कर्त्ता नित्य इति साधनसातत्यात्साध्यसातत्यं न वाच्यम्। कर्तृत्वस्यानुपरमेऽनिर्मोक्षप्रसङ्गादुपरमे च साधनसातत्या भावान्मोक्षस्य विच्छित्तिः स्यादित्यर्थः। यस्माच्च श्रेयसं ब्रह्मज्ञानं विना दुष्प्रापं तस्मादित्युपसंहारः। ब्रह्मविद्यायास्तूपनिषच्छब्दप्रसिद्धिरपि विद्याया एव निश्रेयससाधनत्वे प्रमाणमित्याह। उपनिषदिति॥ निशातनाच्छिथिली-

तैत्तिरीयोपनिषदारम्भः ॥

हरिः॥ॐ॥शं नो मित्रः शं वरुणः। शं नो भवत्वर्य्यमा। शं न इन्द्रो बृहस्पतिः। शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि।

ब्रह्मणो वोपनिगमयितृत्वात् उपनिषत्। न वास्याः परं श्रेय इति। तदर्थत्वाद्ग्रन्थोऽप्युपनिषत्॥

शं सुखं प्राणदृत्तेरङ्गत्वाभिमानी देवतात्मा मित्रो नोऽस्माकं भवतु। तथैवापानदृत्तेरावेत्वाभिमानीदेवतात्मा वरुणः। चक्षुष्यादित्ये वाभिमानी अर्य्यमा। बले इन्द्रः। वाचि बुद्धौ च बृहस्पतिः। विष्णुरुरुक्रमो विस्तीर्णक्रमः पादयोरभिमानी। एवमाद्याध्यात्मदेवता शं नो भवत्विति सर्वत्रानुषङ्गः। तासु हि सुखकृत्सु विद्याश्रवणधारणोपयोगा अप्रतिबन्धेन भविष्यन्तीति तत्सुखकर्तृत्वं प्रार्थ्यते शं नो भवत्विति॥ ब्रह्मविद्याविविदिषुणा नमस्कारवन्दन-

---

करणादित्यर्थः। अस्यां विद्यायां निमित्तभूतायां परं श्रेयो ब्रह्म जीवस्योपनिषच्च स्वात्मतयोपस्थितं भवतीत्यर्थः॥

एवमुपनिषदं व्याख्यारभ्य सम्भाव्य प्रतिपदव्याख्यामारभते। शं सुखमित्यादिना॥ शं नो भवत्विति॥ सुखकृद्भवत्वित्यर्थः। अध्यात्मप्राणकरणाभिमानिनां देवतानां सुखकृत्वं किमिति प्रार्थ्यते तत्राह। तासु ह्रीति॥ श्रवणं गुरुपादोपसर्पणपूर्वकं वेदान्तानां तात्पर्यावधारणम्। धारणं श्रुतस्याप्यविस्मरणसुपयोगः शिष्येभ्यो निवेदनम्। अन्यद्ब्रह्म वायुश्चान्य इति नाशङ्कनीयमित्याह। परोक्षेति॥ ब्रह्म इति परोक्षेण स

ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् । ॐ शान्तिः शान्तिः शान्तिः ॥१॥ सत्यं वदिष्यामि पञ्च च ॥ १ ॥ इति प्रथमोऽनुवाकः ॥

क्रिये वायुविषये ब्रह्मविद्योपसर्गशान्त्यर्थं क्रियते । सर्वक्रियाफलानां तदधीनत्वात् ब्रह्म वायुस्तस्मै ब्रह्मणे नमः । प्रह्वीभावं करोमीति वाक्यशेषः । नमस्ते तुभ्यं हे वायो ! नमस्करोमीति । परोक्षप्रत्यक्षाभ्यां वायुरेवाभिधीयते । किञ्च त्वमेव चक्षुरादृपेक्ष्य बाह्यं सन्निकृष्टमव्यवहितं प्रत्यक्षं ब्रह्मासि यस्मात्तस्मात्त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं यथाशास्त्रं यथाकर्त्तव्यं बुद्धौ सुपरिनिश्चितमर्थं तदपि त्वदधीनत्वात्त्वामेव वदिष्यामि । सत्यमिति वाक्कायाभ्यां सम्पाद्यमानः सोऽपि त्वदधीन एव सम्पाद्य इति त्वामेव सत्यं वदिष्यामि । तत्सर्वात्मकं वाच्याख्यं ब्रह्म मयैव श्रुतं सत् मां विद्यार्थिनमवतु विद्यासंयोजनेन । तदेव ब्रह्म वक्तार-

---

ब्रह्मेत्याचक्षत इति श्रुतेः । वायुशब्देन च प्रत्यक्षतया निर्देशः । प्राणस्य प्रत्यक्षत्वादित्यर्थः । यद्यपि सूत्रात्मरूपेण वायुः परोक्षस्तथाप्यध्यात्मिकप्राणवायुरूपेण ब्रह्मशब्दवाच्यत्वेऽप्यपरोक्षत्वमित्याह । किञ्चेति ॥ बाह्यं चक्षुरादिरूपदर्शनाद्यनुमेयत्वाद्यवहितम् । प्राणस्त्वव्यवधानेन साक्षिवेद्यः सन्निहितस्य भोक्तुरिति चक्षुरादृपेक्षया प्रत्यक्ष इत्यर्थः । बृंहणाद्ब्रह्म । प्राणकृतेन श्वसनादिना* शरीरादेर्बृंहणं प्रसिद्धमित्यर्थः । यथा राज्ञो

---

* अशनायादिनेति पाठान्तरः ॥

ॐ शीक्षां व्याख्यास्यामः। वर्णः स्वरः। मात्रा

माचार्यं वक्तृत्वसामर्थ्यसंयोजनेनावतु। मामवतु वक्तारमिति पुनर्वचनमादरार्थम्। ॐ शान्तिः शान्तिः शान्तिरिति त्रिवचनमध्यात्मिकाधिभौतिकाधिदैविकानां विद्याप्राप्त्युपसर्गाणां प्रशमार्थम्॥ १॥ इति प्रथमोऽनुवाकः॥

अर्थज्ञानप्रधानत्वादुपनिषदो ग्रन्थपाठे यत्नोपरमो मा भूदिति शिक्षाध्याय आरभ्यते॥ शिक्षा शिक्ष्यतेऽनयेति वर्णाद्युच्चारणलक्षणम्। शिक्ष्यन्त इति वा शिक्षा वर्णादयः। शिक्षैव शीक्षा दैर्घ्यं छान्दसं तां शीक्षां व्याख्यास्यामो विसृष्टमासमन्तात् कथयिष्यामः। चक्षिङो वा ख्याञादिष्टस्य व्याङ्पूर्वस्य व्यक्तत्वात् कर्मण एतद्रूपम्। तत्र वर्णोऽकारादिः। स्वर उदात्तादिः। मात्रा ह्रस्वाद्याः। बलं प्रयत्नविशेषः। साम वर्णानां मध्यमवृत्त्योच्चारणं समता। सन्तानः सन्ततिः। संहितेत्यर्थः। एषो हि शिक्षितव्योऽर्थः। शिक्षा

दौवारिकं कञ्चिद्राजदिदृक्षुराह त्वमेव राजेति तथा हार्हस्य ब्रह्मणो द्वारपालं हार्हं ब्रह्म दिदृक्षुर्मुमुक्षुराह त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामीति। ब्रह्मवदनक्रिया प्राणदेवतास्तुत्यर्था। स्तुत्यन्तरमाह। ऋतमित्यादिना॥ १॥ इति प्रथमोऽनुवाकः॥ ॥

यत्नोपरम इति॥ स्वरोष्मव्यञ्जनप्रभादो माभूदित्यर्थः। अन्यथा विवक्षितार्थसिद्धिरेव न स्यात्तदुक्तम्। मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधादिति॥ लक्षण मिति॥ लक्षणं शास्त्रम्। चटुरषाणां मूर्द्धा। दृश्यशानां तालव्यादि तस्माऽन्यतैव सिद्धत्वात्। इह कर्मव्युत्पत्तिरेव

बलम् । सोम सन्तानः । इत्युक्तः शीक्षाध्यायः ॥१॥
शीक्षां पञ्च ॥ २ ॥ इति द्वितीयोऽनुवाकः ॥ ॥
सह नौ यशः । सह नौ ब्रह्मवर्चसम् । अथातः संहिताया उपनिषदं व्याख्यास्यामः ॥

यस्मिन्नध्याये सोऽयं शीक्षाध्याय इति । एवमुक्त उदित उक्त इत्युपसंहार उत्तरार्थः ॥ २ ॥ इति द्वितीयोऽनुवाकः ॥

अधुना संहितोपनिषदुच्यते । तत्र संहिताद्युपनिषत्परिज्ञाननिमित्तं यद्यशः प्रार्थ्यते तन्नौ आवयोः शिष्याचार्ययोः सहैवास्तु । तन्निमित्तञ्च यद्ब्रह्मवर्चसं तेजस्तञ्च सहैवास्तु इति शिष्यवचनमाशीः । शिष्यस्य हि अकृतार्थत्वात्प्रार्थनोपपद्यते । नाचार्यस्य । कृतार्थत्वात् । कृतार्थो हि आचार्यो नाम भवति । अथानन्तरमध्ययनलक्षणविधानस्य पूर्वदृत्तस्य यतोऽत्यर्थं ग्रन्थभाविता बुद्धिर्न शक्यते सहसार्थज्ञानवि-

---

शिक्षायद्धस्य भाव्या । चक्षिङः ख्याञ् वालिटीतिसूत्रेण ख्याजादिष्टो यस्य तस्येदं रूपम् । न ख्याप्रकथने इत्यस्य सोपसर्गस्य प्रयोगानभिधानादित्यर्थः ॥ २ ॥ इति द्वितीयोऽनुवाकः ॥

संहितावर्णानां सन्निकर्षस्तद्विषयस्योपासनं प्रथमं कथ्यत इत्याह । अधुनेति ॥ सन्निधानाच्च स्वशाखासंहितैव भाव्या । शं नो मित्र इत्याशीर्वादः कृतस्योपनिषच्छेषः संहितोपनिषच्छेषमाशीर्वादान्तरमाह । तत्रेति वस्तूपासनं हित्वा प्रथमतः शब्दोपासनविधाने हेतुरतःशब्देनोक्त इत्याह । यतोऽत्यर्थमिति ॥ पञ्चस्विति सप्तम्यो तृतीयार्थे विपरिणेया । अधिकरणशब्दो विषयपर्यायः । पञ्चभिः पदार्थैर्विशेषितं ज्ञानं वर्णेषु वक्तव्यम् ।

पञ्चस्वधिकरणेषु । अधिलोकमधिज्योतिष-
मधिविद्यमधिप्रजमध्यात्मम् । ता महास-
हिता इत्याचक्षते । अथाधिलोकम् । पृथिवी
पूर्वरूपम् । द्यौरुत्तररूपम् । आकाशः सन्धिः ॥
१ ॥ वायुः सन्धानम् । इत्यधिलोकम् । अथाधि-
ज्योतिषम् । अग्निः पूर्वरूपम् । आदित्य उत्तर-
रूपम् । आपः सन्धिः । वैद्युतः सन्धानम् । इत्यधि-
ज्योतिषम् । अथाधिविद्यम् । आचार्यः पूर्वरूपम्

षयेऽवतारयितुमित्यतः संहिताया उपनिषदं संहिता-
विषयं दर्शनमित्येतद्ग्रन्थसन्निकृष्टामेव व्याख्यास्यामः ॥
पञ्चस्वधिकरणेष्वाश्रयेषु ज्ञानविषयेष्वित्यर्थः । कानि
तानीत्याह । अधिलोकं लोकेष्वधि यद्दर्शनं तदधिलोकम् ।
तथाऽधिज्योतिषमधिविद्यमधिप्रजमध्यात्ममिति । ता एताः
पञ्चविद्या उपनिषदो लोकादिमहावस्तुविषयत्वात्
संहिताविषयत्वाच्च महत्यश्च ताः संहिताश्च महासंहिता
इत्याचक्षते कथयन्ति वेदविदः । अथ तासां यथोपन्यस्ता-

यथा विष्णुदर्शनप्रतिमायामित्यर्थः । लोकेष्वधीति ॥ लोकानधिकृत्योपा-
दाय ध्येयत्वमित्यर्थः । विद्याशब्देन विद्याप्रतिबद्ध आचार्यादि-
र्विवक्षितस्तथैव प्रजाशब्देन प्रजाप्रतिबद्धः पित्रादिर्विवक्षितः । अध्यात्म-
मिति । आत्मानं भोक्तारमधिकृत्य यद्दर्शनं जिह्वादिर्विवक्षितः । सर्वत्र
तदभिमानिनी देवतैव ग्राह्या अन्यस्योपास्यत्वासम्भवादिति । विधिशेष-
मधवादमाह । ता एता इति ॥ संहितोपनिषदः कर्त्तव्या इत्यर्थः ।

॥ २ ॥ अन्तेऽस्युत्तररूपम् । विद्या सन्धिः प्रवचनꣳसन्धानम् । इत्यधिविद्यम् । अथाधिप्रजम् । माता पूर्वरूपम् । पितोत्तररूपम् । प्रजा सन्धिः । प्रजननꣳ सन्धानम् । इत्यधिप्रजम् ॥ ३ ॥ अथाध्यात्मम् । अधराहनुः पूर्वरूपम् । उत्तराहनुरुत्तररूपम् । वाक् सन्धिः । जिह्वा सन्धानम् । इत्याध्यात्मम् । इतीमा महासꣳहिताः । य एवमेता महासꣳहिता व्याख्याता वेद । सन्धीयते प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन

नामधिलोकं दर्शनमुच्यते । दर्शनक्रमविवक्षार्थोऽयशब्दः सर्वत्र । द्यौर्वी पूर्वरूपं पूर्वो वर्णः पूर्वरूपम् । संहितायाः पूर्वे वर्णे द्यौर्वीदृष्टिः कर्त्तव्येत्युक्तं भवति । तथा चौत्तररूपमाकाशोऽन्तरिक्षलोकः सन्धिर्मध्यप्रदं पूर्वोत्तरयोः सन्धीयतेऽस्मिन् पूर्वोत्तररूपे इति ॥ १ ॥ वायुः सन्धानम् । सन्धीयतेऽनेनेति सन्धानमित्यधिलोकं । दर्शनमुक्तम् अथाधिज्योतिषमित्यादि समानम् ॥ २ ॥ ३ ॥ इतीमा इत्युक्ता उपप्रदर्श्यन्ते ॥

विधिरुक्तः । कथं कर्त्तव्या इत्याकाङ्क्षायां विनियोगविधिमाह । अथ तारूपमित्यादिना ॥ कर्त्तुरेकत्वादनुष्ठेयानां बहुत्वादवश्यम्भाविनि क्रमे विशेषनियमार्थोऽयशब्दः । हृदयस्याग्रेऽवत्यथ जिह्वाया अथ वक्षस इतिवदुपप्रदर्श्यन्ते परामृश्यन्ते अधिकारिविधिप्रदर्शनाय ॥

सुवर्गेण लोकेन ॥ ३ ॥ सन्धिराचार्यः पूर्वरूप-मित्यधिप्रजं लोकेन ॥ ३ ॥ इति तृतीयोऽनुवाकः ॥

यः कश्चिदेवमेता महासंहिता व्याख्याता वेद उपास्ते। वेदेत्युपासनं स्याद्विज्ञानाधिकारादिति प्राचीनयोग्योपास्तेति वचनात्। उपासनञ्च यथाशास्त्रं तुल्यप्रत्ययसन्ततिरसङ्कीर्णा च। अतस्तत्प्रत्ययैः शास्त्रोक्तालम्बनविषया च। प्रसिद्धश्चोपासनशब्दार्थः। लोकं गुरुमुपासते राजानमुपास्त इति। यो हि गुर्वादीन् सन्ततमुपचरति स उपास्त इत्युच्यते। स च फलमाप्नोत्युपासनस्य। अतोऽत्रापि य एवं वेद सन्धीयते प्रजादिभिः स्वर्गान्तैः प्रजादिफलमाप्नोतीत्यर्थः ॥ ३ ॥ इति तृतीयोऽनुवाकः ॥

यथा दर्शादयः षड्यागाः संसृष्टिताः फलसाधनमधिकारांशेनाभेदात् तथा पञ्चोपनिषदः संसृष्टिताः प्रजादिफलकामस्यानुष्ठेया इत्याह। यः कश्चिदित्यादिना ॥ फलकामिनाऽनुष्ठीयमानं संहितोपासनं कामितफलाय भवति। फलानभिसन्धिना चानुष्ठीयमानं ब्रह्म विद्यार्थं भवति। मेधाहीनेन ब्रह्मणोऽवगन्तुमशक्यत्वान्मेधाकामस्य जपोऽपि ब्रह्मविद्यार्थो भवति। श्रीविहीनेन रुक्मगुह्यर्थं यागाद्यनुष्ठातुं न शक्यत इति। श्रीकामस्य होमोऽपि परम्परया ब्रह्मविद्योपयोगीति महत्तात्पर्यं विद्यासन्निधिसमाम्नातानां सर्वत्र द्रष्टव्यम् ॥ ३ ॥ इति तृतीयोऽनुवाकः ॥

यस्छन्दसामृषभो विश्वरूपः । छन्दोभ्यो ऽध्यमृतात्सम्बभूव । स मेन्द्रो मेधया स्पृणोतु । अमृतस्य देवधारणो भूयासम् । शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरि विश्रुवम् । ब्रह्मणः कोशोसि मेधया ऽपिहितः । श्रुतं मे गोपाय । आवहन्ती वित-

---

यस्छन्दसामिति मेधाकामस्य श्रीकामस्य च तत्प्राप्तिसाधनं जपहोमावुच्येते स मेन्द्रो मेधया स्पृणोतु । ततो मे श्रियमावहेति च लिङ्गदर्शनात् । यस्छन्दसां वेदानां ऋषभ इव ऋषभः प्राधान्यात् । विश्वरूपः सर्वरूपः सर्ववाग्व्याप्तेस्तद्यथा शङ्कुनेत्यादिश्रुत्यन्तरात् । अत एव ऋषभवत्योङ्कारस्य ओङ्कारो ह्यत्रोपास्य इति ऋषभादिशब्दैः स्तुतिर्न्याय्यैव । ओङ्कारस्य छन्दोभ्यो वेदेभ्यो वेदो ह्यक्षतं तस्मादक्षतादधिसम्बभूव । लोकवेदव्याहृतिभ्यः सारिष्ठं जिघृक्षोः प्रजापतेस्तपस्यत ॐकारः सारिष्टत्वेन प्रत्यभादित्यर्थः । न हि नित्यस्योङ्कारस्याङ्गत्वेनोत्पत्तिरवकल्पते । स एवम्भूत ॐकार इन्द्रः सर्वकामेशः परमेश्वरो मा मां मेधया प्रज्ञया स्पृणोतु प्रीणयतु बलयतु वा । प्रज्ञा

अवान्तरतात्पर्यमभिप्रेत्याह । यस्छन्दसामित्यादिना ॥ सम्बभूवेति जन्यवाचके पदे श्रूयमाणे किमिति प्रजापतिर्लोकानभ्यतपदित्यादिश्रुत्यन्तरानुसारेण आत्मज्ञानयोग्यकार्यश्रेष्ठत्वेन प्रतिभानं व्याख्यायते तत्राह । न ह्येति ॥ पुरुषविपरिणाम इति ॥ भूयासमित्युत्तम-

न्वाना ॥ १ ॥ कुर्व्वाणाचीरमात्मनः । वासाꣳ

वर्त्तं हि प्रार्थ्यते ऽमृतस्याऽमृतत्वहेतुभूतस्य ब्रह्मज्ञानस्य तदधिकारात्। हे देव! धारणो धारयिता भूयासं भवेयम्। किञ्च शरीरं मे मम विचर्षणं विचक्षणं योग्यमित्येतद्भूयादिति प्रथमपुरुषपरिणामः। जिह्वा मे मधुमत्तमा मधुमत्यतिशयेन मधुरभाषिणीत्यर्थः। कर्णाभ्यां श्रोत्राभ्यां भूरि बहु विश्रुवं व्यश्नुवं श्रोता भूयासमित्यर्थः। किञ्चात्मज्ञानयोग्यः कार्य्यकारणसङ्घातो ऽस्विति वाक्यार्थः। मेधा च तदर्थमेव प्रार्थ्यते। ब्रह्मणः परमात्मनः कोशोऽसि। असेरिवोपलब्ध्यधिष्ठानत्वात्। त्वं हि ब्रह्मणः प्रतीकं त्वयि ब्रह्मोपलभ्यते। मेधया लौकिकप्रज्ञया पिहित आच्छादितः सन् त्वं सामान्यप्रज्ञैरविदितसत्त्व इत्यर्थः। श्रुतं श्रवणपूर्वकमात्मज्ञानादिकं मे गोपाय रक्ष। तत्प्राप्तिविस्मरणादिकं कुर्व्वित्यर्थः। जपार्था एते मन्त्रा मेधाकामस्य। होमार्थास्त्वधुना श्रीकामस्य मन्त्रा उच्यन्ते। आवहन्ती आनयन्ती वितन्वाना विस्तारयन्ती तनोतेस्तत्कर्मत्वात् ॥१॥ कुर्व्वाणा निर्व्वर्त्तयन्ती

पुरुषस्य प्रकृतस्य प्रथमपुरुषत्वेन परिणामः कर्त्तव्यः इत्यर्थः ॥ अचेतनशब्दं प्रति प्रार्थना कथम् ॥ कथञ्चेन्द्रशब्देनाभिधानमित्याशङ्क्य ब्रह्माऽभेदविवक्षयेत्यभिप्रेत्याह। ब्रह्मण इति ॥ ब्रह्माभेदेन प्रार्थितदाने समर्थस्य दोङ्कारः किमिति सर्व्वैर्नोपास्यत इत्याशङ्क्याह। मेधयेति ॥

सि मम गावश्च। अन्नपाने च सर्वदा। ततो मे श्रियमावह। लोमशां पशुभिः सह स्वाहा। आमायन्तु ब्रह्मचारिणः स्वाहा। विमायन्तु ब्रह्मचारिणः स्वाहा। प्रमायन्तु ब्रह्मचारिणः स्वाहा। दमायन्तु ब्रह्मचारिणः स्वाहा। शमायन्तु ब्रह्मचारिणः स्वाहा ॥ ३ ॥ यशो जनेऽसानि स्वाहा। श्रेयान् वसस्योऽसानि स्वाहा। तं त्वा भग प्रविशानि स्वाहा। स मा भग

अचीरं अचिरं क्षिप्रमेव छान्दसो दीर्घः। चिरं वा कुर्व्वाणा आत्मनो मम किमित्याह। वासांसि वस्त्राणि मम गावश्च गोश्चेति यावत्। अन्नपाने च सर्वदा एवमादीनि कुर्व्वाणा श्रीर्या तां ततो मेधानिर्वर्त्तनात्परमावह। आनय। अमेधसो हि श्रीरन्धायैवेति। किंविशिष्टां लोमशां अजाद्यादियुक्तां अन्यैश्च पशुभिः संयुक्तामावहेत्यधिकारादोङ्कार एवाभिसम्बध्यते स्वाहा स्वाहाकारो होमान्तमन्त्वार्थज्ञापनार्थः। आयन्तु मासिति व्यवहितेन सम्बन्धः ब्रह्मचारिणो विमायन्तु प्रमायन्तु शमायन्त्वित्यादि ॥ २ ॥ यशो यशस्वी जने जनसमूहेऽसानि भवानि। श्रेयान् प्रशस्यतरो

लौकिकप्रत्ययेति ॥ शालयामादिष्विव देवतावुद्धीत्यर्थः। नैतेष्वार्षेयादि मन्यम्। ब्रह्मणेत्यत्रत्वात्। वस निवासे वस आच्छादने इति धातु ईयाडुप्रत्ययः। शोभायै वर्च्चसेशीलः। पराच्छादनशीलो वा वसुः।

प्रविश स्वाहा। तस्मिन्तसहस्रशाखे। निभगाऽहं त्वयि मृजे स्वाहा। यथाऽऽपः प्रवता यन्ति। यथा मासा अहर्जरम्। एवं मां ब्रह्मचारिणः। धातरायन्तु सर्वतः स्वाहा। प्रतिवेशोऽसि प्र मा

वस्यसो वसीयसो वसुतराद्वसुमत्तराद्वा असानीत्यन्वयः। किञ्च तं ब्रह्मणः कोशभूतं त्वा त्वां हे भग! भगवन्! पूजावन् प्रविशानि प्रविश्य च अनन्यस्वदात्मैव भवानीत्यर्थः। स त्वमपि मा मां भग! भगवन् पूजावन् प्रविश आवयोरेकत्वमेवास्तु। तस्मिन् त्वयि सहस्रशाखे बहुभेदे निमृजे शोधयाम्यहं पापक्षत्याम्। यथा लोके आपः प्रवता प्रवणवता निम्नवता देशेन यन्ति गच्छन्ति। यथा वा मासा अहर्जरं संवत्सरोऽहर्जरोऽहोभिः परिवर्त्तमानो लोकान् जरयतीति अहानि वाऽस्मिञ्छीर्य्यन्त्यन्तर्भवन्तीत्यहर्जरस्तच्च यथा मासा यन्ति एवं मां ब्रह्मचारिणः। हे धातः! सर्व्वस्य विधातः मामायन्तु आगच्छन्तु सर्व्वतः सर्व्वदिग्भ्यः। प्रतिवेशः आपनयनस्थानमासन्नगृहमित्यर्थः। एवं त्वं प्रतिवेश इव प्रतिवेशस्तच्छीलिनां सर्व्वपापदुःखापनयनस्थानमसि अतो मां प्रभाहि प्रकाशयात्मानं प्रपद्यस्व च मां शरविद्धमिव लोहं त्वन्मयं

अतिशयेन वसुर्वसीयान्। तस्माद्वसीयसः। इलोपस्छान्दसः। वसुशब्दान्वसुशब्देन उच्यत इत्यभिप्रेत्याह। वसुमत्तराद्वेति॥ पूर्व्वोक्तस्य

भाहि प्र मा पद्यस्व ॥ ३ ॥ वितन्वाना ग्रमार्यन्तु ब्रह्मचारिणः स्वाहा धातरायन्तु सर्वतः स्वाहेकञ्च ॥ ४ ॥ इति चतुर्थोऽनुवाकः ॥

भूर्भुवः सुवरिति वा एतास्तिस्रो व्याहृतयः । तासामु ह स्मैतां चतुर्थीं । माहाचमस्य

त्वदात्मानं कुर्वित्यर्थः ॥ श्रीकामोऽस्मिन् विद्याप्रकरणेऽभिधीयमानो धनार्थः । धनञ्च कर्म्मार्थम् । कर्म्म चोपात्तदुरितक्षयाय । तत्क्षये हि विद्या प्रकाश्यते । तथाच स्मृतिः । ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः । यथाऽऽदर्शतले प्रख्येपश्यन्त्यात्मानमात्मनीति ॥४॥ इति चतुर्थोऽनुवाकः ॥४॥

संहिताविषयमुपासनमुक्त तदनु मेधाकामस्य श्रीकामस्य मन्त्रानुक्रान्तास्ते च पारम्पर्य्येण विद्योपयोगार्था एव । अनन्तरं व्याहृत्यात्मनो ब्रह्मणोऽन्तरुपासनं * स्वाराज्यफलं प्रस्तूयते भूर्भुवःसुवरिति । इतीत्युक्तोपप्रदर्शनार्थः । एतास्तिस्र इति प्रदर्शितानां परामर्शार्थः ।

प्रयोजनमाह । किञ्चेति ॥ यदुक्तं ब्रह्मचारिणो मामायन्त्विति तत्र दृष्टान्तमाह । यथेति ॥ इति चतुर्थोऽनुवाकः ॥ ४ ॥

दृष्टानुवादपूर्वकमुत्तरानुवाकस्य सम्बन्धमाह । संहिताविषयमित्यादिना ॥ व्याहृतीनां अङ्गाश्रीतत्वात्तत्परित्यागेनोपदिश्यमानं ब्रह्म न बुद्धिमारोहेदिति । ततो व्याहृतिशरीरं हिरण्यगर्भाख्यं ब्रह्मान्तरहृदयश्येयत्वेनोपदिश्यत इत्यर्थः । मह इति व्याहृतावङ्गिब्रह्मदृष्टिः

---

* ब्रह्मान्तरोपासनमिति पुस्तकान्तरपाठः ।

प्रवेदयते। मह इति तद्ब्रह्म। स आत्मा। अङ्गान्यन्या देवताः। भूरिति वा अयं लोकः॥

पराञ्चष्टाः स्मर्यन्ते वै इत्यनेन। तिस्र एताः प्रसिद्धा व्याहृतयः स्मर्यन्ते तावत्। तासामियं चतुर्थी व्याहृतिर्मह इति। तामेतां चतुर्थीं महाचमसस्यापत्यं माहाचमस्यः प्रवेदयते उ ह स्म इत्येतेषां दृष्टानुकथनार्थत्वाद्विदितवान् ददर्श इत्यर्थः। माहाचमस्य ग्रहणमार्षानुस्मरणार्थम्। ऋषिस्मरणमप्युपासनाङ्गमिति गम्यते। दृष्टोपदेशाद्येयं माहाचमस्येन दृष्टा व्याहृतिर्मह इति तद्ब्रह्म महद्धि ब्रह्म। महश्च व्याहृतिः। किं पुनस्तत्। स आत्मा आप्नोतेर्व्याप्तिकर्मणः। आत्मा इतराश्च व्याहृतयो लोका देवा वेदाः। प्राणश्च मह इत्यनेन व्याहृत्यात्मनो देवलोकादयः सर्वेऽवयवभूता यतः। आदित्यचन्द्रब्रह्मान्नभूतेन व्याप्यन्ते यतः। अतोऽङ्गान्यवयवा अन्या देवताः। देवताग्रहणमुपलक्षणार्थम्। लोकादीनां मह इत्येतस्य व्याहृत्यात्मनो देवलोकादयः सर्वेऽवयवभूताः यत आहाऽऽ

कर्त्तव्या। तत्र किं साम्यमित्यत आह। महङ्गीति। यथा देवदत्तस्य पादादीन्यङ्गानि मध्यभागश्चाङ्गी इतरेषामङ्गानामात्मा कथ्यते व्यापकत्वात्॥ तथा महाव्याहृतिर्हिरण्यगर्भस्य ब्रह्मणो मध्यभाग आत्मेति कल्प्यते। इतराश्च व्याहृतयः पादाद्यवयवत्वेन कल्प्यते। प्रथमव्याहृतिः पादौ द्वितीया बाहूदरतीया शिर इत्यर्थः। व्याहृत्यवयवं ब्रह्म उपासी-

भुव इत्यन्तरिक्षम्। भुव इत्यसौ लोकः ॥ १ ॥ मह इत्यादित्यः। आदित्येन वाव सर्वे लोका महीयन्ते। भूरिति वा अग्निः। भुव इति वायुः। सुवरित्यादित्यः। मह इति चन्द्रमाः। चन्द्रमसा वाव सर्वाणि ज्योतीँषि महीयन्ते। भूरिति वा ऋचः। भुव इति सामानि। सुवरिति यजूँषि ॥ २ ॥ मह इति ब्रह्म। ब्रह्मणा वाव सर्वे वेदा महीयन्ते। भूरिति वै प्राणः। भुव इत्यपानः। सुवरिति व्यानः। मह इत्यन्नम्। अन्नेन वाव सर्वे प्राणा महीयन्ते। ता वा एताश्चतस्रश्च

दित्यादिभिर्लोकादयो महीयन्त इति। आत्मनो ह्यङ्गानि महीयन्ते महनं वृद्धिरुपचयो महीयन्ते वर्द्धन्त इत्यर्थः॥

अयं लोकोऽग्निर्ऋग्वेदः प्राण इति प्रथमा व्याहृतिर्भूरिति। एवमुत्तरोत्तरा एकैका चतुर्धा भवति। ॥१॥२॥ मह इति ब्रह्म। ब्रह्मेत्योङ्कारः शब्दाधिकारेऽन्यस्यासम्भवादुक्तार्थमन्यत् ता वा एताश्चतस्रश्चतुर्धेति। ता वा एता भूर्भुवः सुवर्मह इति चतस्र एकैकशश्चतुर्धा चतुःप्रकाराः।

तेत्युत्पत्तिविधिरुक्तः। इदानीमङ्गविशेषविधि कथ्यते। भूरिति वा लोक इत्यादिना॥

तत्रैकैका व्याहृतिश्चतुर्धा चतुःप्रकारा अवगन्तव्येति तात्पर्यमाह। अयं लोक इत्यादिना॥, एकैका व्याहृतयो यदा चतुःप्रकाराश्चिन्त्यन्ते षोढ्यकलः पुरुष उपासितो भवतीत्यभिप्रेत्य सङ्ख्येयमाह। ता वा एता

तुर्थी। चतस्रश्चतस्रो व्याहृतयः। ता यो वेद। स वेद ब्रह्म। सर्वेऽस्मै देवा बलिमावहन्ति॥

धाशब्दः प्रकारवचनः। चतस्रश्चतस्रः सत्यश्चतुर्धा भवन्तीत्यर्थः। तासां यथाक्रमानां पुनरुपदेशस्यैवोपासननियमार्थः। ता यथोक्ताव्याहृतीर्यो वेद स वेद विजानाति। किम्। ब्रह्म। ननु तद्ब्रह्म स आत्मेति ज्ञाते ब्रह्मणि न वक्तव्यमविज्ञातवत्स वेद ब्रह्मेति। न। तद्विशेषविवक्षुत्वाददोषः। सत्यं विज्ञातं चतुर्थव्याहृत्यात्मकं ब्रह्मेति न तु तद्विशेषो हृदयान्तरुपलभ्यत्वं मनोमयत्वादिश्च। शान्तिसच्चमित्येवमन्तो विशेषणविशेष्यरूपो धर्मपूगो विज्ञापयत इति। तद्विवक्षुर्हि शास्त्रमविज्ञातमिव ब्रह्म मत्वा स वेद ब्रह्मेत्याह। अतो न दोषः। यो हि वक्ष्यमाणेन धर्मपूगेन विशिष्टं ब्रह्म वेद स वेद ब्रह्मेत्यभिप्रायः। अतो वक्ष्यमाणानुवाकेनैकवाक्यताऽस्योभयोर्ह्यनुवाकयोरेकमुपासनं लिङ्गाच्च। भूरित्यग्नौ प्रतितिष्ठतीत्यादिकं लिङ्गमुपासनैकत्वे विधायकाभावाच्च। न हि वेदोपासितव्य इति विधायकः कश्चिच्छब्दोऽस्ति।

इति॥ स वेदब्रह्मेति॥ ब्रह्मवेदनं फलत्वेनन सङ्कीर्त्यतेऽधिकारावधिवाक्ये। किन्तु वक्ष्यमाणानुवाकेनास्मिन्नेव ब्रह्मोपासने गुणविधानं भविष्यतीति सूचयितुमित्याह। न तद्विशेषविवक्षुत्वादित्यादिना॥ यदि व्याहृत्यवयव एव ब्रह्मोत्तरत्रोपास्यते तदैवोपासकस्य प्रथमव्याहृत्यात्मकेऽग्नौ प्रतिष्ठाभिधानं घटते तस्माद्व्याहृत्यात्मकदेवताप्राप्त्यभिधानमुपासनैकत्वे लिङ्गमाह। लिङ्गाच्चेति॥ किञ्चैकत्व प्रधानविद्यौविधिरपरत्र गुणविधि-

३ ॥ असौ लोको यजूंषि वेद द्वे च ॥ इति पञ्च-मोऽनुवाकः ॥ ५ ॥

स य एषोऽन्तर्हृदय आकाशः । तस्मिन्नयं

व्याहृत्यनुवाके ता यो वेदेति वक्ष्यमाणार्थसाक्षोपासनभेद-को वक्ष्यमाणार्थत्वञ्च तद्विशेषविवक्षुत्वादित्यादिनोक्तम् । सर्वे देवा अस्मै एवंविदुषेऽङ्गभूता आवहन्ति आनयन्ति बलिं स्वाराज्यप्राप्तौ सत्यामित्यर्थः ॥३॥ इति पञ्चमोऽनुवाकः ॥५॥

भूर्भुवः सुवःस्वरूपा मह इत्येतस्य हिरण्यगर्भस्य व्याहृत्यात्मनो ब्रह्मणोऽङ्गान्यन्यदेवता इत्युक्तम् । यस्य ताऽङ्गभूता अस्यैतस्य ब्रह्मणः साक्षादुपलब्ध्यर्थमुपासनार्थञ्च हृद-याद्याकाशस्थानमुच्यते शालग्राम इव विष्णोः । तस्मिन् हि तद्ब्रह्मोपास्यमानं मनोमयत्वादिधर्मविशिष्टं साक्षादु-पलभ्यते पाणाविवामलकम् । मार्गश्च सर्वात्मभावप्रति-पत्तये वक्तव्य इत्यनुवाक आरभ्यते ॥ स इति ॥ व्युत्क्रम्यायं पुरुष इत्यनेन सम्बध्यते । य एषोऽन्तर्हृदये हृदयस्यान्त-र्हृदयमिति पुण्डरीकाकारो मांसपिण्डः प्राणायतनोऽने-

---

रित्येवमनुवाकभेदे चरितार्थेनानन्यथासिद्धं भेदकं प्रमाणमुपलभ्य इत्याह । विधायकाभावाच्चेति ॥ विधायकात्मक इति भिन्नविद्याबोधक इत्यर्थः इति पञ्चमोऽनुवाकः ॥ ५ ॥

तदुपलभ्यत्वादिति ज्ञानाकारपरिणामिनि मनस्येवोपलभ्य-त्वाद्याप्तेरित्यर्थः* । तस्मात्मनसः प्रवृत्तिं दृष्ट्वा तदधिष्ठातृतया

---

*ध्यायिभिरित्यर्थ इति पुस्तकान्तरपाठः । † जडस्येति पाठान्तरः ।

पुरुषो मनोमयः। अमृतो हिरण्मयः। अन्तरेण तालुके। य एष स्तन इवावलम्बते। सेन्द्रयोनिः। यत्रासौ केशान्तो विवर्त्तते। व्यपोह्य शीर्षकपाले। भूरित्यग्नौ प्रतितिष्ठति। भुव इति वायौ ॥१॥

कनाडीसुषिर ऊर्द्ध्वनालाधोमुखो विशस्यमाने पद्मौ प्रसिद्ध उपलभ्यते। तस्यान्तर्थ्य एष आकाशः प्रसिद्ध एव करकाकाशवत्। तस्मिन् सोऽयं पुरुषः पुरि शयान्नात्मूर्त्तौ वा भूरादयो लोका येनेति पुरुषो मनोमयः। मनो विज्ञानम्। मनुतेर्ज्ञानकर्म्मणस्तन्मयस्तदुपलभ्यत्वात्। मनुतेऽनेनेति वा मनोऽन्तःकरणं तदभिमानी तन्मयस्तल्लिङ्गो वा। अमृतोऽमरणधर्म्मा हिरण्मयो ज्योतिर्म्मयस्तस्यैवंलक्षणस्य हृदयाकाशे साक्षात्कृतस्य विदुष आत्मभूतस्येदृशस्वरूपप्रतिपत्तये मार्गोऽभिधीयते। हृदयादूर्द्ध्वं प्रवृत्ता सुषुम्ना नाम नाडी योगशास्त्रेषु च प्रसिद्धा। सा चाऽन्तरेण मध्ये प्रसिद्धे तालुके तालुकयोर्गता। यश्चैष तालुकयोर्मध्ये स्तन इवावलम्बते मांसखण्डस्तस्य चान्तरेणेत्येतत्। यत्र केशान्तः केशानामन्तो मूलं विवर्त्तते विभागेन वर्त्तते मूर्द्धप्रदेश इत्यर्थः। तं देशं प्राप्य तत्र विनिःसृता व्यपोह्य विभज्य विदार्य्य शीर्षकपाले शिरः-

---

हिरण्यनाड़ी योगशास्त्रे बोध्यते*। तस्य शास्त्रे करणाधिष्ठातृत्वेन

---

* हिरण्यगर्भोऽनुभीयत इति पुस्तकान्तरपाठः।

सुवरित्यादित्ये । मह इति ब्रह्मणि । आप्नोति स्वाराज्यम् । आप्नोति मनसस्पतिम् वाक्पति-श्चक्षुष्पतिः । श्रोत्रपतिर्विज्ञानपतिः । एतत्तदो

भवति । आकाशशरीरं ब्रह्म । सत्यात्म प्राणा-

कपाले विनिर्गता वा सेन्द्रयोनिरिन्द्रस्य ब्रह्मणो योनि-मार्गः स्वरूपप्रतिपत्तिद्वारमित्यर्थः। तथैव विद्वान्मनोमया-त्मदर्शी मूर्ध्नो विनिष्क्रम्यास्य लोकस्याधिष्ठाता भूरिति व्याहृतिरूपो यो ऽग्निर्महतो ब्रह्मणोऽङ्गभूतस्तस्मिन्नग्नौ प्रतितिष्ठत्यग्न्यात्मना इमं लोकमाप्नोतीत्यर्थः। तथा भुव इति द्वितीयव्याहृत्यात्मनि वायौ प्रतितिष्ठतीत्यनुवर्त्तते ॥ १ ॥ सुवरिति तृतीयव्याहृत्यात्मनि आदित्ये । मह इत्य-ङ्गिनि चतुर्थव्याहृत्यात्मनि ब्रह्मणि प्रतितिष्ठति । तेष्वा-त्मभावेन स्थित्वाऽऽप्नोति ब्रह्मभूतः स्वाराज्यं स्वराड्भावं स्वयमेव राजा धिषणतिर्भवति अङ्गभूतानां देवानां यथा ब्रह्म । देवाश्च सर्वेऽस्मै बलिमावहन्त्यङ्गभूता यथा ब्रह्मणे ॥ आप्नोति मनसस्पतिम् । सर्वेषां हि मनसां पतिः सर्व्वा-त्मकत्वाद्ब्रह्मणः । सर्व्वैर्हि मनोभिस्तन्मनुते । तदाप्नोत्येवं विद्वान् । किञ्च वाक्पतिः सर्व्वासां वाचां पतिर्भवति । तथैव चक्षुष्पतिश्चक्षुषां पतिः । श्रोत्रपतिः श्रोत्राणां पति-र्विज्ञानपतिर्विज्ञानानां पतिः । सर्व्वात्मकत्वात्सर्वेषां प्राणिनां

प्रतिष्ठत्वादिति तत्प्रतिष्ठत्वमुक्तमित्यर्थः । स्वाराज्यं निरङ्कुशमैश्वर्यं ऽगत्स्वतृत्वादिलक्षणं न भवतीत्याह । अङ्गभूतानां देवानामिति ॥

भवति। आकाशशरीरं ब्रह्म। सत्यात्म प्राणारामं मन आनन्दम्। शान्तिसमृद्धममृत। इति प्राचीनयोग्योपास्व ॥ २ ॥ वायावमृतमेकञ्च ॥ षष्ठोऽनुवाकः ॥ ६ ॥

करणैस्सहान् भवतीत्यर्थः। किञ्च ततोऽप्यधिकतरमेतद्भवति। किन्तत। उच्यते। आकाशशरीरं आकाशः शरीरमस्य आकाशवद्वा सूक्ष्मं शरीरमस्येत्याकाशशरीरम्। किन्तत्प्रकृतं ब्रह्म सत्यात्म सत्यं मूर्त्तामूर्त्तमवितथं स्वरूपञ्चात्मा स्वभावोऽस्य तदिदं सत्यात्म प्राणारामं प्राणेष्वारमणमाक्रीडा यस्य तत्प्राणारामं प्राणानां वाऽरामो यस्मिन् तत्प्राणारामम्। मन आनन्दभूतं सुखरूपमेव यस्य मनस्तन्मन आनन्दम्। शान्तिसमृद्धं शान्तिरूपशमः शान्तिश्च तत्समृद्धं च शान्तिसमृद्धम्। शान्त्या वा समृद्धं तदुपलभ्यत इति। शान्तिसमृद्धममरणधर्म्मि एतच्चाधिकतरं विशेषणं तत्रैव मनोमय इत्यादौ द्रष्टव्यमिति। एवं मनोमयत्वादिधर्म्मैर्विशिष्टं यथोक्तं ब्रह्म हे प्राचीनयोग्य उपास्वेत्याचार्य्यवचनोक्तिरादरार्था ॥ २ ॥ ॥ षष्ठोऽनुवाकः ॥ ६ ॥

सावधिकमैश्वर्यमत एवाह। आप्नोतीत्यादिना॥ इति षष्ठोऽनुवाकः ॥ ६ ॥

पृथिव्यन्तरिक्षं द्यौर्दिशोऽवान्तरदिशः । अग्निर्वायुरादित्यश्चन्द्रमा नक्षत्राणि । आप ओषधयो वनस्पतयः । आकाश आत्मा । इत्यधिभूतम् ॥ अथाध्यात्मम् । प्राणोऽपानो व्यान उदानः समानः । चक्षुः श्रोत्रं मनो वाक्त्वक् । चर्म मांसꣳ

यदेतद्याहृत्यात्मकब्रह्मोपास्यमुक्तं तस्यैवेदानीं पृथिव्यादिपाङ्क्तस्वरूपेणोपासनमुच्यते । पञ्चसङ्ख्यायोगात्पङ्क्तिच्छन्दसम्पत्तिस्ततः पाङ्क्तत्वं सर्वस्य । पाङ्क्तश्च यज्ञः पञ्चपादा पङ्क्तिः । पाङ्क्तो यज्ञ इति श्रुतेः । तेन यत्सर्वं लोकाद्यात्मान्तञ्च पाङ्क्तं परिकल्पयन्ति । तेन यज्ञेन परिकल्पितेन पाङ्क्तात्मकं प्रजापतिमभिसम्पद्यते । तत्कथं पाङ्क्तमिदं सर्वमित्यत आह । पृथिव्यन्तरिक्षं द्यौर्दिशोऽवान्तरदिश इति लोकपाङ्क्तम् । अग्निर्वायुरादित्यश्चन्द्रमानक्षत्राणीति देवतापाङ्क्तम् । आप ओषधयो वनस्पतय आकाश आत्मेति भूतपाङ्क्तम् । आत्मेति विराड्भूताधिकारादित्यधिभूतमित्यधिलोकाधिदैवतपाङ्क्तद्वयोपलक्षणार्थम् । लोकदेवतापाङ्क्तयोश्चाभिहितत्वात् । अथानन्तरमध्यात्मं पाङ्क्तत्वयमुच्यते ।

उत्तरोऽप्यनुवाकः प्रकारान्तरेण हिरण्यगर्भोपासनविषय इत्याह । यदेतदित्यादिना ॥ पृथिव्यादेः कथं पाङ्क्तत्वमित्याकाङ्क्षायां पङ्क्त्याख्यस्य छन्दसः सम्पादनादित्याह । पञ्चसङ्ख्येति ॥ न केवलं पञ्चसङ्ख्यायोगात्पङ्क्तिछन्दः सम्पादनं यज्ञत्वसम्पादनमपि कर्तुं शक्यत इत्याह । पाङ्क्तश्च यज्ञ इति ॥ पत्नीयजमानदैवमानुषवित्तैः पञ्चभिः सम्पाद्यत इति यज्ञः

स्नावास्थि मज्जा । एतदधिविधाय ऋषिरवोचत् । पाङ्क्तं वा इदꣳसर्वम् । पाङ्क्तेनैव पाङ्क्तꣳस्पृणोतीति ॥ १ ॥ सर्वमेकञ्च । इति सप्तमोऽनुवाकः ॥ ७ ॥

ओमिति ब्रह्म । ओमितीदꣳसर्वम् । ओमित्ये-

प्राणादि वायुपाङ्क्तम् । चक्षुरादीन्द्रियपाङ्क्तम् । चर्म्मादि धातुपाङ्क्तम् । एतावद्वीदं सर्वमध्यात्मम् । बाह्यञ्च पाङ्क्तमेवेत्येतदवं अधिविधाय परिकल्प्य ऋषिर्वेदस्तद्दर्शनसम्पन्नो वा कश्चिदृषिरवोचदुक्तवान् । किमित्याह । पाङ्क्तं वा इदं सर्व्वं पाङ्क्तेनैवाध्यात्मिकेन सङ्घातसामान्यात्पाङ्क्तं बाह्यं स्पृणोति वलयति पूरयति । एकात्मतयोपलभ्यत इत्येतदेव पाङ्क्तमिदं सर्वमिति यो वेद स प्रजापत्यात्मैव भवतीत्यर्थः ॥ १ ॥ इति सप्तमोऽनुवाकः ॥ ७ ॥

व्याहृत्यात्मनो ब्रह्मण उपासनमुक्तम् । अनन्तरं पाङ्क्तस्वरूपेणेदानीं सर्व्वोपासनाङ्गभूतस्योङ्कारस्योपासनं विधित्सते । परापरब्रह्मदृष्ट्या ह्युपास्यमान ओङ्कारः शब्दभावोऽपि परापरब्रह्मप्राप्तिसाधनं भवति । स ह्यालम्बनं

पाङ्क्त इत्यर्थः ॥ उत्कृष्टदृष्टिर्निकृष्टे फलवतीति न्यायाद्बाह्यपाङ्क्तरूपेणाध्यात्मिकपाङ्क्तत्रयमवगन्तव्यमित्यभिप्रेत्याह । एकात्मतयेति ॥ इति सप्तमोऽनुवाकः ॥ ७ ॥

इत्तानुवादपूर्व्वकमुत्तरानुवाकमवतारयति । व्याहृत्यात्मन इत्यादिना ॥ वेदविदां हि सर्व्वाः क्रिया ओङ्कारैसङ्घार्य्य प्रवर्त्तन्ते तस्य सङ्गाग्टह्णोतत्वात्तत्परिहारेणोपदिष्टं ब्रह्म न बुद्धिमारोहेदतस्तदाद्यैः

तदनुकृतिर्ह स्म वा अप्येऽआवयेत्याआवयन्ति। ओमिति सामानि गायन्ति। ओ३ग्ओमितिग्स्त्राणि ग्ंसन्ति ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति। ओमिति ब्रह्मा प्रसौति॥ ओमित्यग्निहोत्रमनुजानाति। ओमिति ब्राह्मणः प्रव-

---

ब्रह्मणः परस्यापरस्य च प्रतिमेव विष्णोः। एतेनैवायतनेनैकतरमन्वेतीति श्रुतेः। ओमिति। इतिशब्दः स्वरूपपरिच्छेदार्थः ओमित्येतच्छब्दरूपं ब्रह्मेति मनसा धारयेदुपासीत। यत ओमितीदं सर्वं हि शब्दरूपमोङ्कारेण व्याप्तम्। तद्यथा शङ्कुना इति श्रुत्यन्तरात्। अभिधानतन्त्वं ह्यभिधेयमित्यत इदं सर्वमोङ्कार इत्युच्यते। ओङ्कारस्तुत्यर्थमुत्तरो ग्रन्थः। उपास्यत्वात्तस्य। ओमित्येतदनुकृतिरनुकरणम्। करोमि यास्यामि वेति। कृतमुक्त ओमित्यनुकरोत्यन्यः। अत ओङ्कारोऽनुकृतिः। ह स्म वै इति प्रसिद्धावद्योतकाः। प्रसिद्धं ह्योङ्कारस्यानुकृतित्वम् अपि चोआवयेति तत्पूर्वकमाआवयति प्रतिआवयति। तद्योमिति सामानि गायन्ति सामगाः। ओमिति शस्त्राणि शंसन्ति शस्त्रशंसितारोऽपि। तद्यौमित्यध्वर्युः प्रतिगरं प्रतिगृणाति। ओमिति ब्रह्मा प्रसौत्यनुजानाति। ओमित्यग्निहोत्रमनुजानाति जुहोमीत्युक्तः। ओमित्येवानुज्ञां प्रयच्छति। ओमित्येव ब्राह्मणः

वोपासनं निर्धार्यत इत्यर्थः। नन्वोङ्कारस्य शब्दमात्रस्याचेतनत्वादहमनेनोपासित इति ज्ञानाभावात्कथं फलदातृत्वं स्यादित्याशङ्क्याह।

च्यन्नाह । ब्रह्मोपाप्नुवानीति । ब्रह्म वोपाप्नोति ॥ १ ॥ ॐ दम ॥ इत्यष्टमोऽनुवाकः ॥ ८ ॥

ऋतञ्च स्वाध्यायप्रवचने च । सत्यञ्च स्वाध्यायप्रवचने च । तपश्च स्वाध्यायप्रवचने च । दमश्च

प्रवक्ष्यन् प्रवचनं करिष्यन्नध्येष्यमाण ओमित्येवाह। ओमिति प्रतिपद्यतेऽध्येतुमित्यर्थः । ब्रह्म वेद उपाप्नुवानीति प्राप्नुयां ग्रहिष्यामीति । उपाप्नोत्येव ब्रह्म । अथवा ब्रह्म परमात्मा तमुपाप्नुवानीत्यात्मानं प्रवक्ष्यन् प्रापयिष्यन्नोमित्येवाह । सचेतनोङ्कारेण ब्रह्म प्राप्नोत्येव । ओङ्कारपूर्वं प्रवृत्तानां क्रियाणां फलवत्त्वं यस्मात्तस्मादोङ्कारं ब्रह्मोपासीतेति वाक्यार्थः ॥ १ ॥ इत्यष्टमोऽनुवाकः ॥ ८ ॥

विज्ञानादेवाप्नोति स्वाराज्यमित्युक्तत्वात् औतस्मार्त्तानां कर्मणामानर्थक्यं प्राप्तमित्यतस्तन्मा प्रापदिति

परापरेति ॥ प्रतिमाद्यर्चनमिव सर्व्वत्र ईश्वर एव फलदातेति भावः । ओङ्कारे ब्रह्मत्वाध्यासे किं साहश्यमित्यत आह । ओमितीदमिति ॥ सर्व्वोत्कृष्टत्वमोङ्कारस्य ब्रह्मणा साहश्यमित्यर्थः । यस्मात्ऋग् गीतिरुक्था ऋच उच्यन्ते । प्रतिगरभित्योंगो सामो देवेतिशब्दभेद्यर्युः प्रतिगृणाति होतुः शंसनं प्रति । प्रतिशंसनमुच्चारयतीत्यर्थः ॥ प्रवक्ष्यन्निति ॥ वच परिभाषण इत्यस्य रूपं प्रथमव्याख्याने । द्वितीये वह प्रापण इत्यस्य द्रष्टव्यम् ॥ १ ॥ इत्यष्टमोऽनुवाकः ॥ ८ ॥

व्यवहितानुवाकेन सम्बन्धमाह । विज्ञानादेवेत्यादिना ॥ अपरविद्यासहकारितया तत्फलेनैव फलवत्त्वसिद्धेरर्थसुत्तरानुवाकारम्भ इ-

स्वाध्यायप्रवचने च । शमश्च स्वाध्यायप्रवचने च अग्नयश्च स्वाध्यायप्रवचने च । अग्निहोत्रञ्च स्वाध्यायप्रवचने च । अतिथयश्च स्वाध्यायप्रवचने च । मानुषञ्च स्वाध्यायप्रवचने च । प्रजा च स्वाध्या-

---

कर्मणां पुरुषार्थं प्रति साधनत्वप्रदर्शनार्थमिहोपन्यासः । ऋतमिति व्याख्यातं । स्वाध्यायोऽध्ययनम् । प्रवचनमध्ययनं ब्रह्मयज्ञो वा । एतान्यृतादीनि अनुष्ठेयानीति वाक्यशेषः । सत्यं सत्यप्रवचनं यथा व्याख्यातार्थं वा । तपः कृच्छ्रादि । दमो बाह्यकरणोपशमः । अग्नय आधातव्याः । अग्निहोत्रं होतव्यम् । अतिथयश्च पूज्याः । मानुषमिति लौकिकः संव्यवहारः । तच्च यथाप्राप्तमनुष्ठेयम् । प्रजाश्चोत्पाद्याः । प्रजननञ्च प्रजननहेतौ भार्यागमनमित्यर्थः । प्रजातिः पौत्रोत्पत्तिः पुत्रो निवेशयितव्य इत्येतत्सर्वैरेतैः कर्मभिर्युक्तस्यापि स्वाध्यायप्रवचने यत्नतोऽनुष्ठेये इत्येवमर्थं सर्वेण सह स्वाध्यायप्रवचनग्रहणम् । स्वाध्यायाधीनं हि अर्थज्ञानम् । अर्थज्ञानायत्तं च परं श्रेयः प्रवचनञ्च तदविस्मरणार्थं धर्मत्वाद्यर्थञ्च अतः स्वाध्यायप्रवचनयोरादरः कार्यः ॥ सत्य-

---

त्यर्थः । लौकिकसंव्यवहारो विवाहादिः । पुनः पुनः स्वाध्यायप्रवचनग्रहणस्य तात्पर्यमाह । सर्वैरेतैरिति ॥ किमिति यत्नतोऽनुष्ठेये तत्राह । स्वाध्यायाधीनमिति ॥

यप्रवचने च। प्रजनश्च स्वाध्यायप्रवचने च। प्रजातिश्च स्वाध्यायप्रवचने च। सत्यमिति सत्यवचा राथीतरः। तपइति तपो नित्यः पौरुषिष्टिः। स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः। तद्धि तपस्तद्धि तपः॥ १॥ प्रजा च स्वाध्यायप्रवचने च षट् च॥ इति नवमोऽनुवाकः॥९॥

मिति। सत्यमेवानुष्ठातव्यमिति। सत्यवचः सत्यमेव वचो यस्य सोऽयं सत्यवचा नाम वा तस्य। राथीतरः रथीतरस्य गोत्रो राथीतराचार्यो मन्यते। तप एव कर्त्तव्यमिति। तपोनित्यस्तपः परस्तपो नित्य इति वा नाम। पौरुषिष्टिः पुरुषिष्टस्यापत्यं पौरुषिष्टिराचार्यो मन्यते। स्वाध्यायप्रवचने एवानुष्ठेये इति नाको नामतो मुद्गलस्यापत्यं मौद्गल्य आचार्यो मन्यते। तद्धि तपस्तद्धि तपः। तद्धि तपो हि यस्मात्स्वाध्यायप्रवचने एव तपस्तस्मात्तेऽनुष्ठेये इति। उक्तानामपि सत्यतपः स्वाध्यायप्रवचनानां पुनर्ग्रहणमादरार्थम्॥ १॥ इति नवमोऽनुवाकः॥ ९॥

त्वयाणाद्यृषीणां मतभेदोपन्यासेन स्वाध्यायप्रवचनयोरेवादरं विद्योतयति। सत्यमित्यादिना॥ स्वाध्यायार्थं इति जप्यार्थः। दृषे त्वेति शाखां छिनत्तीति वत्॥ इति नवमोऽनुवाकः॥ ९॥

अहं वृक्षस्य रेरिवा कीर्त्तिः पृष्ठं गिरेरिव। ऊर्ज्जपवित्रो वाजिनीव स्वमृतमस्मि। द्रविणꣳ सुवर्चसम्। सुमेधा अमृतोक्षितः इति विशङ्के।-

---

अहं वृक्षस्य रेरिवेति स्वाध्यायार्थो मन्त्रान्नायः। स्वाध्यायश्च विद्योत्पत्तये प्रकरणतो विद्यार्थं हि इदं प्रकरणम्। न चान्यार्थत्वमवगम्यते। स्वाध्यायेन च विशुद्धसत्त्वस्य विद्योत्पत्तिरवकल्प्यते। अहं वृक्षस्योच्छेदात्मकस्य संसारवृक्षस्य रेरिवा प्रेरयिता अन्तर्यामात्मना। कीर्त्तिः ख्यातिर्गिरेः पृष्ठमिवोत्थिता मम। ऊर्ज्जपवित्र ऊर्ज्जं कारणं पवित्रं पावनं ज्ञानं प्रकाश्यं पवित्रं परमं च ब्रह्म यस्य सर्व्वात्मनो मम सोऽहं ऊर्ज्जपवित्रो वाजिनीव वाजवतीव। वाजमन्नं तद्वति सवितरीत्यर्थः। यथा सवितरि अमृतमात्मतत्त्वं विशुद्धं श्रुतिस्मृतिशतेभ्यः एवं स्वमृतं शोभनं विशुद्धमात्मतत्त्वमस्मि भवामि। द्रविणं धनं सुवर्चसं दीप्तिमदेवात्मतत्त्वमस्मीत्यनुवर्त्तते। ब्रह्मज्ञानं वा आत्मतत्त्वप्रकाशकत्वात्। सुवर्चसं द्रविणमिव द्रविणं मोक्षसुखहेतुत्वात्। अस्मिन्पक्षे प्राप्तं मयेत्यध्याहारः कर्त्तव्यः। सुमेधाः शोभना मेधा सर्वलक्षणा यस्य मम सोऽहं सुमेधाः। संसारस्थित्युत्पत्त्युपसंहारकौशलयोगात्सुमेधस्त्वम्। अत

अन्यत्र विनियोजकश्रुत्यादिप्रमाणमपि नोपलभ्यत इत्याह। न चान्यार्थत्वमिति॥ अग्नितमस्योत्यादिवदुपासनाविधिशेषत्वं वा वक्तुं न शक्यते। ज्ञानक्रियासाधनविधेः प्रक्रान्तत्वादित्यर्थः। अहं वृक्षस्येति

वेदानुवचनम् ॥ १ ॥ अहꣳ षट् ॥ इति दशमोऽनुवाकः ॥ १० ॥

वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति । सत्यं वद । धर्म्मं चर ।

एवाच्युतोऽमरणधर्म्मा अक्षितोऽक्षीणोऽव्ययः । उक्षितो वा अच्युतेन वेक्षितः सिक्तोऽच्युतेक्षितोऽहमित्यादि ब्राह्मणमिति । एवं त्रिशङ्कोर्ऋषेर्ब्रह्मभूतस्य ब्रह्मविदो वेदानुवचनम् । वेदो वेदनमात्मैकत्वविज्ञानं तस्य प्राप्तिमनुवचनं वेदानुवचनम् । आप्तः कृतकृत्यताख्यापनार्थं वामदेववत्त्रिशङ्कुनार्षेण दर्शनेन दृष्टो मन्त्रान्नाय आत्मविद्याप्रकाश इत्यर्थः । अस्य च जपो विद्योत्पत्त्यर्थोऽवगम्यते । कृतक्रेत्यादिकर्मोपन्यासादनन्तरञ्च वेदानुवचनपाठादेतदवगम्यते । एवं श्रौतस्मार्त्तेषु नित्येषु कर्मसु युक्तस्य निष्कामस्य परंब्रह्म विविदिषोरार्षाणि दर्शनानि प्रादुर्भवन्त्यात्मादिविषयाणीति ॥ १ ॥ इति दशमोऽनुवाकः ॥ १० ॥

वेदमनूच्येत्येवमादिकर्त्तव्यतोपदेशारम्भः प्राग्ब्रह्मविज्ञानान्नियमेन कर्त्तव्यानि श्रौतस्मार्त्तकर्म्माणीत्येवमर्थः ।

मन्त्रस्य ऋषिस्त्रिशङ्कुः पङ्क्तिश्छन्दः परमात्मा देवता ब्रह्मविद्यार्थे जपे विनियोगः ॥ न केवलस्य जपो विद्यार्थः पूर्व्वोक्तानि कर्म्माण्यपीत्याह कृतक्रेत्यादिना ॥ १ ॥ इति दशमोऽनुवाकः ॥ १० ॥

उत्तरानुवाक्यस्य तात्पर्य्यमाह । वेदमनूच्येत्यादिना ॥ विद्योत्पत्त्यर्थं नित्यनैमित्तिकान्यनुष्ठेयानीत्येको नियम उक्तः ॥ प्रागेव वाचानुष्ठेयानीति नियमान्तरमाह । प्रागिति ॥ प्रागुपन्यासाच्च कर्म्माणीति

अनुशासनश्रुतेः पुरुषसंस्कारार्थत्वात्। संस्कृतस्य हि विद्युद्धसत्त्वस्यात्मज्ञातमज्ञसैवोत्पद्यते। तपसा कल्मषं हन्ति विद्ययाऽमृतमश्नुत इति स्मृतिः। वक्ष्यति च। तपसा ब्रह्म विजिज्ञासस्वेति। अतो विद्योत्पत्त्यर्थमनुष्ठेयानि कर्माणि। अनुशास्तीत्यनुशासनशब्दादनुशासनातिक्रमे हि दोषोत्पत्तिः। प्रागुपन्यासाच्च कर्मणां केवलब्रह्मविद्यारम्भाच्च पूर्वं कर्माण्युपन्यस्तानि। उदितायाञ्च विद्यायामभयं प्रतिष्ठां विन्दते। न बिभेति कुतश्चनेति। किमहं साधु नाकरवमित्येवमादिना कर्मनैष्किञ्चन्यं दर्शयिष्यतीत्यतोऽवगम्यते। पूर्वोपचितदुरितक्षयद्वारेण विद्योत्पत्त्यर्थानि निष्कर्माणीति मन्त्रवर्णाच्च। अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुत इति ऋतादीनां पूर्वत्रोपदेशानर्थक्यपरिहारार्थः। इह तु ज्ञानोत्पत्त्यर्थत्वात्कर्त्तव्यनियमार्थः। वेदमनूच्याध्याप्याचार्योऽन्तेवासिनमनुशास्ति ग्रन्थग्रहणादनुपश्चाच्छास्ति तदर्थं ग्राहयतीत्यर्थः। अतोऽवगम्यते अधीतवेदस्य धर्मजिज्ञासमकृत्वा गुरुकुलान्न समावर्त्तितव्यमिति बुद्ध्वा कर्माणि चारभेदिति स्मृतेश्च। कथमनु-

---

संग्रहवाक्यं विवृणोति। केवलेत्यादिना॥ अविद्यया कर्मणा मृत्युं तीर्त्वेति मन्त्रोऽपि विद्योत्पत्तेः प्रागेव कर्मानुष्ठानं सूचयतीत्यर्थः॥ ऋतञ्च स्वाध्यायप्रवचने चेत्यादिना पूर्वत्र कर्मानुष्ठानमुक्तमेवातः पुनरुक्तमित्याशङ्क्याह। ऋतादीनामिति॥ विचारमकृत्वा गुरुकुलाच्च निवर्त्तितव्यम्। किन्त्वध्ययनविधेरर्थावबोधद्वारेण पुरुषार्थपर्य्यवसायितासिद्ध्यर्थमन्तरमग्रहणानन्तरमर्थावबोधे प्रयतितव्यमित्याह। अन्यग्रहणादन्विति॥

स्वाध्यायान्मा प्रमदः। आचार्य्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्म्मान्न प्रमदितम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् ॥ १ ॥ देवपितृकार्य्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृ-

---

ग्राह्यीत्याह। सत्यं वद यथा प्रमाणावगतं वक्तव्यं वद। तद्वद्धर्मं चर। धर्म इत्यनुष्ठेयानां सामान्यवचनं सत्यादिविशेषनिर्देशात् ॥ स्वाध्यायादध्ययनान्मा प्रमदः प्रमादं माकार्षीः। आचार्य्यायाऽऽचार्य्यार्थं प्रियमिष्टं धनमाहृत्यानीय दत्त्वा विद्यानिष्क्रियार्थमाचार्य्येण चानुज्ञातोऽनुरूपान्दारानाहृत्य प्रजातन्तुं सन्तानं मा व्यवच्छेत्सीः प्रजासन्ततेर्विच्छित्तिर्न कर्त्तव्या। अनुत्पद्यमानेऽपि पुत्रे पुत्रकाम्यादिकर्मणा तदुत्पत्तौ यत्नः कर्त्तव्य इत्यभिप्रायः। प्रजा प्रजननप्रजातित्वर्थनिर्देशसामर्थ्यात्। अन्यथा प्रजननस्येत्येतदेकमेवावक्ष्यत्। सत्यान्न प्रमदितव्यं प्रमादो न कर्त्तव्यः। सत्याच्च प्रमदनमनृतप्रसङ्गः। प्रमादशब्दसामर्थ्यात्। विस्मृत्याप्यनृतं न कर्त्तव्यमित्यर्थः। अन्यथाऽसत्यवचनप्रतिषेध एव स्यात्। धर्म्मान्न प्रमदितव्यम्। धर्मश्च-

---

वेदमधीत्य स्नायादिति स्मृतिरप्येतच्छ्रुतिनिरूढेत्याह। अतोऽवगम्यत इति ॥ वक्तव्यमिति वचनार्हं परस्य हितमित्यर्थः ॥ सर्व्वमेतत् स्पष्ट-

देवो भव । आचार्य्यदेवो भव । अतिथिदेवो भव । यान्यनवद्यानि कर्म्माणि तानि सेवितव्यानि । नो इतराणि । यान्यस्माकꣳ सुचरितानि । तानि त्वयोपास्यानि ॥ २ ॥ नो इतराणि । एके चास्मच्छ्रेयाꣳसो ब्राह्मणः । तेषां त्वयासनेन प्रश्वसि-

---

ब्दस्यानुष्ठेयविषयत्वात् । अननुष्ठानं प्रमादः स न कर्त्तव्यो-ऽनुष्ठातव्य एव । कुशलादात्मरक्षार्थात् कर्म्मणो न प्रमदितव्यम् । भूतिर्विभूतिस्तस्यै भूत्यै भूत्यर्थान्मङ्गलयुक्तात्कर्मणो न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् ते हि नियमेन कर्त्तव्ये इत्यर्थः । देवपित्रकार्य्याभ्यां न प्रमदितव्यं देवपित्र्ये कर्मणी कर्त्तव्ये । मातृदेवो माता देवो यस्य स त्वं भव स्याः । एवं पितृदेवः आचार्य्यदेवोऽतिथिदेवो भव । देवतावदुपास्या एते इत्यर्थः । यान्यपि चान्यान्यनवद्यानि अनिन्दितानि शिष्टाचारलक्षणानि कर्म्माणि तानि सेवितव्यानि कर्त्तव्यानि त्वया नो कर्त्तव्यानीतराणि सावद्यानि शिष्टैस्तान्यपि । यान्यस्माकमाचार्य्याणां सुचरितानि शोभनचरितानि आम्नायाद्यविरुद्धानि तान्येव त्वयोपास्यानि अदृष्टार्थान्यनुष्ठेयानि नियमेन कर्त्तव्यानीत्येतत् । नो इतराणि विपरीतान्याचार्य्यैस्तान्यपि । ये के च विशेषिता आचार्य्यत्वादिधर्मैरस्मदस्माकं

स्थिति ॥ एवं कर्त्तव्यमर्थमुपदिश्यानुष्ठानकाले सदुत्तन्नसंशयनिवृत्त्यर्थं

तव्यम्। श्रद्धया देयम्। अश्रद्धयाऽदेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्। अथ यदि ते कर्म्मविचिकित्सा वा वृत्त-विचिकित्सा वा स्यात् ॥ ३ ॥ ये तत्र ब्राह्मणाः सम्मर्शिनः। युक्ता आयुक्ताः। अलूक्षाधर्म्मकामाः स्युः। यथा ते तत्र वर्त्तेरन्। तथा तत्र वर्त्तेथाः। अथाभ्याख्यातेषु। ये तत्र ब्राह्मणाः सम्मर्शिनः। युक्ता आयुक्ताः। अलूक्षा धर्म्मकामाः स्युः।

श्रेयांसः प्रशस्यतरास्ते च ब्राह्मणा न त्वत्तादृयस्तेषामासनेनाऽऽसनदानादिना त्वया प्रश्वसितव्यं प्रश्वसनं प्रश्वासः श्रमापनयस्तेषां श्रमस्त्वयाऽपनेतव्य इत्यर्थः। तेषां वाऽऽसने गोष्ठीनिमित्ते समुदिते तेषु न प्रश्वसितव्यम्। प्रश्वासोऽपि न कर्त्तव्यः केवलं तदुक्तसारग्राहिणा भवितव्यम्। किञ्च यत्किञ्चिद्देयं तच्छ्रद्धयैव देयम्। अश्रद्धयाऽदेयं न दातव्यम्। श्रिया विभूत्या देयं दातव्यम्। ह्रिया लज्जया च देयम्। भिया च भयेन देयम्। संविदा च। संविन्मित्रादिकार्य्यम्। अथैवं वर्त्तमाने त्वयि यदि कदाचित्ते तव श्रौते स्मार्त्ते वा कर्मणि वृत्ते वा आचारलक्षणे विचिकित्सा संशयः स्याद्भवेत्। ये तत्र तस्मिन्देशे काले वा ब्राह्मणास्तत्र कर्म्मादौ युक्ता इति व्यवहितेन

शिष्टाचारः प्रमाणयितव्य इत्याह। अथ वमित्यादिना॥ इत्येका-

यथा ते तेषु वर्त्तेरन्। तथा तेषु वर्त्तेथाः। एष आदेशः। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्। एवमुचैतदुपास्यम् ॥ ४ ॥ स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् तानि त्वयोपास्यानि विचिकित्सा वा स्यात्तेषु वर्त्तेरन् सम्म च ॥ इत्येकादशोऽनुवाकः ॥ ११ ॥

सम्बन्धः कर्त्तव्यः। सम्मर्शिनो विचारक्षमाः युक्ता अभियुक्ताः कर्मणि दक्षे वा। अयुक्ता अपरप्रयुक्ताः। अलूक्षा अरूक्षा अक्रूरमतयः। धर्मकामा अदृष्टार्थिन अकामहता इत्येतत्। ते यथा तत्र तस्मिन् कर्मणि दक्षे वा वर्त्तेरन् तथा त्वमपि वर्त्तेथाः। अथाभ्याख्यातेष्वभ्युक्तदोषेण सन्दिह्यमानेन संयोजिताः केनचित्तेषु च यथोक्तं सर्वमुपनयेत् ये तत्रेत्यादि। एष आदेशो विधिः। एष उपदेशः पुत्रादीनाम्। एषा वेदोपनिषद्वेदरहस्यं वेदार्थ इत्येतत्। एतदेवानुशासनमीश्वरवचनम्। आदेश्यवाक्यस्य विधेरुक्तत्वात्सर्वेषां वा प्रमाणभूतानामनुशासनमेतत्। यस्मादेवं यथोक्तं सर्वमुपासितव्यं कर्त्तव्यम् एवमु चैतदुपास्यमेव चैतान्नानुपास्यमित्यादरार्थम्। पुनर्वचनम् ॥ इत्येकादशोऽनुवाकः ॥ ११ ॥

दशोऽनुवाकः ॥ ११ ॥

शन्नो मित्रः शं वरुणः। शन्नो भवत्वर्य्यमा। शन्न इन्द्रो बृहस्पतिः। शन्नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्मावादिषम्। ऋतमवादिषम्। सत्यमवादिषम्। तन्मामावीत्। तद्वक्तारमावीत्। आवीन्माम्। आवीद्वक्तारम्॥ १॥ सत्यमवादिषं पञ्च च॥ ॐ शान्तिः शान्तिः॥ इति द्वादशोऽनुवाकः॥ १२॥

अतीतविद्याप्राप्त्युपसर्गशमनार्थं शान्तिं पठति। शन्नो मित्र इति। व्याख्यातमेतत्पूर्वम्। अत्रैतच्चिन्त्यते विद्याकर्मणोर्विवेकार्थम्। किं कर्मभ्य एव केवलेभ्यः परं श्रेय उत विद्यासव्यपेक्षेभ्यः। आहोस्विद्विद्याकर्मभ्यां सह ताभ्यां विद्याया वा कर्म्मापेक्षाया उत केवलाया एव विद्याया इति। तत्र केवलेभ्य एव कर्मभ्यः स्यात् समस्तवेदार्थज्ञानवतः कर्म्माधिकाराद्वेदः कृत्स्नोऽधिगन्तव्यः। स रहस्यो द्विजन्मनेति स्मरणात्। अधिगमश्चसहोपनिष-

---

अपरप्रयुक्ता इति स्वतन्त्रा इत्यर्थः। यन्यादौ आद्यवादे केवलाया विद्याया निश्रेयसहेतुत्वमुक्तमपि स्फुटीकर्तुं कर्मविधिमुपलभ्य प्रसङ्गात् पुनर्विचारयितुमुपक्रमते। अत्रैतच्चिन्त्यत इत्यादिना॥ विवेकार्थमिति पृथक्फलत्वाज्ञापनार्थमित्यर्थः। भूतं भव्यायोपदिश्यत इति न्यायेन ज्ञानस्यापि कर्मकर्तुः संस्कारतया कर्मविधिशेषत्वाच्छ्रुतस्यापि फलस्यार्थवादमात्रत्वात्कर्मभ्य एव परोऽयं इति पूर्वपक्षसिद्धान्तमाह। नित्य-

शन्नः शोचाꣳ सह नौ यश्छन्दसां भूः स यः पृथिव्योमित्यृतञ्चाहं वेदमनूच्य शन्नो द्वादश ॥ १२ ॥ शन्नो मह इत्यादित्यो नो इतराणि त्रयोविꣳशतिः ॥ २३ ॥ हरिः ॐ ॥ शन्नो ब्रह्मारम् ॥ इति शिक्षाध्यायः प्रथमा वल्ली ॥ ॥

दर्थनात्मज्ञानादिना । विद्वान् यजते विद्वान् याजयति इति च विदुष एव कर्मण्यधिकारः प्रदृश्यते । सर्वत्र ज्ञात्वा चानुष्ठानमिति च । कृत्स्नश्च वेदः कर्म्मार्थं इति हि मन्यन्ते। केचित्कर्मभ्यश्चेत्परं श्रेयो नावाप्यते वेदोऽनर्थकः स्यान्न । नित्यत्वान्मोक्षस्य । नित्यो हि मोक्ष इष्यते । कर्मकार्य्यस्यानित्यत्वं प्रसिद्धम् । लोकेकर्मभ्यश्चेच्छ्रेयोऽनित्यं स्यात् तच्चानिष्टं काम्यप्रतिषिद्धयोरनारम्भात् । आरब्धस्य च कर्मणः उपभोगेन क्षयान्नित्यानुष्ठानाच्च प्रत्यवायानुपपत्तौ ज्ञाननिरपेक्ष एव मोक्ष इति चेत् । तच्च न । शेषकर्मसम्भवात् । तन्निमित्तशरीरान्तरोत्पत्तिः प्राप्नोतीत्युक्तम् । कर्मशेषस्य च नित्यत्वानुष्ठानेनाविरोधात्क्षयानुपपत्तिरिति च। यदुक्तं समस्तवेदार्थज्ञानवतः कर्म्माधिकारादित्यादि । तच्च न ।

त्वादित्यादिना ॥ यद्यप्यध्ययनविधिप्रयुक्तः कृत्स्नो वेदार्थ एकेन विचारितव्यस्तथाप्यध्ययनविधौ प्रतिवाक्याध्यापनं प्रतिवाक्यार्थविचारश्च व्यापारभेदात्तत्तत्प्रयुक्ताभ्युदयकामस्य कर्मोपयोगिवाक्यार्थज्ञानवत्त्वमात्रेण कर्मण्यधिकारसम्भवाद्ब्रह्मसाक्षात्कारस्य तत्रानुपयोगित्वान्न समस्तवेदार्थज्ञानवतः कर्म्माधिकारे प्रमाणमस्तीत्याह । तच्च नेति ॥ यद्यपि चाध्ययनविधिप्रयुक्तो वेदान्तविचारोऽपि कृतो गुरुकुल एव तथापि न

श्रुतज्ञानव्यतिरेकादुपासनस्य । श्रुतज्ञानमात्रेण हि कर्मस्वधिक्रियते नोपासनामपेक्षते । उपासनञ्च श्रुतज्ञानादर्थान्तरं विधीयते । मोक्षफलं अर्थान्तरप्रसिद्धञ्च स्यात् श्रोतव्येत्युक्त्या तद्व्यतिरेकेण मन्तव्यो निदिध्यासितव्य इति यत्नान्तरविधानान्मननिदिध्यासनयोश्च प्रसिद्धं श्रवणज्ञानादर्थान्तरत्वम् । एवं तर्हि विद्यासव्यपेक्षेभ्यः कर्मभ्यः स्यान्मोक्षः । विद्यासहितानाञ्च कर्मणां भवेत्कार्यान्तरारम्भसामर्थ्यम् । यथा खतोऽमरणज्वरादिकार्यारम्भसामर्थ्यानामपि विषदध्यादीनां मन्त्रार्कराद्यसंयुक्तानां कार्यान्तरारम्भसामर्थ्यम् । एवं विद्यासहितैः कर्मभिर्मोक्ष आरभ्यत इति चेन्न । आरभ्यस्यानित्यत्वादित्युक्तदोषः । वचनादारभ्योऽपि नित्य एवेति चेत् । न । ज्ञापकत्वाद्वचनस्य । वचनं

समस्तवेदार्थज्ञानवतोऽधिकारः । उपासनासाध्यस्य ब्रह्मसाक्षात्कारस्य पृथग्भावादित्याह । श्रुतज्ञानेति ॥ श्रुताङ्गुरकुले विचारिताद्वाक्यादनुष्ठानोपयोगि यज्ज्ञानं तावन्मात्रेण कर्मस्वधिक्रियते न ब्रह्मसाक्षात्कारफलसुपासनमपेक्षते व्यतिरेकाभावादित्यर्थः । अध्यापनविधिव्यापारोपरमेऽनुष्ठेयतया भूतब्रह्मोपासनमेव नास्ति मानाभावादिति न वक्तव्यमित्याह । उपासनञ्चेति ॥ एतच्च कर्ममीमांसान्यायाङ्गीकारमात्रेणोक्तम् । वस्तुतस्तु श्रोतव्यविधिप्रयुक्त एवोपनिषद्विचारब्रह्मो भिन्नाधिकारः । कर्मकाण्डविचारोऽप्युत्तरविधिप्रयुक्त एवेति प्रकटार्थं प्रतिष्ठितम् ॥ केवलं कर्म मोक्षसाधनमिति पक्षं निरस्य विद्यासञ्चितं मोक्षसाधनमिति पक्षान्तरमाशङ्क्य निषेधति । एवं तर्हीत्यादिना ॥ न स पुनरावर्तत इति वचनादारभ्योऽपि मोक्षो नित्य इति न शक्यं वक्तुम् । प्रसिद्धपदार्थयोग्यत्वमुपादाय वचनस्य संसर्गज्ञापकत्वात् । न चारभ्यस्य नित्यत्वयोग्यत्वं प्रसिद्धम् । अन्यथा वचनस्य कारकत्वप्रसङ्गात् । अन्यो

नाम यथा भूतस्यार्थस्य ज्ञापकं नाविद्यमानस्य कर्तृ। न हि वचनशतेनापि नित्यमारभ्यते आरब्धं वा विनाशि भवेत्।

एतेन विद्याकर्मणोः संहतयोर्मोक्षारम्भकत्वं प्रत्युक्तम्। विद्याकर्मणी मोक्षप्रतिबन्धहेतुनिवर्त्तके इति चेत्। न। कर्मणः फलान्तरदर्शनात्। उत्पत्तिसंस्कारविकाराप्तयो हि फलं कर्मणो दृश्यते। उत्पत्त्यादिफलविपरीतश्च मोक्षो गतिश्रुतेराप्य इति चेत् सूर्यद्वारेण तयोर्ह्यायन्नित्येवमादिगतिश्रुतिभ्यः प्राप्यो मोक्ष इति चेत्। न। सर्वगतत्वाद्ब्रह्मभ्यश्चानन्यत्वादाकाशादिकारणत्वात्सर्वगतं ब्रह्म। ब्रह्म व्यतिरिक्ताश्च सर्वे विज्ञानात्मानोऽतो नाप्यो मोक्षः। गन्तुरन्यद्हिभिन्नं देशं भवति गन्तव्यम्। न हि येनैवाव्यतिरिक्तं यत्तेनैव गम्यते तदनन्यत्वप्रसिद्धेश्च। तत्सृष्ट्वा तदेवानुप्राविशत्। क्षेत्रज्ञश्चापि मां विद्धि। इत्येवमादिस्मृतिस्मृतिशतेभ्यः। गत्यैश्वर्यादिश्रुतिविरोध इति चेत्। अथापि

मणिमविन्दित्यादिष्वपि योग्यताकल्पनप्रसङ्गादित्याह। न ज्ञापकत्वादित्यादिना॥

कर्म प्रधानं विद्या चोपसर्जनमिति समसमुच्चयं निरस्य समुच्चयेष्यतिदिशति। एतेनेति॥ अनित्यत्वादिदोषप्रसङ्गेनेत्यर्थः। मोक्षेति॥ मोक्षस्य प्रतिबन्धहेतुरविद्याऽधर्मादिस्तन्निवर्त्तके विद्याकर्मणी न स्वरूपोत्पादिके। ततः स्वरूपावस्थानस्य नित्यत्वम्। प्रध्वंसस्य च कृतकस्यापि नित्यत्वं प्रसिद्धमित्यर्थः। भिद्यते हृदयग्रन्थिरित्यादिश्रुतेः। केवलविद्यासाध्यैवाविद्यानिवृत्तिः। न तत्र विद्यायाः स्वकार्यापेक्षा॥ कर्मफलत्वबन्धेव प्रसिद्धमित्याह। न कर्मण इति॥ उत्पत्तिः पुरोडाशादेः। संस्कारो व्रीह्यादेः। विकारः सोमस्य। आप्तिर्वेदस्य। कर्मफलं प्रसि-

स्यादद्यप्राप्यो मोक्षो गतिश्रुतीनां स एकधा स यदि पितृलोककामो भवति स्त्रीभिर्वा यानैर्वा इत्यादिश्रुतीनाञ्च कोपः स्यादिति चेन्न। कार्य्यब्रह्मविषयत्वात्तासाम्। कार्य्ये हि ब्रह्मणि स्युरादयःस्युर्न कारणे। एकमेवाद्वितीयं यत्र नान्यत्पश्यति तत्केन कं पश्येदित्यादिश्रुतिभ्यो विरोधाच्च। विद्याकर्मणोः समुच्चयानुपपत्तिः। प्रविलीनकर्त्रादिकारकविशेषतत्त्वविषया हि विद्या तद्विपरीतकारकसाध्येन कर्मणा विरुध्यते। न ह्येकं वस्तु परमार्थतः कर्त्रादिविशेषवत् तच्छून्यञ्चेत्युभयथा द्रष्टुं शक्यते। अवश्यं ह्यन्यतरन्मिथ्या स्यादन्यतरस्य च मिथ्यात्वप्रसङ्गे युक्तं यत् स्वाभाविकाज्ञानविषयस्य हैतस्य मिथ्यात्वम्। यत्र हि द्वैतमिव भवति तत्रो: स मृत्युमाप्नोति। अथ यत्रान्यत् पश्यति तदल्पम्। अन्योऽसावन्नोऽहमस्मि। उदरमन्तरं कुरुते। अथ तस्य भयं भवतीत्यादिश्रुतिशतेभ्यः। सत्यत्वं चैकत्वस्यैकधैवानुद्रष्टव्य-

---

ब्रह्म। आत्मस्वरूपस्य तु मोक्षस्यानादित्वादनादेयातिशयत्वादविकार्यत्वान्नित्यप्राप्तत्वाच्च कर्मफलाद्वैपरीत्यमित्यर्थः। गतिश्रुतेरिति॥ अर्चिरादिगतिश्रवणाद्ब्रह्मलोकाद्वस्थितब्रह्मप्राप्तिर्मोक्षस्ततो नित्याप्तत्वमप्रसिद्धमित्यर्थः। गत्वा प्राप्तिः किं संयोगलक्षणा तादात्म्यलक्षणा वा नोभयथापीत्याह। न सर्वगतत्वादिति॥ गत्यादिश्रुतेस्तत्यर्थं शङ्कापूर्वकं दर्शयति। गत्यैश्वर्य्येत्यादिना॥ समुच्चयमभ्युपगम्य कर्मकार्य्यं किञ्चिन्मोक्षे न सम्भवतीत्युक्तम्। सोऽपि न सम्भवतीत्याह। विरोधाच्चेत्यादिना॥

यदि कर्त्रादिकारकभेदस्य सत्यत्वांशमयबोध्यब्रह्मज्ञानमुपदिश्यते तदा मिथ्यार्थत्वात्कर्मविधीनामप्रामाण्यं स्यादित्याह। विक्षिप्तत्वादिति॥ शङ्कां विवृणोति। यदित्यादिना॥ अध्ययनविधिगृहीतानां श्रुतीनां

मेकमेवाद्वितीयम् ' ब्रह्मैवेदꣳ सर्वमात्मैवेदꣳ सर्वमित्यादि-श्रुतिभ्यः। न च सम्प्रदानादिकारकभेदादर्शने कर्मोपपद्यते। अन्ये त्वदर्शनापवादाच्च विद्याविषये सहस्रशः श्रूयन्ते। अतो विरोधो विद्याकर्मणोः। अतश्च समुच्चयानुपपत्तिः। तत्र यदुक्तं संहिताभ्यां विद्याकर्मभ्यां मोक्ष इति। अनुपपन्नं तत्। विहितत्वात्कर्मणाम्। श्रुतिविरोध इति चेत् यद्युपरुद्य कर्त्रादिकारकविशेषमात्मैकत्वविज्ञानं विधीयते। सर्पादि भ्रान्तिज्ञानोपमर्दकरज्वादिविषयविज्ञानवत्प्राप्तः कर्मविधिः श्रुतीनां निर्विषयत्वाद्विरोधः। विहितानि च कर्माणि। सच्च विरोधो न युक्तः। प्रमाणत्वाच्छ्रुतीनामिति चेत् न। पुरुषार्थोपदेशपरत्वाच्छ्रुतीनाम्। विद्योपदेशपरा तावच्छ्रुतिः। संसारात्पुरुषो मोक्षयितव्य इति संसारहेतोरविद्याया निवृत्तिः कर्त्तव्येति विद्याप्रकाश्यकत्वेन प्रवृत्तेति न विरोधः। एवमपि कर्त्रादिकारकसद्भावप्रतिपादनपरं शास्त्रं विरुध्यत एवेति चेन्न। यद्या प्राप्तमेव कारकास्तित्वमुपादायोपात्तदुरितक्षयार्थं कर्म्माणि विदधच्छास्त्रं मुमुक्षूणां फलार्थिनाञ्च फलसाधनं न कारकास्तित्वे व्याप्रियते। उपचितदुरितप्रतिबन्धस्य हि विद्योत्पत्तिर्नावकल्पते। तत्क्षये च विद्योत्पत्तिः स्यात्ततश्चावि-

---

पुरुषार्थोपदेशकत्वेन प्रामाण्यं वक्तव्यम्। ननु भेदस्य सत्यत्वेन ततः प्रसिद्धिसिद्धं कारकादिभेदमर्थक्रियासमर्थमादाय प्रवृत्तानां प्रामाण्यं न विरुध्यत इत्याह। न पुरुषार्थेति॥ सङ्गृह्यवाक्यं विवृणोति। विद्योपदेशपरा तावदित्यादिना॥ पूर्वं सत्यमिथ्याविषयत्वेन विद्याकर्मणो-

द्यानिष्टत्तिस्तत आत्यन्तिकसंसारोपरमः। अपि च नात्मदर्शिनो ह्यनात्मविषयः कामः। कामयमानश्च करोति कर्माणि। तत्फलोपभोगाय शरीराद्युपादानलक्षणं संसारः। तद्यतिक्रामैकत्वदर्शिनो विषयाभावात्। कामानुपपत्तिः। आत्मनि चानन्यत्वात्कामानुपपत्तेः स्वात्मन्यवस्थानं मोक्ष इत्यतोऽपि विद्याकर्मणोर्विरोधः॥

विरोधादेव च विद्या मोक्षं प्रति न कर्माण्यपेक्षते। स्वात्मलाभे तु पूर्वोपचितप्रतिबन्धापनयद्वारेण विद्याहेतुत्वं प्रतिपद्यन्ते कर्माणि नित्यानीति। अत एवास्मिन् प्रकरणे उपन्यस्तानि कर्माणीत्यवोचाम। एवञ्चाविरोधः कर्मविधिश्रुतीनाम्। अतः केवलाया एव विद्यायाः परं श्रेय इति सिद्धम्। एवं तर्ह्याश्रमान्तरानुपपत्तिः। कर्मनिमित्तत्वाद्विद्योत्पत्तेः। गार्हस्थ्ये च विहितानि कर्माणीत्यैकाश्रम्यमेव। अतश्च यावज्जीवादिश्रुतयोऽनुकूलतराः स्युः। न कर्मानेकत्वात् न ह्यग्निहोत्रादीन्येव कर्माणि। ब्रह्मचर्यं तपः सत्यवदनं शमोदमोऽहिंसा इत्येवमादीन्यपि कर्माणीतराश्रम-

---

विरोधमादाय समुच्चयो निरस्तः इदानीं काम्यकामिविषयत्वेनाविरोधमाह। अपि चेत्यादिना॥

समसमुच्चयं निरस्य गुणप्रधानभावेनापि तं निरस्यति। विरोधादेव चेति॥ विद्या चेत्कर्मणि स्वरूपफलेनापेक्षते विरुद्धत्वाच्चिरदृष्टिधर्मवदनुगमनं कथं तर्हि विद्यासन्निधाने कर्मणां पाठ इत्यत आह। स्वात्मलाभे त्विति॥ कर्मणो विद्यासाधनत्वं श्रुत्वा गार्हस्थ्यमेवैकमनुष्ठेयमिति प्रत्यवतिष्ठन्ते कर्मजडाः। एवं तर्हीति॥ श्रुतिस्मृत्यन्तराणा-

प्रसिद्धानि विद्योत्पत्तौ साधकतमान्यसङ्कीर्णत्वाद्विद्यन्ते ध्यानधारणादिलक्षणादीनि च। वक्ष्यति च। तपसा ब्रह्मविजिज्ञासस्वेति। जन्मान्तरकृतकर्मभ्यश्च प्रागपि गार्हस्थ्याद्विद्योत्पत्तिसम्भवात् कर्म्मार्थत्वाच्च गार्हस्थ्यप्रतिपत्तेः कर्मसाध्यायाच्च विद्यायां सत्यां गार्हस्थ्यप्रतिपत्तिरनर्थिकैव। लोकार्थत्वाच्च पुत्रादीनाम्। पुत्रादिसाध्येभ्यश्चायं लोकः पितृलोक इत्येतेभ्यो व्यावृतकामस्य नित्यसिद्धात्मदर्शिनः कर्मणि प्रयोजनमपश्यतः कथं प्रवृत्तिरुपपद्यते। प्रतिपन्नगार्हस्थ्यस्यापि विद्योत्पत्तौ विद्यापरिपाकाद्विरक्तस्य कर्मसु प्रयोजनमपश्यतः कर्मभ्यो निवृत्तिरेव स्यात्। प्रवर्त्तयिष्यन् वा अरेऽहमस्मात् स्थानादस्मीत्येवमादिश्रुतिलिङ्गदर्शनात्। कर्मप्रतिश्रुतेर्यत्नाधिक्यदर्शनाच्चयुक्तमिति चेदग्निहोत्रादिकर्मप्रतिश्रुतेरधिको यत्नो मङ्क्षु च कर्मणायासोऽनेकसाधनसाध्यत्वादग्निहोत्रादीनाम्। तपो ब्रह्मचर्य्यादीनाञ्चेतराश्रमकर्मणां गार्हस्थ्येऽपि समानत्वादल्पसाधनापेक्षत्वाच्चेतरेषां न युक्तस्तुल्यवद्विकल्प आश्रमि-

---

मपि विहितत्वाविशेषाद्दीपकर्मसु कर्मत्वाविशेषाच्च व्याख्यधर्मरागीणामेवैतच्चोद्यमित्याह। न कर्म्मानेकत्वादिति॥ असङ्कीर्णत्वादिति॥ हिंसाद्यभिश्रितत्वादित्यर्थः। दृतश्च विद्याकर्मणोः साधनत्वेऽपि न गार्हस्थ्यभावश्यकमित्याह। जन्मान्तरेति॥ कामिनां गार्हस्थ्यप्रस्थानुष्ठेयत्वेऽपि न सर्वैरनुष्ठेयत्वमित्यत्र हेत्वन्तरमाह। लोकार्थत्वाच्चेत्यादिना॥ गार्हस्थ्यप्रस्थानावश्यकत्वेन वैकल्पिकमनुष्ठानमुक्तं तत्रातुल्यत्वेन विकल्पमाक्षिपति। कर्मप्रतिश्रुतेरिति॥ जन्मान्तरकृतानुग्रहादिति परिहाराय

भिन्नस्येति चेन्न । जन्मान्तरकृतानुग्रहात् । यदुक्तं कर्मणि श्रुतेरधिको यत्न इत्यादि । नाऽसौ दोषः ॥

यतो जन्मान्तरकृतमग्निहोत्रादिलक्षणं ब्रह्मचर्य्यादिलक्षणञ्चानुग्राहकं भवति विद्योत्पत्तिं प्रति । ये च जन्मनैव विरक्ता दृश्यन्ते केचित् । केचित्तु कर्मसु प्रवृत्ता अविरक्ता विद्याविद्वेषिणस्तस्माज्जन्मान्तरकृतसंस्कारेभ्यो विरक्तानामात्मान्तरप्रतिपत्तिरेवेष्यते कर्म्मफलवाञ्छल्याच्च पुत्रस्वर्गब्रह्मवर्चसादिलक्षणस्य कर्मफलस्यासङ्ख्येयत्वात् । तच्च प्रतिपुरुषाणां कामवाञ्छल्यात्तदर्थः श्रुतेरधिको यत्नः कर्मस्वपपद्यते। आशिषां वाञ्छल्यदर्शनादिदं मे स्यादिदं मे स्यादित्युपायत्वाच्च । उपायभूतानि हि कर्म्माणि विद्यां प्रतीत्यवोचाम । उपायेऽधिको यत्नः कर्त्तव्यो नोपेये । कर्मनिमित्तत्वाद्विद्याया यत्नान्तरानर्थक्यमिति चेत्कर्मभ्य एव सञ्चोपचितदुरितप्रतिबन्धक्षयाद्विद्योत्पद्यते चेत् कर्म्मभ्यः श्रवणादियत्नोऽनर्थक इति चेत् । नियमाभावात् । नहि प्रतिबन्धक्षयादेव विद्योत्पद्यते नत्वी-

---

भाव्यं विवृणोति। यदुक्तमित्यादिना ॥ कर्म्माणि यत्नाधिक्यस्यान्यथासिद्धत्वादिकल्पविद्योतकत्वं न सम्भवतीत्यर्थः ।

इदानीं गृहस्थाश्रमकर्म्मणां बहिरङ्गत्वं सन्न्यासाश्रमकर्मणां चान्तरङ्गत्वं विद्यासाधनत्वमिति विशेषं दर्शयितुं चोद्यमुद्भावयति । कर्म्मनिमित्तत्वादित्यादिना ॥ शान्तिद्वयस्यापौनरुक्त्यमाह । यन्नो मित्र इति ॥ तदपरं ब्रह्म सामपरविद्यार्थिनमावीदवतदित्यर्थः ॥ इति द्वादशोऽनुवाकः ॥ १२ ॥ इति श्रीपरमहंस परिव्राजकाचार्य श्रीम-

हरिः ॐ । सह नाववतु । सह नौ भुनक्तु ।
सह वीर्य्यं करवावहै । तेजस्वि नावधीतमस्तु ।
मा विद्विषावहै । ॐ शान्तिः शान्तिः शान्तिः ॥

श्वरप्रसादतया ध्यानाद्यनुष्ठानादिति नियमोऽस्ति अहिंसा ब्रह्मचर्य्यादीनाञ्च विद्यां प्रत्युपकारकत्वात्साक्षादेव कारणत्वाच्छ्रवणमननिदिध्यासनानाम् । अतः सिद्धान्याश्रमान्तराणि सर्व्वेषाञ्चाधिकारो विद्यायां परञ्च श्रेयः केवलाया विद्याया एवेति सिद्धम् । शन्नो मित्र इत्यादि पूर्व्ववत् स्पष्टम् ॥ इति द्वादशोऽनुवाकः ॥ १२ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमद्गोविन्द भगवत्पूज्यपादशिष्यस्य शङ्करभगवतः कृतौ तैत्तिरीयोपनिषद्भाष्ये प्रथमोऽध्यायः शिक्षावल्ली ॥ ॥ ॐ तत्सत् ॥

अतीतविद्याप्राप्तिरूपोपसर्गप्रशमनार्था शान्तिः पठिता । इदानीन्तु वक्ष्यमाणब्रह्मविद्याप्राप्त्युपसर्गोपशमनार्था शान्तिः पठ्यते । सह नाववत्विति ॥ सह नाववतु नौ शिष्याचार्य्यौ सहैवावतु रक्षतु । सह नौ भुनक्तु भोजयतु । सह वीर्य्यं विद्यानिमित्तं सामर्थ्यं करवावहै निर्वर्त्तयावहै । तेजस्वि नौ आवयोस्तेजस्विनोरधीतं स्वधीतमस्त्वर्थज्ञानयोग्यमस्त्वित्यर्थः । मा विद्विषावहै विद्याग्रहणनिमित्तं शिष्यस्या

च्छ्रुतानन्दपूज्यपादशिष्य श्रीभगवदानन्दज्ञानविरचितानां तैत्तिरीयोपनिषद्भाष्यटीकायां प्रथमोऽध्यायः ॥ १ ॥

इदानीं परविद्यार्थिनमप्यवत्तु साधारण्येन मया पूर्व्वं प्रार्थितत्वा-

ॐ ब्रह्मविदाप्नोति परम् ॥

चार्य्यस्य वा प्रमादकृतादन्यायाद्विद्वेषः प्राप्तस्तच्छमनायेय-माशीर्मा विद्विषावहा इति। मैवेतरेतरं विद्वेषमापद्यावहै। शान्तिः शान्तिः शान्तिरिति त्रिर्वचनमुक्तार्थं वक्ष्यमाणविद्याविघ्नप्रशमनार्थञ्चेयं शान्तिः। अविघ्नेनात्मविद्याप्राप्तिराशास्यते। तन्मूलं हि परं श्रेय इति ॥

संहितादिविषयाणि कर्मभिरविरुद्धान्युपासनान्युक्तानि। अनन्तरञ्चान्तः सोपाधिकात्मदर्शनमुक्तं व्याहृतिद्वारेण स्वाराज्यफलेन च। एतावताऽशेषतः संसारबीजस्योपशमनमस्तीत्यतोऽशेषोपद्रवबीजस्याज्ञानस्य निवृत्त्यर्थं विधूतसर्व्वोपाधिविशेषात्मदर्शनार्थमिदमारभ्यते। ब्रह्मविदाप्नोति परमित्यादि ॥ प्रयोजनञ्चाशास्या ब्रह्मविद्याया अविद्यानिवृत्तिस्तत आत्यन्तिकः संसाराभावः। वक्ष्यति च विद्वान्न बिभेति कुतश्चनेति। संसारनिमित्ते च सत्यभयं प्रतिष्ठाञ्च विन्दत इत्यनुपपन्नम्। कृताकृते पुण्यपापे न तपत

दित्यर्थः। असाधारण्येन परविद्योपसर्गशान्त्यर्थमाह। सह नाववत्विति ॥ नौ आवयोस्तेजस्विनोरधीतं तेजस्वदस्त्विति ॥

इष्टानुवादपूर्व्वकमानन्दवल्ल्यास्तात्पर्य्यमाह। संहितादीत्यादिना। ननु यथापूर्व्वमाप्नोति स्वाराज्यमित्यपरविद्याफलमुक्तं संसारगोचरमेव तथाऽपरविद्याफलमपि। सोऽश्नुते सर्व्वान् कामानिति सर्वविषयसाध्यानन्दान् संसारगोचरानेव दर्शयिष्यन् कथमात्यन्तिकसंसाराभाव इत्यत आह। प्रयोजनञ्चाशास्या इति ॥ सर्वकामशब्देन निरतिशयानन्दाभिव्यक्तिर्विवक्षिता। सा च स्वभावानन्दाभिव्यक्तिरूपाविद्यानिवृत्तिरे-

इति च। अतोऽवगम्यतेऽस्माद्विज्ञानात्सर्वात्मब्रह्मविषया-दात्यन्तिकः संसाराभाव इति स्वयमेव प्रयोजनमाह। ब्रह्मविदाप्नोति परमित्यादावेव सम्बन्धप्रयोजनज्ञापनार्थम्। निर्ज्ञातयोर्हि सम्बन्धप्रयोजनयोर्विद्याश्रवणग्रहणधारणाभ्यासार्थं प्रवर्त्तते। श्रवणादिपूर्वकं हि विद्याफलम्। श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्यादिश्रुत्यन्तरेभ्यः। ब्रह्मविद्ब्रह्मैति वक्ष्यमाणलक्षणम्। दृष्टत्वमत्वाद्ब्रह्म तद्वेत्ति विजानातीति ब्रह्मविदाप्नोति परं निरतिशयं तदेव ब्रह्म परम्। न ह्यन्यस्य विज्ञानादन्यस्य प्राप्तिः। स्पष्टञ्च श्रुत्यन्तरं ब्रह्मप्राप्तिमेव ब्रह्मविदो दर्शयति स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवतीत्यादि॥

ननु सर्वगतं सर्वस्यात्मभूतं ब्रह्म वक्ष्यति अतो नाप्यं प्राप्तिश्चान्यस्यान्येन परिच्छिन्नस्य च परिच्छिन्नेन दृष्टा। अपरिच्छिन्नं सर्वात्मकत्वञ्च ब्रह्मोत्यतः परिच्छिन्नवदना-

---

वेति संसारगोचरफलमित्यर्थः॥ अ द्यवाक्यस्यावान्तरतात्पर्यमाह। स्वयमेव चेति॥ विद्यैव केवलया मोक्षः साधयितुं शक्यते। ब्रह्मविदिति विशेषणात्सम्बन्धज्ञानस्य पुरुषाकाङ्क्षाविषयतया परप्राप्तिः प्रयोजनं विद्याया इति। ज्ञानस्य वा कर्मोपयोग इत्याशङ्क्य यज्ञादिपरित्यागेन वेदान्तश्रवणादावेव सुश्रुषा प्रवर्त्तितव्यमित्याह। निर्ज्ञातयोर्हीति॥ परशब्देनोत्कृष्टमुच्यते। कथं ब्रह्मेति व्याख्यायते तत्राह। न ह्यीति॥

आप्नोतिशब्दस्यौपचारिकमर्थं दर्शयितुं शङ्कासूत्रेण मुख्यार्थे बाधकमाह। ननु सर्वगतमित्यादिना॥ परमार्थतो ब्रह्मस्वरूपस्यापि सतो जीवस्याविद्या ब्रह्मज्ञानाप्तं स्यादिति सम्बन्धः। भूतमात्राभिर्भूतार्थैः

मेवञ्च तस्याग्निरनुपपन्नः । नायं दोषः । कथं दर्शनादर्शनापेक्षत्वाद्ब्रह्मण आत्मनात्मनोः परमार्थतो ब्रह्मरूपस्यापि सतोऽस्य जीवस्य भूतमात्राकृतवाह्यपरिच्छिन्नान्नमयाद्यात्मदर्शिनस्तदासक्तचेतसः प्रकृतसङ्घापूरणस्यात्मनोऽव्यवहितस्यापि वाह्यसङ्घेयविषयासक्तचित्ततया स्वरूपाभावदर्शनवत्परमार्थब्रह्मस्वरूपाभावदर्शनलक्षणयाऽविद्यया अन्नमयादीन् वाह्यानन्नात्मन आत्मत्वेन प्रतिपन्नत्वादन्नमयाद्यनात्मभ्यो नान्योऽहमस्मीत्यभिमन्यते । एवमविद्ययाऽऽत्मभूतमपि ब्रह्म नाप्तं स्यात् । तस्यैवमविद्ययाऽनाप्तब्रह्मस्वरूपस्य प्रकृतसङ्घापूरणस्यात्मनोऽविद्याया ऽनाप्तस्य सतः केनचित्स्मारितस्य पुनस्तस्यैव विद्यया आप्तिर्यथा तथा श्रुत्युपदिष्टस्य सर्वात्मब्रह्मण आत्मतत्त्वदर्शनेन विद्यया तदाप्तिरुपपद्यत एव । ब्रह्मविदाप्नोति

कृता ये वाह्याः परिच्छिन्नाश्चान्नमयादयस्तादात्म्यदर्शिन इत्यविद्याया विच्छेपकत्वरूपमुक्तं परमार्थं ब्रह्मरूपं वास्तीत्यभावदर्शनमावरणलक्षणं लिङ्गं यस्याः सा तथोक्ता ॥ स्वरूपेऽप्यपह्नवविपर्ययौ भवत इत्यत्र दृष्टान्तमाह । प्रकृतेति ॥ प्रकृतसङ्घापूरणस्य दशमस्य नवैव वयं वर्त्तामह इति विपर्ययस्वरूपदर्शनञ्च यथेत्यर्थः । अदर्शननिमित्तामनाप्तिं विविच्य दर्शननिमित्तामाप्तिं विवृणोति । तस्यैवमिति ॥ आद्यं ब्रह्मणवाक्यं व्याख्यायोत्तरं मन्त्रं संक्षेपतोऽर्थकथनेनावतारयति । ब्रह्मविदाप्नोतीत्यादिना ॥ सर्वतो व्याप्ततो यः स्वरूपविशेषस्तत्समर्पणे समर्थस्य लक्षणस्याभिधानेन स्वरूपनिर्द्धारणायैषा ऋगुदाहृियत इति सम्बन्धः । बृहत्त्वाद्ब्रह्मेति व्युत्पत्तिबलेनास्ति किमपि महद्वस्त्वित्यविशेषेण प्रतीयते । ततो लक्ष्योद्देशेन लक्षणविधानमिति प्रसिद्धिरुपपद्यते । अव्याकृतादि

तदैषाभ्युक्ता ।

परमिति वाक्यं स्तूयमानं सर्वस्य वस्तुजातस्य ब्रह्मविदाप्नोति परमित्यनेन वाक्येन वेद्यतया स्तुवितस्य ब्रह्मणोऽनिर्धारितस्वरूपविशेषस्य सर्वतो व्यावृत्तस्वरूपविशेषसमर्पणसमर्थस्य लक्षणस्याभिधानेन स्वरूपनिर्धारणद्वारा अविशेषेण चोक्तवेदनस्य ब्रह्मणो वक्ष्यमाणतल्लक्षणस्य विशेषेण प्रत्यगात्मतया अनन्यरूपेण विज्ञेयत्वाय ब्रह्मविद्याफलञ्च ब्रह्मविदो यत्परब्रह्मप्राप्तिलक्षणमुक्तम् ॥

स सर्वात्मभावः सर्वसंसारधर्मातीतब्रह्मस्वरूपत्वमेव नान्यदित्येतत् प्रदर्शनायैषा ऋगुदाह्रियते तदैषाभ्युक्तेति । तत्तस्मिन्नेव ब्राह्मणवाक्योक्तेऽर्थेएषा ऋगभ्युक्ताऽऽम्नाता सत्यं ज्ञानमनन्तं ब्रह्मेति ब्रह्मणोलक्षणार्थं वाक्यम् । सत्यादीनि हि तीणि विशेषणार्थानिपदानि विशेष्यस्य ब्रह्मणोविशेष्यं

ब्रह्मशब्दवाच्यतया स्वजातीयं घटादि विजातीयम् । तस्मात्स्वजातीयविजातीयव्यावर्त्तकतया सत्यादिलक्षणस्य लक्षणत्वप्रसिद्धिरुपपद्यते । लक्षणाभिधानद्वारेण स्वरूपविशेषप्रतिपादने तात्पर्यमिति वाक्यस्य व्यर्थतादोषः परिहृतः । पूर्वत्र ब्रह्मविदित्यनेनाविशेषेणोक्तं वेदनं यस्य ब्रह्मणस्तस्य यो वेद निहितं गुहायामित्यनेन प्रत्यगात्मतया वेदनं वक्तव्यमित्येतदर्थात् ऋगुदाह्रियत इत्याह । अविशेषेण चेति ॥

अवगतप्रतिपन्नविशेषणविशेष्यभावमादाय पदानि विभजते । सत्यादीनि हि त्रीणीति । विशेषणार्थानीति व्याहृत्यर्थानि । कुतो विशेषणविशेष्यता प्रतीतिरित्यत आह । विशेषणविशेष्यत्वादेवेति ॥ नीलं

ब्रह्मविवक्षितत्वाद्वेद्यतया वेद्यत्वेन यतो ब्रह्म प्राधान्येन विवक्षितं तस्माद्विशेष्यं विज्ञेयम्। यतोऽन्यस्माद्विशेषण-विशेष्यत्वादेव सत्यादीन्येकविभक्त्यन्तानि पदानि समानाधिकरणानि सत्यादिभिर्लक्षणैर्विशेष्यमाणं ब्रह्म विशेष्यान्तरेभ्यो निर्धार्यते। एवं हि तज्ज्ञानं भवति यदन्येभ्यो निर्धारितम्। यथा लोके नीलं महत्सुगन्ध्युत्पलमिति। ननु विशेष्यं विशेषणान्तरं व्यभिचरद्विशेष्यते। यथा नीलं रक्तञ्चोत्पलमिति। यदा ह्यनेकानि द्रव्याण्येकजातीयान्यनेकविशेषणयोगीनि तदा विशेषणस्यार्थवत्त्वम्। न ह्येकस्मिन्नेव वस्तुनि विशेषणान्तरायोगाद्यद्यप्यसावेक आदित्य इति तथैकमेव च ब्रह्म न ब्रह्मान्तराणि येभ्यो विशेष्यते नीलोत्पलवत्। न लक्षणार्थत्वाद्विशेषणानाम्। नायं दोषः। कस्मात् लक्षणार्थप्रधानानि विशेषणानि न विशेषणप्रधानान्येव कः पुनर्लक्षणलक्ष्ययोर्विशेषणविशेष्य-

---

महत्सुगन्धु त्पलमित्यादौ सत्येव विशेषणविशेष्यभावे समानाधिकरणतयैकविभक्त्यन्तानि प्रसिद्धान्येतान्यपि च तथाभूतानि नानार्थगतविशेषणविशेष्यभावनिबन्धनानीति गम्यत इत्यर्थः॥ विशेषणविशेष्यभावस्य फलमाह। एवंहीति॥ विशेषणविशेष्यभावमाक्षिपति। नन्विति॥ नीलत्वं व्यभिचरदुत्पलं रक्तमपि सम्भवतीति नीलं विशेषणं घटते न तथा सत्यत्वादिकं व्यभिचरद्ब्रह्मान्तरं लोकप्रसिद्धम्। ततः सजातीयव्यवच्छेद्यस्याभावाद्विशेषणविशेष्यभावो न घटत इत्यर्थः। विशेषणविशेष्यभावस्य तात्पर्येण प्रतिपाद्यत्वाद्व्याकृतादिधास्त्रीयब्रह्मपदार्थव्यवच्छेदेनानिर्वाच्य विशेषणविशेष्यभावरूपत्वाच्चद्वारेण ब्रह्मलक्षणं विवक्षितमित्याह। नेति॥ संग्रहवाक्यं विवृणोति। नायं दोष इत्यादिना॥

सत्यं ज्ञानमनन्तं ब्रह्म ॥

योवा विशेष इत्युच्यते समानजातीयेभ्य एव निवर्त्तकानि विशेषणानि विशेष्यस्य लक्षणं तु सर्वत एव यथावकाशदात्वाकाशमिति लक्षणार्थश्च वाक्यमित्यवोचाम ॥

सत्यादिशब्दा न परस्परं सम्बध्यन्ते परार्थत्वाद्विशेष्यार्था हि ते अत एकैको विशेषणशब्दः परस्परं निरपेक्षो ब्रह्मशब्देन सम्बध्यते । सत्यं ब्रह्म ज्ञानं ब्रह्म अनन्तं ब्रह्मेति सत्यमिति यद्रूपेण यन्निश्चितं तद्रूपं न व्यभिचरति तत्सत्यं यद्रूपेण निश्चितं यत्तद्रूपं व्यभिचरदनृतमित्युच्यते । अतो विकारोऽनृतं वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् । एवं सदेव सत्यमित्यवधारणादतः सत्यं

सर्वत एवेति ॥ सजातीयाद्विजातीयाच्च यथा महाभूतत्वेन सदृशः पृथिव्यादेर्विसदृशाच्चात्मादेराकाशस्य व्यावर्त्तकमवकाशदातृत्वमित्यर्थः ॥

एतदुक्तं भवति अतिव्याप्त्यादिरहितो व्यावर्त्तको धर्मो लक्षणं न्यायविशेषमीमांसकाः ब्रह्मपदव्युत्पत्तिबलेन पदविशेषतः प्रतिपन्नं किञ्चिन्महदस्तीति तत्सत्यं ज्ञानमनन्तमतजड़परिच्छेदविरोधिस्वरूपमिति विशेषतः प्रतिपत्तव्यमिति विशेषावगतिविशेषभूतं लक्षणम् । प्रमितिस्तु प्रमाणादेवेति तार्किकाः । पुनर्लक्षणं केवलव्यतिरेकानुमानमाचक्षते तदा लक्षणादेव स्वभावविशेषप्रमितिः । यथा गुणवद्द्रव्यमिति लक्षणाद्गुणाश्रयत्वयोग्यस्वभावविशेषस्य प्रमितिः सामान्यप्रतिपन्नस्य द्रव्यपदाभिधेयस्य भवति । यद्वा व्यवहारसिद्धिः कथं गुणवद्द्रव्यमिति व्यवहर्त्तव्यं गुणवत्त्वान्न यद्देवं न तदेवं यथा रूपं तथा सत्यत्वादिमत् ब्रह्मेति व्यवहर्त्तव्यम् । सत्यत्वादिमत्त्वान्न यद्देवं न तदेवं यथा घटादय इति

ब्रह्मेति ब्रह्मविकारान्निवर्त्तयति। अतः कारणत्वं प्राप्तं ब्रह्मणः। कारणस्य च कारकत्वं वस्तुत्वात् सदृदचिदूपता च प्राप्ताऽत इदमुच्यते ज्ञानं ब्रह्मेति। ज्ञानं ज्ञप्तिरवबोधो भावसाधनो ज्ञानशब्दो ब्रह्मविशेषणत्वात्सत्यानन्ताभ्यां सह। न हि सत्यताऽनन्तता च ज्ञानकर्तृत्वे सत्युपपद्येते। ज्ञानकर्तृत्वेन हि विक्रियमाणं कथं सत्यं भवेदनन्तञ्च। यद्धि न कुतश्चित्प्रविभज्यते तदनन्तं। ज्ञानकर्तृत्वे च ज्ञेय ज्ञानाभ्यां प्रविभक्तमित्यनन्तता न स्यात्। यत्र नान्यद्विजानाति स भूमा अथ यत्रान्यद्विजानाति तदल्पमिति श्रुत्यन्तरात्। नान्यद्विजानातीति विशेषप्रतिषेधादात्मानं विजानातीति चेन्न। भूमलक्षणविधिपरत्वाद्वाक्यस्य। यत्र नान्यत्पश्यतीत्यादि भूम्नो लक्षणविधिपरं वाक्यम्। यथा प्रसिद्धमेवान्यत्पश्यतीत्येतदुपादाय यत्र तन्नास्ति सभूमेति

एतच्च खण्ड न युक्त्याऽसङ्गमानमपि व्यवहाराङ्गं भवतीति नातीव सूक्ष्मशङ्का कार्या पुनर्विशेषणविशेष्यभावं पक्षद्वयमवलम्ब्याह। सत्यादिशब्दा इति। सत्यं ब्रह्मेत्युक्ते जाड्यव्यावृत्तिः परिच्छेदव्यावृत्तिश्च यद्यपि लभ्यते जडस्य परिच्छिन्नस्य सर्वस्यानृतत्वात् ज्ञानं ब्रह्मेत्युक्तेनानृतपरिच्छेदव्यावृत्तिर्लभ्यते स्वप्रकाशस्य बोधाविषयत्वात्परिच्छेदव्यावृत्तस्य प्रमाणाविषयत्वाच्च लक्षणमपि चानेकं वैकल्पिकमदुष्टम्। तथापि मन्दमतिव्युत्पादनाय यस्मात्सत्यादिपदार्थव्याख्यानपूर्वकं प्रत्येकं व्यावर्त्यमाह। सत्यमिति। यद्भूपेणेत्यादिना भावसाधन इति भावव्युत्पत्तिकः। क्रियासामान्यं यद्यपन्यत्र भाव उच्यते तथापत्र निर्विशेषं चिन्मात्रं भावव्युत्पत्त्या लक्ष्यते सत्यादिशब्दसन्निधानादिति द्रष्टव्यम्। विशेषनिषेधः शेषाभ्यनुज्ञाविषय इति न्यायेन प्रा सङ्गिकं स्वज्ञातत्वे

भूमस्वरूपं तत्र ज्ञाप्यते अन्यग्रहणस्य प्राप्तिप्रतिषेधार्थत्वान्न स्वात्मनि क्रियाखित्यपरं वाक्यम्। स्वात्मनि च भेदाभावाद्विज्ञानानुपपत्तिः। आत्मनश्च विज्ञेयत्वे ज्ञातृभावप्रसङ्गः। ज्ञेयत्वेनैव विनियुक्तत्वात्॥

एक एवात्मा ज्ञेयत्वेन चोभयथा भवतीति चेन्न। युगपदनंशत्वात्। न हि निरवयवस्य युगपज्ज्ञातृत्वोपपत्तिः। आत्मनश्च घटादिवद्विज्ञेयत्वे ज्ञानोपदेशानर्थक्यम्। न हि घटादिवत्प्रसिद्धस्य ज्ञानोपदेशोऽर्थवान्। तस्माज्ज्ञातृत्वे सत्यानन्त्यानुपपत्तिः। सन्मात्रत्वज्ञानुपपन्नं ज्ञानकर्तृत्वादिविशेषवत्त्वे सति सन्मात्रत्वञ्च सत्यम्। तत्सत्यमिति श्रुत्यन्तरात्॥ तस्मात्सत्यानन्तशब्दाभ्यां सह विशेषणत्वेन ज्ञानशब्दस्य प्रयोगाज्ज्ञानसाधनो ज्ञानशब्दः। ज्ञानं ब्रह्मेति कर्तृत्वादिकारकनिवृत्त्यर्थं स्वादिवदचिद्रूपतानिवृत्त्यर्थञ्च

तात्पर्यमाशङ्क्य निषेधति। नान्यद्विजानातीत्यादिना॥ कर्तृत्वं कर्मत्वं चैकक्रियावच्छिन्नधर्मद्वयं भिन्नाधिकरणं प्रसिद्धम्। स्वात्मनि च भेदाभावान्निरूपपत्तिके स्वज्ञातृत्वे तात्पर्यं वक्तुं न शक्यत इत्याह। स्वात्मनि चेति॥

सत्यादीनि व्यावृत्त्यर्थानीत्युक्तं तत्र शङ्कते। सत्यादीनामिति॥ प्रमाणान्तरसिद्धसत्यत्वादिविशेष्यं दृष्टं ब्रह्म तु प्रमाणान्तरसिद्धम्। पदमात्रस्याप्रमाणत्वात्सत्यादीनां च व्यावृत्त्यर्थत्वादसमर्थं वाक्यं स्यादित्यर्थः। सिद्धत्वमात्रेण विशेष्यत्वे सम्भवति प्रमाणान्तरविशेषणमनर्थकं केवलव्यतिरेकाभावान्मिथ्यार्थस्य रज्जुसर्पादेः सदधिष्ठानत्वदर्शनात्प्रपञ्चस्यापि दृश्यत्वादिहेतुभिर्मिथ्यात्वेनावगतस्य सदधिष्ठानत्वं सम्भाव्यते तस्य प्रपञ्चाधिष्ठानतया सम्भावितस्य स्वरूपविशेषलक्षणार्थमिदं वाक्यं ततो नासदर्थत्वमित्याह। न लक्षणार्थत्वादिति॥ विशेषणार्थत्वमभ्युपगम्याह।

प्रयुज्यत । ज्ञानं ब्रह्मेति वचनात्प्राप्तमन्तवत्त्वम् । लौकिकस्य ज्ञानस्यान्तवत्त्वदर्शनात् । अतस्तन्निवृत्त्यर्थमाह । अनन्तमिति ॥ सत्यादीनामनृतादिधर्मनिवृत्तिपरत्वाद्विशेष्यस्य ब्रह्मण उत्पलादिवदप्रसिद्धत्वात् । जगत्तृष्णाम्भसि स्नातः । खपुष्पकृतशेखरः । एष वन्ध्यासुतो याति शशशृङ्गधनुर्धर इति वच्छून्यार्थतैव प्राप्ता सत्यादिवाक्यस्येति चेन्न । लक्षणार्थत्वात् । विशेषणत्वेऽपि सत्यादीनां लक्षणार्थप्राधान्यमित्यवोचाम । शून्ये हि लक्ष्येऽनर्थकं लक्षणवचनं लक्षणार्थत्वान्मन्यामहे न शून्यार्थतेति । विशेषणार्थत्वेऽपि च सत्यादीनां स्वार्थापरित्याग एव । शून्यार्थत्वे हि सत्यादिशब्दानां विशेष्यनियन्तृत्वानुपपत्तिः । सत्यादयैरर्थवत्त्वे तु तद्विपरीतधर्मवद्भ्यो विशेषेभ्यो ब्रह्मणो विशेष्यस्य नियन्तृत्वमुपपद्यते ब्रह्मशब्दोऽपि स्वार्थेनार्थवानेव । तत्रा-

---

विशेषणार्थत्वेऽपि चेति ॥ नोक्तं महत्सुगन्धमिति विशेषणपदानि स्वार्थसमर्पणेन तद्विरुद्धव्यावर्त्तकानि प्रसिद्धानि । तथा सत्यशब्दोऽप्यबाधितसत्त्वे व्युत्पन्नो ज्ञानशब्दः स्वप्रकाशे विषयसंवेदनेऽनन्तोपमाकाश इत्यादावनन्तशब्दो व्यापके । ततः स्वार्थसमर्पणेन विरोधिव्यावर्त्तकत्वान्न व्यावृत्तिमात्रपर्यवसानमित्यर्थः । किञ्च विशेषणस्य व्यावर्त्तकत्वं सति व्यावर्त्ये घटतेऽतोविशेषणत्वानुपपत्त्यैव सदर्थत्वं वाच्यमित्याह । शून्यार्थत्वे हीति ॥ यत्त्वोक्तं ब्रह्मशब्दोऽप्रसिद्धार्थ इति तत्राह । ब्रह्मशब्दोऽपीति ॥ बृह बृहि वृद्धाविति धातोर्ब्रह्मेतिशब्दो निष्पन्नो वृद्धौ महत्त्वे च वर्त्तते । तच्च महत्त्वं देशतः कालतो वस्तुतश्चानवच्छिन्नत्वं सङ्कोचे मानान्तराभावात् निरतिशयमहत्त्वे सम्पन्ने धर्मिणि पर्यवस्यति । ततो

नन्तशब्दोऽन्तवत्त्वप्रतिषेधद्वारेण विशेषणम्। सत्यज्ञानशब्दौ तु स्वार्थसमर्पणेनैव विशेषणे भवतः॥

तस्माद्वा एतस्मादात्मन इति ब्रह्मण्येवात्मशब्दप्रयोगाद्वेदितुरात्मैव ब्रह्म। एतमानन्दमयमात्मानमुपसङ्क्रामतीति च तत्प्रवेशाच्च। तत्सृष्ट्वा तदेवानुप्राविशदिति च। तस्यैव जीवरूपेण शरीरप्रवेशं दर्शयति। अतो वेदितुः स्वरूपं ब्रह्म। एवं तर्ह्यात्मत्वाज्ज्ञानकर्तृत्वमात्मा ज्ञातेति हि प्रसिद्धम्। सोऽकामयत इति च कामिनो ज्ञानकर्तृत्वं प्रसिद्धम्। अतो ज्ञानकर्तृत्वाज्ज्ञप्तिर्ब्रह्मेत्युक्तमनित्यत्वप्रसङ्गाच्च। यदि नाम ज्ञप्तिर्ज्ञानमिति भावरूपता ब्रह्मणस्त्याप्यनित्यत्वं प्रसज्यते परतन्त्र्यञ्च। धात्वर्थानां कारकापेक्षत्वात्। ज्ञानञ्च धात्वर्थोऽतोऽस्यानित्यत्वं परतन्त्रता च। न स्वरूपव्यतिरेकेण कार्यत्वोपचारात्। आत्मनः स्वरूपं ज्ञप्तिर्न ततो व्यतिरिच्यतेऽतो नित्यैव तथापि बुद्धेरूपाधिलक्षणाद्यच्चुरादिद्वारैर्विषयाकारपरिणामिन्या ये

वन्ध्यासुतादिशब्दविलक्षणो ब्रह्मशब्द इत्यर्थः॥ सत्यादिषु त्रिषु विशेषणेष्वान्तरमेदमाह। तत्रानन्तेति॥

अनन्तमित्यनेन चात्मैक्यं ब्रह्मण उक्तमभिप्रेत्यैक्ये शास्त्रतात्पर्यं दर्शयति। तस्माद्वा इत्यादिना॥ ब्रह्मण आत्मैक्यं चेद्विवक्षितं तर्हि ज्ञानशब्दस्य भावसाधनत्वव्याख्या हीयेतेत्याह। एवं तर्हीति॥ इतश्च भावव्युत्पत्तिरसङ्गतेत्याह। अनित्यत्वप्रसङ्गाच्चेति। वृत्तिमदन्तःकरणोपहितत्वेनात्मनो ज्ञातृत्वं न स्वतः कार्यत्वञ्च ज्ञानस्यान्तःकरणवृत्त्युपहितत्वेन तत आत्माभिन्नत्वेऽपि ब्रह्मणो न ज्ञानकर्तृत्वं नापि कार्यत्वं प्रसज्यत इत्याह। न, स्वरूपेति॥ नित्यञ्चेज्ज्ञानं तर्हि तत्र ब्रह्मणः कर्तृत्वाभावे कथं सर्वज्ञत्वमित्यत आह। सर्वभावानाञ्चेति॥ संविदव्यव-

शब्दाद्याकारावभासास्तु आत्मविज्ञानस्य विषयभूता उत्प द्यमाना एवात्मविज्ञानेन व्याप्ता उपपद्यन्ते। तस्मादात्म-विज्ञानावभासाश्च ते विज्ञानशब्दवाच्याश्च धात्वर्थभूता आत्मन एव धर्मा विक्रियारूपा इत्यविवेकिभिः परिक-ल्प्यन्ते। यत्तु तद्ब्रह्मणो विज्ञानं तत्स्वित्प्रकाशवदग्न्युष्ण-वच्च ब्रह्मस्वरूपाव्यतिरिक्तं स्वरूपमेव तन्न तत्कारणा-न्तरसव्यपेक्षं नित्यस्वरूपत्वात्। सर्वभावानां च तेनावि-भक्तदेशकालाकाशादिकारणत्वाच्च निरतिशयसूक्ष्मत्वाच्च न तस्मान्यदविज्ञेयं सूक्ष्मं व्यवहितं विप्रकृष्टं भूतभवद्भ-विष्यद्वास्ति तस्मात्सर्वज्ञं तद्ब्रह्म। मन्त्रवर्णाच्च। अपाणि-पादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महा-न्तमिति। न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽ-विनाशित्वान्न तु तद्द्वितीयोऽस्तीत्यादिश्रुतेश्च। विज्ञात्र-स्वरूपाव्यतिरेकात्करणादिनिमित्तानपेक्षितत्वाच्च ब्रह्मणो

धानेनैव बहिर्विषयस्य सिद्धिः सर्वज्ञं च संवित्स्वभावेन ब्रह्मणा व्यवहित-मिति। सर्वज्ञं ब्रह्मोपचर्यत इत्यर्थः। नित्यं ज्ञानं ब्रह्मणि विद्यत इत्यत्र मन्त्रसम्मतिमाह। मन्त्रवर्णाच्चेति॥ ब्रह्म नित्यं ज्ञानत्वाल्लौ-किकज्ञानवदित्यादि चोद्यमुक्त्याभेन निरस्तमित्याह। विज्ञात्रस्वरू-पेति॥ लौकिकज्ञानस्य करणादिसापेक्षत्वादनित्यत्वम्। आत्मस्वरूपन्तु ज्ञानं न करणादिसापेक्षं सकलकरणव्यापारोपरमेऽपि सुषुप्तप्रभावाद-न्यथा सुषुप्तिसिद्ध्यनुपपत्तेः परामर्शासम्भवप्रसङ्गादतः श्रुतितात्पर्यगम्ये-ऽर्थे न सामान्यतो दृष्टस्य प्रवेश इति भावः। आत्मस्वरूपभूतं ज्ञानं

यो वेद निहितं गुहायां परमे व्योमन्।

ज्ञानस्वरूपत्वेऽपि नित्यत्वप्रसिद्धिरतो नैव धात्वर्थस्तदक्रियारूपत्वात्॥

अत एव च ज्ञानकर्तृ तस्मादेव च न ज्ञानशब्दवाच्यमपि तद्ब्रह्म तथापि तदाभासवाचकेन बुद्धिधर्मविशेषेण ज्ञानशब्देन तल्लक्ष्यते नोच्यते शब्दप्रवृत्तिहेतुजात्यादिधर्मरहितत्वात्तथा सत्यशब्देनापि सर्वविशेषप्रत्यस्तमितस्वरूपत्वाद्ब्रह्मणो वाच्यसत्तासामान्यविषयेण सत्यशब्देन लक्ष्यते सत्यं ब्रह्मेति नतु सत्यशब्दवाच्यं ब्रह्म। एवं सत्यादिशब्दा इतरेतरसन्निधावन्योन्यनियम्यनियामकाः सन्तः सत्यादिशब्दवाच्यत्वान्निवर्त्तका ब्रह्मणो लक्षणार्थाश्च

कारकसाध्यं धात्वर्थत्वादिति चाभिप्रेत्याह। अत इति॥ नित्यात्मस्वरूपत्वादेवेत्यर्थः॥

अतएव चेति नित्यत्वादेव ज्ञानस्य न तत्कर्तृत्वमपि ब्रह्मण आपादयितुं शक्यते लौकिकानित्यज्ञानविलक्षणादेव ज्ञानशब्दवाच्यमपि ब्रह्म न भवतीत्याह। तस्मादेव चेति॥ कथं तर्हि ज्ञानं ब्रह्मेति प्रयोगस्तत्राह। तथापीति॥ शब्दस्य प्रवृत्तिहेतवो जात्यादिधर्मा गौः शुक्ल इत्यादौ तदभावाच्छब्दान्तरेणापि वाच्यं न भवतीत्याह। तथेति॥ तथा सत्यशब्देनापि न वाच्यं ब्रह्मेति शेषः॥ एतत्स्फोरयति। सर्वविशेषेति॥ सत्ता यस्यास्ति तत्सत्यमिति लोकरूढिः। सत्ता चानुगतरूपं सामान्यं व्यावृत्तः सत्ताविशेषः। स चायमनुवृत्तव्यावृत्तभावेनावस्तुपररूपेक्षमिश्रत्वादतो यस्मिन्नपव्यावृत्तानुवृत्तभावस्तद्व्यावृत्तानुगतं ब्रह्म लक्ष्यत इत्यर्थः। एवमेकैकस्य शब्दस्यार्थमुक्त्वा वाक्यार्थमाह। एवं सत्यादिति॥ यद्यपि सत्यादिशब्दानां ब्रह्मणा सहोऽन्वयस्तथाप्यारण्यैकहायन्यादिवत्सापेक्षान्वयेनेतरेतरसन्निधावन्योन्यव्यावृत्तिनियामका भ-

सोऽश्नुते सर्वान् कामान् सह। ब्रह्मणा विपश्चितेति

भवन्ति इत्यतः सिद्धम्। यतो वाचो निवर्त्तन्तेऽप्राप्य मनसा सहाऽनिरुक्तेऽनिलयेनेति चावाच्यत्वं नीलोत्पलवद्वाक्यार्थत्वं च ब्रह्मणस्तद्व्यया व्याख्यातं ब्रह्म यो वेद विजानाति निहितं स्थितं गुहायाम्। गुहतेःसंवरणार्थस्य निगूढा अस्यां ज्ञानज्ञेयज्ञातृपदार्था इति गुहा बुद्धिर्गूढावस्यां भोगापवर्गौ पुरुषार्थाविति वा तस्यां परमे प्रकृष्टे व्योमन् व्योम्याकाशेऽव्याकृताख्ये ॥

तद्धि परमं व्योम एतस्मिन् खलक्षरे गार्ग्याकाश इत्यक्षरसन्निकर्षाद्गुहायां व्योमीति वा सामानाधिकरण्याद्व्याकृताकाशमेव गुहा तत्रापि निगूढाः सर्वे पदार्थास्त्रिषु कालेषु कारणत्वात् सूक्ष्मत्वाच्च तस्मिन्नन्तर्हितं ब्रह्म

वन्ति ज्ञानेन विशेषणात्सत्यशब्दो न जडे कारणे वर्त्तते सत्येन विशेषणाज्ज्ञानशब्दो न विषयसापेक्षे ज्ञाने वर्त्तते। ज्ञानेन विशेषणाच्चानन्तशब्दो ज्ञाताव्यतिरिक्ते वर्त्तते। ततश्च सत्यादिशब्देन लौकिकं वाच्यं तद्विलक्षणेन भवितव्यमिति सम्भावयन्तः सकललौकिकाध्यासाधिष्ठानं ब्रह्मत्वेन लक्षयन्तीत्यर्थः। ततः किं फलतीत्यत आह। अतः सिद्धमिति ॥ वाचकशक्त्या बोधकत्वानङ्गीकाराद्वाच्यत्वं सकलानिष्टव्यवच्छेदेनैकस्यैव लक्ष्यत्वाभ्युपगमाच्च गुणगुण्यादिसम्भेदरूपवाक्यार्थवैलक्षण्यं च ब्रह्मणः सिद्धमित्यर्थः ॥

बुद्धौ कार्य्ये यदनुगतं परमं व्योमाव्याकृताख्यं तस्मिन्निहितमिति सप्तमीद्वयं वैयधिकरण्येन व्याख्यातम् ॥ व्योमशब्दस्य भूताकाशे रूढिं परित्यज्य किमित्यव्याकृतविषयत्वं व्याख्यातं तत्राह। तद्धीति ॥ भूताकाशस्य कार्य्यत्वेनापरत्वादव्याकृताकाशस्य कारणत्वेन परमत्वविशेषण-

हार्दमेव तु परमं व्योमेति न्याय्यं विज्ञानाङ्गत्वेन व्योम्नो विवक्षितत्वात्। यो वै स बहिर्द्धा पुरुषाकाशो यो वै सोऽन्तःपुरुषाकाशःसोऽयमन्तर्हृदयाकाश इति श्रुत्यन्तरात्प्रसिद्धं हार्दस्य व्योम्नः परमं तत्त्वं तस्मिन्हार्दे व्योम्नि या बुद्धिर्गुहा तस्यां निहितं ब्रह्म तदृत्या विविक्ततयोपलभ्यत इति। न ह्यन्यथा विशिष्टदेशकालसम्बन्धोऽस्ति ब्रह्मणः सर्वगतत्वान्निर्विशेषत्वाच्च। स एवं ब्रह्म विजानन् किमित्याह। अश्नुते भुङ्क्ते सर्वान्निर्विशेषान् कामान् भोगानित्यर्थः। किमस्मदादिवत्पुत्रस्वर्गादीन्पर्य्यायेणेत्याह। स ह युगपदेकक्षणोपारूढानेवैकयोपलब्ध्या सवितृप्रकाशवन्नित्यया ब्रह्मस्वरूपया व्यतिरिक्तया यामवोचाम सत्यं ज्ञानमिति। एतत्तदुच्यते। ब्रह्मणा सहेति॥ ब्रह्मभूतो विद्वान् ब्रह्मस्वरूपेणैव सर्वान् कामान् सहाश्नुते न यथोपाधिकृतेन स्वरूपेणात्मना जलसूर्य्याकाशादिवत्प्रतिबिम्बभूतेन संसारिकेण धर्मादिनिमित्तापेक्षांश्चक्षुरादिकरणापेक्षांश्च कामान्

सम्भवाच्छाखान्तरश्रुतपथे चाक्षरेण ब्रह्मणा सामीप्यावगमाद्व्याकृतं व्योमशब्देन लक्ष्यत इत्यर्थः। एवं पराभिप्रायेण व्याख्याय स्वाभिप्रायं व्याचष्टे। हार्दमेवेति॥ हृदयावच्छिन्ने भूताकाशे या गुहा तस्यां बुद्धौ साक्षितया निहितमभिव्यक्तं ब्रह्मेति व्याख्यानं युक्तम्। द्रष्टृभेदेन ब्रह्मण आपरोक्ष्यलाभादन्यथासमष्टिरूपेऽव्याकृते मायातत्त्वेऽवस्थितं ब्रह्मेत्युक्ते ब्रह्मणः परोक्षं प्रसज्येत परोक्षेण च ज्ञानं नापरोक्ष्यसंसाराध्यासनिवर्त्तकम्। तस्मादपरोक्षद्रष्टृचैतन्याभेदेन ब्रह्मणः स्वहृदये प्रत्यक्षतायाः विवक्षितत्वात् हृदयाकाशमेव विज्ञानशेषभूतं विवक्षितमित्यर्थः॥ यदुक्तं भूताकाशस्य परमत्वानुपपत्तिरिति तत्राह। यो वै

पर्य्यायेणाश्नुते लोके। कथं तर्हि यथोक्तेन प्रकारेण सर्वज्ञेन सर्व्वात्मना नित्यब्रह्मात्मस्वरूपेण धर्म्मादिनिमित्तानपेक्षांश्चक्षुरादिनिरपेक्षांश्च सर्व्वान् कामान् सहैवाश्नुत इत्यर्थः। विपश्चिता मेधाविना सर्वज्ञेन। तद्धि वैपश्चित्यं यत्सर्व्वज्ञस्वरूपेण ब्रह्मणाश्नुत इति। इतिशब्दो मन्त्रपरिसमाप्त्यर्थः। सर्व एव वल्ल्यर्था ब्रह्मविदाप्नोति परमिति ब्राह्मणवाक्येन सूचितोऽर्थः संक्षेपतो मन्त्रेण व्याख्यातः पुनस्तस्यैव विस्तरेण निर्णयः कर्त्तव्य इत्युत्तरस्तदृत्तिस्थानीयो ग्रन्थ आरभ्यते तस्माद्वा एतस्मादित्यादिः॥ तत्र च सत्यं ज्ञानमनन्तं ब्रह्मेत्युक्तं मन्त्रादौ तत्कथं सत्यं ज्ञानमनन्तञ्चेत्यत आह। त्रिविधं हि आनन्त्यं देशतः कालतो वस्तुतश्चेति। तद्यथा देशतोऽनन्त आकाशो न हि देशतस्तस्य परिच्छेदोऽस्ति। न तु कालतश्चानन्त्यं वस्तुतश्चाकाशस्य। कस्मात्कार्य्यत्वात्। नैवं ब्रह्मण आकाशवत्कालतोऽप्यन्तवत्त्वमकार्य्यत्वात्। कार्य्यं हि वस्तु कालेन परिच्छिद्यते। अकार्य्यञ्च ब्रह्म। तस्मात्कालतोऽप्यनन्तम्। तथा

इति॥ ननु निश्चितशब्दः स्थितिं ब्रुते कथं विविक्षितया स्फुटतयोपलम्भाभिप्रायेण व्याख्यायते तत्राह। न हीति॥ अन्यथेत्युपलम्भव्यतिरेकेणाविद्यावस्थायां ये सुखविशेषा हिरण्यगर्भाद्युपाधिषु भोग्यत्वेनाभिमतास्तेषां सर्व्वेषां ब्रह्मानन्दाव्यतिरेकाद्ब्रह्मीभूतो विद्वान् सर्व्वानेवानन्दानश्नुत इत्युपचारेण वस्तुवचनमित्यर्थः। इत्तमनुवदन्नुत्तरग्रन्थावतारणाय सर्वं एवेत्यादिना आकाशादिकारणत्वाभिधानेनानन्त्यप्रपञ्चः क्रियत इति समनन्तरग्रन्थतात्पर्यं दर्शयितुं पूर्वोक्तेष्वर्थविशेषमनुवदति। तत्र चेति॥ वस्तुत आनन्त्यं व्याख्यातुं वस्तुतोऽनन्तत्वं तावदाह। भिन्नं

वस्तुतः। कथं पुनर्वस्तुत आनन्त्यं सर्व्वानन्यत्वात्। भिन्नं हि वस्तु वस्त्वन्तरस्यान्तो भवति वस्त्वन्तरबुद्धिर्हि प्रमत्ता वस्त्वन्तरान्निवर्त्तते। यतो यतो यस्य बुद्धेर्निवृत्तिः स तस्यान्तः। तद्यथा गोत्वबुद्धिरश्वत्वाद्विनिवर्त्तते इत्यश्वत्वान्तं गोत्वमित्यन्तवदेव भवति। स चान्तो भिन्नेषु वस्तुषु दृष्टो नैवं ब्रह्मणो भेदोऽतो वस्तुतोऽप्यानन्त्यं कथं पुनः सर्व्वानन्यत्वं ब्रह्मण इत्युच्यते सर्ववस्तुकारणत्वात्। सर्वेषां हि वस्तूनां कालाकाशादीनां कारणं ब्रह्म। कार्य्यापेक्षया वस्तुतोऽन्तत्वमिति चेन्न। अवस्तुत्वात्कार्य्यवस्तुनः। न हि कारणव्यतिरेकेण कार्य्यं नाम वस्तुतोऽस्ति। यतः कारणाद्बुद्धिर्निवर्त्तते। वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमेवं सदेव सत्यमिति श्रुत्यन्तरात्। तस्मादाकाशादिकारणत्वाद्देशतस्तावदनन्तं ब्रह्म। आकाशो ह्यनन्त इति प्रसिद्धं देशतस्तस्येदं कारणं तस्मात्सिद्धं देशत आत्मन आनन्त्यम्। न हि सर्वगतात्सर्वगतमुत्पद्यमानं किञ्चिदृश्यतेऽतोनिरतिशयमात्मन आनन्त्यं देशतस्तथाऽकार्य्यत्वात्कालतस्तद्भिन्नवस्त्वन्तराभावाच्च वस्तुत अत एव निरतिशयसत्यत्वम्॥

ह्रीत्यादिना॥ विस्तरेणोक्तमानन्त्रं सङ्क्षिप्याह। तस्मात्सिद्धमिति॥ देशतोऽनवच्छिन्नस्याकाशस्य कारणत्वाद्व्यापकत्वान्निरतिशयमात्मनो देशत आनन्त्यमकार्य्यत्वाच्च कालत आनन्त्यं यद्यतोऽव्यावर्त्तेत तस्य पृथगसत्वात्कार्य्यस्योपादानादन्यत्र सत्तायोगाद्वस्तुतोऽप्यानन्त्यं सिद्धमित्यर्थः। अत इति निरतिशयानन्त्यादेव सत्यत्वमपि सिद्धमन्तवत्त्व एव रज्जुसर्पादिवदसत्यत्वादित्यर्थः॥

तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेराप्रः।

तस्मादिति मूलवाक्यसूचितं ब्रह्म परामृश्यते। एतस्मादिति। मन्त्रवाक्येन अनन्तरं यथा लक्षितं यद्ब्रह्मैव ब्राह्मणवाक्येन सूचितम्। यच्च सत्यं ज्ञानमनन्तं ब्रह्मेत्यनन्तरमेव। लक्षितं तस्मादेतस्माद्ब्रह्मण आत्मन आत्मशब्दवाच्यत्वात् आत्मा हि तत्सर्वस्य तत्सत्यं स आत्मेतिश्रुत्यन्तरादतो ब्रह्मात्मा। तस्मादेतस्माद्ब्रह्मण आत्मस्वरूपादाकाशः सम्भूतः समुत्पन्नः। आकाशो नाम शब्दगुणोऽवकाशकरो मूर्त्तद्रव्याणां तस्मादाकाशात्स्वेन स्पर्शगुणेन पूर्व्वेण च कारणगुणेन शब्देन द्विगुणो वायुः सम्भूत इत्यनुवर्त्तते वायोश्च स्वेन रूपगुणेन पूर्व्वाभ्याञ्च त्रिगुणोऽग्निः सम्भूतः। अग्नेः स्वेन रसगुणेन पूर्व्वैश्च त्रिभिश्चतुर्गुणा आपः सम्भूताः। अद्भ्यः स्वेन गन्धगुणेन पूर्व्वैश्चतुर्भिः पञ्चगुणा पृथिवी सम्भूता। पृथिव्या ओषधयः। ओषधीभ्योऽन्नम्। अन्नाद्रेतोरूपेण परिणतात्पुरुषः शिरःपाण्याद्याकृतिमान्। स वा एष पुरुषोऽन्नरसमयोऽन्नरस-

---

एवं सृष्टिवाक्यतात्पर्य्यसङ्गा पदानि विभजते। तस्मादित्यादिना॥ अन्त्यकार्य्यपर्य्यन्तं परमात्मनः सर्वत्रोपादानत्वादाकाशभावापन्नात्परमात्मन एव वायुः सम्भूतोऽत एव तद्गुणस्योत्तरत्रानुवृत्तिर्गुणशब्दप्रयोगोऽपि भेदकल्पनया तत्त्वम्। तत्त्वाभिप्रायेण न वैशेषिकपक्षवत्तत्त्वभेदाभिप्रायेण तत्त्वतो भेदे प्रमाणाभावादिति द्रष्टव्यम्। पुरुषमयत्वस्य तात्पर्य-

अङ्गेभ्यः पृथिव्यै। पृथिव्या ओषधयः। ओषधीभ्योऽन्नम्। अन्नाद्रेतः। रेतसः पुरुषः। स वा एष पुरुषोऽन्नरसमयः।

विकारः। पुरुषाकृतिभावितं हि सर्वेभ्योऽङ्गेभ्यस्तेजः सम्भूतं रेतो वीजं तस्माद्यो जायते सोऽपि तथा पुरुषाकृतिरेव स्यात् सर्वजातिषु जायमानानां जनकाकृतिनियमदर्शनात् सर्वेषामप्यन्नरसविकारत्वे ब्रह्मवंश्यत्वे चाविशिष्टे कस्मात्-पुरुष एव गृह्यते प्राधान्यात्। किं पुनः प्राधान्यं कर्मज्ञानाधिकारः पुरुषएव हि यज्ञत्वादर्थित्वाच्च अर्थी विद्वान् समर्थः कर्मज्ञानयोरधिक्रियते। पुरुषत्वे वाविस्तरात्मा स हि विज्ञानेन सम्पन्नतमो विज्ञातं वदति विज्ञातं पश्यति वेद श्रुतं वेद लोकालोकौ मर्त्येनाप्तमीप्सतीत्येवं सम्पन्नोऽथेतरेषां पशूनामशनापिपासे एवाभिज्ञानमित्यादिश्रुत्यन्तरदर्शनात्॥

माह। सर्वेषामपीति॥ प्राधान्यादिति विधिनिषेधविवेकसामर्थ्योपेतत्वादित्युक्तं तत्रैतरेयकश्रुतिसम्मतिमाह। पुरुषे त्वेवेति॥ ब्राह्मणादिजातिमति मनुष्यादिदेहे आविस्तरामतिशयेन प्रकट आत्मा ज्ञानातिशयदर्शनादित्यर्थः। मर्त्येन ज्ञानकर्मादिसाधनेनाप्तयफलं प्राप्तुमिच्छतीत्यर्थः। येन विवेकज्ञानेन पुरुषस्य प्राधान्यं विवक्षितं तत्पश्वादीनां नास्तीत्याह। अथेतरेषामिति॥

तस्येदमेव शिरः। अयं दक्षिणः पक्षः। अयमुत्तरः पक्षः। अयमात्मा। इदं पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति ॥ इति प्रथमोऽनुवाकः ॥ १ ॥

स हि पुरुष इह विद्ययान्तरतमं ब्रह्म सङ्क्रामयितुमिष्टस्य च वाह्याकारविशेषेष्वनात्मस्वात्मभाविता बुद्धिरनालम्बनविशेषं काञ्चित्सहसान्तरतमप्रत्यगात्मविषया निरालम्बना च कर्त्तुमशक्येति दृष्टशरीरात्मसामान्यकल्पनया शाखाचन्द्रनिदर्शनवदन्तः प्रवेशयन्नाह। तस्येदमेव शिरः। तस्यास्य पुरुषस्यान्तरसमयस्येदमेव शिरः प्रसिद्धम्। प्राणमयादिष्वशिरसां शिरस्त्वदर्शनादिहापि तत्प्रसङ्गो मा भूदितीदमेव शिर इत्युच्यते। एवं पक्षादिषु योजना। अयं दक्षिणो बाहुः पूर्वाभिमुखस्य दक्षिणः पक्षोऽयं सव्यो बाहुरुत्तरः पक्षोऽयं मध्यमो देहभाग आत्माऽङ्गानाम्। मध्यं श्लेषामङ्गानामालेतिश्रुतेः। इदमिति नाभेरधस्ताद्यदङ्गं तत्पुच्छं प्रतिष्ठा। प्रतितिष्ठत्यनयेति प्रतिष्ठा पुच्छमिव पुच्छमधोवलम्बनसामान्याद्यथा गोः पुच्छम्। एतत्प्रकृत्योत्तरेषां प्राणमयादीनां रूपकत्वसिद्धिः। भूषानिषिक्तद्रुततास्त्रप्रतिमावत्। तदप्येष श्लोको भवति। तत्तस्मि-

---

कोशपञ्चकोपन्यासस्य तात्पर्यमाह। स हीत्यादिना ॥ पक्षपुच्छशब्दप्रयोगात्पक्षपर्णाकारकृतिं दर्शयति। उत्तरत्र तत्तत्प्रक्रियया बाह्यवि-

अन्नाद्वै प्रजाः प्रजायन्ते । याः काश्च पृथिवीꣳ श्रिताः । अथो अन्नेनैव जीवन्ति । अथैनदपि यन्त्यन्ततः । अन्नꣳ हि भूतानां ज्येष्ठम् । तस्मात्सर्वौषधमुच्यते ।

न्नेवार्थे ब्राह्मणोक्तोऽन्नमयात्मप्रकाशकः एष श्लोको मन्त्रो भवति ॥ इति प्रथमोऽनुवाकः ॥ १ ॥

अन्नाद्रसादिभावपरिणतात् । वै इति स्मारणार्थः । प्रजाः स्थावरजङ्गमात्मकाः प्रजायन्ते । याः काश्चाविशिष्टाः पृथिवीं श्रिताः पृथिवीमाश्रितास्ताः सर्वा अन्नादेव प्रजायन्ते । अथोऽपि जाता अन्नेनैव जीवन्ति प्राणान्धारयन्ति वर्द्धन्त इत्यर्थः । अथाप्येनदन्नमपि यन्त्यपिगच्छन्ति । अपिशब्दः प्रतिशब्दार्थोऽन्नं प्रति प्रलीयन्त इत्यर्थः । अन्ततोऽन्ते जीवनलक्षणाया वृत्तेः परिसमाप्तौ । कस्मादन्नम् । हि यस्माद्भूतानां प्राणिनां ज्येष्ठं प्रथमजम् । अन्नमयादीनां हीतरेषां भूतानां कारणमन्नमतोऽन्नप्रभवा अन्नजीवना अन्नप्रलयाश्च सर्वाः प्रजाः । यस्माच्चैवं तस्मात्सर्वौषधं सर्वप्राणिनां देहदाढ्यप्रथममन्नमुच्यते ॥

षयासङ्कल्प्योपहृहेतुबुद्धेरात्मनि स्थिरीकरणार्थं नोपासनविधानमिह विवक्षितम् ॥ इति प्रथमोऽनुवाकः ॥ १ ॥

उपक्रमोपसंहारयोर्ब्रह्मात्मैकत्वप्रतिपादनेनैवोपपत्तेर्मध्ये चान्यस्योपासनविधौ तात्पर्ये च वाक्यभेदप्रसङ्गादत एवाङ्गे स्तुतिपरार्थत्वादिति न्यायेन यथा प्रयाजादिफलश्रवणमर्थवादस्तथान्नमयादिप्रतिपत्तेरपि फलश्रवणमर्थवाद एव तत्तद्बुद्धिस्थिरीकारस्य पूर्वपूर्वबुद्धिविलापनेनात्मनः प्रतिपत्तियोग्यत्वादिति द्रष्टव्यम् ॥ इति द्वितीयोऽनुवाकः ॥ २ ॥

सर्वं वैतेऽन्नमाप्नुवन्ति। येऽन्नं ब्रह्मोपासते। अन्नꣳ हि भूतानां ज्येष्ठम्। तस्मात्सर्वौषधमुच्यते। अन्नाद्भूतानि जायन्ते। जातान्यन्नेन वर्द्धन्ते। अद्यतेऽत्ति च भूतानि। तस्मादन्नं तदुच्यत इति।

अन्नब्रह्मविदः फलमुच्यते। सर्वं वै ते समस्तमन्नजातमाप्नुवन्ति। के। येऽन्नं ब्रह्म यथोक्तमुपासते। कथमन्नजोऽन्नात्माऽन्नप्रलयोऽहं तस्मादन्नं ब्रह्मेति। कुतः पुनः सर्वान्नप्राप्तिफलमन्नात्मोपासनमित्युच्यते। अन्नं हि भूतानां ज्येष्ठम्। भूतेभ्यः पूर्वं निष्पन्नत्वाज्ज्येष्ठं हि यस्मात्तस्मात्सर्वौषधमुच्यते। तस्मादुपपन्ना सर्वान्नात्मोपासकस्य सर्वान्नप्राप्तिः। अन्नाद्भूतानि जायन्ते। जातान्यन्नेन वर्द्धन्त इत्युपसंहारार्थं पुनर्वचनम्। इदानीमन्ननिर्वचनमुच्यते। अद्यते चैव यद्भूतैरन्नमत्ति च भूतानि स्वयं तस्मादन्नं तदुच्यते। इतिशब्दः प्रथमकोशपरिसमाप्त्यर्थः॥ अन्नमयादिभ्य आनन्दमयान्तेभ्य आत्मभ्योऽभ्यन्तरतमं ब्रह्म विद्यया प्रत्यगात्मत्वेन दिदर्शयिषुः शास्त्रमविद्याकृतं पञ्चकोशापनयनेनानेकतुषकोद्रवतुषीकरणेनेव तण्डुलान् प्रस्तौति। तस्माद्वा एतस्मादन्नरसमयादित्यादि। तस्मादेतस्माद्यथोक्तादन्नरसमयात्पिण्डादन्यो व्यतिरिक्तोऽन्तरोऽभ्यन्तर आत्मा पिण्डवदेव मिथ्यापरिकल्पित आत्मत्वेन प्राणमयः। प्राणो वायुस्तन्मयस्तत्प्रायत्वेन प्राणमयेनान्नरसमय आत्मा एष पूर्णो वायुनेव भृतिः। स वा

तस्माद्वा एतस्मादन्नरसमयात्। अन्योऽन्तरात्मा प्राणमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य प्राण एव शिरः। व्यानो दक्षिणः पक्षः। अपान उत्तरः पक्षः। आकाश

एष प्राणमय आत्मा पुरुषविध एव पुरुषाकार एव शिरःपक्षादिभिः किं स्वत एव नेत्याह। प्रसिद्धं तावदन्नमयस्यात्मनः पुरुषविधत्वम्। तस्यान्नरसस्य पुरुषविधतां पुरुषाकारताम्। अन्वयं प्राणमयः पुरुषविधो मूषानिषिक्तप्रतिमावन्नस्वत एव। एवं पूर्वस्य पूर्वस्य पुरुषविधतामनूत्तरोत्तरः पुरुषविधो भवति पूर्वः पूर्वश्चोत्तरोत्तरेण पूर्णः। कथं पुनः पुरुषविधताऽस्येत्युच्यते। तस्य प्राणमयस्य प्राण एव शिरः प्राणमयस्य वायुविकारस्य प्राणो मुखनासिकानिःसरणो वृत्तिविशेषः शिर इव परिकल्प्यते वचनात्। सर्वत्र वचनादेव पक्षादिकल्पना। व्यानो व्यानवृत्तिर्दक्षिणः। पक्षः अपान उत्तरः पक्षः। आकाश आत्मा य आकाशस्थो वृत्तिविशेषः स समानाख्यः स आत्मेवात्मा प्राणवृत्त्यधिकारान्मध्यस्थत्वादितराः पर्यन्ता वृत्तीरपेक्ष्यात्मा। मध्यं ह्येषामङ्गानामात्मेति प्रसिद्धं मध्यमस्यस्यात्मत्वम्। पृथिवीपुच्छं प्रतिष्ठा। पृथिवीति पृथिवीदेवताऽध्यात्मकस्य प्राणस्य धारयित्री स्थितिहेतुत्वात्सैषा पुरुषस्यापानमवष्टभ्येति हि श्रुत्यन्तरम्। अन्यथो-

आत्मा। पृथिवी पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति ॥ इति द्वितीयोऽनुवाकः ॥ २ ॥

प्राणं देवा अनु प्राणन्ति। मनुष्याः पशवश्च ये। प्राणो हि भूतानामायुः। तस्मात्सर्वायुष-

---

दानदृत्योर्ऊर्ध्वगमनं गुरुत्वाच्च पतनं वा स्याच्छरीरस्य तस्मात् पृथिवी देवता पुच्छं प्रतिष्ठा प्राणमयस्यात्मनः ॥ तत्तस्मिन्नेवार्थे प्राणमयात्मविषय एष श्लोको भवति ॥ इति द्वितीयोऽनुवाकः ॥ २ ॥

प्राणं देवा अनुप्राणन्ति। अग्न्यादयः प्राणं वाय्वात्मानं प्राणनशक्तिमन्तमनु तदात्मभूताः सन्तः प्राणन्ति प्राणनकर्म कुर्वन्ति प्राणनक्रियया क्रियावन्तो भवन्ति। अध्यात्माधिकाराद्देवा इन्द्रियाणि प्राणमनुप्राणन्ति मुख्यप्राणमनुचेष्टन्त इति वा। तथा मनुष्याः पशवश्च ये ते प्राणनकर्मणैव चेष्टावन्तो भवन्ति। अतश्च नान्नमयेनैव परिच्छिन्नेनात्मना आत्मवन्तः प्राणिनः। किन्तर्हि तदन्तर्गतेन प्राणमयेनापि साधारणेनैव सर्वपिण्डव्यापिनात्मवन्तो मनुष्यादयः। एवं मनोमयादिभिः पूर्वपूर्वव्यापि-

---

पूर्वपूर्वकोशस्योऽत्तरोत्तरः कोश एवात्मेति व्याख्यातमापातदर्शनेन। तदसत् ॥ इति द्वितीयोऽनुवाकः ॥ २ ॥

आत्मशब्दस्यानुख्यार्थत्वप्रसङ्गात् प्रकृतपरामर्शकैतच्छब्दकोपाच्चातः सर्वकोशाध्यासाधिष्ठानभूतस्यिदात्मैवात्रात्मशब्देन विवक्षित इति तात्पर्यमाह। तथा स्वाभाविकेनेति ॥ अर्थादित्यात्मशब्दसामर्थ्यात्कल्पितस्याधिष्ठानत्वानुपपत्तेरित्यर्थः। असाधारणादिति ॥ व्याकृतस्वरूपा-

मुच्यते। सर्वमेव त आयुर्यन्ति। ये प्राणं ब्रह्मोपासते। प्राणो हि भूतानामायुः। तस्मात्सर्वायुषमुच्यत इति। तस्यैष एव शारीर आत्मा।

भिरुत्तरोत्तरैः सूक्ष्मैरानन्दमयान्तैराकाशादिभूतारब्धैरविद्याकृतैरात्मवन्तः सर्वे प्राणिनः। तथा स्वाभाविकेनाप्याकाशादिकारणेन नित्येनाविकृतेन सर्वगतेन सत्यज्ञानानन्तलक्षणेन पञ्चकोशातिगेन सर्वात्मनात्मवन्तः। स हि परमार्थत आत्मा सर्वेषामित्येतदर्थादुक्तं भवति। प्राणं देवा अनुप्राणन्तीत्युक्तम्। तत्तस्मादित्याह। प्राणो हि यस्माद्भूतानां प्राणिनामायुर्जीवनं यावच्चास्मिञ्छरीरे प्राणो वसति तावदायुरिति श्रुत्यन्तरात्। तस्मात्सर्वायुषम्। सर्वेषामायुः सर्वायुः सर्वायुरेव सर्वायुषमित्युच्यते। प्राणापगमे मरणप्रसिद्धेः। प्रसिद्धं हि लोके सर्वायुष्ट्वं प्राणस्य। अतोऽस्माच्छ्लोकादसाधारणादन्नमयादात्मनोऽपसंक्रम्यान्तः साधारणं प्राणमयमात्मानं ब्रह्मोपासते येऽहमस्मि प्राणः सर्वभूतानामात्मायुर्जीवनहेतुत्वादिति ते सर्वमेवायुरस्मिँल्लोके यन्ति नापच्छत्युना म्रियन्ते प्राक्कृतादायुष इत्यर्थः। शतं वर्षाणीति तु युक्तम्। सर्वमायुरिति

दपक्रम्य तत्रात्मबुद्धिं हित्वेत्यर्थः। साधारणमिति सर्वेन्द्रियसाधारणम्। प्राणकृतमशनादिना सर्वेषां पुष्ट्यादिदर्शनादित्यर्थः। सर्वभूतानामात्मेति सूत्रात्मना पूर्वस्य य आत्मा चिद्धातुरेष एव तस्य प्राणमयस्यात्मेति योजना॥

यः पूर्वस्य । तस्माद्वा एतस्मात्प्राणमयात् । अन्योऽन्तर आत्मा मनोमयः । तेनेष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् ।

श्रुतिप्रसिद्धेः किं कारणं प्राणो हि भूतानामायुस्तस्मात्सर्वायुषमुच्यत इति। यो यद्गुणकं ब्रह्मोपास्ते स तद्गुणभाग्भवतीति विद्याफलप्राप्तेर्हेत्वर्थं पुनर्वचनं प्राणो हीत्यादि। तस्य पूर्वस्यान्नमयस्यैष शरीरेऽन्नमये भवः शारीर आत्मा। क एषः। प्राणमयः॥ तस्माद्वा एतस्मादित्युक्तार्थमन्यत्। अन्योऽन्तरात्मा मनोमयः। मन इति सङ्कल्पविकल्पात्मकमन्तः करणं तन्मयो मनोमयः। सोऽयं प्राणमयस्याभ्यन्तर आत्मा। तस्य यजुरेव शिरः। यजुरित्यनियताक्षरपदावसानो मन्त्रविशेषस्तज्जातीयवचनो यजुःशब्दस्तस्य शिरत्वं प्रधान्यात्। प्राधान्यञ्च यागादौ सन्निपत्योपकारात्। यजुषा हि हविर्हीयते स्वाहाकारादिना वाचनिको वा शिरआदिकल्पना। सर्वत्र मनसो हि स्थानप्रयत्ननादस्वरपूर्णपदवाक्यविषया

यजुःशब्देन वाह्यो यजुर्वेद उच्यते। तस्य कथमान्तरं मनोमयं प्रति शिरस्त्वमित्याशङ्क्याह। मनसो होति॥ यद्यपि यजुःशब्दो वाह्ये यज्ञराशौ रूढस्तथापि श्रुतेरनतिशङ्कनीयत्वात्तत्साधारण्याद्विशिष्टमनोवृत्तिर्यजुःसङ्केतविषयभूता यजुर्वेदमधीमहे एतत्प्रमका वर्णा यजुर्वेदतयाऽध्येतव्या इत्येवं सङ्कल्परूपा याह्येत्यर्थः। श्रुत्यनुग्राहिकां युक्तिमप्याह। एवञ्चेति॥ अन्यथेतिशब्दानां घटादिवद्बाह्यद्रव्यत्वे मनोविषयत्वासम्भवाच्छ्रवणमनसो बाह्येऽर्थेऽस्वातन्त्र्यान्मनसो जपो न स्यादित्यर्थः। इतश्च मनोऽ

अन्वयं पुरुषविधः। तस्य यजुरेव शिरः। ऋग्दक्षिणः पक्षः। सामोत्तरः पक्षः। आदेश

तत्सङ्कल्पात्मिका तद्भाविता वृत्तिः श्रोत्रादिकरणद्वारा यजुःसङ्केतेन विशिष्टा यजुरित्युच्यते। एवमृगेवं साम। एवञ्च मनोवृत्तित्वे मन्त्राणां वृत्तिरेवावर्त्यत इति मानसो जप उपपद्यते। अन्यथा विषयत्वान्मन्त्रो नावर्त्तयितुं शक्यो घटादिवदिति मानसो जपो नोपपद्यते। मन्त्रावृत्तिश्चोद्यते बहुशः कर्मस्वध्वरविषयस्मृत्यावृत्त्या मन्त्रावृत्तिः स्यादितिचेन्न। मुख्यार्थासम्भवात्। त्रिः प्रथमामन्वाह त्रिरुत्तरामिति ऋगावृत्तिः श्रूयते। तत्रर्चो विषयत्वे तद्विषयस्मृत्यावृत्त्या मन्त्रावृत्तौ च क्रियमाणायां त्रिप्रथमामन्वाहेति ऋगावृत्तिर्मुख्योऽर्थश्चोदितः परि-

---

वृत्तित्वं मन्त्राणां वाच्यमित्याह। मन्त्रावृत्तिश्चेति॥ शब्दानां घटादिवद्बाह्यद्रव्यत्वे मन्त्राणां घटादिवदावृत्तिर्नोपपद्येत क्रियैव ह्यावर्त्तेत आवृत्तिसिद्ध्युपपत्त्याऽक्रियात्वं वाच्यमित्युक्तम्॥ तत्रान्यथाप्युपपत्तिमाशङ्कते। अध्वरविषयेति॥ मन्त्रेभ्यः स्मृतेरन्यत्वादन्याऽऽवृत्तिर्गौणी प्रसज्यते अतो नान्यथाप्युपपत्तिरित्युक्तमेतत् स्फुटयति॥ त्रिः प्रथमामित्यादिना॥ सामिधेन्यः समिधो यदा अध्वर्युणा ह्रियन्ते तदा प्रवोवाजा अभिदव इत्यादृग्वर्चं रूक्षं होता शंसति तासाङ्गर्चां मध्ये प्रथमामृचं सूक्ष्मान्त्याङ्गर्चं होता त्रिरनुब्रूयादित्यावृत्तिः श्रूयत इत्यर्थः॥ मन्त्राणां मनोवृत्तित्वमुक्त्वा मनोवृत्तीनां सदा चिद्व्याप्तत्वेनैव सिद्धेश्चिदात्मतामाह। तस्मादिति॥ मन्त्राणां मनोवृत्तित्वेनावृत्ति-

आत्मा । अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ इति तृतीयोऽनुवाकः ॥ ३ ॥

त्यक्तः स्यात् । तस्मान्मनोवृत्त्युपाधिपरिच्छिन्नं मनोवृत्ति-निष्ठमात्मचैतन्यमनादिनिधनं यजुःशब्दवाच्यं आत्मविज्ञानं मन्त्रा इति। एवं च नित्यत्वोपपत्तिर्वेदानाम्। अन्यथा विषयत्वे रूपादिवदनित्यत्वं च स्यान्नैतदुक्तम् । सर्वे वेदा यत्रैकं भवन्ति समानसीन आत्मेति च श्रुतिर्नित्यात्मनैकत्वं ब्रुवन्ती ऋगादीनां नित्यत्वे समञ्जसा स्यात् । ऋचोऽक्षरे परमे व्योमन्यस्मिन्देवा अधिविश्वे निषेदुरिति च मन्त्रवर्षः । आदेशोऽत्र ब्राह्मणमतिदेष्टव्यविशेषानतिदिशतीति । अथर्वाङ्गिरसा च दृष्टा मन्त्रा ब्राह्मणं च शान्तिकपौष्टिकादिप्रतिष्ठाहेतुकर्मप्रधानत्वात्पुच्छं प्रतिष्ठा तद-

---

घटते । परम्परया चिदात्मत्वेन नित्यत्वमपि घटत इत्याह । एवञ्चेति ॥ अन्यथेति ॥ स्वप्रकाशचिदात्मत्वानङ्गीकारे रूपादिवद्विषयत्वादनित्यत्वमपि प्रसज्येत । कालिदासादिवाक्यानामप्येतेन न्यायेन नित्यत्वापाताद्युक्त्याभासमेतत् । अस्त्वनित्यमिति । न वाच्यमित्याह । नैतदुक्तमिति । वाचा विरूपनित्यया श्रुत्या नित्यत्वस्यावेदितत्वाद्वेदानित्यत्वं युक्तं न भवतीत्यर्थः । वेदानां जड़त्वे स्वप्रकाशेनात्मना एकत्वं न सम्भवति जड़ाजड़योर्विरोधादतो मनोवृत्तिव्यापकचिदात्मत्वं सूचितमित्यर्थः । साक्षितया मनसि भवो मानसीनोऽक्षरे परमे व्योमकल्पे ब्रह्मणि ऋचो विधिनिषेधरूपा निषेदुस्तादात्म्येन व्यवस्थिता इति

यतो वाचो निवर्त्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्। न बिभेति कदाचनेति। तस्यैष एव शारीर आत्मा। यः पूर्व्वस्य। तस्माद्वा एतस्मान्मनोमयात्। अन्योऽन्तर आत्मा विज्ञानमयः। तेनैष पूर्णः। स

प्येष श्लोको भवति॥ मनोमयात्मप्रकाशकः पूर्व्ववत्॥ इति तृतीयोऽनुवाकः॥ २॥

यतो वाचो निवर्त्तन्तेऽप्राप्य मनसा सहेत्यादि। तस्य पूर्वस्य प्राणमयस्यैष एवात्मा शारीरः। शरीरे प्राणमये भवः शारीरः। कः। य एष मनोमयः। तस्माद्वा एतस्मादिति पूर्व्ववत्। अन्योऽन्तर आत्मा विज्ञानमयो मनोमयस्याभ्यन्तरो विज्ञानमयो मनोमयो वेदात्मोक्तः। वेदार्थविषया बुद्धिर्निश्चयात्मिका विज्ञानं तच्चाध्यवसायलक्षणमन्तः करणस्य धर्मः। तन्मयो निश्चयविज्ञानैः प्रमाणस्वरूपैर्निर्वर्त्तित आत्मा विज्ञानमयः। प्रमाणविज्ञानपूर्वको हि यज्ञादिस्तायते। यज्ञादिहेतुत्वञ्च वक्ष्यति श्लोकेन। निश्चयविज्ञानवतो हि कर्त्तव्येष्वर्थेषु पूर्वं ब्रह्मोपपद्यते। सा सर्वकर्त्तव्यानां प्रायस्याच्छिर

मस्त्वर्थे एकत्वं दर्शयतीत्यर्थः। अतिदेष्टव्यविशेषात् कर्त्तव्यविशेषादिदमेवं कर्त्तव्यमित्युपदिशतीत्यर्थः॥ इति तृतीयोऽनुवाकः॥ २॥

वाङ्मनसगोचरत्वं नोपपद्यते स्वात्मनिष्ठत्तिविरोधादतो वाङ्मनोविशिष्टान्मनोमयाद्वाचो मनसा सह निवर्त्तन्त इत्यर्थः। तस्य च मनो-

वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य श्रद्धैव शिरः। ऋतं दक्षिणः पक्षः। सत्यमुत्तरः पक्षः। योग आत्मा। महः पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति॥ इति चतुर्थोऽनुवाकः॥ ४॥

इव शिरः। ऋतसत्ये यथा व्याख्यात एव। योगो युक्तिः समाधानम्। आत्मैवात्मा। आत्मवतो हि युक्तस्य समाधानवतोऽङ्गानीव श्रद्धादीनि यथार्थप्रतिपत्तिलक्षणानि भवन्ति तस्मात्समाधानम्। योग आत्मा विज्ञानमयस्य। महः पुच्छं प्रतिष्ठा। मह इति महत्त्वं प्रथमजम्। महद्यच्चं प्रथमजमिति श्रुत्यन्तरात्। पुच्छं प्रतिष्ठाकारणात्। कारणं हि कार्याणां प्रतिष्ठा। यथा वृक्षवीरुधां पृथिवी। सर्वबुद्धिविज्ञानानां महत्त्वं कारणम्। तेन तद्विज्ञानात्मा तस्यात्मनः प्रतिष्ठा। तदप्येष श्लोको भवति पूर्ववत्। यथान्नमयादीनां ब्राह्मणोक्तानां प्रकाशकाः श्लोका एवं विज्ञानकर्तृत्वं सर्वमयस्यापि॥ इति चतुर्थोऽनुवाकः॥ ४॥

मयस्य ब्रह्मणः उपासनफलभूतमधिदैविकमानन्दं विद्वान्न बिभेति गर्भवासादिदुःखादित्यर्थः। वेदार्थेति॥ तथा व्यवसायलक्षणं लौकिकमपि ज्ञानं प्राह्यमित्यर्थः॥ इति चतुर्थोऽनुवाकः॥ ४॥

विज्ञानं यज्ञं तनुते। कर्म्माणि तनुतेऽपि च। विज्ञानं देवाः सर्व्वे। ब्रह्म ज्येष्ठमुपासते। विज्ञानं ब्रह्म चेद्वेद। तस्माच्चेन्न प्रमाद्यति। शरीरे पाप्मनो हित्वा। सर्व्वान् कामान्सम-

---

विज्ञानं यज्ञं तनुते विज्ञानवान् हि यज्ञं तनोति श्रद्धादिपूर्वकम्। अतो विज्ञानस्य कर्तृत्वम्। तनुत इति कर्म्माणि च तनुते। यस्माद्विज्ञानकर्तृत्वं सर्वम्। तस्माद्युक्तं विज्ञानमय आत्मा ब्रह्मेति। किञ्च विज्ञानं ब्रह्म सर्वे देवा इन्द्रादयो ज्येष्ठं प्रथमजत्वात् सर्वदृत्तीनां वा तत्पूर्वकत्वात्प्रथमजं विज्ञानं ब्रह्म उपासते ध्यायन्ति तस्मिन्विज्ञानमये ब्रह्मण्यभिमानं कृत्वोपासत इत्यर्थः। तस्मात्ते महतो ब्रह्मण उपासनाज्ज्ञानैश्वर्य्यवन्तो भवन्ति। तच्च विज्ञानं ब्रह्म चेद्यदि वेद विजानाति न केवलं वेदैव तस्माद्ब्रह्मणश्चेन्न प्रमाद्यति बाह्येष्वेवानात्मस्वात्मभावितत्वात् प्राप्तं विज्ञानमये ब्रह्मण्यात्मभावनायाः प्रमदनं तन्निवृत्त्यर्थमुच्यते तस्माच्चेन्न प्रमाद्यतीति अन्नमयादिष्वात्मभावं हित्वा केवले विज्ञानमये ब्रह्मण्यात्मत्वं भावयन्नास्ते चेदित्यर्थः। ततः किं स्यादित्युच्यते। शरीरे पाप्मनो हित्वा शरीराभिमा-

---

प्रथमजत्वादिति हिरण्यगर्भभेदेनेत्यर्थः॥ आनन्दमयः परमात्मेति वृत्तिकारैरुक्तं तन्निषेधेन व्याचष्टे। कार्य्यात्मप्रतीतिरित्यादिना॥ सङ्क्रामतीत्येतदतिक्रामतीत्यभिप्रायेण व्याख्यातम्॥ प्राप्तमभिप्रायं कस्मान्न व्याख्यायत इत्यत आह। न चात्मन एवेति॥ अन्नमयादीना-

श्रुत इति । तस्यैष एव शारीर आत्मा । यः पूर्वस्य । तस्माद्वा एतस्माद्विज्ञानमयात् । अन्योऽन्तर

ननिमित्ता हि सर्वे पाप्मानस्तेषाञ्च विज्ञानमये ब्रह्मण्यात्माभिमानान्निमित्तापाये हानमुपपद्यते । छत्रापाय इव छायायाः । तस्माच्छरीराभिमाननिमित्तान् सर्व्वान् पाप्मनः शरीरे प्रभवान् शरीरे एव हित्वा विज्ञानमयब्रह्मस्वरूपापन्नस्तत्स्थान् सर्व्वान् कामान् विज्ञानमयेनैवात्मना समश्नुते सम्यक् भुङ्क्त इत्यर्थः । तस्य पूर्वस्य मनोमयस्यात्मा एष एव शरीरेमनोमये भवः शारीरः । कः । य एष विज्ञानमयः । तस्माद्वा एतस्मादित्युक्तार्थम् ॥ आनन्दमय इति कार्य्यात्मप्रतीतिरधिकारान्मयट्शब्दाच्च । अन्नादिमया हि कार्य्यात्मानो भौतिका इहाधिकृताः । तदधिकारपतितश्चायमानन्दमयः । मयट् चात्र विकारार्थे दृष्टः । यथान्नमय इत्यत्र । तस्मात्कार्य्यात्माऽऽनन्दमयः प्रत्येतव्यः । सङ्क्रमणाच्चानन्दमयमात्मानमुपसङ्क्रामतीति वक्ष्यति । कार्य्यात्मनाच्च सङ्क्रमणमनात्मनां दृष्टम् । सङ्क्रमणकर्मत्वेन चानन्दमय आत्मा श्रूयते । यथान्नमय-

---

तिक्रमणीयतया प्रकृतत्वादेकस्य कर्तृत्वकर्मत्वासम्भवाच्च प्राप्तिः संक्रमणं न भवतीत्यर्थः ॥ आनन्दमयस्य परमात्मत्वासम्भवे हेत्वन्तराण्याह । शिर आदीत्यादिना ॥ आनन्दमयस्य परमात्मत्वविवक्षायां मन्त्रतः तस्यैवासत्त्वाशङ्का वक्तव्या: ॥ तदसम्भवाच्च नानन्दमयः परमात्मतया प्रतिपद्यत इत्याह । मन्त्रोदाहरणानुपपत्तेश्चेति ॥ न हि मन्त्रोदाहरणमुपपद्यत इति सम्बन्धः । विधिशेषस्य विधेयप्रकाशकार्थत्वात्सुरूपहमित्युप-

आत्मानन्दमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरु-

---

मात्मानमुपसङ्क्रमतीति। न चात्मन एवोपसङ्क्रमणं। अधिकारविरोधादसम्भवाच्च। न ह्यात्मनैवात्मन उपसङ्क्रमणं सम्भवति। स्वात्मनि भेदाभावात्। आत्मभूतश्च ब्रह्म। सङ्क्रमितुः शिरआदिकल्पनानुपपत्तेश्च। न हि यथोक्तलक्षण आकाशादिकारणेऽकार्यपतिते शिरआद्यवयवरूपकल्पनोपपद्यते अदृश्येऽनात्म्येऽनिलयनेऽनिरुक्तेऽस्थूलमनण्वनेति नेत्यादिविशेषापोहश्रुतिभ्यश्च। मन्त्रोदाहरणानुपपत्तेश्च। न हि प्रियशिरआद्यवयवविशिष्टे प्रत्यक्षतोऽनुभूयमान आनन्दमय आत्मनि ब्रह्मणि नास्ति ब्रह्मेत्याशङ्काभावात् असन्नेव भवति। असद्ब्रह्मेति वेद चेदिति मन्त्रोदाहरणमुपपद्यते। ब्रह्म पुच्छं प्रतिष्ठेत्यपि चानुपपन्नम्। पृथग्ब्रह्मणः प्रतिष्ठात्वेन ग्रहणम्। तस्मात्कार्यपतित एवानन्दमयो न पर एवात्मा आनन्द इति विद्याकर्मणोः फलम्। तद्विकार आनन्दमयः। स च विज्ञानमयादन्तरः। यज्ञादिहेतोर्विज्ञानमयस्यान्तरत्वश्रुतेः। ज्ञानकर्मणोर्हि फलं भोक्तुर्थ-

---

लभ्यमानो भोक्ता आनन्दमय इत्युक्तम्॥ कथं तस्य विज्ञानमयादान्तरत्वमित्यत आह। स चेति॥ कर्तृप्रेप्सया भोक्तृत्वस्योत्तरभावित्वं प्रसिद्धमेव श्रुत्योक्तमित्यर्थः॥ एतत् स्फुटयति। ज्ञानकर्मणोर्हीति॥ शरीरादिभ्य आनन्दसाधनेभ्यः सकाशात्साध्येनानन्देन विशिष्टोऽन्तरतमः प्रसिद्ध्यतीत्यर्थः। किञ्च प्रियं तत्साधनञ्चोद्दिश्य कर्त्ता विज्ञानकर्मणी

षविधः। तस्य प्रियमेव शिरः। मोदो दक्षिणः पक्षः। प्रमोद उत्तरः पक्षः। आनन्द आत्मा।

त्वादनन्तरतमं स्यात्। अन्तरतमश्चानन्दमय आत्मा पूर्वेभ्यः। विद्याकर्मणोः प्रियाद्यर्थत्वाच्च। प्रियादिप्रयुक्ते हि विद्याकर्मणी। तस्मात्प्रियादीनां फलरूपाणामात्मसन्निकर्षाद्विज्ञानमयस्याभ्यन्तरत्वमुपपद्यते। प्रियादिवासनानिर्वर्त्तितो ह्यानन्दमयो विज्ञानमयाश्रितः स्वप्न उपलभ्यते॥ तस्याप्यानन्दमयस्यात्मन इष्टपुत्रादिदर्शनजं प्रियं शिर इव शिरः प्राधान्यात्। मोद इति प्रियलाभनिमित्तो हर्षः। स एव च प्रकृष्टो हर्षः। प्रमोद आनन्द इति सुखसामान्यमात्मा प्रियादीनां सुखावयवानां तेष्वनुस्यूतत्वादानन्द इति परं ब्रह्म। तद्धि शुभकर्मणा प्रत्युपस्थाप्यमाने पुत्रमित्रादिविषयविशेषोपाधावन्तःकरणवृत्तिविशेषे तमसा प्रच्छाद्यमाने प्रसन्नेऽभिव्यज्यते। तद्विषयसुखमिति प्रसिद्धं लोके। तत्तद्वृत्तिविशेषप्रत्युपस्थापकस्य कर्मणोऽनवस्थितत्वा-

---

नुतिष्ठते। तत उद्देश्यत्वादस्यानन्त्यं सिद्धमित्याह। विद्याकर्मणोरिति॥ प्रियादिविशिष्टस्य स्वप्ने साक्षिणा उपलभ्यत्वाच्च न मुख्यात्मत्वमित्याह। प्रियादिवासनेति॥ यदुक्तं ज्ञानकर्मणोः फलभूत आनन्दमयस्तस्य साध्यत्वमौपाधिकं स्वमतानुसारेणाह। आनन्द इति परमिति॥ कथं तर्हि विषयसुखस्य क्वचित्कत्वं सातिशयत्वं च व्यञ्जकवृत्तिनिबन्धनमित्याह। तद्वृत्तिविशेषेति॥ ब्रह्मण आनन्दस्वभावत्व एव किं प्रमाणमित्यत आह। वक्ष्यति चेति॥ अन्तःकरणवृत्त्युत्कर्षादेवानन्दस्य

ब्रह्म पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति॥
इति पञ्चमोऽनुवाकः॥ ५॥

त्मुखस्य क्षणिकत्वम्। तद्यदन्तःकरणं तपसा तमोघ्नेन विद्यया ब्रह्मचर्येण श्रद्धया न निर्मलत्वमापद्यते यावत्तावद्विविक्ते प्रसन्नेऽन्तःकरणविशेष आनन्द उल्लसते विपुलीभवति। वक्ष्यति च। रसो वै सः। रसं ह्येवायं लब्धानन्दी भवति। एष ह्येवानन्दयाति एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तित श्रुत्यन्तरात्। एवञ्च कामोपभोगोत्कर्षापेक्षया यतगुणोत्तरोत्तरोत्कर्षं आनन्दस्य वक्ष्यते। एवञ्चोत्क्रम्यमाणस्यानन्दमयस्यात्मनः परमार्थब्रह्मविज्ञानापेक्षया ब्रह्म परमेव यत्प्रकृतं सत्यज्ञानानन्दलक्षणं यस्य च प्रतिपत्त्यर्थं पञ्चान्नादिमयाः कोशा उपन्यस्ताः। यच्च तेभ्योऽभ्यन्तरं येन च ते सर्वे आत्मवन्तस्तद्ब्रह्म पुच्छं प्रतिष्ठा। तदेव च सर्वस्याविद्यापरिकल्पितस्य द्वैतस्यावसानभूतमद्वैतं ब्रह्म प्रतिष्ठा। आनन्दमयस्य एकत्वावसानत्वात्। अस्ति तदेवमविद्याकल्पितस्य द्वैतस्याव-

---

सातिशयत्वमित्यत्र लिङ्गमाह। एवञ्चेति॥ यदि विषयविशेषजन्यत्वेनानन्दोत्कर्षस्तदा निःकामस्य विषयविशेषोपभोगासम्भवादानन्दोत्कर्षो न श्राव्येत। आत्मस्वभावस्यैवानन्दस्य व्यञ्जकान्तःकरणशुद्ध्युत्कर्षा इत्येवन्तु सति अकामकृतत्वोत्कर्षः सम्भाव्यत इत्यर्थः। उक्तप्रकारेण विषयानन्दस्य सातिशयत्वे सति तद्विशिष्टस्यानन्दमयस्याब्रह्मत्वं सिद्धम्। सातिशयत्वेन प्रतिशरीरं भिन्नत्वात्। ब्रह्म तु तदध्यासाधिष्ठानम-

असन्नेव भवति । असद्ब्रह्मेति वेद चेत् ।
अस्ति ब्रह्मेति चेद्वेद । सन्तमेनं ततो विदुरिति ।

सानभूतमद्वैतं ब्रह्म प्रतिष्ठा पुच्छं तदेतस्मिन्नप्यर्थे स एष श्लोको भवति ॥ इति पञ्चमोऽनुवाकः ॥ ५ ॥

असन्नेवासत्सम एव यथा सन्न पुरुषार्थसम्बन्धी एवं सम्भवति । अपुरुषार्थसम्बन्धी कोऽसौ । यो ऽसदविद्यमानं ब्रह्मेति वेद विजानाति चेद्यदि तद्विपर्ययेण यत्सर्वविकल्पास्पदं सर्वप्रवृत्तिबीजं सर्वविशेषप्रत्यस्तमितमप्यस्ति तद्ब्रह्मेति वेद चेत् । का पुनः शङ्का । तत्रास्तित्वे व्यवहारातीतत्वं ब्रह्मण इति ब्रूमः । व्यवहारविषये हि वाचारम्भणमात्रेऽस्तित्वभाविता बुद्धिस्तद्विपरीते व्यवहारातीते नास्तित्वमपि प्रतिपद्यते । यथा घटादिव्यवहारविषयतयोपपन्नः संस्तद्विपरीतोऽसन्निति प्रसिद्धम् । एवं तत्सामान्यादिहापि स्याद्ब्रह्मणो नास्तित्वप्रत्याशङ्का । तस्मादुच्यते अस्ति ब्रह्मेति चेद्वेदेति। किं पुनः स्यात्तदस्तीति विजानतः-स्तदाह । सन्तं विद्यमानब्रह्मस्वरूपेण परमार्थसदात्मापन्नमेनमेवंविदं विदुर्ब्रह्मविदस्तत्तस्मादस्तित्वे वेदनात्सोऽन्येषां ब्रह्मवद्विज्ञेयो भवतीत्यर्थः । अथवा यो नास्ति ब्रह्मेति

द्वितीयमित्याह । एवञ्चेति ॥ एतस्मिन्नर्थ इति आनन्दमयस्य प्रतिष्ठाभूतब्रह्मप्रकाशमपरे इत्यर्थः ॥ इति पञ्चमोऽनुवाकः ॥ ५ ॥

आनन्दमयस्य प्रकाशकोऽयं श्लोक इति केचन तान्प्रत्याह । तं प्रतीति ॥ सविशेषतया प्रत्यक्षत्वादित्यर्थः । सर्वेषां साधारणत्वाच्च ब्रह्मणो

तस्यैष एव शारीर आत्मा। यः पूर्वस्य। अथातोऽनुप्रश्नाः। उताविद्वानमुं लोकं प्रेत्य।

मन्यते स सर्वस्यैव सन्मार्गस्य वर्णाश्रमादिव्यवस्थालक्षणस्य नास्तित्वं प्रतिपद्यते। ब्रह्मप्रतिपत्त्यर्थत्वात्तस्य। अतो नास्तिकः सोऽसन्नसाधुरुच्यते लोके। तद्विपरीतः सन् योऽस्ति ब्रह्मेति चेद्वेद स तद्ब्रह्मप्रतिपत्तिहेतुं सन्मार्गवर्णाश्रमादिव्यवस्थालक्षणश्रद्दधानतया यथावत्प्रतिपद्यते यस्मात्ततस्तस्मात्सन्तं साधुमार्गस्थमेनं विदुः साधवः। तस्मादस्तीत्येव ब्रह्म प्रत्यक्षितव्यमिति व्याख्यार्थः। तस्य पूर्वस्य विज्ञानमयस्यैवैष एव शरीरे विज्ञानमये भवः शारीर आत्मा। कोऽसौ। य एष आनन्दमयस्तं प्रति नास्त्याशङ्का नास्तस्यपूर्वास्तित्वेऽपोह्यः। सर्वविशेषत्वात्तु ब्रह्मणो नास्तित्वमित्याशङ्का युक्ता। सर्वसामान्यात्तु ब्रह्मणो यस्मादेवमतस्तस्मात्। अथानन्तरं श्रोतुं शिष्यस्यानुप्रश्नाः आचार्योक्तिमनु एते प्रश्नाः। सामान्यं हि ब्रह्माकाशादिकारणत्वाद्विदुषोऽविदुषश्च। तस्मादविदुषोऽपि ब्रह्मप्राप्तिराशङ्क्यते। उत अपि अविद्वानमुं लोकं परमात्मानमितः प्रेत्य कश्चन शब्दोऽप्यर्थे विद्वानपि गच्छति प्राप्नोति किंवा न गच्छतीति द्वितीयोऽपि प्रश्नो द्रष्टव्यो-

---

व्यवहार्यत्वं सर्वान् प्रति भवेन्न च दृश्यते ततोऽपि नास्तित्वाशङ्का जायत इत्यर्थः। आकाशादिकारणत्वादिति भूतविशिष्टसर्वजीवकारणत्वादित्यर्थः॥ कस्य सामर्थ्येन प्राप्तं प्रश्नान्तरमित्यत आह। असन्ब्रह्मेति॥

कश्च न गच्छतीइ । आहो विद्वानमुं लोकं प्रेत्य कश्चित्समश्नुताइउ । सोऽकामयत । बहु स्यां

ऽनुप्रश्ना इति बहुवचनाद्विद्वांसं प्रत्यन्यौ प्रश्नौ । यद्यविद्वान् सामान्यं कारणमपि ब्रह्म न गच्छति ततो विदुषोऽपि ब्रह्मागमनमाशङ्क्यते अतस्तं प्रति प्रश्नः आहो विद्वानिति । विद्वान् ब्रह्मविदपि कश्चिदितः प्रेत्यामुं लोकं समश्नुते उ इत्येवं स्थिते अयादेशे यलोपे च कृतेऽकारस्य श्रुतिः समश्नुता उ इति विद्वान् समश्नुतेऽमुं लोकम् । किंवा यथाऽविद्वानेवं विद्वानपि न समश्नुते इत्यपरः प्रश्नः । द्वावेव वा प्रश्नौ विद्वदविद्वद्विषय । बहुवचनन्तु सामर्थ्यप्राप्तप्रश्नान्तरापेक्षया घटते । असद्ब्रह्मेति वेद चेत् अस्ति ब्रह्मेति चेद्वेदेति श्रवणादस्ति नास्तीति संशयस्ततोऽर्थप्राप्तः किमस्ति नास्तीति प्रथमोऽनुप्रश्नः । ब्रह्मणोऽपक्षपातित्वाद्विद्वान् गच्छति न गच्छतीति द्वितीयः । ह्यब्रह्मणः समत्वेऽप्यविदुष इव विदुषोऽप्यगमनमाशङ्क्यते । किं विद्वान् समश्नुते न समश्नुत इति तृतीयोऽनुप्रश्नः । एतेषां प्रतिवचनार्थमुत्तरग्रन्थः आरभ्यते । तत्रास्तित्वमेव तावदुच्यते । यच्चोक्तं सत्यं ज्ञानमनन्तं ब्रह्मेति । तत्र कथं सत्यत्वमित्येतदुक्तव्यमितीदमुच्यते सत्त्वोक्त्यैव सत्यत्वमुच्यते । उक्तं हि सदेव सत्यमिति । तस्मात्सत्त्वोक्त्यैव सत्यत्वमुच्यते। कथमेवमर्थतो-

---

चेच्छब्दात्मात्मिकसत्त्वावगमसामर्थ्यादित्यर्थः । सत्त्वं चेदुपपन्नं ब्रह्मण-

वगम्यतेऽस्य ग्रन्थस्य शब्दानुगमादनेनैव ह्यर्थेनान्वितान्युत्तराणि वाक्यानि । तत्सत्यमित्याचक्षते यदेष आकाश आनन्दो न स्यादित्यादीनि ॥

तत्रासदेव ब्रह्मेत्याशङ्कते । कस्मात् यदस्ति तद्विशेषतो गृह्यते यथा घटादि । यन्नास्ति तन्नोपलभ्यते यथा शशविषाणादि । तथा नोपलभ्यते ब्रह्म । तस्माद्विशेषतोऽग्रहणान्नास्तीति । तत्राकाशादिकारणत्वाद्ब्रह्मणः । नास्ति ब्रह्म कस्मादाकाशादि हि सर्वं कार्यं ब्रह्मणो जातं गृह्यते । यस्माच्च जायते किञ्चित्तदस्तीति । दृष्टं लोके घटाङ्कुरादिकारणं मृद्बीजादि । तस्मादाकाशादिकारणत्वादस्ति ब्रह्म । नचासता जातं किञ्चिद्गृह्यते लोके कार्यम् । असतश्चेन्नामरूपादिकार्यं निरात्मकत्वान्नोपलभ्येत उपलभ्यते तु तस्मादस्ति ब्रह्म । असतश्चेत्कार्यं गृह्यमाणमप्यसदन्वितमेव तत् स्यात् । नचैवं तस्मादस्ति ब्रह्म । तत्कथमसतः सज्जायतेतिश्रुत्यन्तरम् । असतः सज्जन्मासम्भवमन्वाचष्टे न्यायतश्च । तस्मा-

---

स्तावतैव सत्यत्वं सिद्धति सतो बाधासम्भवादित्यर्थः । एवमर्थतेति सत्त्वोपपादनेन सत्यवस्तुविषयतेत्यर्थः ॥

ब्रह्मणः सत्यसाधनं नामासत्त्वव्यावृत्तिरेवेत्यभिप्रेत्यासत्त्वशङ्कासङ्गावयति । तत्रासदेवेति ॥ विप्रतिपन्नमाकाशादि सत्पूर्वं कार्यत्वात् घटवदिति लौकिकव्याप्त्यवष्टम्भेन सत्कारणं तावत्सिद्धम् । तस्य च देशादिकारणत्वेन देशाद्यनवच्छिन्नत्वात् ब्रह्मपदवाच्यत्वं सिद्धम् । तस्य विशेषतोऽनुपलम्भेनासच्छङ्का जायते सा कारणत्वेन व्यावर्त्यते न तु कारणत्वात्सत्त्वं साध्यते आश्रयासिद्ध्यसङ्गादिति भावः ॥ इतोऽपि जगदुपादानेनासत्त्वाशङ्का कार्येत्याह । नचासत इति ॥ असदन्वयादिदर्शनादिति ॥

प्रजायेयेति। स तपोऽतप्यत। स तपस्तप्त्वा।

त्मदेव ब्रह्मेति युक्तम्। तद्यदि बह्वीजादिवत्कारणं स्याद-चेतनं तर्हि न कामयितृत्वात्। नहि कामयितृचेतनमस्ति लोके। सर्वज्ञं हि ब्रह्मेत्यवोचाम। अतः कामयितृत्वो-पपत्तिः। कामयितृत्वादस्मदादिवदनाप्तकामं चेन्न। स्वा-तन्त्र्यद्याद्यान् परवशीकृत्य कामादिदोषाः प्रवर्त्तयन्ति न तथा ब्रह्मणः प्रवर्त्तकाः कामाः। कथं तर्हि सत्यज्ञानल-क्षणाः स्वात्मभूतत्वाद्विशुद्धा न तैर्ब्रह्म प्रवर्त्तते। तेषान्तु तत्प्रवर्त्तकं ब्रह्म प्राणिकर्म्मापेक्षया। तस्मात्स्वातन्त्र्यं कामेषु ब्रह्मणः। अतो नानाप्तकामं ब्रह्म साधनान्तरान-पेक्षत्वाच्च॥ किञ्च स्वयान्येषामनात्मभूता धर्म्मादिनिमित्ता-

---

युक्तित इत्यर्थः॥ एवमुक्त्वाशङ्कां निरस्याचेतनत्वाशङ्कां प्रधानवादिनः प्रसङ्गान्निराचष्टे। तद्यदिति॥ यद्यपि साङ्ख्यमते चेतनस्य निर्विकारत्वात्-कामयितृत्वमसिद्धं तथापि लौकिकव्याप्तिबलेन कामयितृत्वादचेतनत्वशङ्का निवर्त्तत इत्याह। न हीति॥ तर्हि लौकिकव्याप्तिबलेनैवानाप्तकाम-त्वमपि प्राप्नोतीत्याशङ्क्याह। कामयितृत्वादित्यादिना॥ जीवानाम-नाप्तानन्दत्वं परवशत्वान्न तदस्ति ब्रह्मण इत्यर्थः॥ कथम्भूतास्तर्हि ब्रह्मणः कामा इत्याशङ्क्यायमाह। सत्यज्ञानलक्षणा इति॥ सत्यज्ञान-लक्षणं स्वरूपं येषां ते तथोक्ताः। एतदुक्तं भवति मायाप्रतिबिम्बितं ब्रह्म जगतः कारणं मायापरिणामैरेव कामैः कामयिता। तेषाञ्च परि-णामानामविद्यादिनभिभूतचिद्रूपत्वात्सत्यज्ञानात्मकत्वं ब्रह्मणस्तदात्मत्वाच्च धर्म्मादिननुसृष्टत्वे शुद्धत्वम्। ततो जीवकामवैलक्षण्यं सिद्धमिति। तर्हि ब्रह्मणः कामाः पुण्यकारिणामप्यनिष्टफलप्राप्तिप्रतिकूलाः स्युः। स्वातन्त्र्यादित्याशङ्क्याह। तेषान्त्विति॥ कामस्य शरीरादिसम्बन्धजन्यत्व-

प्राविशदिति प्रवेशस्यानिर्वाच्यताद्योतने न जीवस्य ब्रह्मात्मतया प्रवेशवाक्यस्य तात्पर्यं दर्शयितुं विचारमारभते ॥

नन्वैतच्चिन्त्यं कथमनुप्राविशदिति। किञ्च स्रष्टा स तेनैवात्मनानुप्राविशदुतान्येनेति किन्तावद्युक्तम्। प्रत्ययाश्रवणात्। यः स्रष्टा सऽएवानुप्राविशदिति। ननु न युक्तं सदब्रह्मैत्कारणं ब्रह्म तदात्मकत्वात्कार्यस्य। कारणमेव हि कार्यात्मता परिणमतऽइत्यतोऽप्रविष्टऽइव कार्योत्पत्तेरूर्ध्वं पृथक्कारणस्य पुनः प्रवेशोऽनुपपन्नः। न हि घटपरिणामव्यतिरेकेण सदो घटे प्रवेशोऽस्ति। यथा घटे चूर्णात्मना सदोऽनुप्रवेशः एवमन्येनात्मना नामरूपकार्येऽनुप्रवेशऽआत्मनऽइति चेत् श्रुत्यन्तराज्जानेन जीवेनात्मनानुप्रविश्येति। नैवं युक्तं एकत्वाद्ब्रह्मणः। सदात्मनश्चनेकत्वात्मावयवत्वाच्च युक्तो घटे सदश्चूर्णात्मनाऽनुप्रवेशः। सद्-

---

निर्वाच्यभावद्योतनेन जीवस्य ब्रह्मात्मतया प्रवेशवाक्यस्य तात्पर्यं दर्शयितुं विचारमारभते ॥

तन्वैतच्चिन्त्यमित्यादिना ॥ विमर्शे सति ब्रह्मश्रुत्यनुरोधात्स्रष्टुरेव प्रवेशऽइत्युक्तं सिद्धान्तिना ॥ पूर्ववाद्याह। ननु न युक्तमिति ॥ सृष्टिप्रवेशक्रिययोः पूर्वापरकालीनत्वसम्भवे सति कर्त्रैक्यं ब्रह्मश्रुत्या बोध्येत न तु प्रवेशस्योत्तरकालता सम्भवति। सृष्टिसमय एवोपादानस्य कार्यात्मतयावस्थितत्वादित्यर्थः ॥ एतदेव विवृणोति। कारणमेव हीति ॥ अप्रविष्टे यथा भुवनादौ देवदत्तस्य प्रवेशो दृष्टस्तथा कार्योत्पत्तेरूर्ध्वं पृथक्प्रवेशो न सम्भवतीत्यर्थः ॥ सिद्धान्तैकदेशिनां मतमुद्भाव्य पूर्ववादी दूषयति। यथा घट इत्यादिना ॥ स्रष्टुरन्यस्य वा प्रवेशो न सम्भवतीति चेत्कथं तर्हि प्रवेशो वाच्य इति सिद्धान्तैकदेश्याह। कथमिति ॥ नास्त्येवेति न वक्तव्यमित्याह। युक्तश्चेति ॥ स एवाह गतिम्। सावयवमेवेति ॥

सूर्यस्याप्रविष्टदेशवत्त्वाच्च । न त्वात्मनोऽएकत्वे सति निरवयवत्वादप्रविष्टदेशाभावाच्च प्रवेशोऽउपपद्यते कथं तर्हि प्रवेशः स्यात् । युक्तश्च प्रवेशः श्रुतत्वात्तदेवानुप्राविशदिति । सावयवमेवास्तु तर्हि सावयवत्वात् मुखे हस्तप्रवेशवन्नामरूपकार्ये जीवात्मनाप्रवेशो युक्तोऽएवेति चेत् । नाशून्यदेशत्वात् । नहि कार्यात्मना परिणतस्य नामरूपकार्यदेशव्यतिरेकेणात्मशून्यः प्रदेशोऽस्ति यं प्रविशेज्जीवात्मना । कारणमेव चेत्प्रविशेज्जीवात्मत्वं जह्यात् यथा घटो घटत्वप्रवेशे घटत्वं जहाति तदेवानुप्राविशदिति च श्रुतेर्न कारणानुप्रवेशो युक्तः । कार्यान्तरमेव स्यादिति चेत् । तदेवानुप्राविशदिति जीवात्मरूपं कार्यं नामरूपपरिणतं कार्यान्तरमेवापद्यत इति चेन्न । विरोधात् । नहि घटो घटान्तरमापद्यते व्यतिरेकश्रुतिविरोधाच्च जीवस्य । नामरूपकार्यव्यतिरेकानुवादिभ्यः श्रुतयो विरुद्ध्येरन् । तदापत्तौ मोक्षासम्भवाच्च । नहि यतोमुच्यमानस्तदेवापद्यते । नहि मृङ्मुक्तापत्तिर्बद्धस्य तस्करादेः ॥

पूर्ववादी दूषयति । नाशून्यदेशत्वादिति ॥ कार्यात्मना परिणतस्य ब्रह्मणो नामरूपात्मकं कार्यमेव देशस्तद्व्यतिरेकेण न ह्यन्यः प्रदेशोऽस्ति । यत्कारणमेव कार्याकारेण परिणतं तत्प्रतिकार्यविशेषो जीवात्मना प्रवेक्ष्यतीति न शङ्कनीयमित्याह । कारणमेव चेदेति ॥ कार्यविशेषस्य प्रवेशमङ्गीकृत्य दूषणमुक्तं स न सम्भवति श्रुतिविरोधादित्याह । तदेवेति ॥ कारणपरामर्शकेन तच्छब्देन कार्यमुपलक्ष्य कार्यान्तरस्य तत्र प्रवेशो विधीयते । प्राप्तप्रवेशसम्भवात् । अतो न श्रुतिविरोध इति सिद्धान्तैकदेशिमतमङ्गीकृत्य दूषयति । कार्यान्तरमेवेत्यादिना ॥

वाह्यान्तर्भेदेन परिणतमिति चेत्तदेव कारणं ब्रह्म शरीरादाधारत्वेन तदन्तर्जीवात्मना ध्येयत्वेन च परिणमत इति चेन्न। वह्निष्ठस्य प्रवेशोपपत्तेः नहि यो यस्यान्तःस्थः स एव प्रविष्ट उच्यते। वह्निष्ठस्यानुप्रवेशः स्यात्प्रवेशशब्दार्थस्यैवं दृष्टत्वात्। यथा गृहं कृत्वा प्राविशदिति। जलसूर्य्यकादिप्रतिबिम्बवत्प्रवेशः स्यादिति चेन्न। अपरिच्छिन्नत्वादमूर्त्तत्वाच्च। परिच्छिन्नस्य मूर्त्तस्यान्यस्यान्यत्र प्रसादस्वाभाविके जलादौ सूर्य्यकादिप्रतिबिम्बोदयः स्यात्। न त्वात्मनोऽमूर्त्तत्वादाकारादिकारणस्यात्मनो व्यापकत्वात्। तद्विप्रकृष्टदेशप्रतिबिम्बाधारवस्त्वभावाच्च प्रतिबिम्बवत्प्रवेशो न युक्तः। एवं तर्हि नैवास्ति प्रवेशो न च गत्यन्तरमुपलभामहे। तदेवानुप्राविशदिति च श्रुतेः। श्रुतिश्च नोऽतीन्द्रियविज्ञानोत्पत्तौ निमित्तम्। नचास्माद्वाक्याद्यत्नवतामपि विज्ञानमुपपद्यते। हन्त तर्ह्यनर्थकत्वादपोह्यमेतद्वाक्यम्। तत्सृष्ट्वा तदेवानुप्राविशदिति न। अन्यार्थ

कारणवाचकेन तच्छब्देन कार्यलक्षणायामविवक्षितलक्षणा चेत् प्रसज्यते तर्हि कारणपर एव तच्छब्दोऽस्त्वित्याह अन्यः सिद्धान्तैकदेशी। वाह्येति॥ अस्मिन्पक्षे प्रवेशश्रुतेर्मुख्यार्थो न लभ्येतेत्याह। न वह्निष्ठेति॥ अन्यस्य वेदान्तिनो मतमुद्भाव्य दूषयति। जल इत्यादिना॥ एवं सिद्धान्तैकदेशीयं निरस्य पूर्ववाद्युपसंहरति। एवं तर्हीति॥ नैवास्ति प्रवेशो ब्रह्मणः ततोऽन्यस्यापि प्रवेशो न सम्भवतीत्युक्तमित्याह। न चेति॥ इतरस्यापि प्रवेशः कल्पयितुं न शक्यत इत्याह। तदेवानुप्राविशदिति॥ सा च श्रुतिः स्रष्टुः प्रवेशमाह। सा चास्माकं मीमांसकानां प्रमाणं ततस्तद्विरोधे नान्यस्य प्रवेशकल्पना युक्तेति

तदनुप्रविश्य । सच्च त्यच्चाभवत् । निरुक्तञ्चा-

त्वात् । किमर्थमस्थाने चर्चा प्रकृतोऽप्यन्यो विवक्षितोऽस्य वाक्यस्यार्थोऽस्ति स स्मर्त्तव्यः । ब्रह्मविदाप्नोति परम् । सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायामिति । तद्विज्ञानं च विवक्षितं प्रकृतं तत् । ब्रह्मस्वरूपानुगमाय चाकाशाद्यन्नमयान्तं कार्य्यं प्रदर्शितं ब्रह्मानुगमश्चारब्धः । तत्रान्नमयादात्मनोऽन्योऽन्तर आत्मा प्राणमयस्तदन्तर्मनोमयो विज्ञानमय इति । विज्ञानगुहायां प्रवेशितस्तत्र चानन्दमयो विशिष्ट आत्मा प्रदर्शितः । अतः परमानन्दमयलिङ्गाधिगमद्वारेणानन्दविद्यावसान आत्मा । ब्रह्म पुच्छं प्रतिष्ठा सर्वविकल्पास्पदो निर्विकल्पोऽस्यामेव गुहायामधिगन्तव्य इति तत्प्रवेशः प्रकल्प्यते ॥

भावः । तर्हि श्रुतिशरणतयैव ब्रह्मण एव प्रवेशस्तव्यतामित्याशङ्क्याह । न चेति ॥ तस्मादन्यो मणिमविन्ददिति वदर्थशून्यमेवेदं वाक्यमिति निगमयति । हन्तेति ॥ यच्छब्दगोचरस्यार्थस्यासम्भवादर्थशून्यत्वं तात्पर्यगोचरस्य वा । नाद्यः । आकाशादेरविप्रकृष्टदेशेऽपि जलेमूर्त्तस्य प्रतिबिम्बभाववदमूर्त्तस्यापि ब्रह्मणोऽनिर्वाच्यावच्छिन्नेषु प्रतिबिम्बितहृदुत्तरकालमन्तःकरणादिषु प्रतिबिम्बाभावासम्भवादित्याह । नेति ॥ न द्वितीय इत्याह । अन्यार्थत्वादिति ॥ एतत्स्फुटयति । किमर्थमित्यादिना ॥ अतः परमिति ॥ बुद्धिगुहाप्रवेशादनन्तरमानन्दमय एव विशिष्टोऽर्थो विशेष्यस्य चिज्ज्ञातोर्लिङ्गविशिष्टस्य विशेष्याव्यभिचारदर्शनात्तदधिगमद्वारेणानन्दविद्यावसान आत्मब्रह्मरूपोऽस्यामेव गुहायामधिगन्तव्य इत्यभिप्रेत्य जले सूर्य्यप्रवेशवदनिर्वाच्यः प्रवेशोऽभिधीयत इत्यर्थः ॥

निरुक्तञ्च । निलयनञ्चानिलयनञ्च । विज्ञा-

नन्यत्रोपलभ्यते ब्रह्म निर्विशेषत्वात् विशेषसम्बन्धो ह्युपलब्धिहेतुर्दृष्टः । यथा राहोश्चन्द्रार्कविशिष्टसम्बन्धः । एवमन्तःकरणगुहात्मसम्बन्धो ब्रह्मण उपलब्धिहेतुः । सन्निकर्षादवभासात्मकत्वाच्चान्तःकरणस्य । यथाचालोकविशिष्टघटाद्युपलब्धिरेवं बुद्धिप्रत्ययालोकविशिष्टात्मोपलब्धिः स्यात्तस्मादुपलब्धिहेतौ गुहायां निहितमिति प्रकृतमेव । तद्वृत्तिस्थानीये त्विह पुनस्तत्सृष्ट्वा तदेवानुप्राविशदित्युच्यते । तदेवेदमाकाशादिकारणं कार्यं सृष्ट्वा तदनुप्रविष्टमिवान्तर्गुहायां बुद्धौ द्रष्टृश्रोत्मन्तृविज्ञातृत्येवं विशेषवदुपलभ्यते । तदेव तस्य प्रवेशस्तस्मादस्ति तत्कारणं ब्रह्म । अतोऽस्तित्वादस्तीत्येवोपलब्धव्यं तत् । तत्कार्यमनुप्रविश्य किं सच्च मूर्त्तञ्च त्यच्चामूर्त्तमभवत् । मूर्त्तामूर्त्ते ह्याकृते नामरूपे आत्मस्थेऽन्तर्गतेनात्मना व्याक्रियेते मूर्त्तामूर्त्तशब्दवाच्ये ते । आत्मना त्वप्रविभक्तदेशकाले इति ज्ञात्वा आत्मा तेऽभवदित्युच्यते । किञ्च निरुक्तञ्चानिरुक्तञ्च निरुक्तं नाम निकृष्टं समानासमानजातीयेभ्यो देशकाल

बुद्धिगुहायामेव ब्रह्मणोपलब्धिसम्भवात्तत्रैव प्रवेशोऽभिधातुमुचित इत्याह । न हीति ॥ नन्वन्यत्रोपलब्ध्यनर्हं ब्रह्म बुद्धावेव कथमुपलभ्यत इत्याशङ्क्योपाधेर्योग्यताविशेषसम्भवादित्याह । विशेषेति ॥ सन्निकर्षादित्यन्तःकरणसंसर्गादेव देहघटादिषु चैतन्याभिव्यक्तिर्न स्वतः । अन्तःकरणञ्चाव्यवधानेनैव चैतन्याभिव्यञ्जकमन्वयव्यतिरेकाभ्यामित्यर्थः । यथा चाऽलब्धस्वभावके घटादौ सुखं न प्रतिबिम्बिते जलादौ स्वच्छस्वभावके

नञ्चाविज्ञानञ्च । सत्यञ्चानृतञ्च सत्यमभवत् ।

विशिष्टतयेदं तदित्युक्तं निरुक्तमनिरुक्तं तद्विपरीतं निरुक्तानिरुक्तेऽपि मूर्त्तामूर्त्तयोरेव विशेषणे । यथा सच्च त्यच्च प्रत्यक्षपरोक्षे । तथा निलयनं चानिलयनं च । निलयनं नीडं आश्रयो मूर्त्तस्यैव धर्म्मः । अनिलयनं तद्विपरीतममूर्त्तस्यैव धर्म्मः । त्यदनिरुक्तानिलयान्यमूर्त्तत्वेऽपि व्याकृतविषयाण्येव । सर्गोत्तरकालभावश्रवणात् । त्यदिति प्राणाद्यनिरुक्तं तदेवानिलयनञ्च । अतो विशेषणान्यमूर्त्तस्य व्याकृतविषयाण्येवैतानि । विज्ञानं चेतनमविज्ञानं तद्रहितमचेतनं पाषाणादि सत्यञ्च व्यवहारविषयमधिकारान्न परमार्थसत्यमेकमेव हि परमार्थसत्यं ब्रह्म । इह पुनर्व्यवहारविषयमापेक्षिकं सत्यं मृगतृष्णिकाद्यनृतापेक्षयोदकादि सत्यमुच्यते । अनृतं च तद्विपरीतम् । किं पुनरेतत्सर्वमभवत्परमार्थसत्यं किं पुनस्तद्ब्रह्म । सत्यं ज्ञानमनन्तं ब्रह्मेति प्रकृतत्वात् ॥ यस्मात्सत्यदादिकं मूर्त्तामूर्त्तधर्मजातं यत्किञ्चेदं सर्वमविशिष्टं विकारजातमेकमेव सच्छब्दवाच्यं ब्रह्माभवत् । तद्व्यतिरेकेणाभावान्नामरूपविकारस्य । तस्मात्तद्ब्रह्म सत्य-

---

प्रतिबिम्बिते तथा सत्त्वप्रधानस्यान्तःकरणप्रसादस्याभाव्याद्दृष्टते । तत्र ब्रह्मोपलब्धिरित्याह । अवभासात्मकत्वाच्चेति ॥ किञ्च यथा जाड्यांशेऽन्तःकरणस्यैव प्रत्ययाकारपरिणतस्याज्ञानलक्षणावरणाभिभवसमर्थं आलोकोऽङ्गीक्रियते तथा जाड्यांशेऽन्तःकरणस्यैव प्रत्ययाकारपरिणतस्याज्ञानलक्षणावरणाभिभवसामर्थ्यमङ्गीकर्त्तव्यमित्याह । अथा चेति ॥

यदिदं किञ्च। तत्सत्यमित्याचक्षते। तदप्येष श्लोको भवति ॥ इति षष्ठोऽनुवाकः ॥ ६ ॥

मित्याचक्षते। ब्रह्मविदोऽस्ति नास्तीत्यनुप्रश्नः प्रकृतस्यास्य प्रतिवचनविषय एतदुक्तमात्मा कामयत बहु स्यामिति। स यथा कामयाकाशादिकार्यं सत्यादिलक्षणं सृष्ट्वा तदनुप्रविश्य पञ्चीकृत्य पञ्चात्मानो विजानन् बहुभवत्तस्मात्तदेदमाकाशमाकाशादिकारणं कार्यस्य परमे व्योमन् हृदयगुहायां निहितं तत्प्रत्ययावभासविशेषेणोपलभ्यमानमस्तीत्येवं विजानीयादित्युक्तं भवति। तदेतस्मिन्नर्थे ब्राह्मणोक्तो एष श्लोको मन्त्रो भवति। यथा पूर्वेष्वन्नमयाद्यात्मप्रकाशकाः पञ्चस्वेवं सर्वान्तरतमात्मास्तित्वप्रकाशकोऽपि मन्त्रः कार्यद्वारेण भवति ॥ इति षष्ठोऽनुवाकः ॥ ६ ॥

निलयनं गृहप्रासादादिमूर्त्तसन्निवेशविशेषेऽवयवसंस्थानविशेषराहित्यमनिलयनमनिरुक्तत्वाद्यमूर्त्तधर्मवद्ब्रह्मण एव किं न स्यादित्यत आह। त्वदनिरुक्तानिलयनानीति ॥ तत्सत्यमित्याचक्षत इत्यस्योपपत्तिमाह। यस्मादिति ॥ पदानि व्याख्याय प्रकृतानुप्रश्ननिराकरणे प्रकरणस्य तात्पर्यं स्फोऽकामयतेत्यादेर्दर्शयति। अस्ति नास्तीत्यादिना ॥ तस्या बुद्धिगुहायाः प्रत्ययाः अहं कर्त्ता भोक्तेत्यादयस्त एवावभासविशेषास्तैर्व्यज्यमानं विशिष्टधर्मस्य विषयत्वेऽपि रूढ्या स्वविषयत्वादित्यर्थः ॥ इति षष्ठोऽनुवाकः ॥ ६ ॥

असद्वा इदमग्र आसीत्। ततो वै सद्-
जायत। तदात्मानꣳ स्वयमकुरुत। तस्मा-
त्तत्सुकृतमुच्यत इति। यद्वै तत्सुकृतम्। रसो वै

असद्वा इदमग्र आसीत्। असदिति व्याकृतनामरूप-
विशेषविपरीतरूपम्। अविकृतं ब्रह्मोच्यते। न पुनरत्यन्तमे-
वासत्। न ह्यतः सज्जन्मातीतमिति नामरूपविशेषवद्या-
कृतं जगदग्रे पूर्वं प्रागुत्पत्तेः। ब्रह्म वा सच्छब्दवाच्यमासीत्ततो
ऽसतो वै सत्प्रविभक्तनामरूपविशेषमजायतोत्पन्नम्। किन्ततः
प्रविभक्तकार्य्यमिति पितुरिव पुत्रो नेत्याह। तदसच्छब्द-
वाच्यं स्वयमेवात्मानमेवाकुरुत कृतवत्। यस्मादेवं तस्मात्
तद्ब्रह्मैव सुकृतं स्वयं कर्तृ उच्यते। स्वयं कर्तृ ब्रह्मेति प्रसिद्धं
लोके सर्वस्य कारणत्वात्। यस्माद्वा स्वयमकरोत्सर्वं सर्वा-
त्मना तस्मात्पुण्यरूपेणापि तदेव ब्रह्म कारणं सुकृतमुच्यते।
सर्वथापि तु फलसम्बन्धादिकारणं सुकृतशब्दवाच्यं प्रसिद्धं
लोके। यदि पुण्यं यदि वान्यस्मा प्रसिद्धिर्नित्ये चेतनवत्का-
रणे सत्युपपद्यते। तस्मादस्ति तद्ब्रह्म सुकृतप्रसिद्धेः। इत-
श्चास्ति रसत्वात्। कुतो रसत्वप्रसिद्धिर्ब्रह्मण इत्यत आह।
यद्वै तत्सुकृतं रसो वै सः। रसो नाम तृप्तिहेतुरानन्दकरो
मधुराम्लादिः प्रसिद्धो लोके। रसमेवायं लब्ध्वा प्राप्या-

सुकृतमिति क्तप्रत्ययः। सुष्ठु क्रियत इति कर्म्माभिधायकोऽपि छा-
न्दस्या प्रक्रियया सुष्ठु करोतीति कर्त्तरि व्याख्यातः॥ एकार्थवृत्तित्वे-
नेत्येकप्रयोजनसाधनत्वेन परस्परायत्तेत्यर्थः। अन्यत्रेति गृहप्रासादा-

सः। रसꣳ ह्येवायं लब्ध्वानन्दी भवति। को ह्येवान्यात्कः प्राण्यात्। यदेष आकाश आनन्दो न स्यात्। एष ह्येवानन्दयाति। यदा ह्येवैष

नन्दी सुखी भवति नासत आनन्दहेतुत्वं दृष्टं लोके। बाह्यानन्दसाधनरहिता अप्यनीहा निरेषणा ब्राह्मणा बाह्यरसलाभादिरसानन्दा दृश्यन्ते विद्वांसो नूनम्। ब्रह्मैव रसस्तेषाम्। तस्मादस्ति तेषामानन्दकारणं रसवद्ब्रह्म॥ इतश्चास्ति कुतः। प्राणनादिक्रियादर्शनात्। अयमपि हि पिण्डो जीवतः प्राणेन प्राणिति अपानेनापानिति। एवं वायवीया ऐन्द्रियकाश्च चेष्टाः संहतैः कार्यकारणैर्निर्वर्त्त्यमाना दृश्यन्ते। तच्चैकार्थवृत्तित्वेन संहननं संहननान्तरेणाचेतनं संहतं सम्भवति। अन्यत्वादर्शनात्। तदाह यद्यदि एष आकाशे परमे व्योम्नि गुहायां निहित आनन्दो न स्यान्न भवेत्को ह्येव लोकेऽन्यादपानचेष्टां कुर्यादित्यर्थः। कः प्राण्यात् प्राणनं कुर्यात्तस्मादस्ति तद्ब्रह्म। यदर्थाः कार्यकारणप्राणनादिचेष्टाः तत्कृत एवानन्दो लोकस्य। कुतः। एष ह्येव पर आत्मानं दयाति आनन्दयति सुखयति लोकं धर्मानुरूपम्। स एवात्मानन्दरूपोऽविद्यया परिच्छिन्नो बिभायते प्राणिभिरित्यर्थः। भयाभयहेतुत्वाद्विद्वद्विदु-

---

दिषु स्वतन्त्रं स्कन्धादनारभ्यं स्वामिनमन्तरेण संहननस्यादर्शनात्कार्यकारणसङ्घातेऽपि विलक्षणः स्वामी शरीरेऽव्ययादिभिरुपचयादिरहितोऽवगम्यते। स च चेतनत्वेन भेदाभावाद्ब्रह्मैवेति तदस्तित्वसिद्धि-

एतस्मिन्नदृश्येऽनात्मेऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते। अथ सोऽभयं गतो भवति॥ यद्

धोरस्ति तद्ब्रह्म। सदवस्थाश्रयणेन ह्यभयं भवति। नासदवस्थाश्रयणेन भयनिवृत्तिरुपपद्यते। कथमभयहेतुत्वमित्युच्यते। यदा ह्येव यस्मादेष साधक एतस्मिन् ब्रह्मणि किं विशिष्टेऽदृश्ये दृश्यं नाम दृष्टव्यं विकारो दर्शनार्थत्वाद्विकारस्य। न दृश्यमदृश्यमविकार इत्यर्थः। एतस्मिन्नदृश्येऽविकारेऽविषयभूतेऽनात्मेऽशरीरे यस्मादृश्यं तस्मादनात्मं यस्मादनात्मं तस्मादनिरुक्तम्। विशेषो हि निरुच्यते। विशेषश्च विकारः। अविकारश्च ब्रह्म। रूपविकारहेतुत्वात्तस्मादनिरुक्तम्। यत एवं तस्मादनिलयनं निलयनं नीड आश्रयो न निलयनमनाधारं तस्मिन्नेतस्मिन्नदृश्येऽनात्मेऽनिरुक्तेऽनिलयने सर्वकार्यधर्मविलक्षणे ब्रह्मणीति वाक्यार्थः। अभयमिति क्रियाविशेषणम्। अभयमिति च लिङ्गान्तरं परिणम्यते। प्रतिष्ठां स्थितिमात्मभावं विन्दते लभते। अथ तदा स तस्मिन्नानात्वस्य भयहेतोरविद्याकृतस्यादर्शनादभयं गतो भवति। स्वरूपप्रतिष्ठो ह्यसौ यदा भवति तदा नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति। अन्यस्य ह्यन्यतो भयं भवति नात्मत एवाऽऽत्मनो भयं

रित्यर्थः॥ दासोऽहं तस्य देवस्य ममाराध्यः परमेश्वर इति भेदं विद्वान् कथमत्र इत्युच्यते तत्राह। असौ योऽयमिति॥ यथा चन्द्रभेदं पश्यन्नपि विद्वानुच्यतेऽतत्त्वदर्शित्वात्तथेत्यर्थः॥ कथं तर्हि तस्य भय-

ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते। अथ तस्य भयं भवति। तत्वेव भयं विदुषो मन्वानस्य। तदप्येष श्लोको भवति ॥ इति सप्तमोऽनुवाकः ॥ ७ ॥

युक्तं तस्मादात्मैवात्मनोऽभयकारणम्। सर्वतो हि निर्भया ब्राह्मणा दृश्यन्ते सत्सु भयहेतुषु तद्युक्तं असति भयत्राणे ब्रह्मणि। तस्मात्तेषामभयदर्शनादस्ति तदभयकारणं ब्रह्मेति। कदासावभयं गतो भवति साधको यदा नान्यत्पश्यत्यात्मनि चान्तरं भेदं न कुरुते तदा ऽभयं गतो भवतीत्यभिप्रायः। यदा पुनरविद्यावस्थायां हि यस्मादेषो ऽविद्यावान् अविद्यया प्रत्युपस्थापितं वस्तु तैमिरिकद्वितीयचन्द्रवत्पश्यत्यात्मनि चैतस्मिन् ब्रह्मणि। उदपि अरमल्पमप्यन्तरं क्षिद्रं भेददर्शनं कुरुते। भेददर्शनमेव ह्यन्तःकरणमल्पभेदं पश्यतीत्यर्थः। अथ तस्माद्भेददर्शनात् हेतोरस्य भेददर्शिन आत्मनो भयं भवति। तस्मादात्मैवात्मनो भयकारणमविदुषस्तदेतदेव तद्ब्रह्म तु एव भयं भेददर्शिनो विदुष ईश्वरोऽन्यो मतोऽहमन्य; संसारीत्येवं विदुषो भेददृष्टनीश्वराख्यं तदेव ब्रह्मात्मनमप्यन्तरं कुर्वतो भयं भवत्येकत्वेनामन्वानस्य। तस्माद्विद्वानपि अविद्वानेव। असौ योऽयमेकमभिन्नमात्मतत्त्वं न पश्यति उच्छेदहेतुदर्शनाद्युच्छे-

---

सम्भावनेत्यत आह। उच्छेदेति ॥ संहर्त्ता हि परमेश्वरो मां संहरिष्यति नरके वा निक्षेक्ष्यतीति पश्यतो भयं भवतीत्यर्थः ॥ ब्रह्मैवोच्छेद-

भीषाऽस्माद्वातः पवते। भीषोदेति सूर्य्यः। भीषास्मादग्निश्चेन्द्रश्च। मृत्युर्धावति पञ्चम इति। सैषानन्दस्य मीमाःसा भवति। युवा स्यात् साधु युवाध्यायिकः। आशिष्टो दृढिष्ठो बलिष्ठः। तस्येयं पृथिवी सर्व्वा वित्तस्य पूर्णा स्यात्। स

द्याभिमतस्य भयं भवति। अनुच्छेद्यो ह्युच्छेदहेतुसत्ता-सत्युच्छेदहेतावनुच्छेद्ये तद्दर्शनकार्य्यं भयं युक्तम्। सर्वञ्च जगद्भयवद्दृश्यते। तस्माज्जगतो भयदर्शनाद्भ्रम्यते नूनं तदस्ति भयकारणमुच्छेदहेतुरनुच्छेदात्मकं यतो जगद्बिभेतीति। तदेतस्मिन्नर्थ्ये एष श्लोको भवति॥ इति सप्तमोऽनुवाकः॥७॥

भीषा भयेनास्माद्वातः पवते। भीषोदेति सूर्य्यः। भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम इति। वातादयो हि महार्हाः स्वयमीश्वरा॥ सन्तः पवनादिकार्य्येष्वायासबाहुल्येषु नियताः प्रवर्त्तन्ते। भयकारणमानन्दं ब्रह्म। तस्मात्स ब्रह्मण आनन्दस्यैतद्भ्रमम्। प्रशास्तरि सति यस्मिन्नियमेन तेषां प्रवर्त्तनं तस्मादस्ति भयकारणं तेषां प्रशास्तृ ब्रह्म। यतस्ते भृत्या इव राज्ञः आत्माद्ब्रह्मणो भयेन प्रवर्त्तन्ते।

हेतुः कुत इत्यत आह। अनुच्छेद्यो हीति॥ उच्छेदहेतोरप्युच्छेदत्वेऽनवस्थाप्रसङ्गात्नित्यत्वं वक्तव्यं तच्च ब्रह्मणो नान्यत्रभाव्यत इत्यर्थः॥ इति सप्तमोऽनुवाकः॥ ७॥

तच्च भयकारणं ब्रह्मानन्दसूत्रं यदेष आकाश आनन्दो न स्यादिति। अतानन्दश्च लोकजन्यः प्रसिद्धस्ततो विचारमारभते। तस्माद्भेत्यादिना॥

एको मानुष आनन्दः। ते ये शतं मानुषा आनन्दाः। स एको मनुष्यगन्धर्वाणामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं मनुष्यगन्धर्वाणामानन्दाः। स एको देवगन्धर्वाणामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं देवगन्धर्वा-

---

तत्र भयकारणमानन्दं ब्रह्म। तस्यास्य ब्रह्मण आनन्दस्यैषा मीमांसा विचारणा भवति। किमानन्दस्य मीमांस्यमित्युच्यते। किमानन्दो विषयविषयिसम्बन्धजनितो लौकिकानन्दवदाहोस्वित्स्वाभाविक इत्येवमेषानन्दस्य मीमांसा। तत्र लौकिक आनन्दो बाह्याध्यात्मिकसाधनसम्पत्तिनिमित्त उत्कृष्टः। स य एष निर्दिश्यते ब्रह्मानन्दानुगमार्थम्। अनेन हि प्रसिद्धेनानन्देन व्याहृत्तविषयबुद्धिगम्य आनन्दोऽनुगन्तुं शक्यते। लौकिकोऽप्यानन्दो ब्रह्मानन्दस्यैव मात्राऽविद्यया तिरस्क्रियमाणोऽविज्ञातो उत्कृष्यमाणायां चाविद्यायां ब्रह्मादिभिः कर्मवशाद्यथाविज्ञानं विषयादिसाधनसम्बन्धवशश्च विभाव्यमानाच्च लोकेऽनवस्थितो लौकिकः सम्पद्यते स एवाविद्याकामकर्मापकर्षेण मनुष्यगन्धर्वाद्युत्तरोत्तरभूमिष्वकामहतविदुच्छ्रोत्रियप्रत्यक्षो वि-

---

ब्रह्मानन्दस्य चेन्मीमांसा प्रस्तुता किमर्थस्तर्हि सार्वभौमानन्दाद्युपन्यासस्तत्राह। तत्र लौकिक इत्यादिना॥ लौकिक आनन्दः क्वचित्काष्ठां प्राप्तः। सातिशयत्वात्परमाणुवदिति ब्रह्मानन्दानुमानार्थः। लौकिकोप-

णामानन्दाः। स एकः पितृणां चिरलोकलोकानामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं पितृणां चिरलोकलोकानामानन्दाः। स एक आजानजानां देवानामानन्दः। श्रोत्रियस्य

भाव्यते शतगुणोत्तरोत्तरोत्कर्षेण यावद्धिरण्यगर्भस्य ब्रह्मण आनन्द इति। निरस्तोऽविद्याकृते विषयविषयि-विभागे विद्यया स्वाभाविकः परिपूर्णएक आनन्दोऽद्वैते-भवतीत्येतदर्थं विभावयिष्यन्नाह। युवा प्रथमवयाः साधु-युवेति। साधुश्चासौ युवा चेति यूनो विशेषणम्। युवाप्यसाधु-भवति साधुरप्ययुवाऽतो विशेषणं युवा स्यात्साधुयुवेति। आध्यायिकोऽधीतवेदः। आशिष्ठ आशासितृतमः दृढिष्ठो दृढतमः। बलिष्ठो बलवत्तमः एवमाध्यात्मिकसाधनस-म्पन्नः। तस्येयं पृथिवी उर्वी सर्वा वित्तस्य वित्तेनोपभोग-साधनेन दृष्टार्थेन च कर्मसाधनेन सम्पन्ना पूर्णा राजा पृथिवीपतिरित्यर्थः। तस्य च य आनन्दः स एको मानुषो मनुष्याणां प्रकृष्ट एक आनन्दः। ते ये शतं मानुषा आनन्दाः स एको मनुष्यगन्धर्वाणामानन्दः। मानुष्यादा-नन्दाच्छतगुणेनोत्कृष्टो मनुष्यगन्धर्वाणामानन्दो भवति।

भ्यास इत्यर्थः। विषयेभ्यो व्यावृत्ताः व्यावृत्तविषया अविषयब्रह्मात्मै-कत्वदर्शिनस्तद्बुद्धिगोचरा इत्यर्थः॥ प्रकारान्तरेण ब्रह्मानन्दानुगम-माह। लौकिकोऽरीत्यादिना॥ मनुष्यगन्धर्वानन्दस्योत्कृष्टत्वे निमित्त-माह। ते ह्यन्धर्वानादीति॥ प्रथममकामहतायश्रुतस्य तात्पर्यमाह। प्रथममिति। यदि प्रथमपर्याय एवाकामहतो श्रूयेत तदा तस्यैव सार्व-

चाकामहतस्य। ते ये शतमाजानजानां देवगन्धर्वाणामानन्दाः। स एकः कर्म्मदेवानामानन्दः। ये कर्म्मणा देवानपि यन्ति। श्रोत्रियस्य चाकाम-

---

मनुष्याः सन्तः कर्मविद्याविशेषाद्गन्धर्वत्वं प्राप्ताः मनुष्यगन्धर्वाः ते ह्यन्तर्धानादिशक्तिसम्पन्नाः सूक्ष्मकार्य्यकारणाः। तस्मात्प्रतिघातात्पत्वं तेषां द्वन्द्वप्रतिघातशक्तिसाधनसम्पत्तिश्च। ततोऽप्रतिहन्यमानस्य प्रतिकारवतो मनुष्यगन्धर्वस्य स्याच्चित्तप्रसादः। तस्य प्रसादविशेषात्सुखविशेषाभिव्यक्तिः। एवं पूर्वस्याः पूर्वस्या भूमेरुत्तरस्यामुत्तरस्यां भूमौ प्रसादविशेषतः शतगुणेनानन्दोत्कर्ष उपपद्यते। प्रथमन्वकामहतग्रहणं मनुष्यविषयभोगकामनाभिहतस्य श्रोत्रियस्य मनुष्यानन्दाच्छतगुणेनानन्दोत्कर्षो मनुष्यगन्धर्वेण तुल्यो वक्तव्य इत्येवमर्थं साधु युवाध्यायिक इति श्रोत्रियत्वाद्दृजिनत्वे सति ह्यविशिष्टे सर्वत्र। अकामहतत्वं तु विषयोत्कर्षापकर्षतः सुखोत्कर्षापकर्षाय विशिष्यते। अतोऽकामहतग्रहणम्। तद्विशेषतः शतगुणात् सुखोत्कर्षोपलब्धेरकामहतत्वस्य परमानन्दप्राप्तिसाधनत्वविधानार्थम्। व्याख्यातमन्यत्। देवगन्धर्वा जातित

भौमानन्देन तुल्य आनन्दः स्यात्तदा च व्याघातो भवेत्। मानुषानन्दनिस्यन्दो मानुषानन्दभागभागी चेति। ततो मानुष्यगन्धर्वानन्देन तुल्यमानन्दं तस्य दर्शयितुं प्रथमपर्य्याये तदग्रहणमित्यर्थः। अदृजिनत्वमपापत्वं यथोक्तकारित्वं तत्साधुपदाल्लभ्यत इत्यर्थः॥ देवास्त्रयस्त्रिंशत्। अष्टौ

हतस्य । ते ये शतं कर्म्मदेवानामानन्दाः । स एको देवानामानन्दः । श्रोत्रियस्य चाकाम-

---

एव । चिरलोका इति पितॄणां विशेषणम् । चिरकालस्थायी लोको येषां पितॄणां ते चिरलोका इति । आजान इति देवलोकस्तस्मिन्नाजाने जाता आजानजा देवाः स्मार्त्तकर्म्मविशेषतो देवस्थानेषु जाताः । कर्म्मदेवा ये वैदिकेन कर्मणाग्निहोत्रादिना केवलेन देवानपि यन्ति । देवा इति त्रयस्त्रिंशद्विर्भुजः । इन्द्रस्तेषां स्वामी तस्याचार्य्यो बृहस्पतिः । प्रजापतिर्विराड् चैलोक्यशरीरो ब्रह्मा । समष्टिव्यष्टिस्वरूपः संसारमरणानलव्यापी । यत्रैत आनन्दभेदा एकतां गच्छन्ति धर्मश्च तन्निमित्तो ज्ञानञ्च तद्विषयकामहतत्वं च निरतिशयं यत्र स एष हिरण्यगर्भो ब्रह्मा तस्यैष आनन्दः । श्रोत्रियेणाहृजिनेनाकामहतेन च सर्वतः प्रत्यक्षमुपलभ्यते । तस्मादेतानि त्रीणि साधनानीत्यव

वसवः । एकादश रुद्राः । द्वादशादित्याः । इन्द्रः प्रजापतिश्चेति ॥ यदर्थं मीमांसारब्धा तस्य निरतिशयानन्दस्य सिद्धौ वाक्यतात्पर्यनिश्चयेतिशब्दः । तस्याकामहतत्वेति ॥ तस्य ब्रह्मणो हिरण्यगर्भस्यानन्दस्तदुपासकप्रत्यक्षो यस्य मात्रा स एष परमानन्दः स्वाभाविक इति सम्बन्धः ॥ हिरण्यगर्भानन्दस्य मात्रत्वे श्रुत्यन्तरं प्रमाणयति । एतस्यैवेति ॥ न केवलं हिरण्यगर्भानन्द एव मात्रा यस्य प्रागुपन्यस्तः सार्वभौमाद्यानन्दः स एष यस्य मात्रा प्रविभक्ता नानात्वमापन्ना सतो यत्र निरतिशयानन्देऽकामहतब्रह्मविन्मात्रत्वे कैवल्य एकताङ्गतेति योजना ।

हतस्य। ते ये शतं देवानामानन्दाः। स एक इन्द्रस्यानन्दः। श्रोत्रियस्य चाकामहतस्य। ते

गम्यते। तत्र श्रोत्रियत्वादृजिनत्वे नियतेऽकामहतत्वं त्वत्कृष्यते इति प्रकृष्टसाधनतागम्यते। तस्य तस्याकामहतत्वं प्रकर्षतश्चोपलभ्यमानः श्रोत्रियप्रत्यक्षो ब्रह्मण आनन्दो यस्य परमानन्दस्य मात्रा एकदेशः। एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुत्यन्तरात्। स एष आनन्दो यस्य मात्रा समुद्राम्भस इव विष्णुषः प्रविभक्तायत्रैकताङ्गता स एष परमानन्दः स्वाभाविकोऽद्वैतत्वात् आनन्दानन्दिनोश्चाविभागोऽत्र॥ तदेतन्मीमांसाफलमुपसंहियते स यश्चायं पुरुष इति॥ गुहायां निहितः परमे व्योम्याकाशादिकार्यं सृष्ट्वान्नमयान्तं तदेवानुप्रविष्टः स य इति निर्दिश्यते। स एकोऽसावयं पुरुषे यश्चासावादित्ये यः परमानन्दः श्रोत्रियप्रत्यक्षो निर्दिष्टो यस्यैकदेशं ब्रह्मादीनि भूतानि सुखा-

---

अकामहतप्रत्यक्षत्वाभिधानाद्भेदप्राप्तिं निरस्यति। आनन्दानन्दिनोरिति। प्रत्यक्षत्वाभिधानमज्ञानसंशयादिव्यवधानाभावाभिप्रायं न तु विषयविषयिभावाभिप्रायम्। अदृश्येऽनात्म्ये उदरमन्तरं कुरुत इत्यादिना निषेधादित्यर्थः। मीमांसया निरतिशयानन्दं ब्रह्माप्नोतिनिर्द्धारितम्। तस्याकामहतप्रत्यक्षाभिधानादभेदसिद्धिः। न हि परानन्दः परस्य प्रत्यक्षो भवति। तस्माच्चिरतिशयानन्दब्रह्मैकत्वं जीवस्य ब्रह्मविदाप्नोति परमित्युपक्रान्तं मीमांसया च सिद्धमुपसंहियत इत्यर्थः॥ आदित्यप्रकृष्णस्याधिदैवकोपाधिलक्षणार्थस्याविवक्षितत्वं दर्श-

ये शतमिन्द्रस्यानन्दाः। स एको बृहस्पतेरानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं

र्हीण्युपजीवन्ति स यश्चासावादित्ये इति स एकः। तं मीमांसथा च सिद्धमुपसंहृतो भिन्नप्रदेशस्थघटाकाशाकाशैकत्ववत्। ननु तन्निर्देशे स यश्चायं पुरुष इत्यविशेषतोऽध्यात्मं न युक्तो निर्देशो यश्चायं दक्षणेऽक्षन्निति तु युक्तः प्रसिद्धत्वात्। न पराधिकारात्। परो ह्यात्मात्राधिकृतोऽदृश्येऽनात्म्ये भोक्तर्यात्मत्वेन भोगसाधनतः पवते सैषानन्दस्य मीमांसेति। न ह्यकस्मादप्रकृतो युक्तो निर्देष्टुं परमात्मविज्ञानं च विवक्षितम्। तस्मात्पर एव निर्दिश्यते स एक इति। नन्वानन्दस्य मीमांसा प्रकृता तस्या अपि फलमुपसंहर्तव्यमभिन्नः स्वाभाविकः स्वानन्दः परमात्मैव न विषयविषयिसम्बन्धजनित इति। ननु तदनुरूप एवायं निर्देशः स यश्चायं पुरुषे यश्चासावादित्ये स एक इति भिन्नाधिकरणस्थविशेषोपमर्दनेन। नन्वेवमप्यादित्यविशेषणग्रहणमनर्थकम्। नानर्थकम्। उत्कर्षापकर्षापोहार्थत्वात्।

वित्तं चोद्यसङ्गावयति। नन्विति॥ य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षणेऽक्षन् पुरुष इत्यादौ श्रुत्यन्तरे मण्डलस्थदक्षिणाक्षिस्थैक्यस्य प्रसिद्धत्वादिहाध्यादित्यस्थैक्यनिर्देशे दक्षिणाक्षिग्रहणं युक्तमित्यर्थः। अध्यात्ममधिदैवतं च लिङ्गात्तत्रोपासनविवक्षायां तथा स्यादेह तद्विवक्षितमित्याह। न पर इति॥ य एवं विद्वान् निरतिशयानन्दस्वरूपोपाधौ प्रतिबिम्बितः स एव निकृष्टोपाधौ शिरःपाण्यादिमति पुरुषे प्रतिबिम्बित इति परमानन्दमपेक्ष्य समत्वं विधिश्रुत्योः स्वभावैक्यं विवक्षित-

बृहस्पतेरानन्दाः। स एक प्रजापतेरानन्दः श्रोत्रियस्य चाकामहतस्य। ते ये शतं प्रजापते-

---

दैतस्य हि योमूर्त्तामूर्त्तलक्षणस्योत्कर्षः सवित्रभ्यन्तरगतः स चेत्पुरुषगतविशेषोपमर्देन परमानन्दमपेक्ष्य समो भवति न कश्चिदुत्कर्षोऽपकर्षो वा तां गतिं गतस्येत्युभयं प्रतिष्ठां विन्दत इत्युपपन्नम्। अस्ति नास्तीति अनुप्रश्नो व्याख्यातः। कार्य्यरसलाभप्राणनाभयप्रतिष्ठाभयदर्शनोपपत्तिभ्योऽस्खेव तदाकाशादिकारणं ब्रह्मेति अपाकृतोऽनुप्रश्न एको द्वावन्यावनुप्रश्नौ विद्वद्विदुषोर्ब्रह्मप्राप्तप्राप्तिविषयौ तत्र विद्वान् समश्नुते समश्नुत इत्यनुप्रश्नोऽन्यस्तदपाकरणायोच्यते। मध्यमोऽनुप्रश्नोऽन्यापकरणादेवापाकृत इति तदपाकरणाय न यत्यते। स यः कश्चिदेवं यथोक्तं ब्रह्मोत्कृज्योत्कर्षापकर्षमद्वैतं सत्यं ज्ञानमनन्तमसीति। एवं शब्दस्य प्रकृतपरामर्शार्थत्वात्। स किमस्माल्लोकात्प्रेत्य दृष्टादृष्टविषयसमुदायो ह्ययं लोकस्तस्मादस्माल्लोकात्प्रेत्य प्रत्यादृत्य निरपेक्षो भूत्वा एतं यथा व्याख्यातं अन्नमयमात्मान-

---

मित्यर्थः। वृत्तानुवादपूर्व्वकमुत्तरग्रन्थमवतारयति। अस्ति नास्तीति॥ सन्दिग्धं सप्रयोजनं च विचारमर्हति। अत्र च कस्मिन्पक्षे को दोषः को वा लाभ इत्याह। किन्नत इति॥ उभयत्रानुपपत्तिं संशयकारणमाह। यद्यन्यः स्यादिति॥ चोद्यसूत्रेण संशयव्याहृत्तिं प्रयोजनमाह। यद्युभयथेत्यादिना॥ एतदेव मम विचारारम्भकस्य सूत्रस्यायनं कल्याणं यन्नामैकत्ववादिनं त्वमात्थ ब्रूषेऽप्रतिपन्नवस्तुवादित्वादनेकत्ववादिनोऽप्येकस्य वस्तुनः सम्मतत्वादनेकवस्तुवादिनश्च बहवः प्रतिपत्ताः सन्ति

रानन्दा। स एको ब्रह्मण आनन्दः। श्रोचि-

सुपसङ्क्रामति विषयजातमन्नमयात्पिण्डान्मनो व्यतिरिक्तं न पश्यति सर्व्वं स्थूलभूतमन्नमयमात्मानं पश्यतीत्यर्थः॥ ततोऽभ्यन्तरमेतं प्राणमयं सर्व्वान्नमयात्मस्थमविभक्तम्। अथैतं मनोमयं विज्ञानमयमानन्दमयमात्मानमुपसंक्रामति। अथाऽदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते। तत्रैतच्चिन्त्यम्। कोऽयमेवंवित् कथं वा सङ्क्रामतीति। किं परस्मादात्मनोऽन्यः संक्रमणकर्त्ता प्रविभक्त उत स एवेति। किन्ततो यद्यन्यः स्याच्छ्रुतिविरोधः। तत्स्रष्ट्वा तदेवानुप्राविशत्। अन्योऽसावन्योऽहमस्मीति। न स वेद। एकमेवाद्वितीयं तत्त्वमसीति अथ स एवानन्दमयमात्मानमुपसङ्क्रामतीति कर्म्मकर्त्तृत्वानुपपत्तिः। परस्यैव च संसारित्वं पराभावो वा। यद्यप्युभयथा प्राप्तो दोषो न परिहर्त्तुं शक्यत इति व्यर्था चिन्ता। अथान्यतरस्मिन् पक्षे दोषाप्राप्तिस्तृतीये वाऽदृष्टे पक्षे स एव शास्त्रार्थ इति व्यर्थैव चिन्ता न तन्निर्द्धारणार्थत्वादर्थवत्येव चिन्ता। सत्यं प्राप्तो दोषो न शक्यः परिहर्त्तुमन्यतरस्मिंस्तृतीये वा पक्षेऽदृष्टेऽवृते व्यर्था चिन्ता स्यान्तु सोऽवधृत इति तद्-

---

मभेत्यर्थतोऽपि कल्याणमनेकत्वस्यान्योन्याश्रयादिदोषदुष्टत्वात्पूर्वपक्षनिराकरणेन सिद्धान्तोपपत्तेरेत्यर्थः॥ विचारारम्भमुपपाद्य सिद्धान्तमुपक्रमते। स एव तु स्यादिति॥ औपाधिकभेदभिन्नोऽप्येवंवित् स्वतः पर एव स्यादित्यर्थः॥ अविद्याध्यारोपिता ब्रह्मत्वव्यावृत्तिरेव ब्रह्मप्राप्तिर्विवक्षितेति फलवाक्यस्यैवमर्थता कथमवगम्यते न पुनरप्राप्ताप्राप्तिरि-

यस्य चाकामहतस्य। स यश्चायं पुरुषे। यश्चा-

वधारणार्थत्वादर्थवत्येवैषा चिन्ता। सत्यमर्थवती चिन्ता। शास्त्रावधारणार्थत्वात्। चिन्तयसि च त्वं तत्तु निर्णेष्यसि किं न निर्णेतव्यमिति वेदवचनं न कथं तर्हि वक्तृप्रतिपत्तित्वात् एकत्ववादी त्वं वेदार्थपरत्वात् बहवो हि नानात्ववादिनो वेदवाक्यात्स्वप्रतिपत्ता अतो ममाशङ्का ननिर्णेष्यसीत्येतदेव मे स्वस्त्ययनं यन्मामेकयोगिनमनेकयोगिवक्तृप्रतिपत्तमात्य अतो जेष्यामिसर्व्वानारभेच चिन्ताम्। स एव तु स्यात्तद्भावस्य विवक्षितत्वात्। तद्विज्ञानेन परमात्मभावो ह्यत्र विवक्षितो ब्रह्मविदाप्नोति परमिति। न ह्यन्यस्यान्यभावापत्तिरुपपद्यते॥ ननु तस्यापि तद्भावापत्तिरनुपपन्नैव। नाऽविद्याकृतानात्मापोहार्थत्वात्॥ या हि ब्रह्मविद्यया स्वात्मप्राप्तिरुपदिश्यते साऽविद्याकृतस्यान्नादिविशेषात्मन आत्मत्वेनाध्यारोपितस्यानात्मनोऽपोहार्था। कथमेवमर्थतावगम्यते विद्यामात्रोपदेशात्। विद्यायाश्च दृष्टं कार्य्यमविद्यानिवृत्तिस्तच्चेह विद्यामात्रमात्मप्राप्तौ साधनमुपदिश्यते मार्गविज्ञानोपदेशवदिति चेन्नदात्मत्वे विद्यामात्रसाधनोपदेशोऽहेतुः। कस्मात्। देशान्तरप्राप्तौ

त्याह। कथमिति॥ परिहरति। विद्यामात्रेति॥ अन्यथाप्युपपत्तिं दर्शयति। मार्गेति॥ गन्तुः स्वतो धामत्वाभावेऽपि यथा मार्गज्ञानोपदेशः सार्थकस्तथा जीवस्य स्वतो ब्रह्मत्वाभावेऽपि विद्योपदेशोऽभ्यासद्वारेण ब्रह्मप्राप्तिहेतुत्वादित्यर्थः॥ त्वं धामोऽसीति न तवोपदेशः स्वतोभेदोप-

सावादित्ये। स एकः। स य एवंवित्।

मार्गविज्ञानोपदेशदर्शनात्। न हि ग्राम एव गन्तेति चेत्। न वैधर्म्म्यात्। तत्र हि ग्रामविषयं विज्ञानं नोपदिश्यते तत्प्राप्तिमार्गविषयमेवोपदिश्यते विज्ञानं न तथेह ब्रह्मविज्ञानव्यतिरेकेण साधनान्तरविषयं विज्ञानमुपदिश्यते। उक्तकर्म्मादिसाधनापेक्षं ब्रह्मविज्ञानं परप्राप्तौ साधनमुपदिश्यत इति चेन्न। नित्यत्वान्मोक्षस्येत्यादिना प्रयुक्तत्वात्। श्रुतिश्च तत्स्रष्ट्वा तदेवानु प्राविशदिति कार्य्यस्य तदात्मत्वं दर्शयति। अभयप्रतिष्ठोपपत्तेश्च। यदि हि विद्यावान् स्वामनोऽन्यन्न पश्यति ततोऽभयं प्रतिष्ठां विन्दत इति स्याद्भयहेतोः परस्याभावात्। अन्यस्य चाविद्याकृतत्वे विद्ययाऽवस्तुत्वदर्शनोपपत्तिस्तद्वद्द्वितीयस्य चन्द्र-

---

देशः प्रतीयतेऽत उपदेश्यवैधर्म्म्यान्न दृष्टान्तो युक्त इत्याह। न वैधर्म्म्यादिति॥ यदि विदुषः सकाशादन्य ईश्वरो भयहेतुर्नास्ति का तर्हि गतिर्व्यतिरिक्तेश्वरदर्शनस्येत्याशङ्क्याह। अन्यस्य चेति॥ कल्पितभेदविशिष्टरूपेणेश्वरस्याविद्याकृतत्वे मिथ्यात्वे सति विद्यया तत्तावस्तुत्वदर्शनमुपपद्यते। ईश्वरो मम प्रशास्तेति मिथ्यैतद्यतस्तस्य मम चैकात्म्यमेव परमार्थमिति विद्वद्दृष्ट्या विशिष्टस्यासत्त्वमित्यर्थः। दृष्टान्तवैषम्यं शङ्कते। नैवमिति॥ यथा चन्द्रैकत्वदर्शनात् द्वितीयश्चन्द्रो न दृश्यते नैवं ब्रह्मविदा दृश्यते व्यतिरिक्तेश्वरः। प्रतिनियतप्रपञ्चावभासस्य भोजनादिप्रवृत्त्यनुपपत्त्या जीवन्मुक्तस्याप्यभ्युपगमात्प्रपञ्चनियमस्य चेश्वराधीनत्वाभ्युपगमादित्यर्थः॥ यद्यपि जागरे व्यतिरेकाभासदर्शनं विदुषस्तथापि न तद्भयकारणं नहि मायावी स्वविरचितव्याघ्राभासाद्बिभेति। अविदुषोऽपि

अस्माँल्लोकात्प्रेत्य। एतमन्नमयमात्मानमुपसङ्-

स्यासत्त्वं यदतैमिरिकेण चक्षुष्मता न गृह्यते नैवं गृह्यत इति चेन्न सुषुप्तसमाहितयोरग्रहणात्। सुषुप्तेऽग्रहणमत्यासक्तवदिति चेन्न। सर्वाग्रहणात्। जाग्रत्स्वप्नयोरन्यस्य ग्रहणात्सत्त्वमेवेति चेत् नाविद्याङ्गतत्वात्। जाग्रत्स्वप्नयोर्यदन्यग्रहणं जाग्रत्स्वप्नयोस्तदविद्याङ्गतमविद्याभावे ऽभावात्। सुषुप्तेऽग्रहणमप्यविद्याङ्गतमिति चेन्न। स्वाभाविकत्वात्। दृष्टस्य हितत्वमविक्रियापरानपेक्षत्वात् विक्रियानन्तत्वं परापेक्षत्वात्। न हि कारकापेक्षं वस्तुनस्त्वं सतो विशेषः, कारकापेक्षो विशेषश्च विक्रिया। जाग्रत्स्वप्नयोश्च ग्रहणं विशेषः। यद्धि यस्यान्यापेक्षं स्वरूपं तत्तस्य तत्त्वं यदन्यापेक्षं न तत्तत्त्वम्। अन्याभावेऽभावात्। तस्मात्स्वाभाविकत्वाज्जाग्रत्स्वप्नवन्न सुषुप्ते विशेषः। येषां

व्यतिरेकदर्शनं न सदातनमित्याह। न सुप्तेति॥ सुषुप्ते व्यतिरेकाग्रहणसत्त्वसाधकं न भवतीत्याह। सुषुप्त इति॥ यथा दृषत्कार दृष्वासक्तमनास्तया तद्व्यतिरिक्तं विद्यमानमपि न पश्यति तथा सुषुप्तेऽपि निरतत्या सुखासक्ततया सदपि द्वितीयं न पश्यति नत्वभावादित्यर्थः॥ अन्यासक्तस्य तद्व्यतिरिक्तादर्शनेऽपि तददर्शनमेवास्ति सुषुप्तेऽपि न किञ्चिदत्तासिषमिति प्रत्ययात्सुखस्याप्यात्मतादात्म्यादत्तानस्य च व्यतिरिक्तत्वानिर्वचनादतस्तात्त्विकद्वितीयाभावादेवाग्रहणमित्याह। न सर्वाग्रहणादिति॥ सुषुप्ते चेदनुपलम्भादसत्त्वं तर्हि जाग्रत्स्वप्नयोरुपलम्भाद्वैतस्य सत्त्वं किं न स्यादित्याह। जाग्रदिति॥ अनात्मादावात्मत्वादिबुद्धिरविद्या तद्भावे एव हेतोपलम्भान्नोपलम्भमात्रं सत्त्वसाधकमन्यथा शुक्तिरूप्यादेरपि सत्त्वप्रसङ्गादित्याह॥ नाविद्येति॥ पूर्ववाद्याह। सुषु-

क्रामति । एतं प्राणमयमात्मानमुपसङ्क्रामति ।

पुनरीश्वरोऽन्य आत्मनः कार्य्यञ्चान्यत्तेषां भयानिवृत्तिर्भयस्यान्यनिमित्तत्वात् सतश्चान्यस्यात्महानानुपपत्तिः । न चासत आत्मलाभः सापेक्षस्यान्यस्य भयहेतुत्वमिति चेन्न । तस्यापि तुल्यत्वात् । यदधर्म्माद्यनुसाहायीभूतं नित्यमनित्यं वा निमित्तमपेक्ष्यान्यङ्भयकारणं स्यात्तस्यापि तथाभूतस्यात्महानाभावाद्भयानिवृत्तिरात्महाने वा सदसतोरितरेतरापत्तौ सर्वत्रानाश्वास एवैकत्वपक्षे पुनः सन्निमित्तस्य संसारस्याऽविद्याकल्पितत्वाददोषः । तैमिरकदृष्टस्य हि द्वितीयचन्द्रस्य नात्मलाभो नाशो वास्ति । विद्याविद्ययोस्तद्धर्म्मत्वमिति चेन्न । प्रत्यक्षत्वात् । विवेकाविवेकौ रूपादिवत् प्रत्यक्षावुपलभ्येतेऽन्तःकरणस्थौ । न हि

प्रेति ॥ सुषुप्ते द्वितीयस्याग्रहणमपि लयरूपाविद्याकृतं न तु भेदाभावनिबन्धनमतो यदुक्तं सुषुप्ते सर्व्वात्मकब्रह्मभूतो जीवः खल्वतिरिक्तभावादेव न पश्यतीति तदसदित्यर्थः । सतोऽपि द्वितीयस्याविद्यावशादग्रहणमिति कोऽर्थः किं ग्रहणः प्रागभावो जायते उताप्रकाशारोपः किं वाऽग्रहणाकाराविकृतस्वरूपावस्थानम् । नाद्यः । प्रागभावस्यानादित्याभ्युपगमात् । न द्वितीयः । परैर्द्वितीयस्याः स्वप्रकाशतास्वाभाव्याभ्युपगमेनाप्रकाशारोपानभ्युपगमात् प्रकाशारोपे च सर्व्वस्य स्वप्रकाशब्रह्मात्मतायाअभ्युपगन्तव्यत्वेनास्मत्सीद्धितसिद्धिप्रसङ्गात् । न तृतीय इत्याह । न स्वाभाविकत्वादिति ॥ अविकृतस्वरूपावस्थानं नाविद्याकार्य्यमनागन्तुकत्वादित्यर्थः ॥ एतत् स्फुटयति । दृष्टस्य हीत्यादिना ॥ सम्प्रति दृष्टमुच्यते स्वातन्त्र्यसिद्ध्यभिप्रायेण न वैशेषिकाभिप्रायेण क्रियावद्गुणवत्समवायिकारणं दृष्टं कार्य्यमाकाशादिति द्रष्टव्यम् । अविक्रियेति विक्रिया-

एतं मनोमयमात्मानमुपसङ्क्रामति । एतं वि-

रूपस्य प्रत्यक्षस्य सतो द्रष्टृधर्मत्वम् । अविद्या च स्वानुभवेन रूप्यते मूढोऽहमविवित्तं मम विज्ञानमिति तथाविद्याविवेकोऽनुभूयते । उपदिश्यन्ति चान्येभ्य आत्मनो विद्यां बुद्धा । तथा चान्येऽवधारयन्ति तस्मान्नामरूपपक्षस्यैव विद्याविद्ये नामरूपे च नात्मधर्मौ नामरूपयोर्निर्वोढिते यदन्तरात्तद्ब्रह्मेति श्रुत्यन्तरात् । ते च पुनर्नामरूपे सवितर्यहोरात्रे इव कल्पिते न परमार्थतो विद्यमानेऽभेदे एतमानन्दमयमात्मानमुपसङ्क्रामतीति कर्मकर्तृत्वानुपपत्तिरिति चेन्न । विज्ञानमात्रत्वात्सङ्क्रमणस्य । न जलूकादिवत्सङ्क्रमणमिहोपदिश्यते किं तर्हि विज्ञानमात्रं सङ्क्रमणश्रुतेरर्थः । ननु मुख्यमेव सङ्क्रमणं श्रूयते उप-

---

भावोपलब्धं स्वरूपमनपेक्षमिति वादित्यर्थः । यद्दर्शनादिविक्रिया न स्वाभाविको परापेक्षत्वाद् स्फटिकलोहित्यवदित्यर्थः ॥ यदुक्तमनपेक्षमिति वादविक्रियत्वमिति तत् स्फुटयति । यद्वीति ॥ एवं स्वमते चित्सत्ताव्यतिरिक्तेश्वरस्य भयहेतोरभावादभयं विदुषः सम्भवतीत्युपपाद्य द्वैतिपक्षे तदसम्भवमाह । येषामिति ॥ सतोऽन्यस्य स्वरूपे स्थिते नष्टे वा नाभूद्भंसो व्यावातात्तदवस्थानाच्च ॥ तर्ह्यसत एव भयस्योत्पादेऽभयप्राप्तिर्भविष्यतीत्याशङ्क्याह । नचासत इति ॥ व्यतिरिक्तेश्वरस्य सत्तामात्रेण न भयहेतुत्वं किन्तु प्राणिकृतधर्माद्यपेक्षस्य तु तदभावादभयं भविष्यतीत्याशङ्क्य नैतत्साङ्ख्येन वाच्यम् । अधर्मादेरपि सतस्तेनात्यन्ताभावस्य दुरवधारणत्वात्तेनापि वाच्यमित्याह । न तस्यापीति ॥ किञ्च सच्चेदसत्त्वमापद्यते अधर्मादिकं तर्ह्यात्मन्यपि कः प्रत्यासत्तस्तस्मात्स्वभाववैपरीत्यं सतोऽसत्त्व-

ज्ञानमयमात्मानमुपसङ्क्रामति । एतमानन्दम-

सङ्क्रामतीति चेन्न । अन्नमयेऽदर्शनात् । न ह्यन्नमयमुप-
सङ्क्रामतो वाह्यादस्माज्जलूकावत्सङ्क्रमणं दृश्यतेऽन्यथा
वा ॥ मनोमयस्य वहिर्निर्गतस्य विज्ञानमयस्य वा पुनः प्रत्या-
वृत्यात्मसङ्क्रमणमिति चेन्न । स्वात्मनि विक्रियाविरोधा-
दन्योन्नमयमुपसङ्क्रामतीति प्रकृत्य मनोमयो विज्ञानमयो
वा स्वात्मानमेवोपसङ्क्रामतीति विरोधः स्यात् । तथा
नानन्दमयस्यात्मसङ्क्रमणमुपपद्यते । तस्मान्न प्राप्तिः
सङ्क्रमणं नाप्यन्नमयादीनामन्यतमकर्तृकं पारिशिष्याद
न्नमयाद्यानन्दमयान्तात्मव्यतिरिक्तकर्तृकं ज्ञानमात्रञ्च
सङ्क्रमणमुपपद्यते ज्ञानमात्रत्वे चानन्दमयान्तस्यैव
सर्वान्तरस्याकाशाद्यन्नमयान्तं कार्यं सृष्ट्वानुप्रविष्टस्य हृद-
यगुहाभिसन्धानादन्नमयादिष्वनात्मस्वात्मविभ्रमसङ्क्रमणा-

गमनं कस्यापि मते न घटत इत्याह । सदसतोरिति ॥ स्वमतं निगम-
यति । एकत्वपक्ष इति ॥ अविद्याकल्पितं भयं विद्याया निवर्त्तत इति
वदतो विद्याविद्ययोरात्मधर्म्मत्वमिष्टं ततो धर्म्मित्वादविनाशयोर्विका-
रित्वमनित्यत्वं च प्रसज्येतेति शङ्कते । विद्याविद्ययोरिति ॥ कल्पि-
तयोर्विद्याविद्ययोरात्मनि भयाभयहेतुत्वसम्भवान्नात्मधर्म्मत्वे प्रमाण-
मस्ति प्रस्तुत वैधर्म्म्याद्रूपादिवदात्मधर्म्मत्वं नास्तीत्यनुमातुं शक्यत इ-
त्याह । न प्रत्यक्षत्वादिति ॥ चिन्मात्रतन्त्रानादिरनिर्वाच्याविद्यान्तः-
करणरूपेण परिणमते तज्ज्ञान्तःकरणं तामसवृत्तिकावस्थाभेदेन
भ्रान्तिसम्यक्ज्ञानाकारेण परिणमते तस्मिन् प्रतिविम्बितश्चिधातुः
स्वोपाधिधर्म्मेणैव भ्रान्तः सम्यक्दर्शीति च व्यवह्रियते न तत्त्वतो
विद्याविद्यावत्त्वमित्याह । तेन पुनरिति ॥ उक्तन्यायेन ब्रह्मचित्ततो

यमात्मानमुपसङ्क्रामति तदप्येष श्लोको भवति॥
इत्यष्टमोऽनुवाकः ॥ ८ ॥

त्मविवेकज्ञानोत्पत्त्या विनश्यति तदेतस्मिन्नविद्याविभ्रमनाशे सङ्क्रमणशब्द उपचर्यते न ह्यन्यथा सर्वगतस्यात्मनः सङ्क्रमणमुपपद्यते वस्त्वन्तराभावाच्च। न च स्वात्मन एव सङ्क्रमणम्। न हि जलूकात्मानमेव सङ्क्रामति। तस्मात्सत्यं ज्ञानमनन्तं ब्रह्मेति यथोक्तलक्षणात्मप्रतिपत्त्यर्थमेव बद्धभवनसर्गप्रवेशरसभयाभयसङ्क्रमणादिपरिकल्प्यते ब्रह्मणि संव्यवहारादिविषये न तु परमार्थतो निर्विकल्पे ब्रह्मणि कश्चिदपि विकल्प उपपद्यते। तमेतं निर्विकल्पमात्मानमेवं क्रमेणोपसङ्क्रम्य विदित्वा न बिभेति कुतश्चिन्नाभयं प्रतिष्ठां विन्दत इत्येतस्मिन्नर्थेऽप्येष श्लोको भवति। सर्वस्यै-

---

ब्रह्माभिन्न इत्युक्तम्॥ तत्र परोक्तसङ्गत्या निरस्यति। अभेद इत्यादिना॥ नानन्दमयः परमात्मा नच तत्र प्रवेशः सङ्क्रमणं किन्तु अविषयब्रह्मात्मताज्ञानेनानन्दमयस्यात्मतया भ्रान्तिग्रहीतस्यातिक्रमणं बाधोऽत्र विवक्षित इत्यर्थः। अन्यथा वेति॥ नीडे पक्षिप्रवेशवदेत्यर्थः॥ यद्यप्यत्रमये सुखं सङ्क्रमणं न सम्भवति तथापि मनोबुद्ध्योर्बहिर्विषये प्रवृत्तयोस्ततो व्यावृत्त स्वरूपेऽवस्थानं सङ्क्रमणं दृष्टं तथा दुःखिन आनन्दमयस्य स्वरूपेऽवस्थानं सङ्क्रमणं भविष्यतीत्याह। मनोमयस्येति॥ स्वरूपावस्थानस्यानागन्तुकत्वात्क्रमविरोधाच्च न तन्मुख्यसङ्क्रमणमित्याह। नेति॥ ज्ञानमात्रत्वे वा सङ्क्रमणस्य किं फलतीत्यत आह। ज्ञानमात्रत्वे चेति॥ मुख्यासम्भवे गौणार्थग्रहणं न्याय्यमेवातोऽधिष्ठानयाथात्म्यप्रतिषेधविशिष्टस्याध्यस्तस्य बाधनमेव सङ्क्रमणं फलतीति भावः॥ कुतश्च तन्मुख्यं सङ्क्रमणमन्वेषणीयमित्याह। वस्त्वन्तराभावाच्चेति॥ सङ्-

यतो वाचो निवर्त्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्। न बिभेति कुतश्चनेति। तए ह वाव न तपति। किमहए साधु नाकरवम्। किमहं पापमकरवमिति। स य एवं विद्वानेते आत्मानए स्पृणुते। उभे ह्येवैष एते आत्मानए स्पृणुते। य एवं वेद।

वास्य प्रकरणस्यानन्दवल्ल्यर्थस्य सङ्क्षेपतः प्रकाशनायैष मन्त्रो भवति॥ इत्यष्टमोऽनुवाकः॥ ८॥

यतो यस्मान्निर्विकल्पाद्ययोक्तलक्षणादद्वयानन्दादात्मनो वाचोऽभिधानानि द्रव्यादिसविकल्पवस्तुविषयाणि वस्तुसामान्यान्निर्विकल्पेऽद्वयेऽपि ब्रह्मणि प्रयोक्तृभिः प्रकाशनाय प्रयुज्यमानानि अप्राप्याप्रकाश्यैव निवर्त्तन्ते। स्वसामर्थ्याद्विरमन्ति। मन इति प्रत्ययो विज्ञानम्। तच्च यत्राऽभिधानं प्रवृत्तमतीन्द्रियाद्यर्थे तदन्वेव प्रवर्त्तते प्रकाशनाय। यत्र विज्ञानं तत्र वाचः प्रवृत्तिः। तस्मात्सहैव वाङ्मनसयोरभिधानप्रत्यययोः प्रवृत्तिः सर्वत्र। तस्माद्ब्रह्मप्रकाशनाय सर्वथा प्रयोक्तृभिः प्रयुज्यमाना अपि वाचो यस्मादप्रत्ययविषयादनभिधेयादद्वयादि विशेषणात्सहैव

क्रमणस्यौपचारिकत्वं व्याख्याय प्रकरणस्य सङ्गत्यात्पर्यसुपसंहारव्याजेनाह। तस्मादिति॥ इत्यष्टमोऽनुवाकः॥ ८॥

साध्यसाधनौ न स्तः प्रकाश्येते चेति सत्प्रकाशमात्रमात्मतत्त्वमेव तयोः स्वरूपं ततोऽतिरिक्तं पदार्थानर्थहेतुत्वं नामविशेषरूपं तत्र वस्तु सत्-

इत्युपनिषत् ॥ इति नवमोऽनुवाकः ॥ ९ ॥
ब्रह्मादिदमयमिदमेकविंशतिरन्नादन्नरसमया-
दन्नात्प्राणो व्यानोऽपान आकाशः पृथिवी
पुच्छं षड्विंशतिः प्राणं यजुर्ऋक्सामादेशो-
ऽथर्वाङ्गिरसः पुच्छं द्वाविंशतिर्यतश्चैतं सत्यं
योगो महोष्टादशविज्ञानं प्रियं मोदः प्रमोद

मनसा विज्ञानेन सर्वप्रकाशनसमर्थेन निवर्तन्ते तं ब्रह्मण आनन्दं चोत्तिष्ठस्याऽष्टजिनस्याऽकामहतस्य सर्वैषणा-विनिर्मुक्तस्यात्मभूतं विषयविषयिसम्बन्धविनिर्मुक्तं स्वाभाविकं नित्यमविभक्तं परमानन्दं ब्रह्मणो विद्वान् यथोक्तेन विधिना न बिभेति कुतश्चन निमित्ताभावात्। नहि तस्माद्विदुषोऽन्यद्वस्वन्तरमस्ति वस्तु भिन्नम्। यतो बिभेति अविद्यया यदीदृशमन्तरं कुरुते। अथ तस्य भयं भवतीति चोक्तम्। विदुषश्चाविद्याकार्यस्य तैमिरिकदृष्टद्वितीयाचन्द्रवच्चाग्राह्यनिमित्तस्य न बिभेति कुतश्चनेति युज्यन्ते। मनोमये चोदाहृतो मन्त्रो मनसो ब्रह्मविज्ञानसाधनत्वात्। तत्र ब्रह्मत्वमध्यारोप्य तत्स्तुत्यर्थं न बिभेसि कदाचनेति भयमात्रं प्रतिषिद्धमिहाद्वैतविषये न बिभेति कुतश्चनेति भयनिमित्तमेव प्रतिषिध्यते। नन्वस्ति भयनिमित्तं साध्व-

---

प्राकाश्यान्यत्वे नासत्त्वादप्रकाश्यमानत्वाच्चेत्यभिप्रेत्याह। स्वेन विशेषरूपेणेति॥ आत्मैवाविद्यया साध्वसाधुरूपेण प्रतिपन्न आसीत् इदानीन्तु ये साध्वसाधुनी अर्थानर्थहेतू बभूवतुस्ते आत्मैवेति ज्ञानेन स्वात्मानं

आनन्दो ब्रह्म पुच्छं द्वाविंशतिरसन्नेवाथाष्टा-विंशतिरसत्षोडश भीषास्मान्मानुषो मनुष्यग-न्धर्वाणां देवगन्धर्वाणां पितृणां चिरलोकलोका-नामाजानजानां कर्मदेवानां ये कर्मणा देवा-नामिन्द्रस्य बृहस्पतेः प्रजापतेर्ब्रह्मणः स यश्च सङ्ग्रामत्येकपञ्चाशद्यतः कुतश्च नैतमेकादश नव॥

करणं पापक्रिया च। नैवं कथमित्युच्यते एतं यथोक्तमे-वंविदं ह वावेत्यवधारणार्थौ। न तपति नोद्वेजयति नात्यन्तं तापयति। कथं पुनः साध्वकरणं पापक्रिया च न तपतीत्युच्यते। किं कस्मात्साधु शोभनं कर्म नाकरवं न कृतवानस्मीति पश्चात्तन्तापो भवत्यासन्ने मरणकाले। तथा किं कस्मात्पापं प्रतिषिद्धं कर्माकरवं कृतवानस्मीति च नरकपतनादिदुःखभयात्तापो भवति। त एते साध्व-करणपापक्रिये एवमेनं न तपतो यथाऽविद्वांसं तपतः। कस्मात्पुनर्विद्वांसं न तपत इत्युच्यते स य एवंविद्वानेते साध्वसाधुनी तापहेतू इत्यात्मानं स्रुणुते प्रीणयति बलयति वा परमात्मभावेनोभे पश्यतीत्यर्थः। उभे पुण्य-पापे हि यस्मादेवमेष विद्वानेते आत्मानमात्मरूपेणैव

साध्वसाधुकरणेन प्रीणयत्येव लोकदृष्ट्या निष्पाद्यमाने पुण्यपापे दृष्ट्वा। दृश्यते च विद्वान् न बिभेतीत्याह। स्रुणुत एवेति॥ इति नवमोऽनु-वाकः॥९॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपाद-

सह नाववतु। माविद्विषावहै। ॐ शान्तिः शान्तिः शान्तिः। ब्रह्मविद्य एवं वेदेत्युपनिषत्॥ इति ब्रह्मानन्दवल्ली॥ ॐ तत्सत्॥

हरिः ॐ॥ सहनाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्वि नावधीतमस्तु मा विद्विषामहै। ॐ शान्तिः शान्तिः शान्तिः॥

पुण्यपापे स्वेन शेषरूपेण शून्ये कृत्वा आत्मानं सृणुत एव। को य एवं वेद यथोक्तमहैतमानन्दं ब्रह्म वेद तस्यात्मभावेन दृष्टे पुण्य पापे निर्बीर्यतापके जन्मारम्भके न भवत इतीयमेवं यथोक्ताऽस्यां वल्ल्यां ब्रह्मविद्योपनिषत्सर्वाभ्यो विद्याभ्यः परमरहस्यं दर्शितमित्यर्थः। परं श्रेयोऽस्यां निषण्णमिति॥ इति नवमोऽनुवाकः॥ ९॥ इति श्रीपरमहंसपरिव्राजकाचार्यश्रीगोविन्द भगवत्पूज्यपादशिष्यस्य श्रीशङ्करभगवतः कृतौ तैत्तिरीयोपनिषद्भाष्ये ब्रह्मानन्दवल्ली नाम द्वितीयोऽध्यायः॥ २॥

ॐ सत्यं ज्ञानमनन्तं ब्रह्म आकाशादिकार्यमन्नमयान्तं दृष्ट्वा तदेवानुप्रविष्टं विशेषवदिवोपलभ्यमानं यस्मात्तस्मात्सर्वकार्यं विलक्षणमहृद्यादिधर्मकमेवानन्दं तदेवाहमिति विजानीयादनुप्रवेशस्य तदर्थत्वात् तस्यैवं विजानतः

शिष्यभगवदानन्द ज्ञान विरचिते तैत्तिरीयोपनिषद्भाष्यटीकायां ब्रह्मानन्दवल्लीनाम द्वितीयोऽध्यायः॥ २॥ ॐ तत्सत्॥

इत्तानुवादपूर्वकमुत्तरवल्लीसम्बन्धमाह। सत्यं ज्ञानमित्यादिना। तप इति पदार्थं विवरणं वाक्यार्थं ज्ञान साधनमित्यर्थः। अधोऽधीत्यध्यापय

भृगुर्वै वारुणिः । वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तस्मा एतत्प्रोवाच । अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति । तꣳ होवाच । यतो वा इमानि भूतानि जायन्ते ।

शुभाशुभ कर्मणी जन्मान्तरारम्भके न भवत इत्येवमानन्दवल्ल्यां विवक्षितोऽर्थः । परिसमाप्ता च ब्रह्मविद्या । अतःपरं ब्रह्मविद्या साधनं तपो वक्तव्यमन्नमयादिविषयाणि चोपासनान्युक्तानीत्यतः पूर्ववच्छान्ति पाठ पूर्वकमिदमारभ्यते । आख्यायिका विद्यास्तुतये प्रियाय पुत्राय पित्रोक्तेति भृगुर्वै वारुणिः । वैशब्दः प्रसिद्धानुस्मारको भृगुरित्येवंनामा प्रसिद्धोऽनुस्मार्यते । वारुणिर्वरुणस्यापत्यं वारुणिर्वरुणं पितरं ब्रह्म-विजिज्ञासुरुपससारोपगतवान् अधीहि भगवो ब्रूह्येत्यनेन मन्त्रेण । अधीह्यध्यापय कथय । स च पिता विधिवदुपसन्नाय तस्मै पुत्रायैतद्वचनं प्रोवाचान्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति । अन्नं शरीरं तदभ्यन्तरञ्च प्राणमन्तरमुपलब्धिसाधनानि चक्षुः श्रोत्रं मनो वाचमित्येतानि ब्रह्मोपलब्धौ द्वाराण्युक्तवान् ।

कारय । दृक्स्मरण इति धातुपाठादित्यर्थः । ब्रह्मोपलब्धाविति लक्ष्यत्वमर्थविवेकाय द्वाराणि शरीरादिचेष्टाऽन्यथानुपपत्त्या हि साक्षिभूतश्चिद्धातुर्विविच्यत इति भावः । न केवलमर्थज्ञानं वाक्यार्थज्ञानसाधनं किन्तु तत्पदार्थज्ञानमपीत्यभिप्रेत्य तदर्थस्य ब्रह्मणो लक्षणमुक्तवानित्यर्थः । भाव-

येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व तद्ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा ॥ इति प्रथमोऽनुवाकः ॥ १ ॥

अन्नं ब्रह्मेति व्यजानात्। अन्नाद्ध्येव खल्वि-

उक्ता च द्वारभूतान्येतान्यन्नादीनि तं भृगुं होवाच। ब्रह्मणो लक्षणं किन्तत् यतो यस्माद्वै इमानि ब्रह्मादीनि स्तम्बपर्यन्तानि भूतानि जायन्ते। येन च जातानि जीवन्ति प्राणान्धारयन्ति वर्द्धन्ते। विनाश काले च यत्प्रयन्ति यद्ब्रह्म प्रतिगच्छन्ति अभिसंविशन्ति तादात्म्यमेव प्रतिपद्यन्ते उत्पत्ति स्थिति लयकालेषु यदात्मतां न जहाति भूत देहं तद्ब्रह्मणो लक्षणम्। तद्ब्रह्म विजिज्ञासस्व विशेषेण ज्ञातुमिच्छस्व। यदेवं लक्षणं ब्रह्म तदन्नादि द्वारेण प्रतिपद्यस्वेत्यर्थः। श्रुत्यन्तरञ्च प्राणस्य प्राण उत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो मनो ये विदुस्ते निचिक्युर्ब्रह्म पुराणमग्र्यमिति। ब्रह्मोपलब्धौ द्वाराण्येतानि दर्शयति। स भृगुर्ब्रह्मोपलब्धिद्वाराणि ब्रह्म लक्षणं च श्रुत्वा पितुस्तप एव ब्रह्मोपलब्धिसाधनत्वेनाऽतप्यत तप्तवान्। कुतः पुनरनुपदिष्टस्यैव

शेषोक्तेरिति पदार्थोपलक्षणस्यैवाभिधानादखण्डवाक्यार्थस्याप्रतिपादनात् पदार्थभेदज्ञानाच्च पुरुषार्थसम्बन्धदूरमन्तरं कुरुत इति निन्दितत्वादतो वाक्यार्थावगतिपर्य्यन्तं तात्पर्य्येण लक्ष्यपदार्थविवरणमाद्दत्याऽनुष्ठितवानित्यर्थः॥ स तपस्तप्त्वेति कृत्वेदं पित्रोक्तं लक्षणं परिपूर्णं भवत्वित्येकाग्रेण चेतसा पर्य्यालोच्यान्नं ब्रह्मेति व्यजानात्। अद्यते

मानि भूतानि जायन्ते । अन्नेन जातानि जीवन्ति । अन्नं प्रयन्त्यभिसंविशन्तीति । तद्वि-ज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तꣳ होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ द्वितीयोऽनुवाकः ॥ २ ॥

तपसः साधनत्वप्रतिपत्तिर्भृगोः सावशेषोक्तेरन्नादि-ब्रह्मणः प्रतिपत्तौ हारं लक्षणं च यतो वा इमानि भूता-नीत्युक्तवान् । सावशेषं हि तल्लक्षणाद्ब्रह्मणो निर्देशात् । अन्यथा हि स्वरूपेणैव ब्रह्म निर्देष्टव्यं जिज्ञासवे पुत्रा-येदमित्थंरूपं ब्रह्मेति । चैवं निरदिशत् किन्तर्हि साव-शेषमेवोक्तवान् । अतोऽवगम्यते नूनं साधनान्तरमप्यपेक्षते पिता ब्रह्मविज्ञानं प्रतीति । तयोर्विशेषप्रतिपत्तिषु सर्व्व-साधकतमत्वात्सर्व्वेषां हि नियतसाध्यविषयाणां साधनानां तप एव साधकतमम् । साधनमिति हि प्रसिद्धं लोके । तस्मात् पित्रानुपदिष्टमपि ब्रह्मविज्ञानसाधनत्वेन तपः प्रतिपेदे भृगुः । तच्च तपो वाङ्मनसः करणसमाधानं तद्वार-कत्वात् ब्रह्मप्रतिपत्तेः । मनसश्चेन्द्रियाणाञ्चैकाग्र्यं परमं तपः तज्ज्यायः । सर्व्वधर्म्मेभ्यः स धर्मः पर उच्यत इति स्मृतेः ।

भुज्यते सर्व्वैरिति सर्व्वप्रतिपत्तिसाधारणं स्थूलदेहकारणं भूतपञ्चकं विराट्सङ्घातमन्नशब्देनोच्यते । तस्य स्थूलभौतिककारणत्वात् । यतो वा इमानीति लक्षणस्य तत्र योजयितुं शक्यत्वात्तद्ब्रह्मेति प्रतिपन्नवानित्यर्थः ॥

प्राणो ब्रह्मेति व्यजानात्। प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते। प्राणेन जातानि जीवन्ति। प्राणं प्रयन्त्यभिसंविशन्तीति। तद्विज्ञाय। पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तꣳ होवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा॥ तृतीयोऽनुवाकः॥ ३॥

मनो ब्रह्मेति व्यजानात्। मनसो ह्येव खल्विमानि भूतानि जायन्ते। मनसा जातानि

स च तपस्तप्त्वा अन्नं ब्रह्मेति व्यजानाद्विज्ञातवान्। तद्धि यथोक्तलक्षणोपेतम्। कथम् अन्नाद्धेव खल्विमानि भूतानि जायन्तेऽन्नेन जातानि जीवन्ति अन्नं प्रयन्ति अभिसंविशन्तीति। तस्माद्युक्तमन्नस्य ब्रह्मत्वमित्यभिप्रायः। स एवं तपस्तप्त्वाऽन्नं ब्रह्मेति विज्ञाय लक्षणोपपत्त्या च पुनरेव संशयमापन्नो वरुणं पितरमुपससार अधीहि भगवो ब्रह्मेति। कः पुनः संशयहेतुरित्युच्यते। अन्नस्योत्पत्तिदर्शनात्तपसः पुनः पुनरुपदेशः साधनातिशयत्वावधारणार्थः। यावद्ब्रह्मणो लक्षणं निरतिशयं न भवति

विराज उत्पत्तिदर्शनाच्छ्रुतिस्मृतिषु लक्षणं तत्र सम्पूर्णं न भवतीति पुनस्तपोऽतप्यत विचार्य च तत्कारणं क्रियाशक्तिविषयतया प्राणशब्दलक्ष्यं हिरण्यगर्भं सकलाध्यवसायशक्तिविशिष्टतया च मनोविज्ञानशब्दलक्ष्यं ब्रह्मेति व्यजानात्तस्यापि कार्यत्वाल्लक्षणं न भवतीति विचार्य

जीवन्ति। मनः प्रयन्त्यभिसंविशन्तीति। तद्वि-
ज्ञाय। पुनरेव वरुणं पितरमुपससार। अधी
हि भगवो ब्रह्मेति। तꣳ होवाच। तपसा
ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपो-
ऽतप्यत। स तपस्तप्त्वा॥ चतुर्थोऽनुवाकः॥ ४॥

विज्ञानं ब्रह्मेति व्यजानात्। विज्ञानाद्ध्येव
खल्विमानि भूतानि जायन्ते। विज्ञानेन जा-
तानि जीवन्ति। विज्ञानं प्रयन्त्यभिसंविशन्तीति।
तद्विज्ञाय। पुनरेव वरुणं पितरमुपससार।
अधीहि भगवो ब्रह्मेति। तꣳ होवाच। तपसा
ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपो-
ऽतप्यत। स तपस्तप्त्वा॥ पञ्चमोऽनुवाकः॥ ५॥

यावच्च जिज्ञासा न निवर्त्तते तावत्तप एव ते सा-
धनम्॥ तपसा एव ब्रह्म जिज्ञासस्वेत्यर्थः। ऋज्वन्यत्। एवं
तपसा विशुद्धात्मा प्राणादिषु साकल्येन ब्रह्मलक्षणमपश्य-
च्छनैः; शनैरनुप्रविश्यान्तरतममानन्दं ब्रह्म विज्ञातवांस्त-
पसा एव साधनेन भृगुस्तस्माद्ब्रह्मविजिज्ञासुना बाह्यान्तः-
करणसमाधानलक्षणं परमं तपःसाधनमनुष्ठेयमिति प्रक-
रणार्थः॥

तत्कारणं स्वातन्त्र्येण निश्चित्य सर्वैः प्रार्थ्यमानतयानन्दशब्दवाच्यं काया-
विशिष्टं ब्रह्मेति विज्ञाय विशिष्टस्याविशिष्टान्तरात्मत्वानुपपत्तेः कार-
णत्वोपलक्षितं विशुद्धानन्दं ब्रह्मेति विज्ञातवानित्यर्थः॥

आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति। सैषा भार्गवी वारुणी विद्या परमे व्योमन् प्रतिष्ठिता। स य एवं वेद प्रतितिष्ठति।

अधुनाऽऽख्यायिकातोऽपहत्य श्रुतिः स्वेन वचनेनाख्यायिकानिर्वर्त्यं मर्थमाचष्टे। सा एषा भार्गवी भृगुणा विदिता वरुणेन प्रोक्ता वारुणी विद्या परमे व्योमन् हृदयाकाशगुहायां परमानन्दऽहैते प्रतिष्ठिता परिसमाप्ता अन्नमयादात्मनोऽधिप्रवृत्ता। एवमन्योऽपि तपसा एव साधनेन। अनेनैव क्रमेणानुप्रविश्यानन्दं ब्रह्म वेद। स एवं विद्याप्रतिष्ठानात्प्रतितिष्ठत्यानन्दे परमे ब्रह्मणि ब्रह्मैव भवतीत्यर्थः। दृष्टञ्च फलं तस्योच्यते। अन्नवान् प्रभूतमन्नमस्य विद्यत इत्यान्नवान्। सत्तामात्रेण तु सर्वो ह्यन्नवानिति विद्याया विशेषो न स्यात्। एवमन्नमत्तीत्यान्नादो दीप्ताग्निर्भवतीत्यर्थः। महान् भवति। केन महत्त्वमित्यत आह। प्रज्ञया

प्रभूतत्वविशेषणं न श्रुतं कथं निश्चिप्यत इत्याशङ्क्याह। सत्तामात्रेणेति॥ अत्र सत्तामात्रे विनिश्चिप्ते अम्यूकरादेरपि शरीरस्थित्यादिप्राप्त्यान्नवानिति विद्यायाः फलविशेषो नोक्तः स्यादतस्तद्बलात्प्रभूतत्वविशेषणं निश्चिप्तमित्यर्थः। यस्येश्वरस्यानुग्रहात् अविदुषामप्यन्नादिसम्पद्विद्यतेऽयोच्छिष्टसुतावरमित्युक्तत्वात्। किमुत तदात्मत्वं साक्षादनुभवत इति अन्नं प्राप्नं न निन्द्यात् यदृच्छयोपपन्नम्। एतच्च दृष्टफलं

अन्नवानन्नादो भवति। महान् भवति। प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या॥ षष्ठोऽनुवाकः॥ ६॥

अन्नं न निन्द्यात्। तद्व्रतम्। प्राणो वान्नम्।

पुत्रादिना पशुभिर्गवाश्वादिभिर्ब्रह्मवर्चसेन शमदमस्नानादिनिमित्तेन तेजसां महान् भवति कीर्त्या ख्यात्या शुभप्रचारनिमित्तया साध्वादनुभवतीत्यर्थः। किञ्चान्नेन द्वारभूतेन ब्रह्मविज्ञानं यस्मात्तस्मान्नृकमिवान्नं न निन्द्यात्तदस्यैवं ब्रह्मविदो व्रतमुपदिश्यते व्रतोपदेशोऽन्नस्तुतये स्तुतिभाक्त्वान्नस्य ब्रह्मोपलब्ध्युपायत्वात्। प्राणो वाऽन्नम्। शरीरान्तर्भावात्प्राणस्य। यद्यस्यान्तः प्रतिष्ठितं भवति तत्तस्यान्नं भवतीति॥

शरीरे च प्राणः प्रतिष्ठितस्तस्मात्प्राणोऽन्नं शरीरम-

ब्रह्मविदो जीवन्मुक्तस्याप्यविद्यातत्कार्यादृष्टैतावभासं पश्यतो नानुपपन्नं यस्येश्वरस्यानुग्रहादविदुषामपि अन्नादिसृष्टिर्दृश्यते किमुत तदात्मतत्त्वम्। अन्यमपश्यं प्राप्तं न निन्द्यात् यदुक्त्योपपन्नम्। अद्योच्छिष्टसुतावरमित्युक्तत्वात्। ब्रह्मविदो नियमाभिधानं साधकस्यानुष्ठानार्थम्। एवं वाक्यार्थज्ञाने लक्ष्यपदार्थानुसन्धानं मुख्यं साधनं तत्फलं चोपसंहृत्याधुना विचारासमर्थस्य मन्दाधिकारिणोऽन्नादृक्पेण प्राणाद्युपासनं गौणं साधनं विधत्ते। प्राणो वाऽन्नमित्यादिना॥ उपासनमपि फलानभिसन्धिनानुष्ठितं बुद्धिद्वारेण ब्रह्मज्ञानायोपकरोतीत्युक्तं मुख्याधिकारिणस्त्वपवादायोपकरिष्यति॥

यत्र वागादौ यत्फलं कार्यं क्षेमादीत्यर्थः। महानिति प्रजादिभि-

शरीरमन्नादम्। प्राणे शरीरं प्रतिष्ठितम्। शरीरे प्राणः प्रतिष्ठितः। तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान् भवति। प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या॥ सप्तमोऽनुवाकः॥ ७॥

न्नादम्। तथा शरीरमप्यन्नं प्राणोऽन्नादः। कस्मात्प्राणे शरीरं प्रतिष्ठितम्। तन्निमित्तत्वाच्छरीरस्थितेः। तस्मादेतदुभयं शरीरं प्राणश्चान्नमन्नादश्च। येनान्योन्यस्मिन्प्रतिष्ठितं तेनान्नम्। येनान्योन्यस्य प्रतिष्ठा तेनान्नादः। तस्मात्प्राणः शरीरञ्चोभयमन्नमन्नादि च। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठत्यन्नांन्नादाल्लनैव। किञ्चान्नवानन्नादो भवतीत्यादि पूर्ववत्। अन्नं न परिचक्षीत न परिहरेत। तद्व्रतं पूर्ववत्स्तुत्यर्थम्। तदेवं शुभाशुभकल्पनयाऽपरिह्रीयमाणं स्तुतं महीकृतमन्नं स्यादेवं यथोक्तमुत्तरेष्वप्यापो वा अन्नमित्यादिषु योजयेत्। अग्नु ज्योतिरिति अद्भ्यो-

---

ब्रह्मवानिति। स्थूलभोगसाधनवान् विराड्वेत्यर्थः॥ स्वयन्तरप्रसिद्धेरिति। य एवमेताः पञ्च देवता वायुर्वाव संवर्ग इत्यादिस्वयन्तराद्ब्रह्मणः संहर्तृत्वं वायुद्वारकमिति वायुर्ब्रह्मणः परिमरः संहारसाधनमित्यर्थः॥ तत्कथं परिमरगुणतयाऽऽकाशोपासनं सिद्धयतीत्यत आह। स इति॥ एवं मन्दाधिकारिगोचरस्वोपासनजातमध्यारोपावस्थायामुपदिश्यापवाददृष्टिमभिप्रेत्याह। प्राणो वाऽन्नमित्यादिना॥

अन्नं न परिचक्षीत। तद्व्रतम्। आपो वा अन्नम्। ज्योतिरन्नादम्। अप्सु ज्योतिः प्रतिष्ठितम्। ज्योतिष्यापः प्रतिष्ठिताः। तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान् भवति। प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या॥ अष्टमोऽनुवाकः॥ ८॥

तिषोरन्नान्नादगुणत्वेनोपासकस्यान्नस्य बहुकरणं व्रतम्। तथा पृथिव्यामाकाशोपासकस्य वसतौ च वसतिनिमित्तं कञ्चन कञ्चिदपि न प्रत्याचक्षीत वसत्यर्थमागतं न निवारयेदित्यर्थः। वासे च दत्तेऽवश्यं ह्यन्नं दातव्यम्। तस्माद्यया कयाच विधया येन केन प्रकारेण बह्वन्नं प्राप्नुयात् बह्वन्नसङ्ग्रहं कुर्यादित्यर्थः। यस्मादन्नवन्तो विद्वांसोऽभ्यागतायान्नार्थिने अराधि रंसिष्टमस्मै अन्नमित्याचक्षते न नास्तीति प्रत्याख्यानं कुर्वन्ति तस्मात्स्वहेतोर्बह्वन्नं प्राप्नुयादिति पूर्वेण सम्बन्धः। अपि चान्नदानस्य माहात्म्यमुच्यते। यथा यत्कालं प्रयच्छत्यन्नं तथा

भोक्तृत्वादिलक्षणः संसारः कार्य्यगोचर इति विदितस्तत्र जीवस्यानौपाधिकसंसारित्वन्दृष्टं तस्यापि कार्य्यत्वादिति भागवतानां मतमुद्भाव्य दूषयति। नन्वात्मापीत्यादिना॥ छान्दोग्यश्रुत्यनुसारेण विकाराकारालना प्रवेशमाशङ्क्य वाक्यशेषविरोधमाह। अनेन जीवेनेत्यादिना॥ भ्रान्त्या देहादिभावमापन्नस्य जीवस्य ब्रह्मव्यतिरिक्तस्यैव ब्रह्मदृष्टिरूप-

अन्नं बहु कुर्वीत। तद्व्रतम्। पृथिवी वाऽन्नम्। आकाशोऽन्नादः। पृथिव्यामाकाशः प्रतिष्ठितः। आकाशे पृथिवी प्रतिष्ठिता। तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवाननादो भवति। महान् भवति। प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या॥ नवमोऽनुवाकः॥ ९॥

तत्कालमेव प्रत्युपनमते। कथमिति तदेतदाह। एतद्वै अन्नं सुखतो मुख्ये प्रथमे वयसि मुख्यया वा वृत्त्या पूजापुरःसरमभ्यागतायान्नार्थिने राद्धं संसिद्धं प्रयच्छतीति वाक्यशेषः। तस्य किं फलं स्यादित्युच्यते। सुखतः पूर्वे वयसि मुख्यया वा वृत्त्याऽस्मै अन्नदायान्नं राध्यते यथा दत्तमुपतिष्ठत इत्यर्थः एवं मध्यतो मध्यमे वयसि मध्यमेन चोपचारेण। तथा ततोऽन्ते वयसि जघनेनोपचारेण परिभवेन तथैवास्मै राध्यते संसिद्ध्यत्यन्नम्। य एवं वेद य एवमन्नस्य यथोक्तं माहात्म्यं वेद तद्दानस्य फलं यथोक्तं फलमुपनयेत्। इदानीं ब्रह्मण उपासनप्रकार उच्यते। क्षेम इति वाचि क्षेमो नामोपात्तपरिरक्षणं ब्रह्म वाचि क्षेमरूपेण प्रतिष्ठितमित्युपास्यम्। योगक्षेम इति योगोऽनुपात्तस्योपादानम्।

दिश्यते संसारित्वापोहार्था। मातृबुद्धिरिव परयोषिति रागापोहार्था। अतस्त्वमसीत्युपदेशस्यान्यार्थत्वान्न जीवस्य पारमार्थिकमसंसारि ब्रह्मा-

न कञ्चन वसतौ प्रत्याचक्षीत। तद्व्रतम्। तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयात्। अराध्यस्मा अन्नमित्याचक्षते। एतद्वै मुखतोऽन्नꣳ राद्धम्। मुखतोऽस्मा अन्नं राध्यते एतद्वै

तौ हि योगक्षेमौ प्राणापानयोर्बलवतोः सतोर्भवतो यद्यपि-तथापि न प्राणापाननिमित्तावेव किन्तर्हि ब्रह्मनिमित्तौ। तस्माद्ब्रह्म योगक्षेमात्मना प्राणापानयोः प्रतिष्ठितमित्युपास्यम्। एवमुत्तरेष्वन्येषु तेन तेनात्मना ब्रह्मैवोपास्यं कर्म्मणो ब्रह्मनिर्वर्त्त्यत्वाद्वस्तयो कर्म्मात्मना ब्रह्म प्रतिष्ठितमुपास्यम्। गतिरिति पादयोः। विमुक्तिरिति पायौ। इत्येतामानुषीर्मनुष्येषु भवा मानुष्याः समाज्ञा आध्यात्मिक्यः समाज्ञाः ज्ञानानि विज्ञानान्युपासनानीत्यर्थः॥ अथानन्तरं दैवीर्दिव्यो देवेषु भवाः समाज्ञा उच्यन्ते। तृप्तिरिति दृष्टौ। दृष्टेरन्नादिद्वारेण तृप्तिहेतुत्वाद्ब्रह्मैव तृप्त्यात्मना दृष्टौ व्यवस्थितमित्युपास्यम्। तथान्येषु तेन तेनात्मना ब्रह्मैवोपास्यम्। तथा बलरूपेण विद्युति॥ यशोरूपेण पशुषु। ज्योतीरूपेण नक्षत्रेषु। प्रजातिरमृत-ममृतत्वप्राप्तिः पुत्रेण ऋणविमोक्षद्वारेणानन्दः सुखमित्ये-

---

त्वमित्याशङ्क्य तद्दूषयति। भावान्तरापन्नस्येत्यादिना॥ अबाधित-तत्पदसुख्यासामानाधिकरण्यविरोधादब्रह्मणि जीवे ब्रह्मत्वसम्पादना-र्थत्वं कल्पितुं न शक्यत इत्यर्थः॥ संसारित्वव्याहतिप्रत्यक्षविरोधादबाधि-तत्वमसिद्धमित्याह। दृष्टमिति॥ सर्वप्रमाणानामनुव्याहतत्वं दृश्यते॥

मध्यतोऽन्नꣳ राद्धम्। मध्यतोऽस्मा अन्नꣳ राध्यते। एतद्वा अन्ततोऽन्नꣳ राद्धम्। अन्ततोऽस्मा अन्नꣳ राध्यते ॥१॥ य एवं वेद। क्षेम इति वाचि। योगक्षेम इति प्राणापानयोः। कर्मेति हस्तयोः।

तत्सर्वमुपस्थनिमित्तं ब्रह्मैवानेनात्मनोपस्थे प्रतिष्ठितमित्युपास्यम् सर्वं ह्याकाशे प्रतिष्ठितमतो यत्सर्वमाकाशे तद्ब्रह्मैवेत्युपास्यम्। तस्माकाशं ब्रह्मैव। तस्मात्तत्सर्वस्य प्रतिष्ठेत्युपासीत। प्रतिष्ठागुणोपासनात्प्रतिष्ठावान् भवति। एवं पूर्वेष्वपि। यद्यन्नाधीनं फलं तद्ब्रह्मैव तदुपासनात्तद्वान् भवति इति द्रष्टव्यम्। श्रुत्यन्तराच्च तं यथायथोपासते तदेव भवतीति। तन्मह इत्युपासीत। महो महत्त्वगुणवत्तदुपासीत। महान् भवति। तन्मन इत्युपासीत। मननं मनो मानवान् भवति मननसमर्थो भवति। तन्नम इत्युपासीत। नमनं नमो नमनगुणवदुपासीत। नम्यन्ते प्रह्वीभवन्त्यस्मा उपास्तिले कामाः कास्यन्त इति भोग्याविषया इत्यर्थः। तद्ब्रह्मेत्युपासीत। ब्रह्मपरिदृढतममित्युपासीत। ब्रह्मवांस्तद्गुणो भवति। तद्ब्रह्मणः परिमर इत्युपासीत। ब्रह्मणः परिमरः परिम्रियन्तेऽस्मिन् पञ्च देवताः विद्युद्वृष्टिश्चन्द्रमा आदित्योऽग्निरित्येताः। अतो वायुः परि-

---

आत्मनश्च संसारधर्मवत्त्वस्य तर्कापरिशुद्धत्वात्तत्प्रत्यक्षस्य भ्रान्तत्वाच्च शास्त्रज्ञानबाधकत्वं सम्भवतीत्याह। नेति॥ सुखादेरुपलभ्यत्वान्नोपलब्धृधर्मत्वं सम्भवति रूपादिवदित्यर्थः॥ संसारित्वमाहकं यद्यपि प्रत्यक्षप्रमाणं न भवति तथापि संसारधर्मविशिष्ट आत्मा स्वचैतन्येनोपलभ्यत इति

गतिरिति प्राद्योः । विमुक्तिरिति पायौ । इति मानुषीः समाज्ञाः । अथदैवीः । तृप्तिरिति दृष्टौ । बलमिति विद्युति ॥ २ ॥ यश इति पशुषु । ज्योतिरिति नक्षत्रेषु । प्रजातिरमृतमानन्द इत्युपस्थे । सर्वमित्याकाशे । तत्प्रतिष्ठेत्युपा-

---

मरः श्रुत्यन्तरप्रसिद्धेः । स एष एवायं वायुराकाशेनानन्य इत्याकाशो ब्रह्मणः परिमरस्तमाकाशं वाय्वात्मानं ब्रह्मणः परिमर इत्युपासीत । एवमेवंविदं प्रतिस्पर्द्धिनो द्विषन्तोऽद्विषन्तोऽपि सपत्ना यतो भवन्त्यतो विद्वियन्ते द्विषन्तः सपत्ना इति । प्राणं द्विषन्तः सपत्नास्ते परिम्रियन्ते प्राणान् जहतीत्यर्थः । किञ्च ये चाऽप्रिया अस्य भ्रातृव्या अद्विषन्तोऽपि ते च परिम्रियन्ते । प्राणो वाऽन्नं शरीरमन्नादमित्यारभ्याकाशान्तस्य कार्यस्यैवान्नान्नादत्वमुक्तम् । उक्तं नाम किं तेन तेनैतल्लिङ्गं भवति कार्यविषय एव भोज्यभोक्तृत्व श्रुतः संसारो न त्वात्मनीति । आत्मनि तु भ्रान्त्योपचर्यते ॥ नन्वात्मापि परमात्मनः कार्यं ततो युक्तस्य संसार इति । न । असंसारिण एव प्रवेशश्रुतेः । तत्सृष्ट्वा तदेवानुप्राविशदित्याकाशादिकार-

---

स्वानुभवविरोधाच्च शाब्दमसंसारित्वज्ञानं प्रमाणमिति चेन्नैतदपि युक्तं कर्मत्वकर्तृत्वविरोधादित्यर्थः ॥ प्रत्यक्षविरोधाभावेऽप्यनुमानविरोधो भविष्यतीत्याह । त्रासादिति ॥ त्रासादि साश्रयं कार्यत्वाद्घटवदित्यस्याश्रयस्यासम्भवादात्मैव तदाश्रयोऽनुमीयत इति न वाच्यमुपलभ्यं नोपलभ्यमुर्ध्वम्-

सीत । प्रतिष्ठावान् भवति । तन्महेत्युपासीत । महान् भवति । तन्मन इत्युपासीत । मानवान् भवति ॥ ३ ॥ तन्नम इत्युपासीत । नम्यन्ऽस्मै कामाः । तद्ब्रह्मेत्युपासीत । ब्रह्मवान् भवति । तद्ब्रह्मणः परिमर इत्युपासीत ।

णस्य ह्यसंसारिण एव परमात्मनः कार्येष्वनुप्रवेशः श्रूयते । तस्मात्कार्यानुप्रविष्टो जीव आत्मा पर एवासंसारी । दृष्ट्वानुप्राविशदिति समानकर्तृत्वोपपत्तेश्च । सर्गप्रवेशक्रिययोश्चैकश्चेत्कर्त्ता ततः क्त्वाप्रत्ययो युक्तः । प्रविष्टस्य तु भावान्तरापत्तिरिति चेन्न । प्रवेशस्यान्यार्थत्वेन प्रत्याख्यातत्वात् । अनेन जीवेनेति विशेषश्रुतेः । धर्म्मान्तरेणानुप्रवेश इति चेन्न । तत्त्वमसीति पुनस्त्वद्भावोक्तेः । भावान्तरापन्नस्यैव तदपोहार्थो सम्पदिति चेन्न । तत्सत्यं स आत्मा तत्त्वमसीति सामानाधिकरण्यात् । दृष्टं जीवस्य संसारित्वमिति चेन्न । उपलब्धुरनुपलभ्यत्वात् । संसारधर्म्मविशिष्ट आत्मोपलभ्यत इति चेन्न । धर्म्माणां धर्म्मिणोऽव्यतिरेकात्कर्मत्वानुपपत्तेः । उष्णप्रकाशयोर्द्रव्यप्रकाश्यत्वानुपपत्तिवत्त्वासादिर्द्यनाद्युःखत्वाद्यनुमीयत इति चेन्नम् । त्वासादेर्दुःखस्य चोपलभ्यमानत्वान्नोपलभ्यधर्म्मत्वम् ।

रूपादिवदिति व्याघातस्तरविरोधाद्ध्यासादपि कार्यदर्शनसम्भवादित्यर्थः । जीवस्य ब्रह्मात्मत्वं प्रतिपादयतः शास्त्रस्य तर्कशास्त्रविरोधादप्रामाण्यमाशङ्क्य दूषयति । कापिलेत्यादिना ॥ तर्कशास्त्रस्य श्रुतेश्च विरुद्धाव्यभिचारित्वेन प्रामाण्यसंशयोऽपि नाशङ्कनीय इत्याह । श्रुत्यप-

पर्य्येण म्रियन्ते द्विषन्तः सपत्नाः। परि ये ऽप्रिया भ्रातृव्याः। स यश्चायं पुरुषे। यश्चासावादित्ये। स एकः॥ ४॥ स य एवंवित्। अस्माल्लोकात्प्रेत्य। एतमन्नमयमात्मानमुपसङ्क्रम्य। एतं प्राणमयमात्मानमुपसङ्क्रम्य एतं। मनोमयमात्मानमुपसङ्क्रम्य। एतं विज्ञानमयमात्मान-

---

कापिलकाणादादितर्कशास्त्रविरोध इति चेन्न। तेषां मूलाभावे वेदविरोधे च भ्रान्त्योपपत्तेः। श्रुत्युपपत्तिभ्याञ्च सिद्धमात्मनोऽसंसारित्वम्। एकत्वाच्च कथमेकत्वमित्युच्यते॥

स यश्चायं पुरुषे यश्चासावादित्ये स एक इत्येवमादि पूर्ववत्। सर्वं अन्नमयादिक्रमेणानन्दमयमात्मानमुपसंक्रम्यैतत्साम गायन्नास्ते। सत्यं ज्ञानमित्यस्या ऋचोऽर्थो व्याख्यातो विस्तरेण तद्विवरणभूतयाऽऽनन्दवल्ल्या सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति तस्य फलवचनस्यार्थविस्तारो नोक्तः। के ते किं विषया वा सर्वे कामाः कथं वा ब्रह्मणा सह समश्नुत इत्येतदुक्तव्यमितीदमिदानीमारभ्यते। तत्र पितापुत्राख्यायिकायां पूर्वविद्याशेषभूतायां तपो ब्रह्मविद्यासाधनमुक्तम्। प्राणादेराकाशान्तस्य च

पत्तिभ्याञ्चेति॥ किञ्च तार्किकेणापि ईश्वराधीनं जीवस्य सुखित्वं निरूपणीयं न तन्निरूपयितुं शक्यते॥ स्वात्मनीश्वरस्य सुखदुःखहेतुत्वासम्भवादित्यभिप्रेत्याह। एकत्वाच्चेति॥

स य इत्यादिपदव्याख्यानसमुपेक्षोपसङ्क्रमणसामगानयोरेककर्तृत्वम-

सुपसङ्क्रम्य। एतमानन्दमयमात्मानमुपसङ्क्रम्य। इमाँल्लोकान् कामान्नी कामरूप्यनुसञ्चरन्। एतत्साम गायन्नास्ते। हाऽवु हाऽवु हाऽवु ५ ॥ अहमन्नमहमन्नमहमन्नम्। अहमन्नादोऽहमन्नादो २ ऽहमन्नादः। अहꣳ श्लोकदहꣳश्लोकदहꣳश्लोकत्। अहमस्मि प्रथमजा ऋता-

---

कार्यस्यान्नान्नादत्वेन विनियोगश्चोक्तः। ब्रह्मविषयोपासनानि च। ये च सर्वे कामाः प्रतिनियतानेकसाधनसाध्या आकाशादिकार्यभेदविषया एते दर्शिताः। एकत्वे पुनः कामकामित्वानुपपत्तिः। भेदजातस्य सर्वस्यात्मभूतत्वात्। तत्र कथं युगपद्ब्रह्मस्वरूपेण सर्वान् कामानेवंवित्समश्नुत इत्युच्यते। सर्वात्मत्वोपपत्तेः। कथं सर्वात्मत्वोपपत्तिरित्याह। पुरुषादित्यस्य चैकत्वविज्ञानेनोपोद्घातोत्कर्षापकर्षवन्मयाद्यात्मनोऽविद्याकल्पितान् क्रमेण संक्रम्यानन्दमयान्तान् सत्यं ज्ञानमनन्तं ब्रह्माद्यस्यादिधर्मकं स्वाभाविकमानन्दमजमद्वैतमभयमद्वैतं फलमाप्त्वा इमाँल्लोकान् भूरादीननुसञ्चरन्निति व्यवहितेन सम्बन्धः। कथमनुसञ्चरन्। कामान्नो कामतोऽन्नमस्येति कामान्नी। तथा कामतो रूपाण्यस्येति कामरूपी। अनुसञ्चरन् सर्वात्मनेमाँल्लोकानात्मत्वे-

---

न्वयप्रदर्शनेन दर्शितमिदानीं ब्रह्मसमाप्तिपर्यन्तस्य ग्रन्थस्य तात्पर्यं दृष्टकीर्त्तनेनाह। सत्यं ज्ञानमित्यादिना ॥ अविद्याजेयत्वेन हैतावभासमनुभवन्विद्वान् सर्वस्यात्माहमिति मन्यमानोऽणिमाद्यैश्वर्यभाजां योगिनां यत्-

३स्य। पूर्वं देवेभ्योऽमृतस्य नाऽभायि। यो मा ददाति स इदेव माऽवाः। अहमन्नमन्नमदन्त-माऽग्मि। अहं विश्वं भुवनमभ्यभवांऽ। सुवर्ण-ज्योतीः। य एवं वेद। इत्युपनिषत्॥ ६॥ राध्यते विद्युति मानवान् भवत्येको हाऽवु य एवं वेदैकञ्च॥ इति दशमोऽनुवाकः॥ १०॥

नानुभवन्। किमेतत्साम गायन्नास्ते। समवाङ्ब्रह्मैव साम सर्वानन्यरूपं गायन् छन्दयन्नात्मैकत्वं प्रख्यापयन् लोकानु-ग्रहार्थतद्विज्ञानफलं चातीव कृतार्थत्वं गायन्नास्ते तिष्ठति। हावु हावु हावु अहो इत्येतस्मिन्नर्थेऽत्यन्तविस्मयख्याप-नार्थः। कः पुनरसौ विस्मय इत्युच्यते। अहैत आत्मा निरञ्जनोऽपि सन्नहमेवान्नमन्नादश्च। किञ्चाहमेव श्लोक-कृत्। श्लोको नामान्नान्नदयोः सङ्घातस्तस्य कर्त्ता चेतना-वान्। अन्नस्यैव वा परार्थस्यान्नादार्थस्य सतोऽनेकात्मकस्य परार्थेन हेतुना सङ्घातकृत्। त्रिरुक्तिर्विस्मयत्वख्याप-नार्था। अहमस्मि भवामि। प्रथमजः प्रथमोत्पन्नः। ऋतस्य सत्यस्य मूर्त्तामूर्त्तस्यास्य जगतो देवेभ्यश्च पूर्वमहतस्य नाभिर्मध्यं मत्संस्थमहतत्वं प्राणिनामित्यर्थः। यः कश्चिन्-मामामनन्नन्नार्थिभ्यो ददाति प्रयच्छति अन्नात्मना ब्रवीति

कामान्नत्वं कामरूपत्वञ्च ममैवेति पश्यन्नुपलब्धीनु विषयानन्दानश्नुत इत्युपचर्यत इत्याह। सर्वात्मत्वापत्तेरिति॥ प्रथमजो हिरण्यगर्भो-ऽग्महम्। श्रुतिस्मावदादरार्था। देवेभ्यः स्वव्यष्टिरूपेभ्यः पूर्वं विराड्-

भृगुस्तच्चै यतो विज्ञन्ति तद्विजिज्ञासस्व तत्तृ-
योदशानूं प्राणं मनो विज्ञानमिति विज्ञाय तं
तपसा द्वादश द्वादशानन्द इति सैषा दशानूं न
निन्द्यात् प्राणःशरीरमनूं न परिचक्षीतापो ज्यो-
तिरनूं बह्व कुर्वीत पृथिव्यामाकाश एकादशैका-
दश। न कञ्चनैकषष्ठिरेकानूविंशतिरेकानूविंश-

स इत इत्यर्थः। एवमेवमविनष्टं यथाभूतं मां आवा अव-
तीत्यर्थः। यः पुनरन्यो मामदत्वार्थिभ्यः काले प्राप्तेऽनूमत्ति
तमनूमदन्तमहमनूमेव भक्षयन्तं पुरुषं भोजयामि प्रत्यङ्गि।
अत्राहैवं तर्हि बिभेमि सर्व्वात्मत्वप्राप्तेर्मोक्षादस्तु संसार एव
यतो मुक्तोऽप्यहमनूभूत आद्यः स्यामन्नस्यैव मा भैषीः संव्यव-
हारविषयत्वात्सर्व्वकामाशनस्याक्तीत्यायं संव्यवहारविषय-
मन्नान्नादादिलक्षणमविद्याकृतं विद्यया ब्रह्मत्वमापन्नो विद्वां-
स्तस्य नैव द्वितीयं वस्त्वन्तरमस्ति यतो बिभेति अतो न
बिभेतव्यं मोक्षात्। एवं तर्हि किमिदमाह अहमनूमह-
मनूमहमन्नाद इत्युच्यते। योऽहमन्नान्नादादिलक्षणः संव्यव-
हारः कार्य्यभूतः। ससंव्यवहार कार्य्यभूतमेव न परमार्थ-
वस्तु। स एवम्भूतोऽपि ब्रह्मनिमित्तो ब्रह्मव्यतिरेकेणा-

रूपमेवेत्यर्थः। आवेति लोष्मध्यमपुरुषैकवचनम्। पौनः पुन्येनेत्येवं
सर्व्वव्याख्यानेषु निपात्यत इत्यवतीति व्याख्यातम्। अभिभवामि उप-
संहरामीत्यर्थः। ईश्वरात्मताज्ञानेनाहं बाधे इतं ततो नास्ति भयकारण-
मित्यर्थः। इत्येवार्थे॥

शतिः ॥ * ॥ ॥ सह नाववतु । सहनौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥ ॐ शान्तिः शान्तिः शान्तिः ॥ भृगुरित्युपनिषत् । शन्नो मित्रः ॥ आवीद्वक्तारम् ॥ ॐ शान्तिः ३ ॥ इति तैत्तिरीयोपनिषत्समूर्णा ॥

सन्निति ज्ञात्वा ब्रह्मविद्याकार्यं सर्वभावस्य स्तुत्यर्थमुच्यते । अहमन्नमहमन्नमहमन्नम् । अहमन्नादोऽहमन्नादोऽहमन्नाद इत्याद्यन्तो भयादिदोषगन्धोऽप्यविद्यानिमित्तो विद्योच्छेदात् ब्रह्मभूतस्य नास्तीत्यहं विश्वं समस्तं भुवनं भूतैः सम्भजनीयं ब्रह्मादिभिर्भवन्तीति वाच्यिन् भूतानीति भुवनमध्यभवामभिभवामि परेणेश्वरेण स्वरूपेण । सुवर्ण-ज्योतिः सुवरादित्यो नकार उपमार्थः । आदित्य इव सकृद्विभातमस्मदीयं ज्योतिर्ज्योतिः प्रकाश इत्यर्थः । इति वल्लीहयविहितोपनिषत्परमात्मज्ञानं नाम । तामेतां यथोक्तामुपनिषदं शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वा भृगुवत्तपो महदास्थाय य एवं वेद तस्येदं फलं यथोक्तमोमित्युक्तेरिति ॥ इति श्रीपरमहंसपरिव्राजकाचार्यस्य शङ्करभगवतः कृतौ तैत्तिरीयोपनिषद्भाष्यं समाप्तम् । ॐ तत्सत् ।

तैत्तिरीयकभाष्यस्य शङ्करस्य दुर्गमस्य ।
स्फुटार्थं बोधिका व्याख्या निरमायि सुटीप्पणी ॥

इति श्रीपरमहंसपरिव्राजकाचार्य श्रीमद्गुज्ञानन्दपूज्यपादशिष्य श्रीभगवदानन्दज्ञानविरचिता तैत्तिरीयभाष्यटिप्पणी समूर्णा ॥ ॐ तत्सत् ॥

ॐ तत्सत् ॐ ॥

ऋग्वेदीयैतरेयोपनिषद्भाष्यम् ।

॥ ॐ नमः परमात्मने ॥ परिसमाप्तं कर्म्म सहापरब्रह्म-विषयविज्ञानेन । सैषा कर्मणो ज्ञानसहितस्य परा गतिरुक्थविज्ञानद्वारेणोपसंहृता। एतत् सत्यं ब्रह्म प्राणाख्यम् एष एको देवः । एतस्यैव प्राणस्य सर्वे देवा विभूतयः ।

ऋग्वेदीयैतरेयोपनिषद्भाष्यटीका ॥

॥ ॐ नमो गणेशाय ॥ आत्मा वा इत्यादिना केवलात्मविद्यारम्भस्यावसरं वक्तुं वृत्तं कीर्त्तयति । परिसमाप्तमिति ॥ तत्परिसमाप्तिः कथं गम्यत इत्याशङ्क्याह । सैषेति ॥ परा गतिरिति परं गन्तव्यं प्राप्तव्यं फलमित्यर्थः ॥ उपसंहारमेव वाक्योदाहरणेन दर्शयति । एतदिति ॥ तत्सह सर्वेण भोज्येन संयुक्तोऽध्यात्माधिदैवलक्षणः प्राणः सत्यैकशब्दवाच्यो भवति प्राणस्वरूपमनेन वाक्येनोपसंहृतमित्यर्थः ॥ अनेन प्राण एक एवेत्युक्तमित्याह । एष इति ॥ तर्हि वागग्न्यादयो देवाः के इत्याशङ्क्य तस्य वाक्तन्तिः ॥ अथातोऽस्य पुरुषस्येत्यादिना प्राणस्यैव विभूतयो विस्तारा इत्युक्तमित्याह । एतस्यैवेति ॥ एवं सर्व्वात्मकप्राणस्यात्मतत्त्वेन विज्ञानात् कर्म्मसहितात् सर्वदेवतात्मकप्राणप्राप्तिलक्षणं फलं ब्रह्ममयो देवतामयो ब्रह्ममयोऽमृतमयोऽसम्भूय देवता अप्येति य एवं वेदेत्यनेन वाक्येनोपसंहृतमित्याह । एतस्येति ॥ तथा च ज्ञानसहितेन कर्मणा केवलात्मस्वरूपावस्थानलक्षणमोक्षस्याभिप्रेतत्वाद्यर्थं केवलात्मविद्यारम्भस्येदानीमवसर इति भावः ॥ अवान्तरे सर्व्वात्मकसूत्रात्मप्राप्तिव्यतिरिक्तमोक्षस्याभावात्तदर्थं केवलात्मविद्यारम्भो न युक्त इति शङ्कां निरस्तसमुत्थापयति । सोऽयमिति ॥ एतस्यैव विषयादिमतः सुख-

एतस्य प्राणस्यात्मभावं गच्छन्देवता अप्येतीत्युक्तम्। सोऽयं देवताप्यलक्षणः परः पुरुषार्थः। एष मोक्षः। स चायं यथोक्तेन ज्ञानकर्मसमुच्चयेन साधनेन प्राप्तव्यो नातः परमस्तीत्येके प्रतिपन्नास्तान् निराचिकीर्षुरुत्तरं केवलात्मज्ञानविधानार्थमात्मा वा इदमित्याद्याह। कथं पुनरकर्म-

---

रूपत्वेन पुरुषार्थत्वान्मोक्षत्वं न निर्विषयस्य केवलात्मस्वरूपावस्थानस्येत्याह। एष इति॥ अयमपि चेन्मोक्षः केवलमात्मज्ञानेनापि साध्यते तदा तदारम्भोऽर्थवानित्याशङ्क्य सविशेषस्य मोक्षस्य सविशेषेणैव साधनेन सिद्धिर्युक्तेत्याह। स चेति॥ आत्मनः सविशेषत्वेन केवलात्मविद्याया अभावादपि न तस्या हेतुत्वमित्याह। नातः परमिति॥ तन्मतं प्रदर्श्य तन्निराकरणार्थत्वेन केवलात्मविद्यावाक्यमवतारयति। तानिति॥ केवलात्मज्ञानेति निर्विशेषात्मविषयत्वमकर्मनिष्ठत्वं कर्मानङ्गत्वलक्षणं कर्मासम्बन्धित्वञ्च कैवल्यमिह विवक्षितम्॥ नन्वात्मा वा इदमित्यादि कथं केवलात्मविषयम्। स इमान् लोकान्सृजतेति लोकसृष्टिप्रतीतेः। तस्याश्च सविशेषहिरण्यगर्भकर्तृकत्वेन पुराणेषु प्रसिद्धेः। ताभ्यो गामानयदित्यादि व्यवहाराणां लोके सविशेषविषयत्वप्रसिद्धेः। पूर्वत्राघातो रेतसः सृष्टिः। प्रजापते रेतो देवा इत्यत्र प्रजापतिशब्दितस्य हिरण्यगर्भस्य प्रस्तुतत्वाच्च तस्य तद्विषयत्वस्यौचित्यादात्मशब्दीतिरित्यधिकरणे पूर्वपक्षन्यायेन शङ्कते। कथमिति॥ सविशेषाविषयत्वे सत्यात्मविद्यायाः कर्मासम्बन्धोऽप्यसिद्ध इत्यभिप्रेत्योक्तम्। अकर्मसम्बन्धीति। आत्मा वा इदमेक एवाग्र आसीदित्यद्वितीयात्मोपक्रमात् एष ब्रह्मैष इन्द्र इत्यादनुक्रम्य सर्वं तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितमिति प्रज्ञानशब्दितप्रत्यगात्माधिष्ठानत्वेन तद्व्यतिरेकेण ब्रह्मशब्दितहिरण्यगर्भादिप्रपञ्चस्याभावमुक्त्वा प्रज्ञानं ब्रह्मेत्यद्वितीयात्मनोपसंहारात् स एतमेव पुरुषं ब्रह्म ततमपश्यदिति मध्ये परामर्शाद्ब्रह्मात्माद्वितीयत्वस्य मानान्तरागम्यत्वेनापूर्वत्वादनुघ्नि स्वर्गे लोके सर्वान् कामानाप्त्वाऽमृतः समभवदिति। स्वर्गशब्दितनिरतिशयत्वसुखात्मकब्रह्मैक्येन स्थितस्य तदन्तर्भूत-

सम्बन्धिकेवलात्मविज्ञानविधानार्थं उत्तरो ग्रन्थ इति गम्यते। अन्यार्थानवगमात्। तथा च पूर्वोक्तानां देवानामग्न्यादीनां संसारित्वं दर्शयिष्यति अशनायादिदोषवत्त्वेन। तमशनायापिपासाभ्यामन्ववार्जदित्यादिना। अशनायादिमत् सर्वं संसार एव। परस्य तु ब्रह्मणोऽशनायाद्यत्ययश्रुतेः। भवत्वेवं केवलात्मज्ञानं मोक्षसाधनं न त्वकर्म्मैवाधि-

---

वैषयिकसर्व्वानन्दप्राप्तिलक्षणफलोक्तेः स्तुत्यादयर्थवादात् स एतमेव सीमानं विदार्य्यैतया द्वारा प्रापद्यतेति प्रवेशोक्तेः। तस्य तय आवसथास्त्रयः स्वप्ना इति जाग्रदाद्यवस्थात्रयस्य स्वप्नत्वेन मिथ्यात्वोक्त्युपपत्तेश्च॥ निर्विशेषाद्वितीयात्मपरत्वावगमेन अन्यस्यार्थान्तरशङ्काऽनवकाशाल्लोकादिसृष्ट्युक्तेश्चाध्यारोपापवादाभ्यामुक्तात्मप्रतिपत्त्यर्थमात्मन्यारोपात् परमात्मैवेहात्मशब्देन गृह्यते इतरवत्। यथेतरेषु सृष्टिश्रवणेषु। तस्माद्वा एतस्मादात्मन आकाशः सम्भूत इत्येवमादिषु परस्यात्मनो ग्रहणम्। यथा वेतरस्मिन् लौकिके आत्मशब्दप्रयोगे प्रत्यगात्मैव मुख्य आत्मशब्देन गृह्यते तथेहापि भवितुमर्हति। कुतः। वाक्यार्थदर्शनात्। आत्मगृहीतिरितरवदुत्तरादित्यधिकरणसिद्धान्तन्यायेन केवलात्मपरत्वनिश्चयाच्च सविशेषपरत्वमुत्तरग्रन्थस्येत्याह। अन्यार्थेति॥ यच्चैष एव मोक्ष इति तत्राह। तथा चेति॥ तथा संसारित्वञ्च दर्शयिष्यतीत्यन्वयः। तं हिरण्यगर्भस्य सूक्ष्मरूपं वैराजं पिण्डमशनायापिपासाभ्यां संयोजितवानीश्वर इति भूत्यर्थः। अशनायादिमत्त्वेऽपि निरतिशयसुखवत्त्वेन देवतात्वस्य मोक्षत्वं स्यादित्यत आह। अशनायादिमदिति॥ अशनायादेर्दुःखनियतत्वाच्चिरतिशयसुखत्वं तस्मात्सिद्धमिति संसारित्वमित्यर्थः। यच्च निर्विशेषात्मस्वरूपावस्थानस्य विषयादिरहितत्वेन न मोक्षत्वमिति तदसत्। तस्य योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येतीत्यशनाद्यत्ययश्रुतेस्तन्निवृत्तिदुःखाप्रवृत्तेः। स्वतश्चानन्दो ब्रह्मेति व्यजानादिति स्वयन्तरादक्षिन् स्वर्गे लोके इतीहाप्यानन्दरूपतावगमात् स्वर्गशब्दस्य

क्रियते। विशेषाश्रवणात्। अकर्म्मिण आत्मन्यन्तरस्येहाश्रवणात्। कर्म्म च बृहतीसहस्रलक्षणं प्रसुत्यानन्तरमेवात्मज्ञानं प्रारभ्यते। तस्मात् कर्म्मैवाऽधिक्रियते। न च कर्म्मासम्बन्ध्यात्मविज्ञानं पूर्ब्ववदन्ते उपसंहारात्। यथा कर्म्मसम्बन्धिनः पुरुषस्य सूर्य्यात्मना स्थावरजङ्गमादिसर्व्वप्राण्यात्मत्वमुक्तं ब्राह्मणेन मन्त्रेण च सूर्य्यात्मेत्यादिना तथैवैष ब्रह्मा एष

सुखसामान्यवाचित्वादनन्ते स्वर्गे लोके ब्रह्मविदः स्वर्गलोकमित जर्ह्व विसृजा इत्यादिश्रुतिषु ब्रह्मानन्दे स्वर्गशब्दप्रयोगाच्च। तस्य विषयाभावेऽपि पुरुषार्थत्वान्मोक्षत्वमित्याह। परस्य त्विति॥ एवं निर्व्विशेषात्मविद्याया मोक्षसाधनत्वमङ्गीकृत्य तस्या अकर्म्मिनिष्ठत्वनियमरूपं कैवल्यं न सम्भवतीति वदन् संन्यासमाक्षिपति। भवत्विति॥ विशेषाश्रवणमेव स्फुटयति। अकर्म्मिण इति॥ संन्यासिन इत्यर्थः। न केवलं विशेषाश्रवणं किन्तु सन्निधानात् कर्म्मिणः प्रतीतेः कर्म्मिसम्बन्धित्वनियमश्रवणञ्चास्तीत्याह। कर्म्म च बृहतीसहस्रलक्षणमिति॥ तथा च तद्द्वारा कर्म्मी सन्निहित इत्यर्थः॥ तस्मादिति॥ अतो न कर्म्मत्यागरूपसंन्यासावसोऽस्तीत्यर्थः। एवमात्मविद्यां केवलां कर्म्मसम्बन्धिनीमङ्गीकृत्य तस्या अकर्म्मिनिष्ठत्वनियमो निराकृतः॥ इदानीमङ्गीकारं परित्यजति। न चेति॥ पूर्ब्वत्र कर्म्मसम्बन्धिज्ञानविषयस्य सर्व्वात्मत्वोक्तेरेष ब्रह्मेत्यादिनाऽत्रापि सर्व्वात्मत्वोक्तेस्तेन च लिङ्गेनाऽस्याप्यात्मज्ञानस्य कर्म्मसम्बन्धित्वानुमानाद्दृष्यमाणस्यात्मज्ञानस्य कर्म्मसम्बन्धित्वमित्यर्थः॥ संग्रहवाक्यं विवृणोति। यथेत्यादिना॥ कर्म्मसम्बन्धिन इति तस्यैष श्लोकं लोकमभ्यार्च्चत् पुरुषरूपेण य एष तपतीत्यादिना सूर्य्यात्मत्वञ्च तस्य सर्व्वात्मत्वं तस्माच्छतचिन इत्याचक्षते। एतमेव सन्तमित्यादिना प्राणश्च इत्येवं विद्यादित्यन्तेन प्राणो वै सर्व्वाणि भूतानि चेत्यनेन चोक्तमित्यर्थः। जगतो जङ्गमस्य तस्थुषः स्थावरस्य सूर्य्यः आत्मेति मन्त्रार्थः। प्रज्ञानेत्रमिति प्रज्ञायच्छितब्रह्मनेत्रकमित्यर्थः। सन्दंशन्यायेन

इन्द्र इत्याद्युपक्रम्य सर्व्वप्राणात्मत्वम्। यच्च स्थावरजङ्गमं सर्व्वं तत् प्रज्ञानेत्रमित्युपसंहरिष्यति। तथाच संहितोपनिषदि एतं ह्येव बह्वृचो महत्युक्थे मीमांसन्त इत्यादिना कर्म्मसम्बन्धित्वमुक्त्वा सर्व्वेषु भूतेषु एतमेव ब्रह्मेत्याचक्षत इत्युपसंहरति। तथा तस्यैव योऽयमशरीरः प्रज्ञात्मेत्युक्तस्य यश्चासावादित्य एकमेव तदिति विद्यादित्येकत्वमुक्त्वापि कोऽयमात्मेत्युपक्रम्य प्रज्ञात्मत्वमेव प्रज्ञानम् ब्रह्मेति दर्शयिष्यति। तस्मान्नाकर्म्मसम्बन्ध्यात्मज्ञानं पुनरुक्त्याऽऽनर्थक्यमिति चेत्। कथं प्राणो वा अहमस्मि एष इत्यादि ब्राह्मणेन सूर्य्य आत्मेति च मन्त्रेण निर्धारितस्यात्मन आत्मा वा इदमित्यादिब्राह्मणेन कोऽयमात्मेति प्रश्नपूर्व्वकं पुनर्निर्धारणं पुनरुक्तमनर्थकमिति चेन्न। तस्यैव धर्म्मा-

---

नाथस्य कर्म्मसम्बन्ध्यात्मविषयत्वमिति वदन् सर्व्वात्मत्वं लिङ्गस्य कर्म्मसम्बन्ध्यात्मनियतत्वमाह। तथा चेति॥ तथा संहितोपनिषदि चेति चकारान्वयः। महत्युक्थे बृहतीसंज्ञाख्ये यज्ञे एतं प्रकृतमात्मानं ऋग्वेदिनो विचारयन्तीति शेषार्थः। संहितोपनिषदि प्रज्ञात्मेत्युक्तस्यात्मनो योऽयमशरीरो ध्यायेदित्यादिवाक्यपर्य्यालोचनया कर्म्मसम्बन्धप्रतीतेरस्यापि प्रज्ञात्मत्वोक्त्या च कर्म्मसम्बन्धावगमात् तज्ज्ञानस्य कर्म्मसम्बन्धित्वमित्याह। तथा तस्यैवेति॥ शङ्कामपसंहरति। तस्मादिति॥ शङ्कावादेव सिद्धान्त्याशङ्कामाशङ्कते। पुनरुक्तीति॥ संग्रहवाक्यं विवृणोति। प्राणो वा इत्यादिना॥ पूर्व्वोत्तरब्राह्मणयोरेकार्थत्वे वक्ष्यमाणमपि प्राणात्मविषयं स्यात् न निर्द्धारितमिति पुनरुक्तमित्यर्थः॥ स एव शङ्कां परिहरति। न तस्येति॥ तमेव प्रश्नपूर्व्वकं विवृणोति। कथमित्यादिना॥ जगत्सृष्टेति स इमाँल्लोकान्ससृजतेत्यादिश्रवणादित्यर्थः॥

न्तरविशेषनिर्द्धारणार्थत्वान्न पुनरुक्तादोषः। कथं तस्यैव कर्म्मसम्बन्धिनो जगत्सृष्टिस्थितिसंहारादिधर्म्मविशेषनिर्द्धारणार्थत्वात् केवलोपास्त्यर्थत्वाद्वा अथवा आत्मेत्यादिपरो ग्रन्थसन्दर्भ आत्मनः कर्म्मणोऽन्यचोपासनाप्राप्तौ कर्म्मप्रस्तावे विहितत्वात् केवलोऽप्यात्मोपास्य इत्येवमर्थं भेदाभेदोपास्यत्वादैक एवात्मा कर्म्मविषये भेददृष्टिभाक् स एवाकर्म्मकालेऽभेदेनाप्युपास्य इत्येवमपुनरुक्तता॥

विद्याञ्चाविद्याञ्च यस्तद्वेदोभयं सह। अविद्यया मृत्युन्तीर्त्वा विद्ययाऽमृतमश्नुते इति च। कुर्व्वन्नेवेह कर्म्माणि जिजीविषेच्छतं समा इति च वाजिनाम्। न च वर्षशतात् परमायुर्म्मर्त्यानां यतः कर्म्मपरित्यागेनात्मानमुपासीत।

प्रकारान्तरेण पुनरुक्तिं परिहरति। केवलेति॥ एतमेव परिहारं वा शब्दार्थं वदन् विवृणोति। अथवेति॥ कर्म्मणोऽन्यत्रेति कर्म्माङ्गत्वं तदङ्गोक्त्याद्यधिकरणत्वञ्च विनेत्यर्थः। अप्राप्ताविति छेदः। अप्राप्तत्वे हेतुमाह। कर्म्मप्रस्ताव इति॥ अविहितत्वादिति छेदेनोत्तरत्र हेतुः। न चैवं स्वोक्तकर्म्मसम्बन्धित्वनियमत्यागापत्तिः कर्म्माङ्गाश्रितमात्रस्य त्यागेऽपि कर्म्मसम्बन्धित्वस्य सविशेषविषयत्वलक्षणस्य कर्म्मसमुच्चितत्वलक्षणस्य चात्यागादङ्गीकारवादेनास्य पक्षस्योक्तेर्वाऽविरुद्धत्वात् पक्षे कर्म्मनिष्ठत्वं नियतमिति भावः॥ अत्रैव पक्षे विशेषान्तरमाह। भेदेति॥ भेददृष्टेति छेदान्तयोपास्य इत्यर्थः। अभेदेनेति अहन्त्वेत्यर्थः॥

आत्मा वा इदमित्यादिषट्कस्य स्वपक्षेऽर्थवत्त्वसङ्गा तस्य कर्म्मत्यागेनात्मज्ञानार्थत्वपक्षे बहुश्रुतिविरोधमाह। विद्यामित्यादिना॥ अविद्याशब्देनात्र तत्कार्यं कर्म्मोच्यते। ननु कुर्व्वन्नेवेति मन्त्रे वर्षशतस्य कर्म्मनियतत्वोक्तावपि तदनन्तरं संन्यासः स्यादित्यत आह। न चेति॥ शतायुर्वैपुरुष इतिश्रुतेरित्यर्थः। इहापि इहतीसहस्राख्यस्य यज्ञस्य

दर्शितश्च तावन्ति पुरुषायुषोऽङ्गानि सहस्राणि भवन्ति। वर्षशतञ्चायुः कर्मणैव व्याप्तम्। दर्शितश्च मन्त्रः कुर्वन्नेवेह कर्माणीत्यादिः। तथा यावज्जीवमग्निहोत्रं जुहोति यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेत्याद्यश्च। तं यज्ञपात्रैर्दहन्तीति च। ऋणत्रयश्रुतेश्च। तत्र पारिव्राज्यादिशास्त्रं व्युत्थायाथ भिक्षाचर्यं चरन्तीत्यात्मज्ञानस्तुतिपरोऽर्थवादो-

---

षट्त्रिंशतमच्चराणां सहस्राणीत्युक्ता तावन्ति पुरुषायुषोऽङ्गानि सहस्राणीत्युक्तत्वात् संवत्सरशतमेवायुरित्याह। दर्शितश्चेति॥ भवन्तीत्यनन्तरमितिशब्दो द्रष्टव्यः। पुरुषायुषस्याङ्गानीति माध्यमपाठः साधुः। पुरुषायुषोऽङ्गानीति तु समासान्तविधेरनित्यत्वाभिप्रायेण कथञ्चिच्छेयः॥ पुरुषायुषश्चेद्वर्षशताधिकं नास्ति तर्हि तन्मध्य एव कर्मसंन्यासः स्यादत आह वर्षशतञ्चेति॥ तत्र मानमाह। दर्शितश्चेति॥ ननु पुराणेषु शताधिकस्यायुषोदाहरणादेः श्रुतत्वात् शतवर्षानन्तरं कर्मसंन्यासः स्यादित्याशङ्क्य शतायुःश्रुतिविरोधेन तस्यार्थवादत्वात्तथाङ्गीकारेऽपि जीवनकालस्य सर्वस्यापि कर्मणाव्याप्तत्वश्रुतेर्नैवमित्याह। तथा यावज्जीवमिति॥ जीर्णो वा विरमेदिति वचनाज्जरानन्तरं संन्यासः स्यादित्याशङ्क्य यज्ञपात्रैर्दहनविधानाच्चेत्याह। तं यज्ञपात्रैरिति॥ ननु यावज्जीवादिवाक्यानां प्रतिपन्नगार्हस्थ्यविषयत्वं वक्तव्यमन्यथा ब्रह्मचारिणोऽपि तद्विधिप्रसङ्गात्तस्य गार्हस्थ्यात् पूर्वं कर्मत्यागः स्यादत आह ऋणेति॥ जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायत इति श्रुतेः। ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेदिति स्मृतेश्चेत्यर्थः। ततश्च तदपाकरणार्थं तेनापि गार्हस्थ्यमेव प्रतिपत्तव्यं न संन्यास इत्यर्थः। यदहरेव विरजेत्तदहरेव प्रव्रजेत् व्युत्थायाथ भिक्षाचर्यञ्चरन्ति। ब्राह्मणः प्रव्रजेदुत्पन्नादिति श्रुतिस्मृत्योः का गतिरित्यत आह। तत्रेति॥ ज्ञानस्तुतीति सर्वसंन्यासेनात्मा ज्ञातव्य इति ज्ञानस्तुतिः प्रतीयत इति तत्पर इत्यर्थः। विधि-

ऽनधिकृतार्थो वा न परमार्थतात्मविज्ञाने फलादर्शने क्रियानुपपत्तेः। यदुक्तं कर्म्मिण एव चात्मज्ञानं कर्म्मसम्बन्धि चेत्यादि तन्न। परं ह्यात्मकामं सर्व्वसंसारदोषवर्जितं ब्रह्माहमस्मीत्यात्मत्वेन विज्ञाते कृतेन कर्त्तव्येन वा प्रयोजनं आत्मनोऽपश्यतः फलादर्शने क्रिया नोपपद्यते। फलादर्शनेऽपि नियुक्तत्वात् करोतीति चेन्न। नियोगाविषयात्मदर्शनादिष्टयोगमनिष्टवियोगञ्चात्मनः प्रयोजनं पश्यंस्तदुपायार्थी यो भवति स नियोगस्य विषयो दृष्टो लोके नतु तद्विपरीतनियोगाविषयाब्रह्मात्मदर्शी। ब्रह्मात्म-

---

त्वेऽपि कर्म्मानधिकृतान्धपङ्ग्वादिविषयत्वमेवेत्याह। अनधिकृतेति॥ तस्माद्यात्कर्म्मिनिष्ठैव विद्या किन्तु कर्म्मिनिष्ठा तत्सम्बन्धिनी चेति स्थितम्॥ नदेतत्सिद्धान्ती परिहरति। नेति॥ एवं हि कर्म्मिनिष्ठा विद्या स्यात्। यदि विदुषोऽपि कर्म्मानुष्ठानं स्यात्तदपि प्रयोजनार्थितया वा स्यात्काम्य इव नियोगबलाद्वाप्राप्ताकरणत इव नित्यकर्म्मणि। तत्र नाद्य इत्याह। परमार्थेति॥ संप्रहवाक्यं विद्यास्तुतिविधेयार्थेऽध्याहारपूर्व्वकं नञर्थं विद्योति। यदुक्तमित्यादिना॥ कर्म्मसम्बन्धि चेति कर्म्मश्लोक्यात्माश्रयमित्यर्थः॥ परमार्थेति वाक्यांशं विद्योति॥ परमिति॥ व्यर्थप्राप्तार्थमनर्थनिवृत्त्यर्थं वा कर्म स्यान्नोभयमपीति वक्तुं विशेषणद्वयं दोषपदेन रागद्वेषाभावेनापि प्रवृत्त्यभावं सूचयति। प्रागनुष्ठितकर्म्मणाप्यसम्बन्धे कर्त्तव्ये न सम्बन्धो दूरापास्त इति वक्तुं कृतेनेत्युक्तम्॥ द्वितीयं शङ्कते। फलादर्शनेऽपीति॥ ममेदं कार्य्यमिति बोद्धा हि नियोगस्य विषयो नियोज्यः कार्य्ये स्वकीयत्वज्ञानञ्च तज्जन्यफलार्थिनः। न चात्मनोऽसङ्गित्वज्ञानिनो ममेदमिति बुद्धिर्भवति अतो न तस्य नियुक्तत्वमित्याह। न नियोगेति॥ तदेवोपपादयति। दृष्टेति॥ 'ममेदं कार्य्यमिति बोधाभावेऽपि चेन्नियुज्येत तर्हि राजसूयादिकं ब्राह्मणादिना कर्त्तव्यं स्यादग्निष्टोमादिकञ्च सर्व्वदा कर्त्तव्यं स्याद्विनिमित्तत्वा-

त्वदर्थमपि सन् चेन्नियुज्येत नियोगाविषयोऽपि सन्न कश्चिदनियुक्त इति सर्व्वं कर्म्म सर्व्वेण सर्व्वदा कर्त्तव्यं प्राप्नोति। तच्चानिष्टम्। न च स नियोक्तुं शक्यते केनचित्। आम्नायस्यापि तत्प्रभवत्वात् न हि स्वविज्ञानोत्थेन वचसा स्वयं नियुज्यते। नापि बहुवित् स्वाम्यविवेकिना भृत्येन। आम्नायस्य नित्यत्वे सति स्वातन्त्र्यात् सर्व्वान् प्रति नियोक्तृत्वसामर्थ्यमिति चेन्न। उक्तदोषात्। तथापि सर्व्वेण सर्व्वदा विशिष्टं कर्म्म कर्त्तव्यमित्युक्तो दोषोऽपरिहार्य्य एव। तदपि शास्त्रे-

---

विशेषादित्याह। ब्रह्मात्मत्वेति। न कश्चिन्न नियुक्त इति नञद्वयेन सर्व्वोऽपि नियुक्त एवेत्यर्थः। किञ्च नियोक्तायस्य किं यः कश्च पुरुषो देवो वा। आद्ये विदुष ईश्वरात्मत्वज्ञानात् सर्व्वं नियोक्तृत्वेन स्वनियोज्येनास्य नियोज्यत्वं स्यात्तच्च विरोधान्न सम्भवतीत्याह। न च स इति। तस्यैव सर्व्वनियोक्तृत्वादित्यर्थः॥ नन्वन्यस्य नियोज्यत्वाभावेऽप्यात्मायेन विद्वान्नियोज्यः स्यादिति द्वितीयमाशङ्क्य तस्यात्मायस्येश्वरतामापन्नस्य स्वज्ञानपूर्व्वकत्वात् स्ववचनेन स्वस्य नियोज्यत्वमेकत्र कर्त्तृकर्म्मविरोधान्न सम्भवतीत्याह। आम्नायस्यापीति॥ किञ्च व्याकरणादेस्तत्कर्तृमाणिन्यादित्रैयैकदेशार्थविषयत्वदर्शनेन वेदस्यापीश्वरजन्यस्येश्वरत्रैयैकदेशविषयत्वेनाल्पत्वादप्यधिकत्रेश्वरनियोक्तृत्वमयुक्तमित्याह। नापि बहुविदिति॥ अविवेकेनेत्यत्रेत्यर्थः। अचेतनत्वाद्वा तस्याविवेकित्वं भृत्येन न नियुज्यत इत्यनुषङ्गः॥ ननु वेदस्येश्वरज्ञानपूर्व्वकत्वपक्षेपूर्व्वोक्तदोषानुषङ्गेऽपि तस्य नित्यत्वपक्षे नायं दोष इति शङ्कते। आम्नायस्येति॥ तस्याऽचेतनस्य नियोक्तृत्वं न सम्भवति। तस्य चेतनधर्म्मत्वादित्युत्तरमाह। नेति॥ नियोक्तृत्वमभ्युपेत्यापि दोषमाह। उक्तदोषादिति तदेव दृष्टयोति। तथापीति अनियोज्यस्यापि चेत् कर्त्तव्यं विदुषस्तर्हि विशिष्टं विहितं कर्म्म

णेति चेत्। यथा कर्मकर्त्तव्यता शास्त्रेण कृता तथा तदप्यात्मज्ञानं तस्यैव कर्म्मणः शास्त्रेण विधीयत इति चेत्। न। विरुद्धार्थबोधकत्वानुपपत्तेः। न ह्येकस्मिन् कृताकृत-तासम्बन्धित्वं तद्विपरीतत्वञ्च बोधयितुं शक्यम्। शीतोष्णता-मिवाग्नेः। न चेष्टयोगचिकीर्षात्मनोऽनिष्टवियोगचिकीर्षा च शास्त्रकृता सर्वप्राणिनां तदर्शनाच्छास्त्रकृतत्वेत्तदुभयं गोपालादीनां न दृश्येत अशास्त्रज्ञता तेषाम्। यदि स्वतो-ऽप्राप्तं तच्छास्त्रेण बोधयितव्यम्। तच्चेत् कृतकर्त्तव्यता-

---

सर्व्वेण सर्व्वदापि कर्त्तव्यं सङ्गोचे हेत्वभावादित्यर्थः॥ असङ्कुचच्चात्मत्व-ज्ञानस्य कर्म्मकर्त्तव्यतायाश्च शास्त्रेण कृतत्वादुभयोरपि शास्त्रयोः प्रामा-ण्याविशेषात् कदाचिदात्मज्ञानं कदाचित् कर्म्मानुष्ठानञ्च स्यादिति शङ्कते। तदप्रीति॥ तदेव विवृणोति। यथेति॥ स्वाभाविककर्त्रात्मबोधेन सक-दुत्पन्नेनैव कर्त्तृतावोधबाधनाच्च पुनः शास्त्रेण कर्त्तृत्वबोधः सम्भवती-त्याह। नेति॥ कृताकृतेत्यत्र कृतमिति इदानीमकृतं इतःपरं कर्त्तव्यं यत्तदुच्यते। एवं तावच्चियोगाविषयात् कर्त्रात्मदर्शित्वाद् विदुषः प्रयोजनार्थित्वाभावाच्च न कर्म्मोक्तम्। इदानीं स्वत इष्टानिष्टसंयोग-वियोगरूपप्रयोजनार्थितामादेऽपि विदुषः स्वर्गकामो यजेतेति शास्त्रे-णैव साधीयत इत्याशङ्क्य स्वभावतः प्राप्तप्रयोजनार्थितानुवादेन तदुपाय-मात्रं शास्त्रेण बोध्यते न तु साधीयते। अन्यथा अशास्त्रज्ञानां तद-र्थिता न स्यादित्याह न चेष्टेति॥ अत्र चिकीर्षाशब्देन फलेच्छामात्र-मुच्यते न तु कर्त्तुमिच्छा फले तदयोगादिति। ननु कृताकृतसम्बन्धित्वं तद्विपरीतत्वञ्च विरुद्धत्वान्न बोधयति चेच्छास्त्रं तर्हि कृताकृतासम्बन्धित्वमेव-भावबोधीदित्याशङ्क्य तस्य मानान्तरसिद्धत्वेनावश्यं शास्त्रबोध्यत्वे वक्तव्ये तद्विपरीतस्य मानान्तरसिद्धस्य न शास्त्रबोध्यत्वं विरुद्धत्वादित्याह यद्वेति। तच्चेदिति। निश्चयार्थं कृते सतीदं कृतमिदं कर्त्तव्यमिति ज्ञानविरोधीत्यर्थः। कर्त्तव्यतां तज्ज्ञानमित्यर्थः। विध्यभावेन वेदा-

विरोधात्मज्ञानं शास्त्रेण कृतं कथं तद्विरुद्धकर्त्तव्यतां पुनरुत्पादयेच्छीततामिवाग्नौ तमइव भानौ। न बोधयत्येवेति चेन्न। स म आत्मेति विद्याऽऽत्मज्ञानं ब्रह्मेति चोपसंहारात्। तदात्मानमेवावेत् तत्त्वमसीत्येवमादिवाक्यानां तत्परत्वात्। उत्पन्नस्य ब्रह्मात्मविज्ञानस्यावाध्यमानत्वान्नानुत्पन्नं भ्रान्तं वेति शक्यं वक्तुम्। त्यागेऽपि प्रयोजनाभावस्य तुल्यत्वमिति चेत्। न। नाकृतेनेह कश्चनेति स्मृतेः। य आहुर्विदित्वा ब्रह्म व्युत्थानमेवमेव कुर्य्या-

---

नानामताद्दगात्मबोधकत्वमित्याशङ्क्य पुरुषस्य कर्त्तार्थमिसुखीकरणार्थत्वाद्विधेरिहात्मज्ञानाभिसुखीकरणार्थं विधिस्वरूपस्यार्थवादस्य सत्त्वात् स्वरूपबोधक तत्परवाक्यस्यापि सत्त्वाच्च नैवमित्युत्तरमाह। न बोधयत्येवेत्यादिना उपसंहारादित्यन्तेन॥ नित्यकृच्चरितनात्मा वा इदमित्याद्युपक्रमादितात्पर्यलिङ्गं सूचयति। ज्ञानोत्पत्त्यनुवादिकाया एव श्रुतेर्बलाद्व्यनुत्पत्तिशङ्का न कार्येत्याह। तदात्मानमिति॥ तदिति जीवरूपेणावस्थितं ब्रह्मेत्यर्थः॥ छान्दोग्यबलादेवमेवेति वदन् गतिसामान्यन्यायं दर्शयति। तत्त्वमसीति॥ अनेन तद्वास्य विजज्ञाविति वाक्यशेषोऽप्युपलक्ष्यते। अयमात्मा ब्रह्मेत्यादिशब्दार्थः। कर्त्रात्मबोधकर्मकाण्डविरोधादुत्पन्नमपि ज्ञानं भ्रान्तमित्याशङ्क्य तस्य यथा प्राप्तकर्त्रात्मानुवादेनोपायमात्रपरत्वान्न वस्तुपरवेदान्तजन्यज्ञानबाधकत्वमित्याह। उत्पन्नस्येति॥ नानुत्पन्नमिति वाक्यश्रवणानन्तरमकर्त्रात्माहमिति ज्ञानस्यानुभवसिद्धत्वान्नाहमकर्त्तेति विपरीतज्ञानार्थनाच्च नोभयं वक्तुं शक्यमित्यर्थः। विदुषः प्रयोजनतृष्णाभावान्न कर्मणि प्रवृत्तिरित्युक्तम्। तर्हि तत्त्यागेऽपि प्रयोजनाभावात् तत्रापि न प्रवृत्तिः स्यादिति शङ्कते। त्यागेऽपीति॥ तस्य विदुषः कृतेन कर्मणार्थो नास्ति। अकृतेन कर्माभावेनापीह लोकेऽर्थो नास्तीति गीतासु

दिति। तेषामप्येष समानो दोषः। प्रयोजनाभाव इति चेन्न। अक्रियामात्रत्वाद्व्युत्थानस्य। अविद्यानिमित्तो हि प्रयोजनस्य भावो न वस्तुधर्म्मः। सर्व्वप्राणिनां तद्दर्शनात्। प्रयोजनतृष्णया च प्रेर्य्यमाणस्य वाङ्मनःकायैः प्रवृत्तिदर्शनात्। सोऽकामयत जाया मे स्यादित्यादिपुत्रवित्तादि पाङ्क्तलक्षणं काम्यमेवेति। उभे ह्येते साध्यसाधनलक्षणे एषणे एवेति वाजसनेयिब्राह्मणेऽवधारणात्। अविद्याकामदोषनिमित्ताया वाङ्मनः कायप्रवृत्तेः पाङ्क्त-

---

धारणात्। त्यागेऽपि प्रयोजनाभावस्य तुल्यत्वमिति चेदित्यन्वयः॥ शङ्कामेव विवृणोति। य आऽऽरिति॥ कर्मत्यागस्य व्यापारात्मकत्वे व्यापारस्य क्लेशात्मकत्वात्तदनुष्ठानं प्रयोजनापेक्षितं स्यात्। न त्वेतदस्ति किन्तु क्रियाभावमात्रमौदासीन्यरूपम्। तस्य च स्वास्थ्यरूपत्वात् स्वत एव प्रयोजनत्वान्न प्रयोजनान्तरापेक्षत्वमिति परिहरति। नेति॥ त्यागस्यान्यत्र क्लेशव्यापारहेतुजन्यत्वाभावाच्च व्यापारत्वमिति वक्तुं अन्यत्र क्लेशव्यापारहेतुमाह। अविद्येत्यादिना॥ यद्वा विदुषः कथं यत्नं विनां व्युत्थानमौदासीन्यमात्रेण सिद्ध्यतीत्याशङ्क्य क्रियाहेतुभावात् क्रियाभाव इति वक्तुं तद्धेतुमाह। प्रयोजनस्य भाव इति॥ प्रयोजनत्वे तृष्णेत्यर्थः॥ तस्या वस्तुधर्मत्वे विदुषोऽपि तृष्णा स्यादिति तन्निषेधति। न वस्तुधर्म्म इति॥ न वस्तुस्वभाव इत्यर्थः॥ वस्तुधर्मत्वे हि विदुषामविदुषाञ्च सुप्तमूर्च्छितादीनां साम्यान्नात्वेतदस्ति। तत्र हेतुमाह। सर्व्वेति॥ तद्दर्शनादिति पाठे वस्तुस्वभावाज्ञानिनां गोपालादीनामपि तृष्णादर्शनाच्च वस्तुधर्म्म इति कर्मधारयो ज्ञेयम्। तृष्णाया अविद्याजन्यत्वसिद्धा तस्या व्यापारहेतुत्वमाह। प्रयोजनेति। दर्शनादिति पञ्चमी॥ अविद्याकामदोषनिमित्ताया इत्युत्तरत्र हेतुत्वेनसम्बध्यते। न केवलं दर्शनमेव किन्तु श्रुतिरप्यस्तीत्याह। सोऽकामयत इत्यादिना॥ उभे ह्येते एषणे एवेति

लक्षणायाविदुषोऽविद्यादिदोषाभावादनुपपत्तिः। अभावादक्रियामात्रं व्युत्थानं न तु यागादिवदनुष्ठेयरूपं भावात्मकं तच्च विद्यावत् पुरुषधर्म इति न प्रयोजनमन्वेष्टव्यम्। न हि तमसि प्रवृत्तस्योदिते आलोके यन्नर्तपङ्कण्टकाद्यपतनं तत्किंप्रयोजनमिति प्रश्नार्हं व्युत्थानं तद्धर्मप्राप्तत्वान्न चोदनार्थ इति। गार्हस्थ्ये चेत् परब्रह्मविज्ञानं जातं तत्रैवास्वकुर्वत आसनं न ततोऽन्यत्र गमनमिति चेन्न। कामप्रयुक्तत्वान्नार्हस्थ्यस्य। एतावान् वै काम इति। उभे ह्येते

वाक्येन च पुत्रवित्तादि काम्यमेवेति वाजसनेयिब्राह्मणेऽवधारणादित्यन्वयः। पाङ्क्तलक्षणमिति जायापुत्रदैवमानुषवित्तत्रयकर्मभिः पञ्चभिर्योगात् पाङ्क्तलक्षणं कर्मेत्यर्थः॥ उभे इत्यस्यार्थमाह। साध्यसाधनेति॥ एवं क्रियाहेतुं प्रदर्श्य तदभावादेव विदुषः क्रियाभावोऽयत्नसिद्ध इत्याह। अविद्याकामेति॥ पाङ्क्तलक्षणाया इति जायापुत्रदैववित्तमानुषवित्तकर्मभिः पञ्चभिर्लक्ष्यते साध्यत इति वैदिकी प्रवृत्तिः पाङ्क्तलक्षणेत्युच्यते। पञ्चसङ्ख्यायोगेन गौण्या वृत्त्या पङ्क्तिच्छन्दः सम्बन्धोपचारात् पञ्चाक्षरा पङ्क्तिः पाङ्क्तोयज्ञ इति श्रुतेरित्यर्थः। पाङ्क्तलक्षणाया इत्यनन्तरमनुपपत्तिरित्यनुषङ्गः। व्युत्थानमित्यनन्तरमयत्नसिद्धमिति शेषः। एवञ्च क्रियाभावस्यौदासीन्यात्मकस्य पुरुषस्वभावत्वे नायत्नसिद्धत्वे सति न प्रयोजनापेक्षेत्याह तच्चेति॥ पुरुषस्वभाव इत्यर्थः॥ अज्ञानकार्यस्याज्ञाननिवृत्तौ क्वयत्नतएव निवृत्तिरित्यत्र दृष्टान्तमाह। न ह्येति॥ व्युत्थानस्य पुंव्यापाराधीनत्वाभावे विधेरवकाशाद्विदुषो नियमेन व्युत्थानं न सिद्ध्यतीति। यच्छ्रुते व्युत्थानं तर्हीति॥ ततोऽन्यत्र गमनमिति पारिव्राज्यस्वीकार इत्यर्थः किं गार्हस्थ्यशब्देन गृहस्थोऽहमित्यभिमानपुरःसरं पुत्रविद्याद्यभिमान उच्यते उत गृहस्थलिङ्गधारणम्। नाद्यः। विद्ययाऽविद्याकार्याभिमाननिवृत्तेरिताह। न कामेति॥ न द्वितीयः। लिङ्गेऽभिमानदार्ढ्यस्य

एषणे एवेत्यवधारणात्। कामनिमित्तपुत्रवित्तादिसम्बन्ध-नियमाभावमात्रम्। न हि ततोऽन्यत्र गमनं व्युत्थान-मुच्यते। अतो न गार्हस्थ्ये एवाकुर्वत आसनमुत्पन्नविद्यस्य एतेन गुरुशुश्रूषातपसोरप्यप्रतिपत्तिर्विदुषः सिद्धा। अत्र केचिद्गृहस्था भिक्षाटनादिभयात् परिभवाच्च त्रस्यमानाः सूक्ष्मदृष्टितां दर्शयन्त उत्तरमाहुः। भिक्षोरपि भिक्षाटना-दिनियमदर्शनात् देहधारणमात्रार्थिनो गृहस्थस्यापि साध्यसाधनैषणाभयविनिर्मुक्तस्य देह मात्रधारणार्थ-

---

तुल्यत्वात्। न चैवं पारिव्राज्यलिङ्गेऽप्यभिमानाभावात्तस्याप्यसिद्धिरिति वाच्यम्। सर्वतोऽभिमानराहित्येन सर्वसम्बन्धराहित्यं हि परमहं-सपरिव्राजोपलक्षणं न लिङ्गधारणम्। न लिङ्गं धर्मकारणमिति श्रुतेः ततश्च लिङ्गेऽप्यभिमानशून्यस्य पारिव्राज्य" सिद्धमित्याह। कामनिमि-त्तेति॥ गार्हस्थ्य इत्यभिमानात्मक इत्यर्थः तर्हि गुरुशुश्रूषादावप्यभि-मानो न स्यादित्याशङ्क्याऽपत्तिरित्याह। एतेनेति॥ ननु पुत्रादिसम्ब-न्धनियमरहितस्यापि त्वन्मते देहधारणार्थिनो भिक्षोः परिग्रहव्याव-र्त्तनार्थो भिक्षाटनादिरेवेति नियमोऽङ्गीक्रियते। तथाच दृष्टस्यास्याप-भिमानशून्यस्यैव सतो देहधारणार्थं गृह एवासनं न भिक्षुत्व-विशेषादिति शङ्कते। अत्र केचिद्गृहस्था इति॥ तेषां न न्यायो मूलं किन्तु दृष्टमयाचितादिकमेव मूलमित्यग्रसन्नाह। भिक्षाटनादीति॥ परिभवः पामरैः क्रियमाणस्तिरस्कारः॥ सूक्ष्मेति काक्वा व्यतिरेकेण स्थूलदृष्टय इत्यर्थः। भिक्षाटनादीत्यादिशब्देन प्राक्प्रणीतमयाचित-मित्यादयो गृह्यन्ते। देहधारणमात्रार्थिनो भिक्षोरिति पूर्वेणान्वयः॥ सिद्धान्ती तस्यैवंभूतस्य स्त्रीपरिग्रहोऽस्ति वा नवेति विकल्प्याद्यं दूषणमाह। न स्वेति॥ स्वग्रहविशेषशब्देन स्त्रीविशेषो गृह्यते। न हितयोः। स्त्रीपरिग्रहवत एव द्रव्यपरिग्रहाधिकारात्। तदभावेऽर्थाद्द्र-

मथनाच्छादनमात्रमुपजीवतो गृह एवास्यासनमिति। न स्वगृहविशेषपरिग्रहनियमस्य कामप्रयुक्तत्वादित्युक्तोत्तरमेतत्। स्वगृहविशेषपरिग्रहाभावे च शरीरधारणमात्रप्रयुक्ताशनाच्छादनार्थिनः स्वपरिग्रहविशेषाभावेऽर्थाद्भिक्षुत्वमेव। शरीरधारणार्थायां भिक्षाटनादिषु प्रवृत्तौ यथा नियमो भिक्षोः शौचादौ च तथा गृहिणोऽपि विदुषोऽकामिनोऽस्तु नित्यकर्मसु नियमेन प्रवृत्तिर्यावज्जीवादिश्रुतिनियुक्तत्वात् प्रत्यवायपरिहारार्थेति। एतन्नियोगा-

---

व्यपरिग्रहनिवृत्तेः। तदभावे प्रकारान्तरेण जीवनासिद्धेरर्थाद्भिक्षाटनादिनियम एव सिद्धतीत्याह। स्वगृहेति॥ न च पुत्रादिपरिगृहीतेन जीवनमस्तिति शङ्क्यम्। तैरपि स्वस्वत्वेन सम्बन्धाभावे स्वकीयस्यापि परकीयद्रव्यतुल्यत्वेन तत्रापि भिक्षुत्वनियमादिति। अन्ये तु भिक्षोरपि भिक्षाटनादौ सप्तागारान् सङ्कल्पानित्यादिनियमः। शौचादौ च चातुर्गुण्यादिनियमस्य प्रत्यवायपरिहारार्थं यथेष्यते तथा यावज्जीवादिश्रुतिबलात् प्रत्यवायपरिहारार्थं नित्यकर्मणि नियमेन प्रवृत्तिरित्याङ्गीकृतदूषणवदति। शरीरधारणार्थायामिति॥ अत्रैवंत एव गृहेऽवस्थानं पूर्व्वमते शङ्कितम्। अस्मिन्मते त्वग्निहोत्राद्यनुष्ठानमपि कर्त्तव्यमिति शङ्कते। तथेति॥ पूर्व्वम् परिग्रहव्याहत्यर्थो भिक्षाटनादिविषयो दृष्टशरीरधारणप्रयोजनो नियमो दृष्टान्तत्वेनोक्त इह तु स भिक्षाटनादिगतसप्तागारत्वादिविषयो दृष्टार्थो दृष्टान्तत्वेनोक्त इति भेदं दूषयति। एतदिति॥ तस्य सर्व्वनियोक्तृश्वरात्मत्वाच्च न नियोज्यत्वमित्याद्युक्तमित्याह। अत्रोक्तेति॥ तर्हि तन्नियोक्तृप्रामाण्ये भिक्षाटनादिनियमविधेरपि तत् स्यादित्यभिप्रायेण शङ्कते। यावज्जीवेति॥ अविदुषि नियोज्यं तत् प्रामाण्यं घटत इति योक्तदोष इत्याह। नेति॥ तदुक्तप्रतिबन्धौ परिहर्त्तुमनुवदति। यत्तिति॥ दूषयति। तत्रेति॥ आचमनविधिनाऽऽचमनप्रवृत्तस्यार्थिको यः

विषयत्वेन विदुषः प्रत्युक्तमशङ्क्यनियोज्यत्वाच्चेति। यावज्जीवादिनित्यचोदनानर्थक्यमिति चेन्न। अविद्वद्विषयत्वेनार्थवत्त्वात्। यत्तु भिक्षोः शरीरधारणमात्रप्रवृत्तस्य प्रवृत्तेर्नियतत्वं तत् प्रवृत्तेर्न प्रयोजकम्। आचमनप्रवृत्तस्य पिपासापगमवन्नान्यप्रयोजनार्थत्वमवगम्यते। न चाग्निहोत्रादीनान्तद्दर्थप्राप्तप्रवृत्तिनियतत्वोपपत्तेः। अर्थप्राप्तप्रवृत्तिनियमोऽपि प्रयोजनाभावेऽनुपपन्न एवेति चेन्न।

पिपासापगमस्तस्य तदा नान्यप्रयोजनार्थत्वं प्रयोजनम् प्रयुक्तिस्तदर्थत्वं नाचमनप्रवृत्तिप्रयोजकत्वम्। तद्वज्जीवनार्थं भिक्षादौ प्रवृत्तस्य यस्तत्र नियमः स न भिक्षादिप्रवृत्तेः प्रयोजक इत्यर्थः। एतदुक्तं भवति नियोज्यत्वाभावात् किल ब्रह्मविदो नियमविध्यनुपपत्तिराशङ्कते। तन्न युज्यते। कथं नियोज्यो हि नियोगसिध्यर्थमपेक्ष्यते। नियोगश्च प्रवृत्तिसिध्यर्थः। प्रवृत्तिश्चेदन्यतः सिद्धा किं नियोगेन। अतएव दर्शपूर्णमासनियोगादेवावहननियमेन प्रवृत्तिसिद्धौ तत्र न पृथक् नियोगोऽङ्गीक्रियते। तदभावे च न नियोज्यापेक्षेति। ब्रह्मविदो नियोज्यत्वाभावेऽपि न नियमविध्यनुपपत्तिरिति। अग्निहोत्रादिप्रवृत्तेस्तु अन्यतोऽसिद्धत्वेन तद्विधित एव तत्र प्रवृत्तेर्वक्तव्यत्वेन तत्सिध्यर्थं नियोगे वाच्ये तस्य तत्र नियोज्यापेक्षेति वैषम्यमाह। न चाग्निहोत्रेति॥ नियमविधौ नियोज्यानपेक्षायामपि तस्य क्लेशात्मकत्वात् प्रयोजनापेक्षा वाच्या। तदभावान्न नियमः सिध्यतीति शङ्कते। अर्थप्राप्तेति॥ तन्नियमस्यापि पूर्ववासनावशादेव प्राप्तत्वात्तत्रापि न नियमविधेरवकाशो येन प्रयोजनापेक्षा स्यादिति परिहरति। न तदिति॥ यद्यपि नियतेन वाऽनियतेन वा भिक्षाटनादिना जीवनं सिध्यति तथापि विद्योत्पत्तेः पूर्वं विद्यासिद्ध्यर्थं नियमस्यानुष्ठितत्वात्तद्वासनाप्राबल्याद्विद्योत्पत्त्यनन्तरमपि नियम एव प्रवर्त्तते। नानियमे तद्वासनानां नियमवासनाभिरत्यन्तमभिभूतत्वेन पुनरुद्बोधनस्य यत्नसाध्यत्वात्ततस्तत्र न प्रवर्त्तत इति नियमोऽप्यर्थसिद्ध इत्यर्थः।

तन्नियमस्य पूर्व्वप्रवृत्तिसिद्धत्वात्तदतिक्रमे यत्नगौरवादर्थ-प्राप्तस्य च व्युत्थानस्य पुनर्व्वचनाद्विदुषः कर्त्तव्यत्वोपपत्तेः। अविदुषाऽपि मुमुक्षुणा पारिव्राज्यं कर्त्तव्यमेव। तथा च शान्तो दान्त इत्यादिवचनं शमदमादीनाञ्चात्मदर्शन-साधनानामन्याश्रमेष्वनुपपत्तेः। अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसङ्घजुष्टमिति च श्वेताश्वतरे विज्ञायते। न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरिति

एतेन प्रत्यवायपरिहारार्थत्वमपि नियमानुष्ठानस्य निरस्तं तस्य विदुषः प्रत्यवायाप्रसक्तेरिति। एवमुक्तरीत्या व्युत्थानस्य विधिं विना स्वतः प्राप्तत्वे सति तत्कर्त्तव्यतां विधिमपि विदित्वा व्युत्थायेत्यादिकमनु-मोदते विद्वानित्याह। अर्थप्राप्तस्येति॥ विधितः कर्त्तव्यत्वोपपत्तिरि-त्यर्थः। न च विधेः प्रयोजनाभावेऽप्रवर्त्तकत्वादिति वाच्यम्। प्रैषो-च्चारणाभयदानादिवैधसुखस्याप्राप्यर्थत्वेन विधेरर्थवत्त्वात्॥ न च तस्यापि वैयर्थ्यं शङ्क्यम्। विदुषि परमहंसे लोकसङ्ग्रहार्थत्वात्। तस्य तु सङ्ग्रहस्य पूर्व्वाभ्यस्तमैत्रीकरुणादिवासनाप्राप्यत्वेन ब्रह्मविद्यो-पदेशादाविव प्रयोजनानपेक्षणात्। यद्वा प्रारब्धकर्म्मोच्छिन्नदेहेन्द्रि-यादिप्रतिभासेनाविचारितयावज्जीवादिश्रुतिजनितकर्मकर्त्तव्यताभ्रान्तौ तन्निवर्त्तते न वा विदुषो व्युत्थानविधेरर्थवत्त्वोपपत्तिः। एवं विदुषो व्युत्थानप्रसाधनेन विद्याया अकर्म्मनिष्ठत्वं साधितम्। तेनैव च तस्याः कर्म्मासम्बन्धोऽप्यर्थात् साधितः। इदानीं विविदिषोरपि व्युत्था-नम् प्रसाधयन् विद्यायाः कर्म्मनिष्ठत्वं कर्म्मसम्बन्धित्वञ्च दूरादपास्त-मित्याह। अविदुषापीति॥ तत्र श्रुतिमाह। तथा चेति॥ उपरतस्ति-तिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानम् पश्येदिति श्रुतिशेषः। तत्रो-परतशब्देन सन्यासो विहित इति भावः। शमादिसाधनानां पौष्क-ल्येनानुष्ठानस्य गृहस्थादिष्वसम्भवात्तद्विधिनाप्यर्थादाक्षिप्यते। सन्यास इति॥ श्रुतार्थापत्तिमाह। शमादीनाञ्चेति॥ चशब्द उपरतशब्दसमुच्च-

च। ज्ञात्वा नैष्कर्म्यमाचरेदिति स्मृतेः। ब्रह्माश्रमपदे षसेदिति च। ब्रह्मचर्य्यादिविद्यासाधनानाञ्च साकल्येनात्याश्रमिषूपपत्तेर्गार्हस्थ्ये सम्भवात्। न चैवमसम्यन्नं साधनं कस्यचिदर्थस्य साधनायालम्। यद्विज्ञानोपयोगीनि च गार्हस्थ्याश्रमकर्म्माणि तेषां परं फलमुपसंहृतम्। देवताप्यलक्षणं संसारविषयमेव। यदि कर्म्मिण एव परमात्मज्ञानमभविष्यत् संसारविषयस्यैव फलस्योपसंहारो नोपा-

---

र्थः। नेदं विद्याविषयम्। तस्य साधनविधिवैयर्थ्यात् किन्तु विविदिषाविषयमिति वक्तुमात्मदर्शनसाधनानामित्युक्तम्। अत्याश्रमिण इति ब्रह्मचर्य्यादीन् हंससत्यासान्तानाश्रमधर्मवदाश्रमानतिक्रम्य वर्त्तते परमहंस इति। सोऽत्याश्रमशब्देनोच्यत इति तद्विधिरत्र प्रतीयत इत्यर्थः। ऋषिसङ्घजुष्टं मन्त्रसमूहैर्ब्राह्मणसमूहैर्वा सेवितं तत्त्वं प्रोवाचेत्यर्थः। न कर्मणेति त्यागस्य साक्षादमृतत्वसाधनत्वाभावेनामृतत्वसाधनं ज्ञानं त्यागेनानयुः व्याप्नुवन्त इत्यभिधानेन ज्ञानसाधनत्वे त्यागोऽत्र विहित इत्यर्थः। ज्ञात्वेति आपाततो ब्रह्म ज्ञात्वा निश्चयार्थं नैष्कर्म्यं कर्मत्यागरूपं सन्यासमाचरेदिति स्मृत्यर्थः। ब्रह्मेति ज्ञानसाधनीभूत आश्रमो ब्रह्माश्रमः सन्यास इत्यर्थः। किञ्च एकाकी यतचित्तात्मा इत्याद्युपक्रम्य ब्रह्मचारी व्रते स्थितः। मनः संयम्य मच्चित्तो युक्त आसीत मत्पर इत्यन्तेन ब्रह्मचर्य्यादिसाधनविधिबलादप्यर्थात्सन्यासविधिरित्याह। ब्रह्मचर्य्यादिति॥ ननु गृहस्थस्यापि ऋतुकालमात्रगमनलक्षणं ब्रह्मचर्य्यं कदाविज्ञानकाले एकाकित्वञ्च सम्भवतीत्याशङ्क्य तस्यापुरुषत्वात्ततो ज्ञानासिद्धेर्ध्यानकाले पत्नीसम्बन्धाप्रसक्तेस्तद्विधिवैयर्थ्याच्च नैवमित्याह। न चेति॥ अतो न कर्म्मनिष्ठत्वं कर्मसम्बन्धित्वञ्चात्मज्ञानस्येत्यर्थः॥ यत्तु कर्म दृष्टादृष्टफललक्षणं प्रस्तुत्यात्मज्ञानं प्रारभ्यत इत्यादिना कर्मसम्बन्धित्वमुक्तं तत्राह। यद्विज्ञानेति॥ तथा पूर्वोक्तकर्मसम्बन्धि ज्ञानं संसारफलकमन्यदेव तच्चोपसंहृतमिति न

पत्त्वात्। अङ्गफलत्वादिति चेन्न। तद्विरोध्यात्मवस्तुविषयत्वात्। आत्मविद्यायानिराकृतसर्व्वनामरूपकर्मपरमार्थात्मवस्तुविषयं ज्ञानमप्यतत्वसाधनम्। गुणफलसम्बन्धे हि निराकृतसर्व्वविशेषात्मवस्तुविषयत्वं ज्ञानस्य न प्राप्नोति तच्चानिष्टम्। यत्र त्वस्य सर्वमात्मैवाभूदित्यधिकृत्य क्रियाकारकफलादिसर्व्वव्यवहारनिराकरणाद्दिदृषः। तद्विपरीतस्याविदुषो यत्र हि द्वैतमिवेत्युक्त्वा क्रियाकारकफलरूपस्यैव संसारस्य दर्शितत्वाच्च वाजसनेयिब्राह्मणे तथेहापि

तत्परमात्मज्ञानमित्यर्थः॥ ननु पूर्व्वोक्तमेव परमात्मज्ञानं तच्च कर्मसम्बन्धेनेत्याशङ्क्य क्रियाकारकफलत्वेनोपसंहारात्परमात्मज्ञानस्य च मुक्तिफलकत्वान्न तु तत्परमात्मज्ञानमित्याह। यदि कर्मिण एवेति॥ कर्मिनिष्ठत्वेनोक्तज्ञानमेव परमात्मज्ञानञ्चेदित्यर्थः॥ परमात्मज्ञानाङ्गभूतपृथिव्यग्न्यादिदेवताज्ञानस्य तत्संसारफलं नाङ्गिनः परमात्मज्ञानस्येति न तस्य मुक्तिफलत्वविरोध इति शङ्कते। अङ्गेति॥ परमात्मज्ञानस्याङ्गसम्बन्धफलसम्बन्धादिसर्व्वविशेषरहितनिर्व्विशेषवस्तुविषयत्वान्न तस्याङ्गादिसम्बन्धित्वं येन तदङ्गविषयत्वं फलस्य स्यादिति परिहरति॥ न तदिति॥ तदेव स्पष्टयति। निराकृतेत्यादिना॥ तच्चानिष्टमिति आत्मा वा इदमित्यादेरुपक्रमादिलिङ्गैरात्मनो निर्व्विशेषत्वसिद्धेरित्यर्थः वाजसनेयिब्राह्मणे च परात्मविदः सर्व्वसम्बन्धशून्यत्वमुक्त्वा अविदुषः संसारफलत्वोक्तेश्चेह संसारफलस्यातीतस्य ज्ञानस्य परमात्मज्ञानत्वं वक्ष्यमाणस्य निर्व्विशेषवस्तुविषयस्यैव परमात्मज्ञानत्वं मुक्तिफलत्वञ्चेत्याह। यत्रेत्यादिना॥ तथेहापीतिवाक्येफलपदद्वयपाठे एकं फलं निष्पाद्यत्वार्थकं निष्पाद्यत्वं हि संसारविषयं संसारान्तर्गतमिति वक्तुम्। एवं कर्म्मासम्बन्धित्वं ज्ञानस्योक्त्वा यावज्जीवादिश्रुतेः कर्म्मत्यागो न सम्भवतीति यत्पूर्व्व-

दवताप्यं संसारविषयं यत्फलमशनायादिमद्दुःखात्मकं तत्-
फलमुपसंहृत्य केवलं सर्व्वात्मवस्तुविषयज्ञानमहत्तत्वाय
वक्ष्यामीति प्रवर्त्तते। ऋणप्रतिबन्धश्चाविदुष एव। सोऽयं
मनुष्यलोकः पुत्रेणैवेत्यादिलोकत्रयसाधननियमश्रुतेः। वि-
दुषश्चर्णप्रतिबन्धाभावो दर्शितः आत्मलोकार्थिनः किं प्रजया
करिष्याम इत्यादिना। तथैतद्ध स्म वै तद्विद्वांस आहु-
र्ऋषयः कावषेया इत्यादि। एतद्ध स्मैवैतत् पूर्वे विद्वांसो-
ऽग्निहोत्रं न जुहवाञ्चक्रुरिति कौषीतकीनाम्। अविदुष-

वादिनोक्तं तत्र यावज्जीवादिश्रुतेरविद्वद्विषयत्वमुक्तम्॥ ऋणश्रुते-
रिदानीं गतिमाह। ऋणेति॥ ऋणस्यानपाकृतस्य मनुष्यादिलो-
कप्राप्तिम् प्रति प्रतिबन्धकत्वात्तदर्थिनोऽविदुष एवर्णापाकरणं
कर्त्तव्यं न मुमुक्षोः। मुक्तिं प्रति तस्याप्रतिबन्धकत्वादित्यर्थः। ननु
ऋणस्य मुक्तिम् प्रत्यपि प्रतिबन्धकत्वमस्तु विशेषाभावात्। अनपा-
कृत्य मोक्षं तु सेवमानो व्रजत्यध इति श्रुतेश्चेत्याशङ्क्याह। सोऽय-
मिति॥ सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन। कर्म्मणा पित्र-
लोको विद्यया देवलोक इति श्रुतेः। पुत्रादीनां मनुष्यलोकादि-
हेतुत्वावगमात् पुत्रादिभिरपाकर्त्तव्यानां पुत्राद्यभावरूपाणाञ्च-
ऋणानां पुत्रादिसाधनाभावेन साध्यलोकाभावान्न मुक्तिं प्रति
तस्यास्तदभावरूपपुत्रादिसाध्यत्वाभावात्। श्रुतेश्च रागिणां प्रति
सत्यासनिन्द्यार्थवादमात्रत्वादित्यर्थः। न केवलमुक्तन्यायतो मुक्तिम्
प्रत्यप्रतिबन्धकत्वं किन्तु श्रुतितोऽपीत्याह। विदुष इति॥ श्रुति-
स्त्रयेण क्रमेण प्रजाध्ययनकर्म्मणामनुष्ठितानामप्रतिबन्धकत्वं दर्शि-
तम्। कावषेया इत्यनन्तरं किमर्था वयमध्येष्यामह इति शेषो
द्रष्टव्यः॥ शङ्कते। अविदुषस्तर्हीति। यद्यप्यविदुषोऽपि लोकत्र-
यम् प्रत्येव प्रतिबन्धकत्वात् मुक्तिं प्रति प्रतिबन्धकत्वाभावादृण-
स्यानपाकरणीयत्वान्मुमुक्षोः पारिव्राज्यसम्भवादाशङ्का न सम्भ-
वति तथापि विद्वांस आहुरित्युक्तस्त्रयमाम्नेयं शङ्का। यद्वा

स्तर्हृणानपाकरणे पारिव्राज्यानुपपत्तिरिति चेन्न। प्राग्गार्हस्थ्यस्याप्रतिपत्तेर्ऋणित्वासम्भवादधिकारानारूढो-ऽप्यृणी चेत् स्यात् सर्वस्य ऋणित्वमित्यनिष्टम् प्रसज्येत। प्रतिपन्नगार्हस्थ्यस्यापि गृहाद्दनी भूत्वा प्रव्रजेत् यदि वेतरथा ब्रह्मचर्य्यादेव प्रव्रजेद्गृहाद्वा वनाद्वेति। आत्मदर्शनोपायसाधनत्वेनैष्यत एव पारिव्राज्यं यावज्जीवादिश्रुतीनामविद्वदमुमुक्षुविषये कृतार्थता। छान्दोग्ये च केषाञ्चिद्

परिहारान्तरं वक्तुमाशङ्क्य दूष्यति। गृहस्थस्यैवर्णप्रतिबन्धकत्वं तस्यैव तन्निराकरणाधिकारात्। ततश्च गार्हस्थ्यप्रतिपत्तेः प्राक् ब्रह्मचर्य्य एव मुमुक्षोः पारिव्राज्यं सम्भवतीति परिहरति। नेति॥ यद्यप्युपनयनानन्तरमेव ऋणनिवर्त्तनेऽधिकारः सम्भवतीति प्रागार्हस्थ्येत्युक्तं तथापि विविदिषासन्न्यासेऽधीतवेदस्यैवाधिकार इति अधीतवेदस्य गार्हस्थ्यप्रतिपत्तेः प्रागिति द्रष्टव्यम्। ननु जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्य्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य इति। जायमानमात्रस्यर्णवत्त्वं प्रतीयत इत्याशङ्क्यर्णित्वोक्तेः प्रयोजनं न साक्षात् किञ्चिदस्त्यपि तु ब्रह्मचर्य्यादिकर्त्तव्यताज्ञापनम्। न चाधिकारानारूढस्तत्कर्त्तुं शक्नोति। जायमानमात्रस्यासामर्थ्यात्। किञ्च ब्राह्मणग्रहणात् क्षत्रियादेर्ऋणाभावप्रसङ्गः। द्विजात्युपलक्षणत्वेऽधिकार्य्युपलक्षणत्वमेव न्याय्यम्। अतो जायमानपदमधिकारं लक्षयतीति जायमानोऽधिकारी सन्मुच्यमान इति तदर्थः। ततश्च ततः प्राक् नर्णसम्बन्ध इत्याह। अधिकारेति॥ अनिष्टमिति ब्रह्मचारिणोऽप्यृणित्वे ब्रह्मचर्य्य एव मृतस्य नैष्ठिकस्य च लोकप्रतिबन्धः। स्याच्चानिष्टम्। अष्टाशीतीति सहस्राणीत्यारभ्य तदेव गुरुवासिनामित्यादिना पुराणे लोकप्राप्युक्तेरित्यर्थः॥ न केवलंगार्हस्थ्यात् प्रागेव सन्न्याससिद्धिः किन्तु विधिबलाद्गृहस्थस्यापि तदस्तीत्याह। प्रतिपन्नेति॥ आत्मदर्शनेति आत्मदर्शने ये उपायाः श्रवणाद्यस्तत्साधनत्वेनेत्यर्थः। न चर्णश्रुत्या प्राग्राज्यविधिविरोधः। तस्याः

द्वादशरात्रमग्निहोत्रं हुत्वा तत ऊर्द्धं परित्यागः श्रूयते। यत्त्वनधिकृतानाम् पारिव्राज्यमिति। तन्न। तेषाम् दृष्टगेवोत्पन्नाग्निर्निरग्निको वेत्यादिश्रवणात् सर्वस्मृतिषु चाविशेषेणाश्रमविकल्पः प्रसिद्धः समुच्चयश्च। यत्तु विदुषोऽर्थप्राप्तं व्युत्थानमित्यशास्त्रार्थत्वे गृहे वने वा तिष्ठतो न विशेष इति तदसत्। व्युत्थानस्यैवार्थप्राप्तत्वान्नान्यत्रावस्थानं स्यात्। अन्यत्रावस्थानस्य कामकर्मप्रयुक्तत्वं ह्यवोचाम।

श्रवदानार्थवादमात्रत्वेन स्वार्थे तात्पर्याभावात्। अन्यथा तदवदानैरेवावदयते तदवादानामवदानत्वं इत्यवदानमात्रनिरस्तत्वोक्त्या ब्रह्मचर्य्यादीनामप्यनुष्ठेयत्वप्रसङ्गादिति भावः॥ एवमपि यावज्जीवादिश्रुतिविरोधः सन्यासस्मृतेरित्याशङ्क्याह। यावज्जीवेति॥ विरक्तमुमुक्षुमात्रविषयिण्या सन्यासस्मृत्या यावज्जीवादिसामान्यश्रुतेरसमुक्षुविषये सङ्कोच इत्यर्थः। अग्निहोत्रविषयकयावज्जीवादिश्रुतेर्नानयैव सङ्कोचः किन्तु श्रुत्यन्तरेणैव द्वादशरात्रानन्तरमग्निहोत्रत्यागविधायिन्या सा पूर्व्वमेव सङ्कोचिता न तां विरोद्धुं शक्नोतीत्याह। छान्दोग्य इति॥ केषाञ्चिच्छाखिनां त्वयोदशरात्रमहुतवासा यजमानः स्वयमग्निहोत्रं जुहुयादथापवसन् तत्रैव सोमेन पशुना वेष्ट्वाऽग्नीनुत्सृजतीति श्रूयत इत्यर्थः। ननु पारिव्राज्यश्रुतिरप्यनधिकृतविषये सङ्कोचितेत्याह। यच्चेति॥ वचनान्तरेणैव तेषां तद्विधेर्नास्यानधिकारिविषयः किन्त्वधिकार्य्येवेति परिहरति। नेति॥ उत्सन्नाग्निर्नष्टाग्निः निरग्निकोऽपरिगृहीताग्निरिति भेदः॥ श्रुत्युपबृंहितत्वेऽपि पारिव्राज्यस्मृतिर्दुर्बलेत्याह। सर्व्वस्मृतिषु चेति॥ अत एव ब्रह्मचर्य्यवान् प्रव्रजति। बुद्ध्वा कर्म्माणि। यमिच्छेत्तमावसेत्। ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथ भिक्षुकः। य इच्छेत् परमं स्थानमुत्तमां वृत्तिमाश्रयेदित्यादिषु विकल्पः सिद्धः। अधीत्य विधिवद्वेदान् पुत्रानुत्पाद्य धर्म्मतः। इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेदित्यादिषु समुच्चयश्च सिद्ध इत्यर्थः॥ एवं विवि-

तद्भावमात्रं व्युत्थानमिति। यथा कामित्वन्तु विदुषोऽत्यन्तमप्राप्तं अत्यन्तमूढविषयत्वेनावगमात् तथा शास्त्रविहितमपि कर्म्मात्मविदोऽप्राप्तं गुरुभारतयावगम्यते किमुताऽत्यन्ताविवेकनिमित्तं यथा कामित्वम्। न ह्युन्मादतिमिरदृष्ट्युपलब्धं वस्तु तदपगमेऽपि तथैव स्यादुन्मादतिमिरदृष्टिनिमित्तत्वादेव। तस्मादात्मविदो व्युत्थानव्यतिरेकेण न यथा कामित्वम्। न चान्यत् कर्त्तव्यमित्येतत् सिद्धम्। यत्तु विद्याञ्चाविद्याञ्चेदोभयञ्च सहेति। न

दिषासन्न्यासं प्रसाध्य पूर्व्वत्र साधितविद्वत् सन्न्यासे शङ्कामनुवदति। यत्त्विति॥ पूर्व्वत्र गृह एवास्वासनमिति शङ्का निरस्ता दृढ तु गृहे वा वने वाऽस्वासनमित्यनियमशङ्कां निराकर्त्तुं सा पुनरनूद्यते। यथेष्टचेष्टामधिकां परिहर्त्तुञ्चेति द्रष्टव्यम्॥ यद्यप्यर्थप्राप्तस्यापि पुनर्व्वचनादित्यत्र विद्वद्व्युत्थानस्यापि शास्त्रार्थत्वसङ्गमेव तथाप्यशास्त्रार्थत्वसङ्गशङ्कीकृत्याह। तदसदिति॥ यदि व्युत्थानवद्गार्हस्थ्यमप्यर्थप्राप्तं स्यादेवमनियमो न त्वेतदस्तीत्याह। व्युत्थानस्यैवेति॥ अन्यत्रेति गार्हस्थ्येत्र इत्यर्थः। नन्वन्यत्रावस्थानवद्व्युत्थानस्यापि कामादिप्रयुक्तत्वमनुष्ठेयत्वादित्याशङ्क्याह। तद्भावेति॥ कामाद्यभावमात्रमेव व्युत्थानमित्युक्तत्वात्तस्य नानुष्ठेयत्वमित्यर्थः। एवमनियमशङ्कां निरस्य व्युत्थानस्य शास्त्रार्थत्वे यथेष्टचेष्टामाशङ्क्य निराकरोति। यथा कामित्वन्त्विति॥ चेष्टामात्रमेव कामादिप्रयुक्तम्। निषिद्धचेष्टा तु शास्त्रार्थज्ञानशून्यात्यन्तमूढविषया। तदुभयञ्च विदुषो नास्तीति चेष्टामात्रमेवाप्रसक्तं निषिद्धचेष्टा तु दूरापास्तेत्यर्थः॥ एतदेव विवृणोति। तथेति। तथा ह्यित्यर्थे तथाशब्दः। गुरुभारतयातिक्लेशतया यतोऽवगम्यतेऽतोऽप्राप्तमित्यन्वयः॥ अविवेकादिनिमित्तापगमे नैमित्तिकापगम इत्यत्र दृष्टान्तमाह। न ह्यीति॥ उन्मादद्दष्ट्युपलब्धं गन्धर्वनगरादितिमिरदृष्ट्युपलब्धं द्विचन्द्रादिरिति विवेकः। य चान्यदिति वैदिकं कर्मेत्यर्थः। ननु विद्यया अविद्यायाः सहभाव-

विद्यावतो विद्यया सहाविद्यापि वर्त्तत इत्यर्थः। कस्मात्तौ-कस्मिन् पुरुषे एकदैव सह सम्बध्येयातामित्यर्थः। यथा शुक्तिकायां रजतं शुक्तिकाज्ञाने एकस्य पुरुषस्य। दूर-मेते विपरीते विषूची अविद्या या च विद्येति ज्ञात्वेति हि काठके। तस्माच्च विद्यायां सत्यामविद्यासम्भवोऽपि। तपसा ब्रह्म विजिज्ञासस्वेत्यादिश्रुतेः। तपआदिविद्योत्पत्तिसाधनं गुरूपासनादि च कर्माविद्यात्मकत्वादविद्योच्यते। तेन विद्यामुत्पाद्य मृत्युं काममतितरति। ततो निष्काम-

---

श्रवणाद्विदुषोऽपि तन्मूलकामादिकं स्यादेवेति तन्निमित्ता यथेष्टचेष्टा स्यादित्यत आह। यच्चेति॥ यत्तु विद्याञ्चेति वचनं तस्य नायमर्थ इति। तस्येतिशब्दाध्याहारेण वाक्यं योज्यम्। एकस्मिन्निति कालभेदेन स्थित-योरप्येकस्मिन् पुरुषे साहित्यमात्रदर्थ इत्यर्थः। नन्विदं साहित्यं न सरसं किन्त्वेककाले सहत्वं सरसमित्याशङ्क्य श्रुत्यन्तरे विद्याविद्ययोः साक्षात्-साहित्यस्यासम्भवोक्तेरुक्तमेव साहित्यं ग्राह्यमित्याह। दूरमेते इति॥ विषूचीति विष्वगमने विरुद्धे इत्यर्थः। अस्मिन्नपि मन्त्रेऽविद्यया मृत्युतीर्त्वेत्युत्तरार्द्धपर्यालोचनयाऽविद्याया विद्योत्पत्तिहेत्वपगमात् तयोः कालभेदेनैव सहत्वमित्याह। तपसेत्यादि॥ यद्वा गुरूपासनतपसी अविद्येत्युच्यते। तयोश्च श्रवणादिकालेऽनुष्ठेयत्वाद्विद्योत्पत्तिकाले एकस्मिं-स्तयोः साहित्यमस्तीत्यर्थान्तरमाह। तपसेति॥ अस्मिन्नर्थे मन्त्रशेषो-ऽप्यनुगुण इत्याह। तेन विद्यामिति॥ साक्षादविद्या मृत्युतेन मृत्यु-त्तरणहेतुत्वानुपपत्तेरविद्याशब्देन तपआदिकमेवोच्यते। तद्विद्याव्यव-धानञ्चार्थात् कल्पात इत्यर्थः। अविद्वद्विषयत्वेनेति जिजीविषेदिति जीवितेच्छारूपाविद्याकार्य्येण तस्याः सूचनादित्यर्थः। परिहृतमिति यावज्जीवादिश्रुतिन्यायेन परिहृतप्रायमित्यर्थद्वारा हतीयस्य चतुर्थपादे सूत्रं नाविशेषादिति सूत्रेण परिहृतमित्यर्थः। असम्भवादिति विरो-धेन विद्यया सहासम्भवादित्यर्थः। उदाहृतश्रुतिस्तत्त्वसम्भवादिति वा॥

त्यक्तैषणो ब्रह्मविद्ययाऽमृतत्वमश्नुत इत्येतमर्थं दर्शयन्नाह। अविद्यया मृत्युन्तीर्त्वा विद्ययाऽमृतमश्नुते इति। यत्तु पुरुषायुः सर्वकर्मणैव व्याप्तम्। कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा इति अविद्वद्विषयत्वेन परिच्छेदं इतरथाऽसम्भवात्। यत्तु प्राणमपि पूर्वोक्तं तुल्यत्वात् कर्मणा विरुद्धमात्मज्ञानमिति तत्सविशेषनिर्विशेषात्मतया प्रत्युक्तं उत्तरत्र व्याख्याने दर्शयिष्यामः। अतः केवलनिष्क्रियब्रह्मात्मैकत्वविद्याप्रदर्शनार्थमुत्तरो ग्रन्थ आरभ्यते।

प्रत्युक्तमिति निर्विशेषात्मज्ञानस्य कर्त्रादिकारकोपमर्दकत्वेन। विरुद्धत्वादुपमर्दं चेति सूत्रेणाविरुद्धत्वं प्रत्युक्तमित्यर्थः। तस्माद्वक्ष्यमाणविद्याया अकर्मनिष्ठत्वं कर्मासम्बन्धित्वं केवलात्मविषयत्वञ्च सिद्धमिति पूर्वोक्तकर्मभिर्विद्यया च शुद्धसत्त्वस्य तत एव साधनचतुष्टयसम्पन्नस्य केवलात्मस्वरूपाज्ञानलक्षणमोक्षसिध्यर्थं केवलात्मविद्याऽऽरभ्यत इत्युपसंहरति। अत इति॥ नन्वात्मनः सविशेषत्वप्रतीतेस्तद्विरोधात् कथं कैवल्यमित्याशङ्क्य विशेषस्य सर्वस्यात्मनि मायाकल्पितत्वान्न वास्तवनिर्विशेषत्वविरोध इति तदर्थं माययात्मनः सकाशात् सृष्टिं वक्तुं सृष्टेः पूर्वमात्मनो निर्विशेषरूपं दर्शयितुमात्मा वा इत्यादि वाक्यम्॥ तत्रात्मशब्दार्थमाह। आत्मेति॥ आत्मेतिपदेन सर्वज्ञादिरूप आत्मोच्यत इत्यन्वयः। अद्वय इत्यन्तरमुच्यत इति शेषः। नन्वात्मशब्देन कथमुक्तलक्षण आत्मोक्त इत्याशङ्क्याह आत्मशब्दस्य सृत्युक्तव्युत्पत्तिबलाद्बूया चेत्याह। आप्नोतेरिति॥ वा शब्दस्यार्थ आदानञ्च समुच्चिनोति। तथा च श्रुतिः। यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह। यच्चास्य सन्ततो भावस्तस्मादात्मेति कीर्त्यत इति॥ अत्राप्तिर्ज्ञानं व्याप्तिश्चोच्यते सत्तास्फुरणाभ्यां सर्वं व्याप्नोतीति सर्वज्ञत्वं सर्वशक्तित्वञ्चोच्यते: सत्ताप्रदानेनोपादा-

ऋग्वेदीयैतरेयोपनिषत् ॥

॥ ॐ परमात्मने नमः ॥ हरिः ॐ ॥

आत्मा वा इदमेक एवाग्र आसीत् ।

आत्मेति । आप्नोतेरत्तेरततेर्वा परः सर्वज्ञः सर्वशक्तिरय-नायादिरुर्वसंसारधर्म्मवर्जितो नित्यशुद्धबुद्धमुक्तस्वभावो-ऽजोऽजरोऽमरोऽक्षतोऽभयोऽद्वयः । वै इदं यदुक्तं नामरूप-कर्मभेदभिन्नं जगदात्मैवैकोऽग्रे जगतः सृष्टेः प्रागासीत् । किं नेदानीं स एवैको न कथं तर्ह्यासीदित्युच्यते । यद्यपी-दानीं स एवैकस्तथाप्यस्ति विशेषः । प्रागुत्पत्तेरव्याकृत-

---

नत्वसूचनात् सर्वशक्तित्वम् । अत्तीत्यनेन संहर्तृत्वम् । अततीत्यनेन त्रिविधपरिच्छेदराहित्यमुच्यत इति । अयनायादिवर्जितत्वादिति विषयादानेन रूढ्या च प्रत्यगभेदश्चोच्यत इत्युक्तरूप आत्मपदेनोच्यत इत्यर्थः । अभिव्यक्तनामरूपव्यावर्त्तनेनात्मात्रावधारणार्थो वैशब्द इत्याह । वै इति ॥ यदुक्तमिति पूर्वत्र प्राणशब्दितप्रजापतिरूपत्वेन यदुक्तमित्यर्थः । यदुतेति पाठः साधुः । अत्रेदमितिपदेन प्रत्यक्चादि-प्रसिद्धमुच्यते । अग्रे इति विशेषणादासीदिति भूतत्वोक्तेश्च पूर्वमेवात्म-मात्रं इदानीं त्वात्मात्रं न भवति किन्तु पृथक् तदिति प्रतीयत इति नाद्वितीयात्मेति शङ्कते । किं नेदानीमिति ॥ यदस्य मायिकस्य कदा-चिदपि स्वतः सत्त्वायोगादात्मनो द्वितीयत्वस्य न विरोध इत्याह । नेति ॥ तर्ह्यात्मनात्रस्येदानीमपि सत्त्वे तस्य भूतत्वोक्तेः का गतिरिति पृ-च्छति । कथं तर्ह्यासीदिति ॥ इदमुपलक्षणमत्रे इत्यपि कथमिति द्रष्ट-व्यम् । जगतः कालत्रयेऽप्यात्मव्यतिरेकेणाभावो यद्यपि तथापि तथा बोधने बोध्यस्य प्रत्यक्चादिविरोधाद्वाक्योक्तमात्मतत्त्वं बुद्धौ नारोहेत् । अतःप्रागुत्पत्तेरासीदित्युच्यते बोध्यस्य चित्तमनुरुध्य तदपि जगतो नामरू-

रूपदमानमात्मभूतं आत्मैकशब्दप्रत्ययगोचरं जगदिदानीं व्याकृतनामरूपभेदत्वादनेकशब्दप्रत्ययगोचरमात्मैकशब्दप्रत्ययगोचरश्चेति विशेषः। यथा सलिलात् पृथक् फेनं नामरूपव्याकरणभाक् सलिलैकशब्दप्रत्ययगोचरमेव फेनम्। यदा सलिलात् पृथङ्नामरूपभेदेन व्याकृतं भवति तदा सलिलं फेनश्चेत्यनेकशब्दप्रत्ययभाक् सलिलमेवेति चैकशब्दप्रत्ययभाक् न फेनं भवति तद्वत्। नान्यत् किञ्चन

पाभिव्यक्त्यभावमपेक्ष्यैव न त्विदानीमात्ममात्रत्वाभावाभिप्रायेणेत्युत्तरमाह। यद्यपीत्यादिना॥ अव्याकृतो नामरूपभेदो यस्मिन्नात्मनि तथाविधात्मभूतमित्यर्थः। आत्मैकशब्दप्रत्ययगोचरमिति यद्यपि प्रागुत्पत्तेर्वागबुध्योरभावेन शब्दप्रत्ययौ तावपि न स्तस्तथापीदानीं तदानींतनात्मतत्त्वं सुप्तादुत्थितः सुप्तिकाले नात्मतत्त्वमिव प्रमाणान्तरेणात्मा तदानीमात्मैक एवासीदिति वदति। प्रत्येतिचेति॥ तथोक्तमीश्वरस्यैवात्मैकशब्दप्रत्ययौ स्त इति द्रष्टव्यम्। अनेकशब्देति अविवेकिनां घटादिशब्दप्रत्ययगोचरं घटः सन्नित्यात्मशब्दपर्यायसच्छब्दगोचरश्चेत्यर्थः। गोचरशब्दस्य भावप्रधानत्वमङ्गीकृत्य गोचरत्वं यस्येति बहुव्रीहिणा नपुंसकत्वं द्रष्टव्यम्। आत्मैकशब्देति विवेकिनामित्यर्थः॥ उक्तमर्थं दृष्टान्तेन विशदयति। यथेति। अत्रात्मशब्दव्युत्पत्तिबलात् सर्वज्ञादिशब्दोपलक्षितं सत्यज्ञानानन्दरूपोऽखण्डैकरस आत्मोपक्षिप्तः। तस्यैवार्थस्य दृढीकरणार्थमेकादिपदानि। तत्रैक इत्यात्मान्तराभाव उच्यते। एवेत्यनेन वृक्षादावेकत्वेऽपि शाखादिभिर्नानात्मवदेकस्यात्मनो नानात्मत्वाभाव उच्यते इति स्वजातीयभेदस्वगतभेदनिराकरणार्थत्वेन पदद्वयमित्यभिप्रेत्य विजातीयभेदनिराकरणार्थत्वेन नान्यत् किञ्चनेति पदं व्याचष्टे। नान्यदिति। ननु जडप्रपञ्चस्य कारणीभूता जडा माया वर्त्तत इति कथं विजातीयभेदनिषेध इत्यत आह। निषेधदिति॥ मायायाः सत्त्वेऽपि तदानीं व्यापाराभावाद्व्यापारवतोऽन्यस्य निषेधः सम्भवतीत्यर्थः॥ ननु निर्व्यापाराया अपि तस्या

नान्यत्किञ्चन मिषत् ।

न किञ्चिदपि मिषदिति । मिषद्व्यापारवदितरद्वा ।

अन्यस्याः सत्त्वे आत्मशब्दोक्तं तस्याखण्डैकरसत्वं न सिद्धेदित्यत आह । इतरद्वेति । निर्व्यापारं वेत्यर्थः । ननु माया तथाविधाऽस्तीति पूर्वोक्तदोषः पुनः स्यादित्याशङ्क्य मिषदित्यनेन न स्वतन्त्रं स्वतः सत्ताकमुच्यते तथाविधस्य च निषेध इति । व्यतिरेकदृष्टान्तमाह । यथेति । अन्यात्मपक्षपातीति आत्मशक्तितयात्मन्येवान्तर्भूतमात्मपक्षपातीत्युच्यते न तद्भिन्नमित्यर्थः ॥ शक्तित्वेऽपि प्राभाकराणामिव तस्याः स्वतः सत्त्वं स्यान्नेत्याह । स्वतन्त्रमिति ॥ यथा साङ्ख्यानां प्रधानशक्तिभूतं स्वतः सत्ताकमस्ति । काणादानाञ्च तथाविधा अणवः सन्ति तथाविधमात्मव्यतिरिक्तं मिषदित्यनेनानूद्य निषिध्यते । माया तु न तथा भूतेति नोक्तदोष इत्यर्थः । दीपिकायान्तु धातूनामनेकार्थत्वेन मिषदिति धातोरासीदित्यर्थस्वीकृता नान्यत् किञ्चनासीदिति वाक्यार्थ उक्तः । तदयं वाक्यार्थ इदं जगदग्रे सजातीयविजातीयस्वगतभेदरहितात्मैवासीदित्यनेनात्मनोऽद्वितीयत्वं जगतस्तथाविधात्ममात्रतया मृषात्वञ्च सूचितमनेनाग्रे जगत आत्ममात्रत्वोक्तेर्न किञ्चित्प्रयोजनमात्मैक एवासीन्नान्यत् किञ्चनेत्येतावतैवाखण्डत्वसिद्धेरित्याशङ्क्य निरस्ता जगन्मृषात्वसूचनस्यैव प्रयोजनत्वात् । न चैवमर्थभेदे वाक्यभेदः स्यादिति वाच्यम् । अखण्डत्वसम्भावनार्थमेव जगदनिर्वचनीयत्वस्येदं जगदखण्डात्मैवेति विशिष्टविशेषणोक्तात्वात् । विशेषणानाङ्गार्थात्सिद्धेः सोमेन यजेतेत्यत्रेवेत्यत्रार्थद्वयस्यापि सूचितत्वादेवान्तेऽपि तस्य तत्र आवश्यकत्वेन स्वप्ना इति जाग्रदादेः स्वप्नत्वेन मृषात्वसङ्गा स य एतमेव पुरुषं ब्रह्मततमपश्यदित्यात्मशब्दोक्तम् । ततत्वं त्रिविधपरिच्छेदराहित्यलक्षणमखण्डत्वम् वक्ष्यति । न चेदमात्मैवासीदिति सामानाधिकरण्येनात्मनो जगद्वैशिष्ट्यमेव प्रतीयते न तु मृषात्वमिति वाच्यम् । आत्मैक एवेति पदैरुक्तेऽखण्डैकरसे तद्विपरीतजगत्प्रतीतेरतस्मिंस्तद्बुद्धिरूपत्वेन मृषात्वसिद्धेर्जगद्वैशिष्ट्यस्य घटः सन्नित्यादिरूपेण प्रत्यक्ष-

यथा साङ्ख्यानामात्मपक्षपाति स्वतन्त्रं प्रधानम् । यथा

सिद्धत्वेन प्रयोजनाभावेन च तत्प्रतिपादनस्यानुपपत्तेश्च मृषात्वमेव तदर्थः। मिषदित्यनेन स्वातन्त्र्यविशेषेण स्वतः सत्तानिषेधादपि मृषात्वसिद्धेश्च। स्वतः सत्तावत्त्वे स्वव्यापारे स्वातन्त्र्यमेव स्यात् । न चानेन प्रकारेणेदानीमपि मृषात्वस्यात्माखण्डत्वस्य च वक्तुं शक्यत्वादयं इति विशेषणं व्यर्थमिति वाच्यम्। इदानीमात्मभिन्नतया पृथक् सत्त्वेन च प्रतीयमानत्वेन तस्य मृषात्वमात्मत्वे बोधिते विरोधप्रतीत्या तस्य बुद्धीनारोहः स्यादिति गुडजिह्विकान्यायेनादौ पृथङ्नामरूपानभिव्यक्तिदशायामात्ममात्रत्वं बोध्यते। तस्मिन् बोधिते पश्चात्तन्यायेनेदानीमपि स्वयमेवात्ममात्रत्वं ज्ञास्यतीत्यभिप्रायेणाय इति विशेषणोपपत्तेः। यद्वा वाजसनेयिके तद्वेदं तर्ह्यव्याकृतमासीदिति श्रुतेः प्राक्कार्यस्थानभिव्यक्तनामरूपावस्थाबीजभूताव्याकृतात्मतोच्यते इह त्वात्ममात्रता अतः श्रुत्योर्विरोधपरिहारायोपसंहारे कर्त्तव्ये इहाव्याकृतपदमुपसंहियते। तत्र चात्मपदमितीदमग्रे अव्याकृतमासीत्तच्च यदात्मैवासीदिति वाक्यं सिध्यति। तत्राव्याकृतशब्देन तम आसीत्तमसा गूढमग्रे। मायां तु प्रकृतिं विद्यादित्यादिषु जगद्बीजावस्थायामव्यक्तमादिशब्दप्रयोगात् तमोरूपा मायोच्यते तत्कार्यस्याग्रे ऽनभिव्यक्तनामरूपात्मकमायात्मकत्वं सिध्यति। तस्मात्तादात्म्योक्त्या साङ्ख्यमतवत् स्वतन्त्रत्वनिरासेन तत्र कल्पितत्वं सिध्यति। तयोः कार्यकारणभावाद्भावेन प्रकारान्तरेण तादात्म्यानिर्वाहात्तत्तस्यात्मनोऽखण्डत्वं तद्भिन्नस्य मृषात्वञ्चात्मनः परिणममानाऽविद्याधिष्ठानत्वेन विवर्त्योपादानत्वं तस्याश्च परिणामित्वञ्च सूचितम्भविष्यति। कार्यस्य मृषात्वार्थमेवाव्याकृतात्मत्वमुच्यते। तस्याव्याकृतस्यात्मतादात्म्येन मायात्वेन च मृषात्वादिदानीन्तु नानभिव्यक्तनामरूपबीजात्मत्वमित्यस्य इति विशेषणमप्यर्थवत्। तदभिप्रेत्यैव भाष्ये प्रागुत्पत्तेरनभिव्यक्तनामरूपभेदात्मभूतमात्मैकशब्दप्रत्ययगोचरं जगदिदानीन्तु व्याकृतनामरूपभेदवत्त्वादनेकशब्दप्रत्ययगोचरमात्मैकशब्दप्रत्ययगोचरञ्चेति विशेष इतीदानीन्नानाभिव्यक्तनामरूपबीजात्मनेवाग्यशब्दस्य व्यावर्त्यत्वमुक्तम्। न च साक्षादिदानीमेव

च काणादानामणवो न तद्वदिहान्यदात्मनः किञ्चि-

मायात्मत्वेन सृष्यात्वमुचितामिति वाच्यम्। इदानीं प्रत्यक्षादि-विरोधेन तथा बोधयितुमशक्यत्वादित्युक्तत्वान्नामरूपाभिव्यक्तेः सृष्टेः पूर्वमभावेनेदानीमेव विद्यमानत्वेन कादाचित्कत्वादपि रज्जुसर्पा-दिवन्मृषात्वमिति वक्तुमपि प्रागव्याकृतत्वोक्तिरर्थवतीति न किञ्चि-दवद्यम्। अथवा जगदधिष्ठानं किञ्चित् सद्रूपं सम्भावयितुमिदमग्र आसीदित्युच्यते। असम्भाविते तस्मिन्नखण्डत्वोक्तेर्निर्विषयत्वं प्रसज्येत। अनेनाशक्यविषाणादेरिव सद्रूपेणोत्पत्त्यसम्भवात् कार्यस्य प्रागवस्था सदात्मिका चित्त्वसम्भाविता। तस्माच्च चेतनत्वे कार्याकारेण स्वतोऽप्रच्युत्ते-रतिरिक्तचेतनाधिष्ठानाङ्गीकारेच गौरवात्। उपादानाधिष्ठान-त्वयोरेकस्मिन्नेवात्मघटसम्भवाच्च चेतनत्वमात्मैवेत्यनेन सम्भाव्यते। एवं सम्भाविते ह्यधिष्ठाने उपादानकारणे आत्मन्यखण्डैकरसत्वं तस्य वक्तुमेक एवाद्वितीयोऽनेनेति पदानि अस्मिन्पक्षे चेदमग्रे आत्मैवासीदित्यनेन सम्भावितं कार्यस्य प्राग्यूपमनूद्यदात्मकमिद-मासीत् स एक एव नान्यत् किञ्चनेत्यखण्डैकरसत्वं विधीयते इति न कस्यचिदर्थानर्थक्यम्। अत एव छान्दोग्ये सदेव सोम्येदमग्र आसीदि-त्यस्य सद्रूपकारणसम्भावनार्थत्वादेव तत्सिद्ध्यर्थं तद्वैक आहुरित्यादिना सत्कारणवादो निरस्तः। अन्यथा सिद्धस्य सतोऽद्वितीयत्वमात्रविव-क्षायां तस्याप्रस्तुतत्वप्रसङ्गात्। अस्मिन्नपि व्याख्याने कारणस्याद्वि-तीयत्वादिवचसा तदन्यस्य मृषात्वमपि सिद्ध्यति। कार्यस्य मृषात्वे तन्नि-रूपितं कारणत्वमपि तथेति। तथाविधात्मज्ञानान्मुक्तिरपि वक्ष्यमाणा सिद्ध्यतीति न किञ्चिदवद्यम्। दीपिकायान्तु इदमात्मैवासीदिति सामानाधिकरण्यबाधायां यश्चौरः स स्थाणुरितिवदिदानीं जगद्विषि आत्मप्रतिभासेन तत्र बाधानुपपत्त्या स्थितिकालस्मरित्यध्याहृत्य सृष्टेः प्राचीनः काल उपादीयते। सृष्टिप्रपञ्चबाधया सिद्धस्याख-ण्डैकरसत्वस्य स्फुटीकरणार्थमेकादिशब्दा इति नकस्याप्यानर्थक्यमि-त्युक्तम् तत्राऽप्यशब्दस्य न प्रयोजनमारोप्य प्रतीतिदशायामेव यश्चौरः स स्थाणुरित्यादौ बाधदर्शनेनेहापि जगत्प्रतीतिदशायामेव तद्बाध-

स ईक्षत लोकान् नु सृजा इति ॥ १ ॥

दपि वस्तु विद्यते। किन्तर्ह्यात्मैक एव आसीदित्यभिप्रायः। स सर्वत्र स्वाभाव्यादात्मा एकः सन्नीक्षत। ननु प्रागुत्पत्तेरकार्य्यकारणत्वात् कथमीक्षितवान्। नायं दोषः। सर्वज्ञस्वाभाव्यात्। तथा च मन्त्रवर्णः। अपाणिपादो

नस्य न्याय्यत्वात् सृष्टेः प्रागप्रतीतस्य बाधानुपपत्तेश्च। किञ्च कालत्वयनिषेधो हि बाधः प्राक्काल एवेति निषेधे बाध एव न स्यात्। न हि पाकरक्ते घटे पूर्वं न रक्तो घट इति प्रत्ययबाधं मन्यन्ते। अत एव भाष्ये प्रागुत्पत्तेरव्याकृते नामरूपभेदाक्रान्तं जगदासीदिति जगतः कारणात्मना सत्त्वमेवोक्ता न तु बाध इति। न च सृष्टेःप्राक्कालाभावेनाऽस्य इति कालसम्बन्धायोग इति वाच्यम्। प्राक्काले घटशरावादिकं सृष्टेरासीदित्यादिवाक्येषु कालसम्बन्धेनैव बोधनस्य व्युत्पन्नत्वेनेहापि तथैव बोधयितुं कालसम्बन्धारोपोपपत्तेः। यथा देवदत्तस्य शिर इत्यादाववयवावयविभेदेन बोधनस्य दृष्टत्वेन राहोः शिर इत्यादावपि तत्कल्पनम्। यथा वा पूर्वकालेऽपि काल आसीदित्यादौ कालान्तरसम्बन्धारोपणं तद्वत्। दीपिकायान्तु पररीत्यापरो बोधनीय इति न्यायेन परमे तत्कालस्य नित्यत्वेन प्रागपि सत्त्वात्तद्रीत्या कालसम्बन्धउक्त इत्युक्तम्। न चात्मा वा आसीदिति सत्तावैशिष्ट्यमेव प्रतीयते कर्तुः क्रियान्वयत्वादिति वाच्यम्। सविता प्रकाशत इत्यादौ कर्तृवाचिप्रत्ययस्य धातुत्वमात्रार्थत्वेन सवितुःप्रकाशरूपप्रत्ययवदात्मन एव सद्रूपत्वप्रतीतेः। अतिरिक्त सत्ताजात्यभावाच्चान्यथा सत्तासीदित्यादावगतेरिति सर्वं सुस्थम्।

एवं सृष्टितमात्मनोऽखण्डैकरसत्वं साधयित्वुपपत्तिप्रपञ्चस्य मृषात्वं तदध्यारोपापवादाभ्यां दृढीकर्त्तुमध्यायशेषः तत्राध्यारोपार्थं स जातो भूतानीत्यतः प्राक्तनस्तदादिरपवादार्थः। तत्रापि वाचारम्भणन्यायेनात्मातिरिक्तस्य विकारस्य मृषात्वं वक्तुं सृष्टिवाक्यम्। तत्र स्रष्टुरात्मनः सम्भावितं चेतनत्वं दृढीकर्त्तुमीक्षणमाह। स सर्वज्ञेति-

जवनो ग्रहीता इत्यादिः । केनाऽभिप्रायेणेत्याह । लोकानग्नयः प्रभृतीन् प्राणिकर्मफलोपभोगस्थानभूतान् सृजे सृजेमेति । एवमीक्षित्वाऽऽलोच्च स आत्मा इमाँल्लोकान्सृजत सृष्टवान् ॥ १ ॥

नन्वेकस्याखण्डस्य कथमीक्षणं साधनाभावादित्याशङ्क्य न तस्य साधनापेक्षेत्यभिप्रेत्यैकः सन्नपि सर्वज्ञस्वाभाव्यादृक्षतेत्युक्तमतोऽागमाभावश्छान्दसः ॥ इममेवाभिप्रायं शङ्कापरिहाराभ्यां स्फोरीकरोति । नन्विति ॥ तत्र करणानीन्द्रियाणि कार्यं शरीरमिति विवेकः । तद्रहितस्यापि सार्वज्ञे श्रुतिमाह । तथा चेति ॥ अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः । स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तमिति मन्त्रशेषः न तस्य कार्यं करणञ्च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते । पराऽस्य शक्तिर्विविधैवश्रूयते स्वाभाविकी ज्ञानबलक्रियापि चेत्यादिरादिशब्दार्थः ॥ ननु स्वाभाविकनित्यचैतन्येन कथं कादाचित्केक्षणमिति । अत्र केचित् स्वर्गादौ प्राणिकर्मभिरेका सृज्याकाराऽविद्यावृत्तिरुत्पद्यते । तस्यामात्मचैतन्यम् प्रतिबिम्बितं तदेवेक्षणं तच्चादिकार्यत्वात् स्वपरनिर्व्याहकमिति न तत्रापीक्षणान्तरापेक्षा सर्वैरपि प्रथमकार्येऽनवस्थापरिहारायैवमेवेष्टव्यमित्याहुः अपरे तु प्राणिकर्मवशात् सृष्टिकालेऽभिव्यक्त्युन्मुखीभूतानभिव्यक्तनामरूपावच्छिन्न सत्स्वरूपचैतन्यमेवोन्मुखस्य कादाचित्कत्वात् कदाचित् कर्मेक्षणमित्याहुः । अन्ये त्वीक्षणवाक्यस्य कारणस्याचैतन्यव्यावृत्तिपरत्वादीक्षणे तात्पर्याभावाच्च न तत्र भूयानाग्रहः कर्त्तव्य इत्याहुः ॥ नु शब्दो वितर्कार्थ इति मनसि निधायाह । न्विति ॥ लोडर्थस्य विध्यादेः स्वातन्त्र्यसम्भवात् लोटो लङर्थत्वमाह । सृजे इति । अहमितीत्यस्यैक्षतेति पूर्वेणान्वयः । ईक्षणस्य पूर्वकालीनत्वं वदन् सृष्टिहेतुत्वमाह । एवमिति ॥ १ ॥

स इमाँल्लोकानसृजत

यथेह बुद्धिमांस्त्वष्टादिरेवम्प्रकारान् प्रासादादीन् सृजा इतीच्छीत्वेच्छानन्तरं प्रासादादीन् सृजति तद्वत्। ननु सोपादानस्त्वष्टादिः प्रासादादीन् सृजतीति युक्तं निरूपादानस्त्वात्मा कथं लोकान् सृजति इति। नाऽयं दोषः। सलिलफेनस्थानीये अरूपेऽव्याकृते आत्मैकशब्दवाच्ये व्याकृतफेनस्थानीयस्य जगत उपादानभूते सम्भवः। तस्मा-

---

अनेक्षणपूर्वकसृष्टुक्तेः प्रयोजनं सृष्टुश्चेतनत्वसिद्धिरेवेत्यभिप्रेत्य तथाविधस्य तक्षणश्चेतनत्वमुदाहरति। यथेति॥ नन्वोचित्यस्त्वष्टादेर्दार्वाद्युपादानकारणसहितत्वात्प्रासादादेः स्रष्टृत्वं युक्तम्। इत्यात्मा वा इदमेक एवेत्युक्तस्याद्वितीयत्वेनोपादानकारणान्तराभावात् स्रष्टृत्वं न युक्तमिति शङ्कते। नन्विति॥ न च बहुस्यां प्रजायेयेति तदात्मानं स्वयमकुरुतेति श्रुत्याऽऽत्मन एवोपादानत्वान्नोपादानान्तरापेक्षेति वाच्यम्। विपदादेर्व्यवहारिकत्वेन घटादिवत्परिणामित्वात्तस्य परिणाम्युपादानं वक्तव्यम्। न चात्मा तथा भवितुमर्हति तस्य निरवयवत्वेनापरिणामित्वादिति भावः॥ अत्र विपदादेः परिणामित्वमङ्गीकृत्य तत्रानभिव्यक्तनामरूपावस्थं बीजभूतमव्याकृतं तद्वेदं तर्ह्यव्याकृतमासीत्तम आसीत् मायान्तु प्रकृतिं विद्यादित्यादिश्रुतिसिद्धं परिणाम्युपादानमस्तीत्याह। नायमिति॥ आत्मभूत इत्यनेनानभिव्यक्तनामरूपशब्दिताव्याकृतस्यात्मन्यध्यस्तत्वेन परिणममानाविद्याधिष्ठानत्वेनात्मनो विवर्त्योपादानत्वं तयोरात्ममात्रत्वेन श्रुत्यात्॥ आत्मनो द्वितीयत्वञ्च न विरुद्धत इति दर्शयति। नामरूप इति॥ तदाश्रयमव्याकृतमित्यर्थः। इदानीं घटादिष्वपि विवर्त्तत एव परिणामो नामविवर्त्तादन्यो नास्त्येव विवर्त्त इति परिणाम इति च पर्य्याय इत्यारम्भणाधिकरणन्यायेन विवर्त्ततया सिद्धैर्विकारैरित्यात्मकृतैः परिणामादिति सूत्रकारेण परिणामशब्दप्रयोगाच्च सिद्धं

अम्भो मरीचीर्मरमापोऽदोऽम्भः परेण दिवं

दात्मभूतनामरूपोपादानः सन् सर्वज्ञो जगन्निर्म्मिमीत इति न विरुद्धम्। अथवा यथा विज्ञानवान्मायावी निरुपादान आत्मानमेवात्मान्तरत्वेनाकाशे गच्छन्निव निर्म्मिमीते तथा सर्वज्ञो देवः सर्वशक्तिर्महामाय आत्मानमेवात्मान्तरत्वेन जगद्रूपेण निर्म्मिमीत इति युक्ततरम्। एवञ्च सति कारणकार्य्योभयासद्वादादिपक्षाश्च न प्रसज्यन्ते सुनिराकृताश्च भवन्ति। काँल्लोकान्सृजतेत्याह।

तत्र चात्मन एवोपादानत्वम्। माया तु सहायमात्रमित्यभिप्रेत्यात्मनि चैवं विचित्राश्च हीति द्वितीयस्य प्रथमपादे सूत्रोपष्टम्भेन परिहारान्तरमाह। अथवेति॥ विज्ञानवानित्याकाशेन गच्छन्निव स्थितमात्मान्तरं सृजामीति ज्ञानवानित्यर्थः। इदञ्च विशेषणमीक्षणस्य स्रष्टृत्वस्य च शुक्तिरजतादौ विवर्त्ते अदर्शनात् कार्य्यस्य तत्तुल्यत्वेन तदुभयं न स्यादिति शङ्कानिरासार्थं तन्निरासश्च मायाविनिर्म्मिते विवर्त्ते तदुभयदर्शनादिति। निरुपादान इति स्वव्यतिरिक्तोपादानरहित इत्यर्थः॥ सर्वशक्तित्वे हेतुमाह। महामाय इति॥ आत्मान्तरत्वेनेत्यात्मभिन्नत्वेनेत्यर्थः। युक्ततरमिति इन्द्रो मायाभिः पुरुरूप ईयते मायया त्वन्यदिव भवति वह्नि स्वाम्रजायेय, वाचारम्भणं विकारः, यागादग्नेरग्नित्वमित्यादिवच्छ्रुतिसम्मतत्वादित्यर्थः। एवञ्च सति सत एवात्मनः कारणकार्य्यरूपेणावस्थानाङ्गीकारान्निर्हेतुकमेव कार्य्यसुत्पद्यत इति यदृच्छावादिनाम्। असदेव कार्य्यसुत्पद्यत इति नैयायिकानाम्। उभयमयसदिति शून्यवादिनां पक्षः। आदिशब्देन सदेव कार्य्यसुत्पद्यत इति साङ्ख्यादीनां परिणामपक्ष उक्तः। असत्कार्य्यपक्षे त्वसतः सत्त्वापत्तिः शशविषाणादेरप्युत्पत्तिप्रसङ्गश्च दोषः। परिणामवादे च तस्य पूर्वमेव कारणे सत्त्वात्कुलालादिकारकव्यापारवैयर्थ्यं पूर्वमसत्त्वे कारणस्यैवावस्थान्तरापत्तिलक्षणपरिणामत्वानुपपत्तिः। उत्पत्त्यनन्तरमसत्त्वे ततो

द्यौः प्रतिष्ठाऽन्तरिक्षं मरीचयः । पृथिवी मरोया अधस्तात्ता आपः ॥ २ ॥

अम्भो मरीचीर्मरमाप इति । आकाशादिक्रमेणाण्डमुत्पाद्याम्भः प्रभृतीन्लोकानसृजत । तत्राम्भः प्रभृतीन् स्वयमेव व्याचष्टे श्रुतिः । अदस्तदम्भः शब्दवाच्यो लोकः परेण दिवं द्युलोकात्परेण परस्तात् सोऽम्भः शब्दवाच्यो लोकः । अपाम्भरणात् । द्यौः प्रतिष्ठाऽऽश्रयस्तस्याम्भसो लोकस्य । द्युलोकादधस्तादन्तरिक्षं यत्तन्मरीचयः । एकोऽप्यनेकस्या-

---

व्यवहारासिद्धिरपरोक्षत्वानुपपत्तिश्च दोषः । उभयात्मके चोभयपक्षोक्तदोषः । ते विवर्त्तवादेन प्रसज्जन्त इत्यर्थः । यद्वाक्षाभिर्विवर्त्तवादस्वीकारात् परिणामादिपक्षानङ्गीकारे परपक्षाङ्गीकारलक्षणो दोषो न सम्भवतीत्याह । एवञ्च सतीति ॥ सुनिराकृतश्चेति विवर्त्तवादस्यैव परिपन्थे पक्षान्तरेषु दोषसूचनाद्द्वितीयात्मनस्तद्विपरीतप्रपञ्चाकारतामिधायिन्या बह्वस्यामिति श्रुत्या विवर्त्तवादस्यैव परिगृहीतत्वेन पक्षान्तराणां श्रुतिबाह्यत्वाच्च ते निराकृता भवन्तीत्यर्थः । लोकानां भौतिकत्वादण्डान्तर्वर्त्तित्वाच्च भूतसृष्टित्वमङ्गीकरणाण्डसृष्ट्यनन्तरं तत्. सृष्टिरिति गुणापसंहारन्यायमाश्रित्याह । आकाशादीति ॥ स्वयमेव व्याचष्टे श्रुतिः । तेषां लोकेषु प्रसिद्धत्वादित्यर्थः । द्युलोकात्परस्ताद्ये महरादयो लोका यस्य तस्याम्भसो लोकस्याश्रयो द्युलोकस्ते सर्वे अम्भशब्देनोच्यन्ते । सृष्ट्यम्भसस्तत्र विद्यमानत्वादित्याह । अद इति ॥ अन्तरिक्षं मरीचय इत्यस्यार्थमाह । द्युलोकादिति ॥ मरीचिशब्देन सूर्यकिरणसम्बन्धादन्तरिक्षलोकं लक्षयित्वा तस्यैकत्वेऽपि प्रदेशभेदाद्बहुत्ववचनं युक्तं इदानीं बह्वनां मरीचीनां लक्षकत्वात्तत्कृतत्वाद्बहुत्वं गङ्गायां घोष इत्यत्र लाक्षणिकगतस्त्रीत्व मिवेत्याह । मरीचिभिर्वेति ॥ ननु मरीचिशब्देनान्तरिक्षलोकस्वीकारे मरीचिसम्बन्धो निमित्तान्तरमुच्यत इति

नभेदत्वाद्बहुवचनभाक्। मरीचिभिर्वा रश्मिभिः सम्बन्धात् पृथिवी मरो म्रियन्तेऽस्मिन् भूतानीति। या अधस्तात् पृथिव्यास्ता आप उच्यन्ते। आप्नोतेर्लोकाः। यद्यपि पञ्चभूतात्मकत्वं लोकानान्तथापि अब्बाहुल्यादब्नामभिरेवाम्भो मरीचीर्मरमाप इत्युच्यते ॥ २ ॥

श्रमितव्यम्। एतद्विन्नस्य निमित्तस्य पूर्वमनुक्तत्वेन विकल्पार्थकवाशब्दायोगादाप उच्यन्त इत्यधोलोकवासिभिर्जीवैराप्यमानत्वादाप्नोतेर्धातोरर्थयोगात्ते लोका आप इत्युच्यत इत्यन्वयः॥ ननूक्तानां पञ्चभूतसम्बन्धाविशेषाद्भूतान्तरेण पृथिव्यादीनामुपरितनलोका लक्ष्यन्ते अन्तरिक्षस्य मरीचिव्यतिरिक्तपदार्थान्तरेण मेघादिनापि सम्बन्धात्तेन सलोकः पृथिव्यास्ततोऽधो लोकानाञ्च मरणाम्भिव्यतिरिक्तगमनादिक्रियान्तरेणैव लक्ष्यतामिति शङ्कते। यद्यपीति॥ भूतात्मकत्वमिति भूतसम्बन्धित्वमित्यर्थः। इदमुपलक्षणं मेघादिपदार्थान्तरसम्बन्धेऽपि वर्त्तत इति द्रष्टव्यम्। अम्भ आदीनामेव तेषु लोकेषु प्राचुर्य्यात्तैरेव ते लोका लक्षणीयाः। प्राचुर्य्येण व्यपदेशा भवन्तीति न्यायादिति परिहरति॥ तथापीति॥ अब्बाहुल्यादित्युपलक्षणं मरीच्यादीनामपि बाहुल्यादित्यपि द्रष्टव्यम्। अब्नामभिरित्यत्रापि मरीच्यादिनामभिरित्यपि द्रष्टव्यम्। यथा श्रुते अवान्तरत्वेनाम्भ आदिशब्दलक्ष्यकत्वानुपपत्तेर्लोकानां शङ्कानुपपत्तेर्मरीच्यादीनामब्नामत्वाभावादप्शब्दस्याप्निष्क्रियार्थत्वोक्तेरब्नामत्वाभावेनाब्नामभिरिति परिहारानुपपत्तेश्चेत्युपरितनलोकानृष्टिद्वारेणागतमम्भ एवाक्षाभिः साक्षादुपलभ्यते न तु भूतान्तरमिति। अस्मद्दृष्ट्या अब्बाहुल्यमुपरितनलोकानामूर्द्धलोकगामिप्राण्यपेक्षया अधोलोकगामिनां प्राणिनां पुरीषेषु बाहुल्योक्तेर्बहुभिराप्यन्ते अधोलोका इत्यधोलोकेषु तत्कर्दकाग्नेरपि बाहुल्यं पृथिव्यामतिशीघ्रं प्राणिनां मरणात्तस्यापि तत्र बाहुल्यं अन्तरिक्षस्य तु मरीचिबाहुल्यं प्रति सिद्धमेवेति ज्ञेयं अम्भो मरीचिर्मरमाप इत्यत्र इत्येतैर्नामभिरुच्यन्त ॥ २ ॥

स ईक्षतेमे नु लोका लोकपालान्नु सृजा इति। सोऽद्भ्य एव पुरुषं समुद्धृत्यामूर्छयत् ॥३॥

सर्वप्राणिकर्मफलोपादानाधिष्ठानभूतान् चतुरो लोकान् सृष्ट्वा स ईश्वरः पुनरेवेक्षत। इमे नव्वमः प्रभृतयो मया सृष्टा लोकाः परिपालयितृवर्जिता विनश्येयुः। तस्मादेषां रक्षणार्थं लोकपालान् लोकानां पालयितॄन् सृजेऽहमिति। एवमीक्षित्वा सोऽद्भ्य एवाप्प्रधानेभ्यः पञ्चभूतेभ्यो येभ्योऽम्भः प्रभृतीन् सृष्टवान् तेभ्य एवेत्यर्थः। पुरुषं पुरुषप्रकारं शिरःपाण्यादिमन्तं समुद्धृत्याद्भ्यः समुपादाय सृष्टि-

---

अनात्मा वा इत्युक्तात्मज्ञानेन संसारी मोचयितव्यत्वेन विवक्षितः। असंसारिणो मोक्षानुपपत्तेः। संसारश्च संसरणाधिकरणलोकान् तदुपाधिभूतं लिङ्गशरीरं तदभिमानिनो देवान् तदधिष्ठानं स्थूलशरीरं संसाररूपाधनायादीन् तदभिमानिनं तङ्कोल्लारमन्तरेण नोपपद्यत इति तस्य सृष्टिमयमावसथ इत्यत्रेन ग्रन्थेन क्रमेण वक्ष्यन् संसरणाधिष्ठानलोकसृष्टिमुक्त्वा तत्पालयितृदेवतासृष्टीक्षणद्वारा समष्टिस्थूलशरीरस्य समष्टिलिङ्गशरीरस्य तदभिमानिनां देवानाञ्च सृष्टिं वक्तुमारभते॥ स ईक्षतेति॥ तद्व्याचष्टे। सर्वप्राणीति॥ फलस्य तदुपादानस्य तत्साधनस्य चाधिष्ठानभूतानीत्यर्थः। अव्ययानामनेकार्थत्वान्नुशब्दस्तु शब्दार्थः। वैलक्षण्यं लोकानामाह। इमे त्विति॥ अहमितीत्यस्येक्षतेति पूर्वेणान्वयः॥ समष्टिलिङ्गशरीरतदभिमानिनां विराडवयवजन्यत्वात्तदर्थं विराट्सृष्टिमाह। एवमीक्षित्वेति॥ यद्यपि लोकोत्पत्तेः पूर्वमेवाण्डोत्पत्तिरुक्ता अण्डमुत्पाद्याम्भः प्रभृतीन् लोकानसृजतेति भाष्यकारेण तथापि सैवोत्पत्तिरिहानुद्यते लोकपालसृष्ट्यर्थमिति न विरोध इति भावः। अद्भ्य एवेत्येवकारार्थमाह। येभ्य इति॥ कुलालः पृथिव्याः

तमभ्यतपत्तस्याऽभितप्तस्य मुखं निरभिद्यत यथाण्डम्। मुखाद्वाग्वाचोऽग्निर्नासिके निरभिद्येतां नासिकाभ्यां प्राणः प्राणाद्वायुरक्षिणी निरभिद्येतां अक्षिभ्याञ्चक्षुश्चक्षुष आदित्यः कर्णौ निरभिद्येतां कर्णाभ्यां श्रोत्रं श्रोत्राद्दिशस्त्वङ्निरभिद्यत

मिव कुलालः घटियित्वा अमूर्छयत् संमूर्छितवान् सम्पिण्डितवान् स्वावयवसंयोजनेनेत्यर्थः॥ ३॥

तं पिण्डं पुरुषविधमुद्दिश्याभ्यतपत् तदभिध्यानं सङ्कल्पं कृतवानित्यर्थः। यस्य ज्ञानमयं तप इति श्रुतेः। तस्याभितप्तस्येश्वरसङ्कल्पेन तपसाभितप्तस्य पिण्डस्य मुखं निरभिद्यत मुखाकारं सुषिरमजायत। यथा पक्षिणोऽण्डं निरभिद्यत। एवं तस्मान्निर्भिन्नान्मुखाद्वाक्करणमिन्द्रियं निरवर्त्तत तदधिष्ठानाग्निस्ततो वाचो लोकपालः। तथा

सकाशादुद्भूत्यण्डमेवेत्यन्वयः। स्वावयवेति॥ भूतानां परस्परावयवसंयोजनेनेति श्लिष्टिः संयोगश्लेषेनेत्यर्थः॥३॥

विराडुत्पत्तिमुक्त्वा तदवयवेभ्यो लोकपालोत्पत्तिमाह। तं पिण्डमित्यादिना॥ तपःशब्देनाभिध्यानशब्दितं ज्ञानमुच्यते न कृच्छ्रादीत्यत्र स्मृतिमाह। यस्येति॥ यस्य तपो ज्ञानमेव न कृच्छ्रादीत्यर्थः। ततो वाचो लोकपालोऽग्निर्वागधिष्ठाता निरवर्त्ततेत्यन्वयः। यद्यपि यागादिकारणजातं अपक्वीकृतभूतकार्यं न मुखादिगोलककार्यं तथापि मुखाद्याश्रये तदभिव्यक्तेर्मुखाद्वागित्युक्तम्। नासिकाभ्यां प्राण इत्यत्र प्राणशब्देन प्राणवृत्तिसहितं घ्राणेन्द्रियमुच्यते। अधिष्ठानयितिं गोलकमित्यर्थः। त्वग्गोलकं लोमेति। लोमसहचरितं स्पर्शनेन्द्रियमुच्यते। ओषधिवनस्पतय इति ओषध्याद्यधिष्ठातृदे-

त्वचो लोमानि लोमभ्य ओषधिवनस्पतयो हृदयं निरभिद्यत हृदयान्मनो मनसश्चन्द्रमा नाभिर्निरभिद्यत नाभ्या अपानोऽपानान्मृत्युः शिश्नं निरभिद्यत शिश्नाद्रेतो रेतस आपः ॥४॥ इति प्रथमः खण्डः ॥ १ ॥

नासिके निरभिद्येताम्। नासिकाभ्यां प्राणः प्राणाद्वायुरिति सर्वत्राधिष्ठानं करणं देवता च त्रयं क्रमेण निरभिन्नमिति। अक्षिणी कर्णौ त्वक् हृदयमन्तःकरणाधिष्ठानम्। मनोऽन्तःकरणम्। नाभिः सर्वप्राणनिबन्धनस्थानं। तस्मादपानसंयुक्तत्वादपान इति पाय्विन्द्रियमुच्यते। तस्याधिष्ठात्री देवता मृत्युर्यथान्यत्र तथा शिश्नं निरभिद्यत

वता वायुरुच्यते। चित्तन्तु चेतो हृदयम्। हृदयशब्दाच्छृदयशब्देत्यादौ हृदयशब्दस्यान्तःकरणार्थत्वदर्शनान्मनःशब्देनापि तस्यैवाभिधाने पौनरुक्त्यमित्यत आह। हृदयमिति॥ अन्तःकरणाधिष्ठानं हृदयकमलमुच्यत इत्यर्थः। सर्वप्राणनिबन्धनस्थानमिति गुदामूलमित्यर्थः॥ अपानशब्देन पाय्विन्द्रियलक्षणायां सम्बन्धमाह। अपानेति॥ ननु शिश्नं निरभिद्यतेति पर्यायेण शिश्नरेतसोरुत्पत्त्यभिधाने स्त्रीयोन्यादेरुत्पत्तिरुक्ता स्यादित्याशङ्क्य शिश्नशब्देनोपस्थेन्द्रियस्थानं लक्ष्यते। रेत इति तद्विसर्गार्थत्वेन तल्लक्षितमुपस्थेन्द्रियम्। अप्शब्देन तल्लक्षितपञ्चभूतोपाधिकः प्रजापतिश्चोच्यत इत्याह। यथेति॥ यथाऽन्यत्र पर्यायान्तरे स्थानं करणं देवता चेति त्रयमुक्तं एवमिहापि शिश्नादिशब्दैस्त्रयमप्युच्यत इत्यर्थः। रेत इति॥ इन्द्रियमुच्यत इत्यन्वयः तल्लक्षणायां सम्बन्धमाह।

ता एता देवताः सृष्ट्वा अस्मिन्महत्यर्णवे

प्रजनेन्द्रियस्थानमिन्द्रियं रेतोविसर्गार्थत्वात्महरेतसोच्यते रेतस आप इति ॥ ४ ॥ प्रथमखण्डभाष्यम् ॥ १ ॥

ता एता अग्न्यादयो देवता लोकपालत्वेन सङ्कल्प्य सृष्ट्वा ईश्वरेणास्मिन् संसारार्णवे संसारसमुद्रे महत्यविद्याकामकर्मप्रभवदुःखोद्रेके तीव्ररोगजराद्यत्युग्रग्राहे अनादावनन्ते अपारे निरालम्बे। विषयेन्द्रियजनितसुखलवक्षणविश्रामे पञ्चेन्द्रियार्थतृष्णामारुतविक्षोभोत्थितानर्थशतमहोर्मौ महारौरवाद्यनेकनिरयगतहाहेत्यादिकूजिताक्रोशनोद्भूतमहारवे सत्यार्जवदानदयाहिंसादमश-

---

सह रेतसेति रेतसा सहितं तत् सम्बद्धमित्यर्थः। सम्बन्धमुपपादयति। रेतो विसर्गार्थत्वादिति ॥ ४ ॥ प्रथमखण्डभाष्यटीका ॥ १ ॥

एवं समष्टीनामिन्द्रियाणां तदभिमानिदेवतानाञ्चोत्पत्तिमुक्त्वा अथ तासां देवतानां भोगयोग्यात्यष्टिदेहसृष्टिं तेषु देवतानां भोगार्थं व्यष्टिरूपेण प्रवेशञ्च विवक्षुस्तदुपोद्घातत्वेन क्षुत्पिपासयोः सृष्टिं दर्शयति। ता एता इति॥ तच्छब्दार्थमाह। अग्न्यादय इति॥ एतच्छब्दार्थमाह। लोकपालत्वेनेति॥ अग्न्यादिसृष्ट्युपयोगित्वेनैतासां स्वरूपाज्ञानपूर्वकं संसारे ब्रह्माण्डरूपे पतिततत्वमासक्तत्वं तन्मात्रत्वाभिमानेन यद्बद्धत्वं तदाह। अस्मिन्निति॥ अर्णवसाडृश्यमाह। अविद्येत्यादिना॥ अविद्यादिप्रभवं दुःखमेव। दुःप्रवेशनगुर्वोनोदकमिवोदकं यस्मिन् तीव्ररोगादय एव भयङ्करत्वेन प्राहा नक्रादयस्तस्मिंस्तत्त्वज्ञानमन्तरेण विनाशाभावादनन्ते अज्ञानाद्युत्तरावध्यभावेनापारे विश्रामस्थानाभावेन निरालम्बे समीचीनविश्रामस्थानाभावेऽपि तदाभासोऽस्तीत्याह। विषयेन्द्रियेति ॥ विषयेन्द्रियसम्बन्धज-

मर्थत्याद्यात्मगुणपाथेयपूर्णज्ञानोडुपे सत्सङ्गसर्वत्याग-
मार्गे मोक्षतीरे एतस्मिन्महत्यर्णवे प्रायतन् पतितवन्तः।
तस्मादग्नादिदेवताप्यलक्षणापि या गतिर्व्याख्याता ज्ञान-
कर्मसमुच्चयानुष्ठानफलभूता सापि नालं संसारदुःखोप-
शमायेत्ययमत्र विवक्षितार्थः।

नितस्तुखलेशरूपो विश्रामो यस्मिन् पञ्चेन्द्रियाणामर्थेषु विषयेषु शब्दा-
दिषु या तृष्णा सा एव मारुतस्तत्कृतो यो विक्षोभस्तेनोत्थितान्यनर्थश-
तानि विषयसम्पादिता क्लेशास्त एवोर्म्मयो यस्मिन् महारौरवादय
एवानेके निरया नरकविशेषास्तत्कृतानां गर्भवासतच्छ्रमणबाल्यादयो
मरणान्ता ये ऽनेके निरया दुःखजनकत्वात्तत्कृतानाञ्च यानि हा हेत्या-
दीनि कूजितानि खल्वध्वनय आक्रोशनानि महाध्वनयः तदुद्भवो
महारवो यस्मिन्। महापातकाद्यनेकनिरयेति पाठे महापातकजन्या
निरया इति द्रष्टव्यम्। संसारार्णवस्यैवम्भूतत्वे तस्य तरणासम्भवान्मो-
क्षस्यानर्थक्याविवेकिनां तथात्वेऽपि विवेकिनां तत्तरणोपायोऽस्तीत्या-
ह। सत्येति॥ सत्यादयो ये आत्मगुणास्त एव पाथेयं पथ्यशनं तेन
पूर्णज्ञानमेवोडुपः प्लवो यस्मिन्। सत्सङ्गः सन्न्यासः तावेव मार्गौ
ज्ञानोडुपप्रवृत्तिहेतुर्यस्मिन् मोक्षे सति पुनः संसारार्णवस्यार्श-
भावात् स एव तीर्त्वा तीरं यस्मिन्नेतस्मिन् प्रत्यक्षसिद्धेऽर्णवे इत्यर्थः।
अत्र पतनं नाम स्वरूपाज्ञानेन संसारे अहमभिमानेन सक्तत्वम्। ननु
संसारार्णवपतितत्वं वक्ष्यमाणाशनायादियोग इत्यादि सर्वोऽपि बन्ध-
स्तदभिमानिनो जीवस्य वक्तव्यो न देवतानाम्। न च तासामपि तत्राभि-
मानोऽस्तीति तदुक्तमिति शङ्कनीयम्। तथापि प्राधान्यतोऽभिमानिनं
जीवं विहायाप्राधान्यतोऽभिमानिनीषु तदुक्तेरभिप्रायो वक्तव्य इत्यत
आह। तस्मादिति॥ यस्मात् संसारार्णवपतितत्वं तासां तस्मादित्यर्थः॥

प्राप्तंस्तमश्नायापिपासाभ्यामन्ववार्जत्। ता एन-

यत एवं तस्मादेवं विदित्वा परं ब्रह्मात्मात्मनः सर्वभूता-
नाञ्च यो वक्ष्यमाणविशेषणः प्रकृतश्च जगदुत्पत्तिस्थिति
संहारहेतुत्वेन सर्वसंसारदुःखोपशमनाय वेदितव्यस्त-
स्मादेष पन्थाः। एतत् कर्मैतब्ब्रह्मैतत् सत्यं यदेतत् पर-
ब्रह्मात्मज्ञानम्। नान्यः पन्था विद्यतेऽयनायेति मन्त्रव-
र्णात्। तं स्थानकरणादेवतोत्पत्तिबीजभूतं पुरुषं प्रथमो-

महारौरवाद्यनेकनिरयतिगरेवेति पाठे उक्तनिरयो गतिर्यथा दुःखोपशमाय नालं तथा सापि नालमिति पूर्वेणान्वयः॥ तद्विवक्षाया अपि प्रयोजनमाह। यत एवमिति॥ एवं विदित्वेति नालमिति विदित्वेत्यर्थः॥ आत्मनः सर्वभूतानाञ्चात्मा य आत्मा वा इदमित्यादिना जगदुत्पत्त्यादिहेतुत्वेन च यः प्रकृतः स परंब्रह्म वेदितव्य इत्यन्वयः। नन्वेष पन्थाः एतत्कर्मैतब्ब्रह्मैतत्सत्यमित्युपक्रम्योक्तमिति वा इत्यादिना कर्मसम्बन्धिसगुणब्रह्मात्मज्ञानस्यैवोक्तत्वात् तस्यैव मोक्षसाधनत्वं नोक्तकेवलात्मज्ञानमात्रस्येत्याशङ्क्याह एष पन्था इत्यादि ब्रह्मात्मज्ञानमेवोक्तं न कर्मसमुच्चितं ज्ञानम्॥ तस्योक्तवाक्येन संसारहेतुत्वावगमेन सत्यत्वायोगादित्याह। तस्मादेष पन्था इति॥ यस्मात् कर्मसहितस्य प्राणविज्ञानस्य संसारफलत्वं तस्मादेष इत्यनेन पदेन यद्ब्रह्मात्मविज्ञानं तदेवोक्तमित्यन्वयः। तमेव विदित्वातिमृत्युमेति। नान्यः पन्था विद्यतेऽयनायेत्यनेनापि केवलात्मज्ञानव्यतिरिक्तपथनिषेधादयुक्तमेव ज्ञानं पन्था इत्याह। नान्य इति॥ एष पन्था इति ब्रह्मात्मज्ञानमुपक्रम्य मध्ये प्राणविज्ञानोक्तिस्तु प्राणोपासनया चित्तैकाग्र्ये सति तत्फलाच्च वैराग्ये सति एष पन्था इत्युपक्रान्तं मुख्यं ज्ञानं वक्तुं शक्यमित्यभिप्रायेणेति भावः॥ यद्यप्येतद्वाक्यव्याख्यानावसरे कर्ममार्गोऽपि पथिशब्दार्थत्वेनोक्तस्तथापि ज्ञानमार्गोपायत्वेन स उक्तो न प्राधान्येनेति भावः। ननु पिण्डस्था-

मब्रुवन्नायतनं नः प्रजानीहि यस्मिन् प्रतिष्ठिता अन्नमदामेति ॥ १ ॥
ताभ्यो गामानयत्ता अब्रुवन्न वै नोऽयमलमिति।

त्मादितं पिण्डमात्मानमग्नायापिपासाभ्यामन्ववार्जदनुगमितवान् संयोजितवानित्यर्थः। तस्य कारणभूतस्याग्नायादिदोषवत्त्वात् तत्कार्यभूतानामपि देवतानामग्नायादिमत्त्वम्। तास्ततोऽग्नायापिपासाभ्यां पीड्यमाना एनं पितामहं स्रष्टारमब्रुवन्नुक्तवत्यः। आयतनमधिष्ठानं नोऽस्मभ्यं प्रजानीहि विधत्स्व। यस्मिन्नायतने प्रतिष्ठिताः समर्थाः सत्योऽन्नमदाम भक्षयाम इति ॥ १ ॥

एवमुक्त ईश्वरस्ताभ्यो देवताभ्यो गाङ्गवाक्षातिविशिष्टं पिण्डं ताभ्य एवाहृः पूर्ववत् पिण्डे समुद्धृत्य मूर्च्छयित्वा आनयत् दर्शितवान्। ताः पुनर्गवाक्षातिं दृष्ट्वाऽब्रुवन्। न वै

ग्नायादियोगे देवतानां कथं तद्वत्त्वं येन तासामन्नादनार्थमायतनप्रश्नः स्यात् यस्मिन् प्रतिष्ठिता इत्यनेनेत्यत आह। तस्येति॥ पितामहमिति स्वजनकपिण्डजनकमित्यर्थः। अधिष्ठानमिति शरीरमित्यर्थः॥ ननु विराड्देह एवायतनं वर्त्तते इत्याशङ्क्य तस्यातिप्रौढत्वात्तमापूर्य्य तत्र स्थातुं वयमसमर्थाः। अन्नञ्च तद्देहपर्य्याप्तं सम्पादयितुमसमर्थाः। अतोऽस्मद्योग्यं व्यष्टिदेहं सृजस्वेत्युक्तवत्य इत्याह। यस्मिन्निति॥ यद्यप्यस्मदादिव्यष्टिदेहं विनापि चरुपुरोडाशादिहविरदनमस्ति तथापि तदपि हविरदनं व्यष्टिदेवतादेहमन्तरा नास्तीति भावः॥ १॥

व्यष्टिदेहसृष्टिमाह। ताभ्य इति॥ मूर्च्छयित्वेति निर्विड़तया परस्परावयवसंयोजनेन स्थूलत्वर्थः। न योग्य इति॥ शरीरस्योपरिदन्ता-

ताभ्योऽश्वमानयत्ता अब्रुवन्न वै नोऽयमलमिति ॥ २ ॥

ताभ्यः पुरुषमानयत् ता अब्रुवन् सुकृतं वतेति पुरुषो वाव सुकृतम्। ता अब्रूवीद्यथायतनं प्रविशतेति ॥ ३ ॥

नोऽस्मदर्थमधिष्ठायान्नमत्तुमयम् पिण्डोऽलम्। न वै अलं पर्य्याप्तम्। नयोग्य इत्यर्थः। गवि प्रत्याख्याने तथैवाश्वमानयत्। ता अब्रुवन्न वै नोऽयमलमिति पूर्ववत् सर्वप्रत्याख्याने ॥ २ ॥

ताभ्यः पुरुषमानयत् स्वयोनिभूतम्। ताः स्वयोनिं पुरुषं दृष्ट्वाऽखिन्ना सत्यः सुकृतं शोभनमिदमधिष्ठानं वतेत्यब्रुवन्। तस्मात् पुरुषो वाव पुरुष एव सुकृतं सर्वपुण्यकर्महेतुत्वात्। स्वयं वा स्वेनैवात्मना स्वमायाभिः कृतत्वात्तत्सुकृतमुच्यते। ता देवता ईश्वरोऽब्रवीत्। इष्टमासामिदमधिष्ठानमिति मत्वा सर्वे हि स्वयोनिषु रमन्ते। अतो

भावेन दूर्वादिमूलस्योत्खातमशक्यत्वादित्यर्थः। अश्वमिति ॥ तस्योभयतो दन्तत्वेनोक्तदोषाभावादित्यर्थः। न वै नोऽयमलमित्यश्वस्यापि विवेकज्ञानाभावादयोग्यत्वादित्यर्थः॥ गवाश्वयज्ञस्य सर्वतिर्यग्देहोपलक्षकत्वादित्यभिप्रेत्योक्तम्। सर्वेति ॥ २ ॥

स्वयोनिभूतमिति ॥ स्वयोनिभूतं विराट्पुरुषदेहसजातीयमित्यर्थः॥ यस्मात् स्वकीयपरितोषद्योतकेन सुकृतं वतेत्यनेन शब्देन पुरुषदेहसुकृतत्वस्योक्तत्वात्सेदानीमपि सुकृतत्वमित्याह। तस्मादिति ॥ स्वयं वेति ईश्वरेण स्वेनैव कृतं भृत्यादिकृतापेक्षया सुकृतं सुष्ठु कृतमित्यर्थः। पृषोदरादित्वात् स्वयमिति स्याने सुशब्द इत्यर्थः॥ एवं व्यष्टिदेहसृष्टिसुकृ

अग्निर्वाग्भूत्वा मुखं प्राविशद्वायुः प्राणो भूत्वा नासिके प्राविशदादित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशद्दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन्नौषधिवनस्पतयो लोमानि भूत्वा त्वचं प्राविशंश्चन्द्रमा मनो भूत्वा हृदयं प्राविशन् मृत्युरपानो भूत्वा नाभिं प्राविशदापो रेतो भूत्वा शिश्नं प्राविशत् ॥ ४ ॥

यथाऽऽयतनं यस्य यद्दनादिक्रियायोग्यमायतनं तत्प्रविशतेति ॥ ३ ॥

तथाक्षित्यनुज्ञां प्रतिलभ्य ईश्वरस्य नगर्य्यामिव बलाधिकृताः । अग्निर्वागभिमानी वागेव भूत्वा स्वां योनिं मुखं प्राविशत्तथोक्तार्थमन्यत् । वायुर्नासिके । आदित्योऽक्षिणी । दिशः कर्णौ । औषधिवनस्पतयस्त्वचम् । चन्द्रमा हृदयम् । मृत्युर्नाभिम् । आपः शिश्नं प्राविशन् ॥ ४ ॥

तत्र करणानां देवतानाञ्च व्यष्टिरूपेण प्रवेशमाह । ता देवता इति ॥ इष्टत्वे हेतुमाह । सर्वे हीति ॥ आयतनमिति गोलकरूपस्थानमित्यर्थः ॥३॥

राज्ञोऽनुज्ञां प्रतिलभ्य बलाधिकृतादयः सेनापत्यादयो नगर्य्यां यथा प्रविशन्ति तद्वदीश्वरस्यानुज्ञां प्रतिलभ्याग्निः प्राविशदित्यन्वयः । यद्यपि वागभिमान्यग्निर्न तु वागेव तथापि तस्य वाचं विना प्रत्यक्षमनुपलब्धेः । तस्या अपि देवतां विना स्वविषयग्रहणसामर्थ्याभावात् तयोरेकलोलीभावेनाभेदोक्तिरित्याह ॥ वागेवेति ॥ यद्यपि देवतानामीश्वरेण प्रवेशश्चोदितस्तथापि करणैर्विना तासां साक्षाददनादिभोगासम्भवात् तेषामपि प्रवेशोऽर्थाच्चोदित एवेति तेषामपि स उक्तः ॥ ४ ॥

तमशनायापिपासे अब्रूतामावाभ्यामभिप्र-

एवं लब्धाधिष्ठानासु देवतासु निरधिष्ठाने सत्यावशनायापिपासे तमीश्वरमब्रूतासुक्तवत्यौ आवाभ्यामधिष्ठानमभिप्रजानीहि चिन्तय विधत्स्वेत्यर्थः। स ईश्वर एवमुक्तस्तेऽशनायापिपासेऽब्रवीत्। न हि युवयोर्भावरूपत्वाच्चेतनावद्दत्तेनाधिष्ठात्यान्नात्तृत्वं सम्भवति। तस्मादेतास्वेवाग्न्यादिषु देवतास्वध्यात्माधिदेवतासु वां युवां आभ-

---

अशनायापिपासयोरपि व्यष्टिदेहेऽपि कारणाधिष्ठातृदेवतासम्बन्धं वक्तुं तयोः प्रश्नमवतारयति। एवमिति॥ निरधिष्ठाने सत्यामिति कारणीभूते विराड्देहेऽधिष्ठानविशेषो यदि स्यादशनायापिपासयोरन्नाद्योनां मुखादय इव तदा व्यष्टिदेहेऽपि तदेव स्यात् तयोरधिष्ठानं तेषामिव न त्वेतदस्ति अतो निरधिष्ठाने ते इत्यर्थः। विधत्स्वेत्यनन्तरं यस्मिन् प्रतिष्ठिता अन्नमदामेति शेषः। तत्राधिष्ठानविशेषस्तावत् युवयोः कारणे समष्टिदेहेऽभावादिहापि नास्त्येव। कारणपूर्वकत्वात् कार्येष्वधिष्ठानं स्यात्। अदनन्तु युवयोर्धर्मरूपत्वाद्धर्मिणमनाश्रित्य धर्मस्य स्वातन्त्र्यायोगाच्चेतनावद्धर्मिभूतदेवतागतमेवाऽन्नादनं युवयोरित्याह। स ईश्वर इति॥ भावरूपत्वादिति धर्मरूपत्वादित्यर्थः। धर्मिणोऽप्यचेतनस्य भोक्तृत्वादशनाद्यचेतनावद्दत्तेत्युक्तम्। अध्यात्मेति॥ अध्यात्मदेवता व्यष्टिदेहगतदेवताः। अधिदैवतदेवताः समष्टिविराड्देहगता हविर्भुजोऽग्नादयः प्रसिद्धास्ताभित्यर्थः। दत्तेति भागैकदेशदानेनेत्यर्थः॥ एतदेव स्पष्टीकरोति। एतासु भागिन्याविति॥ साक्षाद्देवतासु भागवत्तायोगाद्देवतभागेन भागवत्त्वमंशवत्त्वमुक्तमिति व्याचष्टे। यदिति॥ यद्दैवत्यो यद्देवतासम्बन्धीयो भागः स्यात् तया देवतायाः सम्बन्धिना तेनैव भागेनेत्यर्थः। हविरादीत्यादिशब्देन तत्तदिन्द्रियविषयोऽपि गृह्यते। करोमीत्यनन्तरमुक्तेति शेषः॥ उक्तमर्थमिदानीमनन्यव्यवहारेण दृढीकर्तुं

जानीहीति। स ते अब्रवीदेतास्वेव वा देवता-
स्वाभजाम्येतासु भागिन्यौ करोमीति। तस्मा-

नामि दृष्टिसंविभागेनानुगृह्णामि। एतासु भागिन्यौ यद्देवत्यो यो भागो हविरादिलक्षणः स्यात् तस्यास्तेनैवभागेन भागिन्यौ भागवत्यौ वां करोमीति स्रुच्यादावीश्वर एवं व्यदधात् यस्मात्तस्मादिदानीमपि यस्यै कस्यै च देवतायै

तस्मादित्यादिवाक्यं तद्व्याचष्टे। यस्मादिति॥ यस्मात् स्रुच्यादावेवं व्यदधात् तस्मादित्यर्थः। हविर्ग्रहणमुपलक्षणं अधिदैवतं हविर्गृह्यते। अध्यात्मं देवतायै शब्दादिविषयो गृह्यत इति योज्यम्। भागिन्यावेवेति यद्यपि शब्दादिविषयेण हविषा चाग्न्यादिदेवतादृष्टौ तयोर्नाश एव दृश्यते न तु तद्भागेन भागित्वं तथापि तयोः सर्वात्मना नाशे पुनः कालान्तरे ते न स्याताम्। अतः स्वरूपेण स्थितयोरेव तयोः कदाचिदिन्द्रियदेवतानां विषयोन्मुखतया प्रेरकत्वरूपं कार्योन्मुखं कदाचित्तदभावरूपोपशान्तिरित्यभ्युपगन्तव्यम्। तथा च हविषा देवतादृष्टावशनायापिपासयोरपि दृष्टिरूपशान्तिर्दृश्यत इति तद्भागेन भागवत्त्वमुक्तमित्यर्थः। न च चक्षुरादिना रूपादिग्रहणदशायामशनायापिपासयोर्न शान्तिर्दृश्यते इति न सर्वत्र भागवत्त्वं तयोरिति शङ्क्यम्। क्षुत्पिपासार्त्तस्यान्नपानदर्शनश्रवणादिनाऽन्नपानप्राप्त्यासक्तिपरितोषेण मनसि तृष्णा शान्तेव भाति। न तु यथा पूर्वं बाधत इति चक्षुरादिष्वपि तयोर्भागवत्त्वमित्युक्तम्। सायणीयदीपिकायां वस्तुतस्त्वशनायापिपासाशब्देनेन्द्रियाणां स्वस्वविषयगोचरौ तृष्णाकामावुच्येते। अन्नमदामेत्यत्राप्यन्नादनं स्वस्वविषयग्रहणमेव चक्षुरादीन्द्रियदेवतानां सुख्यान्नादनासम्भवात्। तथाच रूपादिविषयग्रहणे तत्तद्विषयगोचरयोस्तयोः पृथक् दृष्टिर्दृश्यत इति वाच्यम्। इन्द्रियदेवतानां स्वस्वविषयोन्मुखतया प्रेरकत्वरूपकार्योन्मुख्यनिवृत्तिरूपोपशान्तिरेव पृथक् तयोस्तृप्ति-

यस्मै कस्मै च देवतायै हविर्गृह्यते भागिन्यावेवास्यामशनायापिपासे भवतः ॥ ५ ॥ इति द्वितीयः खण्डः ॥ २ ॥

स ईक्षतेमे नु लोकाश्च लोकपालाश्चान्नमेभ्यः सृजा इति ॥ १ ॥

अथाय हविर्गृह्यते चरुपुरोडाशादिलक्षणं भागिन्यौ एव भागवत्यावेवास्यां देवतायामशनायापिपासे भवतः ॥ ५ ॥ इति द्वितीयखण्डभाष्यम् ॥ २ ॥

स एवमीश्वर ईक्षत ऐक्षत । कथमिमे नु लोका लोकपालाश्च मया सृष्टा अशनायापिपासाभ्याञ्च संयोजिताः । अतो नैषां स्थितिरन्नमन्तरेण तस्मादन्नमेभ्यो लोकपालेभ्यः सृजै सृजे इत्येवं हि लोके ईश्वराणामनुग्रहे निग्रहे च स्वातन्त्र्यं दृष्टं स्वेषु तद्वन्महेश्वरस्यापि सर्वेश्वरत्वात् सर्वान् प्रति निग्रहानुग्रहे स्वातन्त्र्यमेव ॥ १ ॥

रस्तीत्युक्तत्वात् । यद्यप्यर्थवत्प्रवेशनमशनायापिपासादिमत्त्वं तद्विमित्तमन्नादनमित्यादि सर्वं कार्यकरणसङ्घातपञ्जराध्यक्षस्य जीवस्य भोक्तुरेव नेन्द्रियदेवताशनायापिपासादीनाम् । तथापि तस्य वस्तुतोऽभोक्तुब्रह्मभूतस्य स्वतो भोक्तृत्वाभोगादिन्द्रियदेवताद्युपाधिकृतमेव तस्य भोक्तृत्वादिसर्वसंसार इति वक्तुं तेष्वेव तमारोप्य स्तुत्योच्यत इति न दोषः ॥ ५ ॥ इति द्वितीय खण्ड भाष्यटीका ॥ २ ॥

एवं भोगसाधनसृष्टिमुक्त्वा भोग्यसृष्टिं वक्तुमारभते । स एवमिति ॥ सुशब्दोक्तं विवर्त्तकं सृष्टीकरोति । लोका इत्यादिना ॥ पूर्ववल्लोकपालप्रार्थनां विना स्वयमेवान्नं सृष्टं वितर्कितवानित्युक्तेः प्रयोजनमीश्वरत्वज्ञापनमित्याह । एवं हीति ॥ १ ॥

सोऽपोऽभ्यतपत् ताभ्योऽभितप्ताभ्यो मूर्त्तिर-
जायत । या वै सा मूर्त्तिरजायतान्न वै तत् ॥२॥
तदेतदभिसृष्टं नदत् पराङ्त्यजिघांसत् त-

स ईश्वरोऽन्नं सिसृक्षुरा एव पूर्व्वोक्ता अप उद्दि-
श्याभ्यतपत् ताभ्योऽभितप्ताभ्य उपादानभूताभ्यो मूर्त्तिर्घन-
रूपं धारणसमर्थं चराचरलक्षणमजायतोत्पन्नं अन्नं वै
तन्मूर्त्तिरूपं या वै सा मूर्त्तिरजायत तदेतदन्नम् ॥ २ ॥
लोकपालानामभिसुखोत्सृष्टं सत् यथा मूषकादिर्मार्जा-
रादिगोचरे सन् सम सत्युरन्नाद इति मत्वा परागञ्च-

अप इति पञ्च भूतानीत्यर्थः । सोऽभ्यतपदिति एतेभ्यो भूतेभ्यो
मनुष्यादीनामन्नभूता व्रीह्यादयो जायन्तां मार्जारादीनामन्नभूतानि
मूषकादीनि जायन्तामिति पर्य्यालोचनं सङ्कल्पं कृतवानित्यर्थः । मूर्त्ति-
शब्देन कठिनचरणादिमतो विधाने व्रीह्यादेरग्रहणं स्यादत आह ॥ घन-
रूपमिति । कठिनमित्यर्थः । नन्वमूर्त्तानामपि वायुचन्द्रकिरणादीना-
मपि सर्पादीनू प्रत्यन्नमस्तीति तत्सङ्ग्रहार्थमाह । धारणसमर्थञ्चेति ॥
शरीरधारणसमर्थमित्यर्थः । चरेति चरं मूषिकादि अचरं व्रीह्यादी-
त्यर्थः ॥ या वै सा मूर्त्तिरजायतान्नं वै तदिति पूर्वेणान्वयः ॥ तच्छब्दार्थ-
माह । मूर्त्तिरूपमिति ॥ शब्दादिभोक्तृत्वमिन्द्रियदेवतोपाधिकं न स्वत
आत्मन इत्यभिप्रायेण तेषां शब्दादिभोगसुद्दा इदानीमन्नपानभोक्तृत्व-
मन्नपानवृत्तिमत्प्राणोपाधिकं न स्वत आत्मन इत्यभिप्रायेण तस्या भो-
क्तृत्वं परिशेषाद्विधारयितुमाह । तदेतदिति ॥ २ ॥

सृष्टं सत्पराङ् सत् अजिघांसदित्यन्वयः ॥ पराङ्पदं व्युत्पादयति ।
परागञ्चतीति ॥ उक्तार्थे दृष्टान्तमाह । यथेति ॥ यथेत्यनन्तरं पराङ-
ञ्चति तद्दिति शेषः । अतिगन्तुमैच्छदिति ॥ यद्यपि व्रीह्याद्यचेतना-
नाञ्च नैवमिच्छा सम्भवति तथापि भोक्तृशरीरान्नं प्रविष्टं किन्तु वह्नि-

द्वाचा जिघृक्षत्तन्नाशक्नोद्वाचा ग्रहीतुम् । स यद्वै-
नद्वाचाऽग्रहैष्यदभिव्याहृत्य हैवान्नमचप्स्यत् ॥३॥
तत्प्राणेनाजिघृक्षत् तन्नाशक्नोत् प्राणेन ग्रहीतुम् ।
स यद्वैनत्प्राणेनाग्रहैष्यदभिप्राण्य हैवान्नमचप्स्यत्
॥४॥ तच्चक्षुषाऽजिघृक्षत् तन्नाशक्नोच्चक्षुषा ग्रहीतुम्
स यद्वैनच्चक्षुषाऽग्रहैष्यद्दृष्ट्वा हैवानमचप्स्यत्॥५॥
तच्छ्रोत्रेणाजिघृक्षत् तन्नाशक्नोच्छ्रोत्रेण ग्रहीतुम्। स
यद्वैतच्छ्रोत्रेणाग्रहैष्यच्छ्रुत्वा हैवान्नमचप्स्यत् ॥६॥

तीति पराङ् सदनृनतीत्याजिघांसदतिगन्तुमैच्छत्
पालयितुं प्रारभत इत्यर्थः। तदभिप्रायं मत्वा स लोक-
लोकपालसंघातैः कार्य्यकारणलक्षणः पिण्डः प्रथमज-
त्वादन्यांश्चान्नादवद्वाचा वदनक्रियया ग्रहीतुमुपादातुं स
प्रथमजः शरीरी यद्यदिहैतद्वाचाऽग्रहैष्यद्गृहीतवान् स्या-

रेव स्थितमित्यत्र तात्पर्यम् । कार्यकारणलक्षणः पिण्डस्तदर्थं वाचा
जिघृक्षदित्यन्वयः । नन्विदानीमिव प्रथममेवापानेनैवान्नजिघृक्षा तस्य
किमिति नासीदित्याशङ्क्य तस्येदानीन्तनशरीरापेक्षया प्रथमजत्वादिति
अस्मदाद्यपेक्षयेत्यर्थः । यस्मिन् प्रतिष्ठिता अस्मदादय इत्युपक्रान्तस्य व्यष्ट-
शरीरस्य समष्टिपिण्डापेक्षया प्रथमजत्वाभावादप्यस्यान्न जानन्नित्यर्थः॥
वदनक्रियया प्रथमजस्य पिण्डस्य कारणस्यान्नग्रहणासामर्थ्यं कार्य-
गतासामर्थ्येन ततः दूढयति । स प्रथमज इति॥ अत्र प्रथममन्नमेवं
गृहीतवान् स्यादित्यत्र कर्मत्वेन सम्बध्यते । तत्कार्यभूतत्वादिति तदन-
न्तरभूतत्वादित्यर्थः । इदानीन्तनशरीरस्य पूर्वकालीनव्यष्टिशरीरका-

तत्त्ववाजिघृक्षत् तन्नाशक्नोत् त्वचा ग्रहीतुम्। स यद्वैनत् त्वचाऽग्रहैष्यत् स्पृष्ट्वा हैवान्नमत्तप्रत् ॥ ७ ॥ तन्मनसाऽजिघृक्षत् तन्नाशक्नोन्मनसा ग्रहीतुम्। स यद्वैनन्मनसाग्रहैष्यद्ध्यात्वा हैवान्नमवप्स्यत् ॥ ८ ॥ तच्छ्मश्रेनाजिघृक्षत् तन्नाशक्नोच्छ्मश्रेन ग्रहीतुम्। स यद्वैनच्छ्मश्रेनाग्रहैष्यद्विसृज्य हैवान्नमचप्स्यत् ॥ ९ ॥ तदपानेनाजिघृक्षत् तदा वयत्। स एषोऽन्नस्य ग्रहो यद्वायुरन्नायुर्वा एष यद्वायुः ॥ १० ॥

त्मर्वोऽपि लोकस्तत्कार्यभूतत्वादन्नमभिव्याहृत्यैवान्नप्स्यत् त्मृत्योऽभविष्यत् ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

न चैतदस्यतो नाशक्नोत् पूर्वजोऽपि वाचा ग्रहीतुमित्यवगच्छामः पूर्वेण समानमुत्तरं तत्प्राणेन तञ्जुषा तच्छ्रोत्रेण तत्त्वचा तन्मनसा तच्छ्मश्रेन तेन करणव्यापारेणान्न ग्रहीतुमशक्नुवन् पश्चादपानेन वायुना मुखच्छिद्रेण तदन्नमजिघृक्षत् तदा वयन्तदन्नमेवं जग्राहाशितवान्। तेन स एषो न वायुरन्नस्य ग्रहोऽन्नग्राहक इत्येतत्। यद्वायुर्वो

र्थत्वाभावादिति अभिव्याहृत्येति वाचकशब्देनाभिधायेत्यर्थः। पूर्वजोऽपीत्यस्य नाशक्नोदिति पूर्वेणान्वयः ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

प्राणेन प्राणेनाभिप्राणताप्रायेत्यर्थः। आपानेनेति मुखच्छिद्रेणा नर्गच्छता वायुनेत्यर्थः। अन्नात्तृत्वमपि श्वसनवृत्तिमतः प्राणस्य धर्मो नात्मनः स्वत इत्येतत्। तदेतत् कृष्टं पराङ्त्यादिनोक्तम् ॥ अस्य सन्दर्भस्य प्रयोजनमुपसंहरति। तेन स एष इति ॥ येन कारणेनापानेनान्नमशितवान् तेनेत्यर्थः। अपानवृत्तिमतः प्राणस्यान्नग्राहकत्व-

स ईक्षत कथं न्विदं महते स्यादिति स

वायुः अन्नायुरन्नबन्धनोऽन्नजीवनो वै प्रसिद्ध्यै स एष यो वायुः ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

स एवं लोकलोकपालसङ्घातस्थितिमन्ननिमित्तां कृत्वा पुरपौरतत्पालचित्तस्थितिसमां स्वामीव ईक्षत। कथं नु केन प्रकारेणेति वितर्कयन्निदं महते मामन्तरेण पुरस्वामिनम्। यदिदं कार्य्यकारणसङ्घातं कार्य्यं वक्ष्यमानं कथं नु खलु मामन्तरेण स्यात् परार्थं सत् यदि वाचाऽभिव्याहृतमित्यादि केवलमेव वाग्व्यवहरणादि

प्रसिद्ध्या द्रढीकर्त्तुमन्नायुरिति वाक्यं व्याचष्टे। अन्नायुरिति॥ अन्नमदामेत्यादिश्रुत्यन्तरे प्राणस्यान्नायुत्वं प्रसिद्धमित्यर्थः॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

एवं भोगाधिकरणभूतानां लोकानां भोगायतनस्य समष्टिव्यष्टिशरीरस्य भोगोपकरणानां वागादीनां समष्टिशरीरे लोकपालत्वेन व्यष्टिशरीरे करणाधिष्ठातृत्वेन च स्थितानां देवतानां भोगे प्रेरकयोरन्नादापिपासयोस्तत्प्रयुक्तस्य करणनिविष्टस्य शब्दादिविषयग्रहणलक्षणस्य भोगस्याप्यन्नवृत्तिमत् प्राणनिष्ठस्यान्नपानग्रहणलक्षणस्य च भोगस्यात्मनः संसारित्वसिध्यर्थं सृष्टिमभिधायेदानीं संसारिणां भोक्तारं दर्शयितुं स्रष्टुरीश्वरस्य विचारांशं दर्शयितुं स ईक्षतेति वाक्यं व्याचष्टे। स एवमिति॥ परस्य पौराणां पुरवासिनां तत्पालयितॄणां राजनियुक्ताधिकारिणां स्थितिसमां तत्तुल्यामन्ननिमित्तां अन्नाधीनां सङ्घातस्थितिं कृत्वेत्यन्वयः॥ कृत्वेत्युपलक्षणं लोकादीनां सृष्ट्वेत्यपि द्रष्टव्यम्॥ पदार्थानुक्त्वा वाक्यार्थमाह। यदिदमिति॥ वक्ष्यमाणमिति वाचाभिव्याहृतमित्यादिना॥ वक्ष्यमाणमभिव्याहरणादिकमित्यर्थः। हेतुगर्भितमिदं शब्दार्थस्य विशेषणं परार्थं सदिति परार्थत्वात् परार्थिनं याचते कथं स्यादित्यस्यैवार्थस्य कथं शब्दस्य चितं व्यतिरेकमाह। यदीति॥

ईक्षत कतरेण प्रपद्या इति। स ईक्षत यदि

तन्निरर्थकं न कथञ्चन भवेत्। वलिस्तुत्यादिवत् पौरवन्द्यादिभिः प्रयुज्यमानं स्वार्थ्यं सत्तत्स्वामिनमन्तरेणास्त्येव स्वामिनि तद्वत्। तस्मान्मया परेण स्वामिनाधिष्ठाता कृताकृतफलसाक्षिभूतेनभोक्ता भवितव्यं पुरस्येव राज्ञा। यदि नामैतत्संहतकार्यस्य परार्थत्वं परार्थिनञ्चेतनमन्तरेण भवेत् पुरपौरकार्यमिव तत्स्वामिनमन्तरे

केवलं भोक्तृरहितव्याहरणादि यत्तन्न कथञ्चन भवेत् कथञ्चिदपि न भवेदित्यन्वयः। तत्र हेतुर्निरर्थकमिति अर्थयत इत्यर्थः। पचाद्यच्। अर्थयिता पुरुषस्तद्रहितमित्यर्थः। अर्थयिता हि पुरुषः स्वस्य प्रयोजनसिध्यर्थं वागादिकं प्रेरयति। तदभावप्रेरकाभावाद्वागव्यवहारादिकं न भवेदित्यर्थः। यद्वा अर्थः प्रयोजनमर्थिनोऽभावे तस्यार्थत्वाभावान्निष्प्रयोजनं सत् तन्न भवेत्। प्रयोजनप्रयुक्तत्वात् सर्वप्रवृत्तेरिति। तत्र दृष्टान्तो वलिस्तुत्यादिवदिति॥ एतदेव विवृणोति। पौरेति॥ अत्र यथाशब्दो द्रष्टव्यः। यथा पौरादिभिः प्रयुज्यमानं वलिस्तुत्यादिकं स्वामिनमन्तरेण न भवेत् तद्वदित्यन्वयः। स्वामिनमन्तरेणेत्यस्य व्याख्यानमस्त्येवेति॥ विचारस्य फलमाह। तस्मादिति॥ परेणार्थादन्येन स्वामिना अर्थिना वागादिव्यवहारकृतोपकारभाजा अधिष्ठाता वागादिप्रेरणं अधिष्ठातृत्वञ्चायस्कान्तवच्चेतनस्य सन्निधानमात्रमेव साक्षितया न व्यापार इत्याह। कृतेति॥ कृताकृतयोस्तत्फलस्य चेत्यर्थः। फलसाक्षित्वमेव भोक्तृत्वमपीत्याह। भोक्तेति। राज्ञेत्यस्येति पदाध्याहारेणेति ईक्षतेति पूर्वेणान्वयः। एवं वाग्व्यवहरणादिकार्यसिध्यर्थं मया प्रवेष्टव्यमित्युक्त्वाऽऽत्मस्वरूपबोधार्थञ्च मया प्रवेष्टव्यमिति वक्तुं स ईक्षत यदि वाचाभिव्याहृतमित्याद्यथ कोऽहमित्यन्तं वाक्यं तत्प्रवेशप्रयोजनकथनार्थत्वेन कथं त्विदमिति वाक्यतुल्यत्वात् स ईक्षत कतरेणेति वाक्येन व्यवहितमपीदंवाक्यस्य व्याचष्टे। यदि नामेति॥ संहतस्य वागादि-

वाचाभिव्याहृतं यदि प्राणेनाभिप्राणितं यदि चक्षुषा दृष्टं यदि श्रोत्रेण श्रुतं यदि त्वचा स्पृष्टं

णाथ कोऽहं किंस्वरूपः कस्य वा स्वामी यद्यहं कार्यकारणसङ्घातमनुप्रविश्य वागाद्यभिव्याहृतादिफलं नोपलभेयम्। राजेव पुरमाविश्याधिकृतपुरुषकृताकृतावेक्षणम् । न कश्चिन्ममयं सन्वेवंरूपश्चेत्यधिगच्छेदिचारयेत् । विपर्य्यये तु योऽयं वागाद्यभिव्याहृतादीदमिति वेद स सन्निति ससंवेदनरूपश्चेत्यधिगन्तव्योऽहं स्यां यदर्थमिदं संहतानां वागादीनामभिव्याहृतादि । यथा स्नग्भकुड्यादीनां प्रासादिसंहतानां स्वावयवैरसंहतपरार्थत्वं तद्वदित्येवमीक्षि-

लक्षणस्य कार्यस्य परार्थत्वं परोपकाररूपाभिव्याहरणादिकारित्वं परार्थिनस्तदुपकारभाजमन्तरेण भवेदित्यर्थः। अनेन यदि वाचैव केवलयाभिव्याहृतं भवेदित्येवकाराध्याहारेण वाक्यं योजितम्। एवमुत्तरत्रापि यदि प्राणेनैवाभिप्राणितं भवेदित्यादि द्रष्टव्यम्। अभिप्राणितमाघ्रातं अभ्यवनितं अन्तर्गतं भक्षितमित्यर्थः॥ उक्तमेव वाक्यार्थं स्पष्टीकरोति। यद्यहमित्यादिना॥ अयं सन्निति अयमात्माऽस्ति स एवं रूपश्चेति नाधिगच्छदित्यर्थः। अप्रवेशे स्वस्याधिगमो न स्यादित्युक्त्वा प्रवेशे तु सोऽस्तीति प्रवेशफलमाह। विपर्य्यये त्विति॥ प्रविश्य अभिव्याहृताद्युपलम्भे त्वित्यर्थः। वेदनरूपः सन्वेत्यधिगन्तव्योऽहं स्यामित्यन्वयः॥ वेदनरूपत्वमुपपादयति। योऽयमिति॥ योऽयं वागाद्यभिव्याहृतादि वेद स वेदनरूप इत्यधिगन्तव्यः स्यामित्यन्वयः। न च वेदितुः कथं वेदनरूपत्वमिति वाच्यम्। वेदितुरवेदनरूपत्वे तस्य वेदनान्तरकर्मत्वं वाच्यम् । तस्मिन् वेदने वेदितैव कर्त्ता चेदेकस्मिन् वेदितरि कर्तृत्वं कर्मत्वञ्च विरुद्धं प्रसज्येत। अन्यो वेदिता कर्त्ता चेत् तस्याप्यन्यो वेदितेत्यनवस्था स्यादिति वेदितुवेदनरूपत्वं सिध्यति अत एव श्रुत्यन्तरे यो वेदेदं जिघ्राणीति। स आत्मेति घ्रातव्येघ्राणवेदनस्यात्मत्व-

यदि मनसा ध्यातं यद्यपानेनाभ्यपानितं यदि शिश्नेन विसृष्टमथ कोऽहमिति ॥ ११ ॥

त्वाऽतः कतरेण प्रपद्या इति । प्रपदश्च मूर्द्धा चास्य सङ्घातस्य प्रवेशमार्गावनयोः कतरेण मार्गेणेदं कार्यकारणसङ्घातलक्षणं पुरं प्रपद्यै प्रपद्येयमित्येवमीक्षित्वा न तावन्मङ्क्ष्यमाणस्य मम सर्वार्थाधिकृतस्य प्रवेशमार्गप्रपदाभ्यामधःप्रपद्ये किन्तर्हि पारिशेष्यादस्य मूर्द्धानं विदार्य प्रपद्येयमिति ॥ ११ ॥

सङ्घमिति भावः ॥ तस्य वेदनरूपत्वे प्रमाणसङ्घाऽस्तित्वे प्रमाणमाह । यदर्थमिति ॥ संहतानां वागादीनामभिव्याहृतादि यदर्थं सोऽन्यो वागादिभिरसंहतः संघेदधिगन्तव्य इति पूर्वेणान्वयः ॥ संहतानामसंहतपरार्थत्वे दृष्टान्तमाह । यथेति एतदुक्तं भवति । वागाद्यभिव्याहृतादि खासंहतपरार्थं भवितुमर्हति संहतत्वात् कुड्यादिवत्प्रासादादिवच्चेतिदृदित्यनन्तरं स्मृतिगतं स ईक्षतेति पदं द्रष्टव्यम् । भाष्ये तु खदृष्टया त्यक्तुं प्रयोजनद्वयवशात् प्रवेशस्य कर्त्तव्यत्वे सिद्धे प्रवेशद्वारस्य विचारस्यावसर इति ॥ इदानीं स ईक्षत कतरेणेति वाक्यं व्याचष्टे एवमीक्षित्वेति ॥ अत इति यतः प्रवेशस्य वागादिव्यवहारसिद्धिर्मत्स्वरूपबोधस्चेति प्रयोजनद्वयसिद्ध्यर्थं कर्त्तव्यत्वमत इत्यर्थः । अन्तरिति पाठे शरीरस्यान्तः प्रपद्ये इत्यन्वयः ॥ कतरेणेति पदं गृहीत्वा तद्व्याख्यातुं मार्गद्वयं दर्शयति । प्रपदश्चेति ॥ इदानीं गृहीतं पदं व्याख्याति ॥ अनयोः कतरेणेति ॥ प्रपद्य इत्यनन्तरं श्रौतं स ईक्षतेति पदं द्रष्टव्यम् । अनन्तरं स ईक्षत यदि वाचेत्यादिवाक्यं पूर्वमेव व्याख्यातमिति तदुत्तरं स एतमेव सीमानमिति वाक्यं व्याख्यातुं तदपेक्षितमाह । एवमीक्षित्वेति ॥ पर्यालोचेत्यर्थः । भृत्यस्य प्रवेशमार्गेण स्वामिनः प्रवेशोऽनुचित इत्यनेनैव मार्गेण प्रवेशं निश्चितवानित्याह । न तावदिति ॥ अक्ष्णेति मिषदक्ष्णेत्यर्थः । प्रपद्येयमित्यनन्तरं निश्चित्येति शेषः ॥ ११ ॥

स एतमेव सीमानं विदार्य्यैतया द्वारा प्रा-

लोक इवेच्छितकारी य ईश्वरः स्रष्टा एतमेव मूर्द्ध-सीमानं केशविभागावसानं विदार्य्य छिद्रं कृत्वा एतया द्वारा मार्गेणेमं लोकं कार्य्यकारणसङ्घातं प्रापद्यत प्रविवेश। सेयं हि प्रसिद्धा द्वाः। मूर्द्धनि तैलादिधारणकाले तद्दुःखादिसंवेदनात् सैषा विदृतिर्विदारितत्वाद्विदृतिर्नाम प्रसिद्धा द्वाः। इतराणि तु श्रोत्रादिद्वाराणि भृत्यादिस्थानीयसाधारणमार्गत्वान्न सम्भूयीनि नानन्दहेतूनि इदन्तु द्वारं परमेश्वरस्यैव केवलस्येति। तदेतन्नान्दनं नन्दनमेव नान्दनमिति दैर्घ्यं छान्दसं। नन्दत्यनेन द्वारेण गत्वा परस्मिन् ब्रह्मणीति तस्यैव स्रष्टा प्रविष्टस्य जीवेना-

---

एवमपेक्षितमुक्त्वा स एतमिति वाक्यं व्याचष्टे। लोक इवेति॥ एवमीक्षित्वा मूर्द्धानं विदार्य्य प्रपद्येयमिति निश्चित्येमं सङ्घातं प्रापद्यत इत्यन्वयः। ननु नव वै पुरुषे प्राणाः। सप्त वै शीर्षण्याः प्राणाः। द्वावर्वाञ्चौ नवद्वारे पुरे देहीत्यादिषु द्वारनवकं प्रसिद्धं न तु मूर्द्धनि द्वारान्तरमित्याशङ्क्याप्रत्यक्षतस्तयोर्द्वाभावन्नश्रुतत्वमेतीति श्रुतितश्च तस्य प्रसिद्धेर्नैवमिति वक्तुं सैषेति वाक्यम्। तद्व्याचष्टे। सेयमिति॥ प्रत्यक्षतः प्रसिद्धिं सैषेति पदाभ्यां दर्शयति। मूर्द्धनीति॥ मूर्द्धनि चिरं विषदुःखतैलादिधारणकाले तिक्तादितदुःखसंवेदनं दृश्यत इति सा द्वाः प्रत्यक्षतः प्रसिद्धेत्यर्थः। न केवलं द्वारः प्रत्यक्षत एव प्रसिद्धिः किन्तु तस्या विदृतिरिति नाम्नापि सिद्धिरित्याह। विदृतिरिति॥ अनेनेश्वरेण स्वप्रवेशार्थमसाधारणतया विदारितत्वान्न भृत्यस्थानीयचक्षुरादिप्रवेशद्वारैः सह नव वै पुरुषे प्राणा इत्यादि पूर्व्वोक्तश्रुतिषु परिगणितमित्युक्तम्। श्रौतप्रसिद्धिं वक्तुं तदेतन्नान्दनमिति वाक्यं तत्रैव देवनान्दनं नान्यानीत्युक्तमिति कृत्वा व्याचष्टे। इतराणि त्विति॥ सह-

पद्यत । सैषा विदृतिर्नाम द्वास्तदेतन्नान्दनं

त्मना राज्ञ इव स्वं पुरम् । त्रय आवसथा जागरितकाले । इन्द्रियस्थानं दक्षिणं चक्षुः । स्वप्नकालेऽन्तर्मनः सुषुप्तकाले हृदयाकाशमित्येतद्ब्रह्ममाणा वा त्रय आवसथाः । पितृशरीरं मातृगर्भाशयः स्वश्च शरीरमिति । त्रयः स्वप्नाः जाग्रत्स्वप्नसुषुप्ताख्याः । ननु जागरितं प्रबो-

---

द्वीनीति । सम्यग्दृष्टिरानन्दो येषु तानीति विग्रहः । हेतुशब्दं भावप्रधानं स्वीकृत्यानन्दम् प्रति हेतुत्वे येषामिति बहुव्रीहिणा हेतुर्नेति नपुंसकत्वं द्रष्टव्यम् । नन्दत्यनेन द्वारेण गत्वेत्यनेन तयोर्द्वयोर्यत्नसृतत्वमेतीति श्रुतौ प्रसिद्धिर्दर्शिता ॥ ईश्वरस्यैवं प्रवेशसङ्गा तस्यैव पूर्वोक्तकार्यकारणसङ्घातोपाधिकसंसारमाह । तस्येति एवं पुरं सृष्ट्वा जीवेनात्मना प्रविष्टस्य तस्य राज्ञ इव त्रय आवसथाः क्रीडास्थानानीत्यन्वयः । तान्येवाह । जागरितेति ॥ चक्षुरिति चक्षुर्गोलकमित्यर्थः । मन इति मनसोऽधिकरणं कण्ठस्थानमित्यर्थः । कण्ठे स्वप्नं समादिधेदिति श्रुतेः । हृदयाकाश इति हृदयावच्छिन्नभूताकाश इत्यर्थः । यद्यपि ब्रह्मण्येव सुषुप्तौ जीवो वर्त्तते सता सौम्य तदा सम्पन्न इति श्रुतेस्तथापि ब्रह्मणोऽपि हृदयाकाशेऽवस्थानात्तत्सम्पन्नोऽपि तत्रैव वर्त्तत इति तथोक्तम् । अन्यथा हृदयाकाशशब्देनैव दहराधिकरणन्यायेन ब्रह्माभिधानेन तस्य त्रयः स्वप्ना इति वक्ष्यमाणस्वप्नतुल्यत्वानुपपत्तिरित्यत एव पक्षान्तरमाह । वक्ष्यमाणा वेति ॥ तानेवाह । पितृशरीरमिति ॥ नन्वात्मा वा इदमेक एवेत्यद्वितीयत्वेनोक्तस्य कथमवसथानां योग इत्याशङ्क्यावसथानां मृषात्वाच्च पारमार्थिकाद्वितीयत्वायोग इति वक्तुं त्रयः स्वप्ना इत्युक्तं तद्व्याचष्टे॥ त्रयः स्वप्ना इति ॥ स्वप्नतुल्या इत्यर्थः । जाग्रदित्युपलक्षणं पित्रादिशरीरत्रयस्येत्यपि द्रष्टव्यम् । तेषां स्वप्नतुल्यत्वं नास्तीति शङ्कते । नन्विति ॥ अत्रापि शरीर त्रयमुपलक्षितं तत्प्रतिबोधस्य स्वप्नप्रबोधतुल्यत्वात् स्वप्नत्वमेवेत्याह । नैवमिति ॥

तस्य चय आवसथास्त्रयः स्वप्ना अयमावसथोऽय-
मावसथोऽयमावसथ इति ॥ १२ ॥

स जातो भूतान्यभिव्यैच्चत् किमिहान्यं वाव-

धरूपवान्न स्वप्नो नैवं स्वप्न एव। कथं परमार्थस्वात्म-
प्रबोधाभावात् स्वप्नवदसद्वस्तुत्वदर्शनाच्च। अयमेवावसथश्च-
क्षुर्दक्षिणं प्रथमः। मन आन्तरं द्वितीयः। हृदयाकाश-
स्तृतीयः। अयमावसथ इत्युक्तानुकीर्त्तनमेव ॥ १२ ॥

तेषु ह्ययमावसथेषु पर्य्यायेणात्मभावेन। वर्त्तमानो
विद्यया दीर्घकालं गाढं प्रसुप्तः स्वाभाविक्या न प्रबुध्यते।
अनेकशतसहस्रानर्थसन्निपातजदुःखं मुह्यंश्च रभिघातानु-

तथाप्रसिद्धिर्नास्तीति यद्भते। कथमिति ॥ अविवेकिनां तथा प्रसिद्ध्यभा-
वेऽपि विवेकिनां तल्लक्षणत्वात्तथाप्रसिद्धिरस्तीत्याह परमार्थेति ॥
वस्तुतत्त्वतिरोधानेनासद्वस्तुप्रतिभासः। स्वप्न इति लक्षणं जागरितमपि
तथाभूतमेव। ब्रह्मस्वरूपतिरोधानादविद्यमानजगत्प्रतीतेश्चेत्यर्थः। आ-
न्तरं यन्मनस्तत् द्वितीय आवसथ इत्यन्वयः ॥ अयमावसथ इत्यादिना-
ऽर्थान्तरं नोच्यते। प्रासादभूमिकावदुपर्य्यधोभावेन स्थित एव चक्षुरादि-
योऽङ्गुल्या निर्दिश्य प्रदर्श्यन्ते बाह्यावसथत्वात्तिरस्कारणायेत्याह।
अयमावसथ इति ॥ उक्तानुकीर्त्तनमेवेति ॥ १२ ॥

नन्वावसथशब्दस्य गृहविशेषवाचिनः कथमक्ष्यादिषु प्रयोग इत्या-
शङ्क्यावसथस्थैवैषु स्थितस्य दीर्घनिद्रादर्शनात्तेषु सुखसुप्तस्येव गौण-
प्रबोधदर्शनात् गौण्या इत्याऽऽवसथत्वमाह। तेषु ह्ययमिति॥ स्वाभाविक्या
विद्ययेत्यन्वयः। अनुभवैरित्यनन्तरमित्येते आवसथा इत्युच्यन्ते।
इति शेषः। ननु जागरितादिकं भूतकार्यस्य कार्यकरणसङ्घातस्य
धर्मो न त्वात्मनः। तद्विशिष्टस्यापि तत्संसादात्याभिमानात्तद्धर्मवत्त्व-
मिति वक्तुं स जात इति वाक्यं तद्व्याचष्टे। स जात इति ॥ भूतान्ये-

दिषदिति । स एतमेव पुरुषं ब्रह्म ततममपश्य-दिदमदर्शमिति ॥ १३ ॥

भवैरपि स कदाचित् परमकारुणिकेनाचार्येणात्मज्ञा-नप्रबोधकृच्छब्दकर्थ्यां वेदान्तमहाभेर्य्यां तत्कर्णमूले ताड्यमा-नायाम् स एतमेव सृष्ट्यादिकर्तृत्वेन प्रकृतं पुरुषं पुरि श-यानमात्मानं ब्रह्म बृहत्तमं अन्ततकारेणैकेन लुप्तेन तत-तमं व्याप्ततमं परिपूर्णमाकाशवत् प्रबुध्यत अपश्यत् । कथ-

---

वभिमुख्येन तादात्म्येन व्याकरोत् व्यक्तं ज्ञातवानुक्तवांश्च । मनुष्योऽहं काणोऽहं सुख्यहमित्यादिप्रकारेणेत्यर्थः । तथा च श्रुत्यन्तरम् । अनेन जीवे-नात्मनानुप्रविश्य नामरूपे व्याकरवाणीति । ननु व्यतिरिक्तात्मज्ञाने सति कथमुक्तादात्म्यभ्रम इत्याशङ्क्याह श्रुतिः । किमिहान्यमिति ॥ इहा-स्मिन् शरीरेऽन्यं व्यतिरिक्तमात्मानं वावदिषत् किमिति काक्षा नोक्तवा-नित्यर्थः । न ज्ञातवानित्यपि द्रष्टव्यम् । इति शब्दो यस्मादित्यर्थे । यस्मादेवं तस्मादभिव्यैक्यादित्यध्यारोपः प्रकरणसमाप्त्यर्थो वा । इदं वाक्यं भाष्यकारैः स्वस्वत्वादुपेक्षितं लेखकदोषात् पतितं वा । एवमध्यारोपं प्रदर्श्य तस्यापवादार्थं स एतमित्यादिवाक्यं व्याचष्टे । स कदाचिदित्यादिना ॥ यद्वा स जात इत्यादिरपवादः । तस्मिन् पक्षे एवं योजना । भूतानि व्याकरोत् विचिन्याकरोत् । किमेषां स्वतः सत्तास्ति न वेति विचारितवानि-त्यर्थः । विचार्यं च किमन्यमात्मव्यतिरिक्तं स्वतः सत्ताकं वावदिषद्वदि-ष्यामि न किञ्चिदप्यात्मव्यतिरिक्तं वक्तुं शक्नोमीति निश्चितवानित्यर्थः ॥ एवं पदार्थशोधनवतो वाक्यार्थज्ञानमाह । स एतमिति ॥ आचार्यवान् पुरुषो वेदेति श्रुतेः ॥ तेन विना स्वतो वाक्यार्थज्ञानं न सम्भवतीत्य-भिप्रेत्याह । परमिति ॥ वेदान्तेति ॥ उपनिषत्कायस्य समुदायस्य भेरीस्थानत्वं तद्वतानां तत्त्वमसीत्यादिवाक्यानां प्रबोधजनकशब्दत्वमिति ज्ञेयम् । पुरि शयनमिति मूर्द्धन्या द्वारा प्रविष्टेति शेषः । लुप्तेनेति

तस्मादिदन्द्रो नामेदन्द्रो ह वै नाम तमिदन्द्रं सन्तमिन्द्रमित्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः। परोक्षप्रिया इव हि देवाः ॥१४॥ इति तृतीयः खण्डः ॥ ३ ॥ इत्यैतरेये द्वितीये आरण्यके चतुर्थोऽध्यायः ॥ उपनिषत्सु प्रथमोऽध्यायः ॥ १ ॥ ॐ तत् सत् ॥

मिदं ब्रह्म ममात्मनः स्वरूपमदर्शं दृष्टवानस्मि। अहो इति विचारणार्था श्रुतिः यस्मादिदमित्येव। यस्माच्चादपरोक्षाद्ब्रह्म सर्वान्तरमपश्यन्नपरोक्षेण ॥ १३ ॥

तस्मादिदं पश्यतीति इदन्द्रो नाम परमात्मा। इदन्द्रो ह वै नाम प्रसिद्धो लोक ईश्वरः। तमेवं इदन्द्रम्। इमि परोक्षाभिधानेनाचक्षते ब्रह्मविदः संव्यवहारार्थं पूज्यतमत्वात् प्रत्यक्षनामग्रहणभयात्। तथा हि परोक्ष-

---

तेन सहेत्यर्थः ॥ किं परोक्षतया ज्ञातमिति पृच्छति। कथमिति ॥ तस्य ज्ञातप्रख्यापकेन वाक्येन तस्यापरोक्षत्वमाह। इदमिति ॥ इतीति श्रुतेरर्थमाह। अहो इति। विचारणापूर्वमिति विचारणार्था श्रुतेर्विहितत्वात्। श्रुत्या सम्यग्ब्रह्मज्ञातं न वेति विचार्य सम्यग्ज्ञातमिति निश्चित्याहो इति खस्य ज्ञातार्थत्वं प्रख्यापितवानित्यर्थः ॥ १३ ॥

तस्येदन्द्रनामप्रसिद्ध्यापि तस्य ज्ञानस्याऽपरोक्षत्वमिति वक्तुं तस्मादिदन्द्र इति वाक्यम्। तद्व्याचष्टे। यस्मादिति ॥ यस्मात् सर्वान्तरं ब्रह्म इदमित्यपरोक्षं प्रत्यगात्मत्वेनाऽपश्यदित्यन्वयः ॥ कथमिन्द्रनामत्वमत आह। इदन्द्रो ह वा इति ॥ ननिन्द्रो मायाभिरित्यादाविन्द्रप्रसिद्धेर्न त्विदन्द्र इत्यत आह। तमेवमिति ॥ इदन्द्रस्यैव खतः परोक्षत्वार्थं अक्षरच्छोपेनेन्द्र इत्याऽऽदरित्यर्थः ॥ परोक्षोक्तेः प्रयोजनमाह। पूज्येति ॥

प्रियाः परोक्षनामग्रहणप्रिया इव ह्येव हि यस्माद्देवाः। किमु सर्व्वदेवामपि देवो महेश्वरः। द्विर्व्वचनं प्रकृता ध्यायपरिसमाप्त्यर्थम्॥ इत्यैतरेयोपनिषद्भाष्ये प्रथमोऽध्यायः॥१॥ ॐ तत्सत्॥

अस्मिन्नध्याये एष वाक्यार्थः। जगदुत्पत्तिस्थितिलयकृदसंसारी सर्वज्ञः सर्वशक्तिः सर्ववित्सर्वमिदं जगत् स्वतोऽन्यद्वस्त्वन्तरमनुपादायैवाकाशादिक्रमेण सृष्ट्वा स्वात्मप्रबोधनार्थं सर्व्वाणि च प्राणादिमच्छरीराणि स्वयं प्रविवेश। प्रविश्य च स्वमात्मानं यथा भूतमिदं ब्रह्मास्मीति साक्षात् प्रत्यबुध्यत। तस्मात् स एव सर्व्वशरीरेष्वेक

पूज्यानां परोक्षतयैव नाम वक्तव्यमित्यत्र प्रमाणमाह। तथा ह्येति॥ देवा इति मूढ्या इत्यर्थः॥ अत एवाचार्या उपाध्याया इत्युक्तावेव प्रीतिं कुर्वन्ति लोके न तु विष्णुमित्रादिनामग्रहण इति भावः॥ नाम्नः परोक्षत्वं नाम यथार्थनाम्नो रूपान्तरकरणेन स्वरूपाच्छादनमिति ज्ञेयम्॥ इत्यैतरेयोपनिषद्भाष्यटीकायां प्रथमोऽध्यायः॥१॥ ॐ तत् सत्॥

अस्मिन्नध्याये आत्मैकत्वलोकपानसृष्ट्यशनायापिपासासंयोजनादीनां बह्वनामर्थानामुक्तत्वात् सर्वेषामपि विवक्षितत्वशङ्कानिवारणाय विवक्षितमर्थमाह। अस्मिन्निति॥ सर्वेष्वपि शरीरेष्वेक एवात्मा स एव परमेश्वर इति वक्ष्यमाणोऽर्थ एतच्छब्दार्थः। वाक्यार्थ इति विवक्षित इति शेषः॥ कथमयमेवार्थो विवक्षित इत्याशङ्क्य पूर्वसन्दर्भपर्यालोचनयेत्याह। जगदित्यादिना॥ यद्यपि लोकादिसृष्ट्या अन्नसृष्ट्या चोत्पत्तिस्थित्योक्ते तथाप्युत्पत्तिस्थित्युक्त्याऽर्थात् प्रलयोऽप्युक्तप्राय इति। लयकृदित्युक्ते लोकपालादीनामेव भोक्तृत्वोक्त्या असंसारीत्युक्तमित्यर्थः॥ सामान्यतः सर्वं जानातीति सर्वज्ञः। विशेषतः सर्वप्रकारेणापि सर्वं जानातीति सर्ववित्। सृष्ट्येत्यनेन जगतस्तत्कार्यत्वात्तद्व्यतिरेकेण नास्तीत्युक्त्वा प्रत्यगात्मनस्तद्भेदमाह। स्वात्मेति॥ न केवलं प्रवेशोक्त्यैव तदभेदः किन्तु तदभेद-

एवात्मा नान्य इति। अन्योऽपि सन्न आत्मा ब्रह्मास्मीत्येवं विद्वादिता आत्मा वा इदमेक एवाग्र आसीद्ब्रह्म ततममिति चोक्तः। अन्यत्र चासर्वगतस्य सर्वात्मनो वालाग्रमात्रमप्यप्रविष्टं नास्तीति कथं सीमानं विदार्य प्रापद्यत पिपीलिकेव सुषिरम्। नन्वत्यल्पमिदं चोद्यं बाढ चात्र चोदितव्यम्। अकरणः सन्नीक्षत अनुपादाय किञ्चिल्लोकानसृजत अद्भ्यः पुरुषं समुद्धृत्यामूर्च्छयत्। तस्याभिध्यानान्मुखादि निर्भिन्नं मुखादिभ्यश्चाग्न्यादयो लोकपालास्तेषाञ्चाग्नायादिसंयोजनं तदायतनप्रार्थनं तदर्थं गवादिप्रदर्शनं तेषाञ्च यथायतनं प्रवेशनं सृष्टस्यान्नस्य पलायनं वागा-

---

ज्ञानोक्तेश्चेत्याह। प्रविश्य चेति॥ प्रत्यबुद्धतेति। यस्मात्सर्वशरीरेष्वेकस्यैव प्रवेश उक्तः। यस्माच्च प्रविष्टस्य ब्रह्मतया ज्ञानमुक्तं तस्मात् सर्वशरीरेष्वेक एवात्मा स च सर्वज्ञ ईश्वर एव नान्य इत्येष वाक्यार्थो विवक्षित इति पूर्वेणान्वयः॥ सन्न आत्मेति विद्वादिति संहितोपनिषद्वाक्यशेषोऽप्येतमेवार्थमाहेत्याह। अन्योऽपीति॥ सन्न इति सर्वभूतेष्वेक इत्यर्थः॥ स ईक्षतेत्यादिसन्दर्भोदयमर्थः प्रतीयत इत्युक्तं पूर्वं इदानीमुपक्रमोपसंहाराभ्यामप्येष एवार्थः प्रतीयत इत्याह। आत्मा वा इति॥ सदेव सोम्येदमग्र आसीत् तदेतद्ब्रह्मापूर्वमित्यादौ चाद्वितीयत्वमुक्तमित्याह। अन्यत्र चेति॥ प्रवेशवाक्यादात्मन एकत्वमुक्तं तदयुक्तं तस्यैवासङ्गतार्थित्वादिति शङ्कते सर्वगतस्येति॥ अशरीरत्वादिदारयितृत्वं सर्वगतत्वात् प्रवेशश्च न सङ्गच्छत इत्यर्थः। किं प्रतीयमानार्थं सङ्गतत्वमुत विवक्षितार्थे। आद्ये सर्वस्याप्यसङ्गतार्थत्वेन सर्वस्याप्रामाण्यं स्यात्। न च वेदस्य तदुक्तमित्याह। नन्विति॥ चक्षुरादिकरणैरीक्षणं प्रसिद्धं मृदाद्युपादानवत एव सृष्टृत्वं इत्याभ्यामेव समुद्धरणसंमूर्च्छने इत्यशरीरस्य तदसङ्गतं शास्त्रादिना मूर्त्तेन विदारणं न त्वमूर्त्तानां मुखा-

दिभिस्तज्जिघृक्षा एतत् सर्वं सीमाविदारणप्रवेशसम-
मेव। अस्तु तर्हि सर्वमेवेदमनुपपन्नम्। न। अत्मात्माव-
बोधार्थमात्रस्य विवक्षितत्वात्। सर्वोऽयमर्थवाद इत्य-
दोषः। मायाविद्वा महामायावी देवः सर्वज्ञः सर्व-
शक्तिः सर्वमेतच्चराचरमुखावबोधप्रतिपत्त्यर्थं लोकवदा-
ख्यायिकादिप्रपञ्च इति युक्ततरः पक्षः। न हि कृष्ण्याख्या-
यिकादिपरिज्ञानात् किञ्चित् फलमिष्यते। एकात्मस्वरूप-

दिभ्योऽग्न्याद्युत्पत्तौ तस्य दाहादिः स्यात् मूर्त्तस्यैवान्येन संयोजनं कर्त्तुं शक्यं नायनायादेरमूर्त्तस्य। अग्न्यादीनां शरीरसृष्टेः पूर्वं प्राणनाया आयोगः। तदा गवादिशरीराभावात् स्वयं चाशरीरत्वादानयनायोगः। तेषामशरीरत्वादमूर्त्तत्वात् प्रवेशानुपपत्तिः। अन्नस्याचेतनस्य पलायनानुपपत्तिः। वागादीनां हस्तादिवदस्वादानासामर्थ्यात् तैर्जिघृक्षानुपपत्तिः सर्वमसङ्गतार्थमित्यर्थः। तर्हि सर्वमप्रमाणमस्विति कश्चिच्छङ्कते। अस्विति॥ विवक्षितार्थे विघं भुङ्क्ष्व। प्रजापतिरात्मनो वपामुदक्खिददित्यादीनामिव प्रामाण्यसम्भवेनाप्रामाण्यं न कस्यचिदपि युक्तम्॥ विवक्षितार्थे च नासङ्गतिरिति द्वितीयं दूषयति। नेति॥ लोके स्वयमेव द्वारं कृत्वा ऽनेकेषु गृहेषु प्रतिष्ठितस्य देवदत्तस्यैकत्वदर्शनात्तद्दिदृक्षात्मन एकत्वमिति बोधयितुं विदारणप्रवेशने उच्येते न तु सोऽर्थो विवक्षितः। विवक्षितात्मैकत्वबोधद्वारतयोक्तत्वात् प्राणस्यार्थद्वारतयोक्तवपोत्खननादिवदर्थवाद इत्यर्थः। अत एव प्रवेशादेरिहोक्तिरित्यङ्गीकृत्य तस्य गुणार्थवादत्वं वपोत्खननादिवार्ज्यवदुक्त्वा अग्निर्हिमस्य भेषजमिति वङ्गूतार्थवादत्वमङ्गीकृत्याह। मायावीति॥ मायया घटितमपि सर्वमुपपद्यते। अघटितघटकत्वात्तस्या इत्यर्थः। अनेन कृष्ण्यादेरघटितार्थत्वाद्गन्धर्वनगरादिवन्मृषात्वमेवेति स्वदीकर्त्तुमघटितमपि कृष्ण्यादि श्रुत्या दर्शितमित्युक्तम्॥ नन्वात्मावबोधस्येहविवक्षितस्तर्हि साक्षादेव स उच्यतां किमनेन वृथा प्रपञ्चनेनेत्यत आह। सुखेति॥ अवबोधः अवबोधनं प्रतिपादनं

परिज्ञानात्त्वश्रुतत्वं फलं सर्व्वोपनिषत्प्रसिद्धम्। स्मृतिषु च गीताद्यासु। समं सर्व्वेषु भूतेषु तिष्ठन्तं परमेश्वरमित्यादि। ननु त्वय आत्मानो भोक्ता कर्त्ता संसारी जीव एकः सर्वलोकशास्त्रप्रसिद्धः। अनेकप्राणिकर्म्मफलोपभोगयोग्यानेकाधिष्ठानवल्लोकदेहनिर्म्माणेन लिङ्गेन यथाशास्त्रप्रदर्शितेन पुरप्रासादादिनिर्म्माणलिङ्गेन तद्वि-

---

सुखेन वक्तुः प्रतिपादनार्थं सुखेन श्रोतुः प्रतिपत्त्यर्थं चेत्यर्थः॥ ननु लोकस्येच्छादेर्मानान्तरागोचरत्वेनापूर्व्वत्वात् तत्परत्वमेवाख्यायिकाया अस्त्वित्याशङ्क्याऽपूर्व्वत्वेऽपि तत्प्रतिपत्त्या फलाभावात् फलवत्त्वज्ञाने श्रुतेस्तात्पर्यनियमात्। अन्यथा रुदूरोदनादेरप्यपूर्व्वत्वेन तत्रापि तात्पर्यापत्तेर्नेच्छादौ तात्पर्यमित्याह। न हीति॥ आत्मप्रतिपत्तौ तु फलदर्शनात् परत्वमेव युक्तमित्याह। ऐकात्म्येति॥ सर्व्वेति एतावदरे खल्वमृतत्वं तमेवं विद्वानमृत इह भवति विद्वानमृतः समभवदित्यादिषु ज्ञानादमृतत्वं सिद्धमित्यर्थः। समं सर्व्वेषु भूतेष्वित्यनेनैकात्म्यसङ्गा समं पश्यन् हि सर्वत्र न हिनस्त्यात्मनाऽऽत्मानमिति ज्ञानादमृतत्वमुक्तमित्याह। स्मृतिषु चेति॥ यद्गत्वाऽमृतमश्नुत इत्यादिरादिशब्दार्थः। सोऽहं स च त्वं स च सर्व्वमेतदात्मस्वरूपं त्यज भेदमोहम्। इतीरितस्तेन स राजवर्य्यस्तत्याज भेदं परमार्थदृष्टिरित्यैकात्म्यसङ्गा स चापि जातिस्मरणात् प्रबोधस्तत्रैव जन्मन्यपवर्गायेत्यादिविष्णुपुराणाद्यशब्दार्थः॥ आत्मैक्यमेवाख्यायस्यार्थ इत्युक्त्वा एतदेव स्थिरीकर्त्तुमाशङ्कते। नन्विति॥ जीव ईश्वरो निर्व्विशेषं ब्रह्म चेति त्रय आत्मान इत्यर्थः। तत्र जीवोऽहं कर्त्तेति। लोके एष हि दृष्टा स्रष्टा यजेत स्वर्गकाम इत्यादिशास्त्रे च प्रसिद्ध इत्याह। लोकेति॥ एक इति त्रयाणां मध्ये एक इत्यर्थः॥ यो लोकदेहनिर्म्माणेन लिङ्गेनावगम्यते सर्व्वज्ञ ईश्वरः स द्वितीय इत्याह। अनेकेति॥ अनेकेषां विचित्राणां प्राणिनां यान्यनेकानि विचित्राणि कर्म्मफलानि

षयकौशलज्ञानवान् तत्कर्त्ता तच्छादिरिव। ईश्वरः सर्वज्ञो जगतः कर्त्ताऽद्वितीयश्चेतन आत्माऽवगम्यते। यतो वाचो निवर्त्तन्ते। नेति नेतीत्यादिशास्त्रप्रसिद्ध औपनिषदः पुरुषस्तृतीयः। एवमेते त्रय आत्मानोऽन्योन्यविलक्षणाः। तत्र कथमेक एवात्माऽद्वितीयोऽसंसारीति ज्ञातुं शक्यते। तत्र जीव एव तावत् कथं ज्ञायेत। नन्वेवं ज्ञायते श्रोता मन्ता द्रष्टाऽऽदेष्टाऽऽघोष्टा विज्ञाता प्रज्ञातेति। ननु विप्रतिषिद्धं विज्ञायते यः श्रवणादिकर्त्तृत्वेनाऽमतो मन्ताऽविज्ञातो विज्ञातेति च। तथा न मतेर्मन्तारं मन्वीथा न विज्ञाते-

---

तदुपभोगयोग्यानि यान्यनेकानि विचित्राण्यधिष्ठानानि स्थानविशेषास्तद्वन्तो लोका देहाश्च तेषां निर्म्माणे लिङ्गेनेत्यर्थः। इदं विशेषणं कर्त्तुः सर्वज्ञतार्थम्। यथाशास्त्रप्रदर्शनेनेति स इमाँल्लोकान्सृजतेत्यादिशास्त्रप्रदर्शितलिङ्गेनेत्यर्थः॥ अनुमाने दृष्टान्तमाह। पुरेति॥ अचेतनं प्रधानं स्वयमेव विचित्रजगदाकारेण परिणमते नतु सर्व्वज्ञोऽधिष्ठाता कश्चिदिति साङ्ख्याः। तन्निरासायाह। चेतन इति॥ चेतनानधिष्ठितस्याचेतनस्य स्वतः प्रवृत्त्यदर्शनादवश्यं सर्व्वज्ञश्चेतनोऽधिष्ठाताऽङ्गीकार्य इत्यर्थः॥ तृतीयमाह। यत इति॥ एकस्यैव रूपभेदेन भेद इत्याशङ्क्याह। एवमिति॥ अन्योन्येति॥ अन्योन्यविरुद्धधर्म्मवत्त्वाद्घनतद्धिनवद्भिन्ना इत्यर्थः॥ तत्र जीवस्य यत् कर्त्तृत्वभोक्तृत्वादिवैलक्षण्यमुक्तं तदसिद्धं तस्य मानान्तराविषयत्वेन तद्धर्म्मवत्तया प्रमातुमशक्यत्वात्॥ इतो न भेद इत्यभिप्रायेण परिहरति सिद्धान्ती। तत्र जीव एवेति॥ कथमिति तस्य ज्ञेयत्वाभावे कर्त्तृत्वादिधर्म्मविशिष्टतयापि स ज्ञातुं न शक्यत इत्यर्थः॥ अविज्ञाताभिप्रायप्रकारः प्रश्नं मत्वा शङ्कते। नन्विति॥ आदेष्टा वक्तृत्वकशब्दवक्ता। आघोष्टा श्रोत्रत्वकशब्दवक्तेत्यर्थः॥ पूर्व्ववाक्ये स एषोऽनन्तोऽमतोऽविज्ञात इति विज्ञेयत्वस्य प्रतिषेधात्तस्मिंस्तद्विरुद्धं ज्ञेयत्वमि-

र्विज्ञातारं विजानीयात् इत्यादि च। सत्यं विप्रतिषिद्धं यदि प्रत्यक्षेण ज्ञायते सुखादिवत् प्रत्यक्षज्ञानञ्च निवार्य्यते न मतेर्मन्तारमित्यादिना। ज्ञायते तु श्रवणादिलिङ्गेन तत्र कुतो विप्रतिषेधः। ननु श्रवणादिलिङ्गेनापि कथं ज्ञायते यावता यदा शृणोति आत्मा श्रोतव्यः शब्दस्तदा तस्य श्रवणादिक्रिययैव वर्त्तमानत्वान्मननविज्ञानक्रिये न सम्भवत आत्मनि परत्र वा। तथान्यत्रापि मननादिक्रियासु श्रवणादिक्रियाच्च स्वविषयेष्वेव। न हि मन्तव्यादन्यत्र मन्तुर्मननक्रिया सम्भवति। ननु मनसः सर्वमेव मन्तव्यम्। सत्यमेवं तथापि सर्वमपि मन्तव्यं मन्तार-

---

त्याह। ननु विप्रतिषिद्धमिति॥ यः श्रवणादिकर्त्तृत्वेन ज्ञायते स एवामतोऽविज्ञातश्चेत्येतद्विप्रतिषिद्धमित्यन्वयः॥ श्रुत्यन्तरे विप्रतिषिद्धत्वेत्याह। तथा न मतेरिति॥ मतेर्म्मनोवृत्तेर्म्मन्तारं साक्षिणमित्यर्थः। आदिपदेनामतो मन्ताऽविज्ञातो विज्ञातेत्यादिसङ्ग्रहः॥ श्रुत्योः प्रमाण्याविर्भावाद्विप्रतिषेधानुपपत्तेः प्रत्यक्षेणाविज्ञेयत्वमनुमानेन विज्ञेयत्वञ्चोच्यते। तास्यामिति। शङ्कते पूर्ब्बवादी। सत्यमिति॥ आत्मनि युगपज्ज्ञानद्वयायोगात् श्रवणादिकाले मननविज्ञानयोरसम्भवात् श्रवणादिना मननविज्ञानरूपात्मविषयकमन्यविषयकं वानुमितिज्ञानं न सम्भवतीत्याह सिद्धान्ती। ननु श्रवणादीति॥ श्रवणक्रियैव सह वर्त्तमानत्वात् श्रवणक्रियाधारत्वादात्मनि विषये परविषये वा तस्य मननविज्ञानक्रिये न सम्भवत इत्यर्थः॥ अत्र प्रकरणे मननविज्ञानशब्दाभ्यामनुमितिरुच्यते आत्मनस्तद्विषयत्वस्यैवेह शङ्कावादिनोक्तत्वादिति तर्हि श्रवणयोर्युगपत्सम्भवे अन्यविषयकमननक्रियया आत्मा मन्तव्य इत्यापद्येत विजातीयक्रियाद्वयवत् सजातीयक्रियाद्वयमपि युगपन्न सम्भवतीत्याह। तथेति॥ मननादिक्रियास्विति मननादिक्रियान्तरमपि न सम्भवतीति शेषः॥ ननु

मन्तरेण न मन्तुं शक्यम् । यद्येवं किं स्यादिदमत्र स्यात् सर्वस्य योऽयं मन्ता स मन्तैवेति न मन्तव्यः स्यात् । न च द्वितीयो मन्तुर्मन्ताऽस्ति । यदा स आत्मनैव मन्तव्यस्तदा-वेन चात्मना मन्तव्यो यश्च मन्तव्य आत्मानौ द्वौ प्रस-

---

मननक्रिया हि लिङ्गम् । न च लिङ्गङ्करणमतीतलिङ्गेनाप्यनुमितिदर्शनात् । किन्तु लिङ्गज्ञानं करणम् । न च तस्याप्यनुमितिकाले सत्वनियमः । पूर्वक्षणसत्त्वमात्रेण करणत्वोपपत्तेरिति तयोर्योगपद्याभावेऽपि न दोष इति चेत् । न । श्रवणमननाद्यङ्गविज्ञानस्य साक्षिरूपस्य स्वतो विशेषाभावेन श्रवणादिनिरूपितत्वमेवैषणैव । तस्यानुभापकस्य वक्तव्यत्वेन तत्सत्ताया अपि तत्काले वक्तव्यत्वादिति भावः ॥ ननु तर्हि बाह्यगोचर-श्रवणादिक्रियया मन्तुरनुमानं माभूत् किन्तु बाह्यगोचरश्रवणादि-क्रियैवात्मानमपि विषयीकरिष्यतीत्यत आह । श्रवणादिक्रियाचेति ॥ स्वविषयगोचरा एव न तु स्वाश्रयगोचरा इत्यर्थः ॥ किञ्च न मतेर्मन्तारं मन्वीथा इत्यात्मनो मन्तव्यत्वनिषेधात् मन्तर्यात्मनि मननक्रिया न सम्भवतीत्याह । न हीति । अन्यत्रेति आत्मनीत्यर्थः । कुठारादि-क्रियाया दारुणो ऽन्यत्र व्यापारादर्शनादित्यर्थः । ननु मनसो वशे सर्वमिदं बभूवेति श्रुतेः सर्वस्य मनोविषयत्वादात्मन्यपि मन्तव्यत्वमेवेति शङ्कते । ननु मनस इति ॥ एवमपि मनसः करणत्वात् क्रियायाश्च कर्त्तारमन्तरानुपपत्तेर्मन्ताऽवश्यमङ्गीकर्त्तव्य इति सिद्धान्ती तावदाह । सत्य मेवमिति ॥ तथापीति न मन्वीथा इति विशेषः । श्रुत्या मन्तव्यत्वनिषेधाद-भ्युपगम्योच्यते इति सूचयन्नपिशब्दः ॥ अस्तु मननस्यावश्यकत्वं तावता किं स्यादिति शङ्कते । यद्येवमिति ॥ एवं सत्यात्मनो मन्तव्यत्वाभावः सिध्य-तीत्याह । इदमिति ॥ कुत एतदिति चेत्तत्र वक्तव्यं किमात्मनो मनने स्वयमेव मन्ता उतान्यो वेति विकल्पाद्यं दूषयति । सर्वस्येति ॥ एकत्र कर्तृकर्मभावस्य विरोधान्मन्तुर्मन्तव्यत्वं न सम्भवतीत्यर्थः । द्वितीये स मन्ता अनात्माऽऽत्मा वेति विकल्प्य आद्ये आह न चेति ॥ द्वितीय इत्यनन्तरमनात्मेति शेषः । अनात्मनोऽचेतनस्य मन्तृत्वानुपपत्तिरि-

ज्येयाताम्। एक एवात्मा द्विधा मन्तृमन्तव्यत्वेन द्विश-
कलीभवेद्वंशादिवदुभयथाप्यनुपपत्तिरेव। यथा प्रदी
पयोः प्रकाश्यप्रकाशकत्वानुपपत्तिः समत्वात् तद्वत्। न
च मन्तुर्मन्तव्ये मननव्यापारशून्यः कालोऽस्यात्मनन-
नाय। यद्यपि लिङ्गेनात्मानं मनुते मन्ता तद्यपि पूर्व-
वदेव लिङ्गेन मन्तव्य आत्मा। यश्च तस्य मन्ता तौ द्वौ
प्रसज्येयातां एक एव वा द्विधेति पूर्व्वोक्तो दोषो न प्रत्य-

त्यर्थः॥ द्वितीयमनुवदति। यदेति अस्मिन् पक्षे एकस्मिन् शरीरे आत्म-
द्वयं स्यादित्याह। तदेति॥ चशब्दौ परस्परसमुच्चयार्थौ। येन चात्म-
नात्मा मन्तव्यो यश्चात्मा मन्ता इत्यन्वयः। द्वितीयान्तप्रथमान्तयोरुक्त्याभ्या-
मुक्तौ द्वावात्मानौ स्यातामित्यर्थः॥ एतद्दोषपरिहारायैकस्यैवात्मन
एकांशेन मन्तृत्वमंशान्तरेण मन्तव्यत्वमित्युक्तौ सावयवत्वं स्यादित्याह।
एक एवेति॥ अस्तु को दोष इत्याशङ्क्यात्मभेदे तयोरैकमत्यायो-
गादिरुदिक्रियतया शरीरमुच्यते सावयवत्वे नित्यत्वेन कृत-
घ्नादिकं स्यादिति दोषमाह। उभयथेति॥ भिन्नयोरपि समान-
स्वभावयोर्द्वौ पयोः कर्तृकर्म्मभावादर्शनादात्मभेदपक्षे आत्मैकत्वभेदपक्षे
वा तयोः समानस्वभावत्वादभिन्नपक्ष इव कर्तृकर्म्मभावो न
सम्भवतीत्यनुपपत्त्यन्तरमाह। यथेति॥ पराञ्चि खानि व्यृ-
णत् स्वयम्भूस्तस्मात् पराङ् पश्यति नान्तरात्मन्निति श्रुत्या करणानां
बहिर्विषयत्वनियमस्यात्मविषयत्वाभावस्य चोक्तत्वात्। यन्मनसा
न मनुते इति श्रुतेश्च॥ मनसो बहिर्विषये मन्तव्य एव व्यापारो
गात्मनीत्याह। न च मन्तुरिति॥ न चैवं सति कश्चिद्धीरः प्रत्य-
गात्मानमैक्षन्मनसैवानुद्रष्टव्यमित्यादीनां का गतिरिति वाच्यम्।
मनसो बहिर्विक्षेपाभावेनैकाग्र्ये सत्यात्मा स्वयमेव प्रकाशत
इति तदर्थत्वात्। अन्यथा पूर्व्वोक्तन्यायोपबृंहितानामतो विज्ञात
इत्यादिबहुश्रुतिव्याकोपः स्यादिति भावः। एवमात्मनः सा-
क्षान्मनसा मन्तव्यत्वपक्षे एकस्मिन् शरीरे आत्मभेदस्य श्रु-

ज्ञेय नाप्यनुमानेन ज्ञायते चेत् कथमुच्यते सम आत्मेति विद्यादिति। कथं वा श्रोता मन्तेत्यादि। ननु श्रोतृत्वादिधर्मवानात्मा अश्रोतृत्वादिप्रसिद्धमात्मन किमत्र विषमं पश्यसि। यद्यपि तव न विषमं मम तु विषमं प्रति-

---

लोभावो वा स्यादित्युक्तदोषमनुमितिविषयपक्षेऽप्याह। यदापीति॥ एवमतो विज्ञात इति श्रुत्या न्यायोपबृंहितया सर्वात्मना ज्ञेयत्वाभावादिति स्थितम्। तत्र पूर्ववादी शङ्कते। न प्रत्यक्षेणेति॥ कथमिति ज्ञेयत्वप्रतिपादकश्रुतेः श्रोतृत्वादिधर्मवत्वप्रतिपादकश्रुतेश्चानुपपत्तिरित्यर्थः। तत्र विद्यादिति श्रुतौ इतरनिषेधे सति स्वप्रकाशत्वेन स्वतः स्फुरणमेवोच्यते न तु कर्मतया वेदत्वमिति परिहारं वक्ष्याम इत्यभिप्रेत्य श्रोतृत्वादिश्रुतौ परिहारमाह। नन्विति॥ तत्र किं धर्मवत्त्वप्रतिपादनस्य कागतिरिति पृच्छ्यते किं वा श्रोतृत्वादिप्रतिपादनेनाश्रोतृत्वादिकमप्रसिद्धमित्युच्यते वेति विकल्प्य नाद्यः। नित्यमेव श्रोतृत्वादिधर्माङ्गीकारादित्याह। श्रोतृत्वादिति॥ न श्रोता न मन्तेत्यादिश्रुतेर्नित्यमेवाश्रोतृत्वादेरपि प्रामाणिकत्वात्। न द्वितीयोऽपीत्याह। अश्रोतृत्वादीति॥ उभयोरविरोधश्चोत्तरत्र वक्ष्याम इति भावः॥ एवञ्च श्रोता मन्ता न श्रोता न मन्तेति चोभयश्रवणे सति श्रोतृत्वादिधर्मवानेवेत्यनन्तरपरिग्रहवैषम्यं तव न युक्तमित्याह। किमत्रेति॥ न च श्रोतृत्वश्रुतेरन्यपरत्वोपपत्तेर्न वैषम्यमित्याशङ्क्य कालभेदेनोभयोरपि दर्शनादन्यतरस्यान्यपरत्वे हेत्वभावात् श्रोतेत्यादिश्रुत्यङ्गीकारे वैषम्यं स्यादेवेत्याह। यद्यपीति॥ अश्रोतृत्वादि प्रसिद्धं अनात्मन इति पाठे नन्विति वाक्यमपि शङ्कान्तर्गतमेव। श्रोतेत्यादिश्रुत्या श्रोतृत्वादिधर्मवानात्मा। ननु तत् कथं स्यादित्यन्वयः। ननु न श्रोतेत्यादिश्रुतेरश्रोतृत्वादिधर्मवत्त्वमात्मन इत्याशङ्क्य लोकेऽप्रसिद्धेनैवमिति स एवाह। अश्रोतृत्वादीति॥ उभयोरप्यात्मधर्मत्वश्रवणे समानेऽन्यतरस्य नात्मधर्मत्वाभिधानमयुक्तमिति सिद्धान्तो दूषयति। किमत्रेति॥ ननु लोकप्रसिद्धिबलादनात्मधर्मत्वनिश्चयाच्च वैषम्यमित्याशङ्क्य निराकरोति। यद्यपीति॥ अश्रोत-

भाति । कथम् । यदासौ श्रोता तदा न मन्ता यदा मन्ता तदा न श्रोता । तत्रैवं सति पक्षे श्रोता मन्ता पक्षे न श्रोता नापि मन्ता । तथाऽन्यत्रापि च यदैवं तदा श्रोतृत्वादिधर्मवानात्मा ऽश्रोतृत्वादिधर्मवांश्चेति संशय-स्थाने कथं तव न वैषम्यम्। यदा देवदत्तो गच्छति तदा न स्थाता गन्तैव । यदोत्तिष्ठति न गन्ता स्थाता एव तदास्य पक्ष एव गन्तृत्वं स्थातृत्वञ्च न नित्यं गन्तृत्वं स्थातृत्वं वा तद्वत् । तथैवात्र काणादादयः पश्यन्ति । पक्षे प्राप्ते नैव

त्वादेरात्मधर्म्मत्वेऽपि प्रसिद्धेरविशेषात् श्रुत्यनुरोधेनोभयोरप्यात्मधर्म्मत्व-मिति प्रश्नपूर्व्वकमाह। कथमिति ॥ इतरत् सर्व्वं समानम् ॥ त्वया हि कादाचित्कज्ञानेन नित्यमेव श्रोतृत्वादिकमङ्गीक्रियते तदयुक्तमित्याह। यदाऽसाविति ॥ मन्तेत्यनन्तरं न तु नित्यमेव श्रोता मन्ता वेति शेषः। तथान्यत्रापीति। द्रष्टृत्वाविच्छातृत्वादावप्येवमेव कादाचित्कत्वमित्यर्थः ॥ श्रोतृत्वादेः पाक्षिकत्वं दृष्टान्तेन स्पष्टीकरोति। यदेति॥ तदास्येत्यत्र यदैवमिति पदमध्याहृत्य यदैवं व्यवस्था तदास्य पक्ष एव गन्तृत्वमिति वाक्यं योज्यम्। तद्वदिति श्रोतृत्वादिकमपि न नित्यमित्यर्थः ॥ अवा-न्तरेऽविदितामिप्रायाः काणादादय उभयमपि कादाचित्कमेवास्त्विति चोदयन्तीत्याह। अत्रेति॥ ननु सिद्धान्तिनापि श्रोतृत्वयोरङ्गीकारस्य सिद्धान्ततत्वात् कथं भेद इत्याशङ्क्य तन्मते नित्यसाक्षिणो नित्यमेव श्रोतृत्वम्। कादाचित्कज्ञानस्य रूपत्वेन तदभावेन च नित्यमेवाश्रोतृ-त्वम्। अस्मन्मते तु कादाचित्कज्ञानेनैव श्रोतृत्वादिकमिति विशेषमाह। संयोगजत्वमिति॥ ज्ञानस्य कादाचित्कत्वे यौगपद्ये च यथाक्रमं प्रमाण-माह। दर्शयन्ति चेति ॥ युगपदिति यदि मनो न स्यात् तर्हि चक्षु-रादीन्द्रियाणां युगपदेव रूपादिभिः सम्बन्धे युगपदेव सर्व्वेन्द्रियैः सर्व-विषयकज्ञानानि स्युः। सामग्र्याः सत्त्वात्। न च तथाऽस्यतः क्रमेण तत्त-

श्रोतृत्वादिनात्मोच्यते श्रोता मन्तेत्यादिसंयोगजत्व-मयौगपद्यञ्च ज्ञानस्य ह्याच्यते। दर्शयन्ति चान्यत्वमना अभवं नादर्शमित्यादि युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्ग-मिति च न्याय्यम्। भवत्वेवं किं तव नेष्टम्। यद्येवं स्याद-स्त्येवं तवेष्टं चेत् श्रुत्यर्थस्तु न सम्भवति किं न श्रोता मन्ते-त्यादिश्रुत्यर्थः। न श्रोता मन्तेत्यादिवचनात्। ननु पाञ्चि-कत्वेन प्रत्युक्तं त्वया न नित्यमेव श्रोतृत्वादि अभ्युपगमात्। न हि श्रोतुः श्रुतेर्विपरिलोपो विद्यत इत्यादिश्रुतेः। एवं

दिन्द्रियसंयोगि अणुपरिमाणं मनोऽङ्गीकर्त्तव्यम्। तथा च युगपत् सर्वेन्द्रियैर्मनःसंयोगाभावान्न युगपत् सर्वविषयकं ज्ञानम्। अतो युगप-द्रूपादिसर्वविषयकज्ञानानुत्पत्तिलिङ्गेन मनोऽस्तीति वदन्तो युगपत् सर्व-ज्ञानानुत्पत्तिरित्युक्तवन्त इत्यर्थः। इममर्थं न्याय्यं पश्यन्तीति पूर्वेणा-न्वयः॥ काणादादिमते सिद्धान्तिना प्रदर्शिते सति तर्हि काणादादि-रीत्या श्रुतिद्वयोपपत्तेरात्मनः श्रोतृत्वादिधर्मसिद्धेश्च न तथैवास्त्विति पूर्वपक्षो तटस्थो वा सिद्धान्तिनं प्रति शङ्कते। भवत्विति॥ यद्येवं न्याय्यं स्यादेवमेव भवतु किं तव नेष्टमित्यर्थः। आत्मनः कादाचित्कज्ञानेन श्रोतृ-त्वादिधर्मवत्त्वस्य श्रुत्यनभिमतत्वान्न तन्न्याय्यमिति सिद्धान्ती तं पक्षं दूषयति। अस्त्येवमिति॥ ननु श्रोता मन्तेति श्रुत्वा तद्धर्मवत्त्वप्रतिपाद-नादनभिमतत्वमसिद्धमिति शङ्कते। किं नेति॥ न श्रोतेति श्रुत्वा विशे-षतः कालत्रयेऽपि श्रोतृत्वादिधर्मराहित्यप्रतिपादनात् तद्धर्मवत्त्वमनभि-मतमेवेति सिद्धान्ती उत्तरयति। न श्रोतेति॥ यदाऽसौ श्रोतेत्यादिना श्रोतृत्वादेः पाञ्चिकत्वस्य त्वयैवोक्तत्वात् काणादपक्षप्रदर्शनवेलायाञ्च कादाचित्कज्ञानेन तदुपपादनात् पाञ्चिकश्रोतृत्वादि तदभावविषयतया श्रुतिद्वयस्योपपत्तिं शङ्कते। नन्विति॥ अपाञ्चिकत्वेन श्रोतृत्वतदभावयोः श्रुतिभ्यां स्वरसतः प्रतीतेः पाञ्चिकत्वेन तदुक्तेर्न युक्त इति स्वाभि-

तर्हि नित्यमेव श्रोत्रत्वाद्यभ्युपगमे प्रत्यक्षविरुद्धा युगपदुज्ञानोत्पत्तिरज्ञानाभावश्चात्मनः कल्पितः स्यात्। तच्चानिष्टमिति नोभयदोषोपपत्तिः। आत्मनः श्रुत्यादिश्रोत्रत्वादिधर्मवत्त्वश्रुतेः। अनित्यानां मूर्त्तानाञ्च चक्षुरादीनां दृष्ट्यादिनित्यत्वमेव संयोगवियोगधर्मिणाम्। यथाऽग्नेर्ज्वलनं तृणादिसंयोगजत्वात्तद्वत्। न तु नित्यस्यामूर्त्तस्यासंयोगविभागधर्मिणः संयोगजदृष्ट्यादिनित्यधर्मत्वं सम्भवति। तथा च श्रुतिः। न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत

प्रायं विद्वन्मनु सिद्धान्त्याह। न नित्यमेवेति॥ ननु श्रुतेरनित्यत्वे सति तद्दृष्टितं श्रोत्रत्वमप्यनित्यमिति शङ्कोच आवश्यकोऽत आह। न ह्रीति श्रुतेः श्रोत्रत्वस्य चानित्यत्ववचनं श्रुतिविरुद्धमित्यर्थः॥ श्रुतिमित्यादीनां नित्यत्वे युगपत् सर्वज्ञानं स्यात् कदाचिदपि कस्यचिदपि ज्ञानस्याभावो नस्यात्। श्रुत्यादिशब्दितानां सर्वेषां ज्ञानानां नित्यत्वात्। न चेष्टापत्तिः। प्रत्यक्षविरोधात्॥ अतो न हि श्रोतुः श्रुतेरित्यादिश्रुतेरन्यपरत्वं वक्तव्यमिति शङ्कते। एवं तर्हीति। इति शब्दः शङ्कासमाप्त्यर्थः॥ परिहरति। नोभयेति॥ युगपज्ज्ञानोपपत्तिरज्ञानभावश्चेत्युभयदोषस्योपपत्तिसम्भवो नास्तीत्यर्थः। श्रोत्रत्वादेर्नित्यत्वे कथमुभयदोषाभाव इत्याशङ्क्यात्मस्वरूपभूतस्याचिरूपश्रुत्यादेर्नित्यत्वेऽपि वृत्तिरूपकादाचित्कश्रुत्यादेरभ्युपगमादुक्तदोषाभाव इति परिहरन् नित्यश्रोत्रत्वादिकं दर्शयति। आत्मन इति॥ आत्मनः स्वरूपभूतं यत् श्रुत्यादि श्रोत्रजन्यवृत्तिमत् साचिरूपं तद्द्वाद्यच्छ्रोत्रत्वादि तद्धर्मवत्त्वस्य श्रोता मन्तेत्यादिश्रुतेरित्यर्थः॥ अनित्यश्रुत्यादिकं तर्हि कथमित्याशङ्क्य तद्दर्शयति। अनित्यानामिति॥ तेषामनित्यत्वमाह। मूर्त्तानामिति॥ दृष्ट्यादेरनित्यत्वे हेतुमाह। संयोगेति॥ संयोगजन्यत्वाद्दृष्ट्यादेरनित्यत्वमित्यर्थः॥ ज्वलनमित्यनन्तरमनित्यमित्यनुषङ्गः। ननु यद्यनित्यदृष्ट्यादयभ्युपगम्येत तर्हि तदेवात्मनोऽपि धर्मोऽस्तु किं नित्यदृष्ट्यादिनेत्यत आह। नन्वि॥ नितत्व-

इत्यादि। एवं तर्हि हे दृष्टी चक्षुषो ऽनित्या दृष्टिर्नित्या चात्मन्। तथा च हे श्रुती श्रोतस्यानित्या आत्मस्वरूपस्य च नित्या। तथा मती विज्ञातौ बाह्यावाह्ये। एवं ह्येव चेयं श्रुतिरुपपन्ना भवति दृष्टेर्द्रष्टा श्रुतेः श्रोता इत्याद्या। लोकेऽपि प्रसिद्धं चक्षुषस्तिमिरागमापाययोर्नष्टा दृष्टिर्जाता दृष्टिरिति चक्षुर्दृष्टेरनित्यत्वम्। तथा श्रुति-

---

त्वादमूर्त्तत्वममूर्त्तत्वात्संयोगादिधर्म्मरहितत्वं ततः संयोगजदृच्छाद्यसम्भव इत्यत आत्मनो नित्यदृच्छाद्यभ्युपगन्तव्यमित्यर्थः। श्रुतितोऽपि नित्यदृच्छादिसिद्धिरित्याह। तथा चेति॥ नित्यानित्यदृष्टिद्वयाङ्गीकारे गौरवमिति शङ्कते। एवं तर्हीति॥ श्रुतिप्रामाण्याद्द्वैविध्याङ्गीकारे गौरवं प्रामाणिकमित्याह। एवं ह्येवेति॥ तथा चेति॥ चोऽवधारणे तथैवेत्यर्थः दृष्टेर्द्रष्टेति। दृष्टिविषयकदृष्टिमानिति तदर्थः। तत्र विषयविषयिभावस्यैकस्मिन्नसम्भवाद्दृष्टिद्वयं प्रतीयत इति दृष्टिद्वैविध्ये सत्येवेयं श्रुतिरुपपद्यते नान्यथेत्यर्थः॥ तिमिररोगस्यागमे नष्टा दृष्टिः अपाये च जाता दृष्टिरिति प्रतीतेर्जन्मनाशयोगिनी अनित्या दृष्टिरेका। तदीयजन्मनाशसाक्षिभूता द्वितीया दृष्टिरस्तीति लोकेऽपि प्रतीयत इत्याह। लोकेऽपीति॥ चक्षुर्दृष्टेरित्युपलक्षणमात्मदृष्टेर्नित्यत्वं प्रसिद्धमित्यपि द्रष्टव्यम्। तथा च श्रुतिमत्त्वादीनामपि नित्यत्वमनित्यत्वञ्च प्रसिद्धमित्यनुषङ्गः। आत्मदृच्छादीनां नित्यत्वे हेत्वन्तरमाह। आत्मदृच्छादीनाञ्चेति॥ स्वप्ने चक्षुषोऽभावेऽपि दृष्टेः सत्त्वान्न सा चक्षुर्जन्येति नित्यैवेत्यर्थः। चक्षुः स्वप्नेऽप्यनुपरतमिति यदि कश्चिब्रूयात् तं प्रति उक्तमनूद्य तच्चक्षुरिति तस्य चक्षुःसत्वे शङ्कैव नास्तीत्यर्थः। अवगमेति अवगतं निश्चितं बाधित्वं यस्येत्यर्थः। न च स्वप्ने दृच्छादेश्चक्षुराद्यजन्यत्वात् कथं दृष्टिश्रुत्यादिशब्दवाच्यत्वमिति वाच्यम्। रूपादिविषयकापरोक्षज्ञानत्वेन दृच्छादिशब्दवाच्यत्वादिति भावः। उक्तमर्थं विपर्य्यये बाधकोक्त्या दृढयति। यदीति॥ न पश्येदिति दर्शनहेतोश्चक्षुषो ऽभावा-

मत्यादीनामात्मदृष्ट्यादीनाञ्च नित्यत्वं प्रसिद्धमेव। लोके वदति ह्युद्भूतचक्षुः स्वप्नेऽद्य मया भ्राता दृष्ट इति। तथावगतवाधिर्यः स्वप्ने श्रुतौ मन्योऽद्येत्यादि। यदि चक्षुःसंयोगजैवात्मनो नित्यदृष्टिस्तदाप्ते नष्टेत तदोद्भूतचक्षुः स्वप्ने नीलपीतादीनि न पश्येत्। न हि द्रष्टुर्दृष्टेरित्याद्या च श्रुतिरनुपपन्ना स्यात्। तच्चक्षुः पुरुषे येन स्वप्नं पश्यतीत्याद्या च श्रुतिः। नित्यात्मदृष्टिर्वाच्या-नित्यदृष्टेर्ग्राहिका। वाच्यदृष्टेश्चोपजनापायाद्यनित्यधर्मवत्त्वाद्ग्राहिकाया आत्मदृष्टे स्तद्वदवभासत्वम्। अनित्यत्वादि-

---

दित्यर्थः। न चेदं दर्शनं स्मृतिरिति वाच्यम्। तथा सति सन्निहितत्वेनापरोक्षाभासो न स्यात्। न च तदंशे भ्रम इति वाच्यम्। बाधकाभावात् पूर्वमननुभूतं भ्रात्रादिदर्शनञ्च न स्यादिति भावः। इदमुपलक्षणं सुखमहमस्वाप्समिति परामर्शहेतुभूतसुषुप्तिकालीनानुभवेऽपि नित्योऽभ्युपगन्तव्यः। तदानीं सर्वकरणानामभावेन नित्यानुभावादित्यपि द्रष्टव्यम्। न केवलं प्रत्यक्षानुपपत्तिः श्रुतिरप्यनुपपन्ना स्यादित्याह। न हि द्रष्टुरिति॥ न हि श्रोतुः श्रुतेर्विपरिलोपो विद्यत इत्याद्या चेत्यनेन गृह्यते। तच्चक्षुरिति। चष्टे इति चक्षुः। द्रष्टा साक्षी पुरुषे आत्मनि शरीरे वा। येन स्वप्नं पश्यति तच्चक्षुः साक्षीत्याद्या चानुपपन्ना स्यादित्यनुषङ्गः॥ स्वप्नान्तं जागरितान्तञ्चोभौ येनानुपश्यतीत्यादिरादिशब्दार्थः। नन्वात्मदृष्टेर्नित्यत्वे कथं तदानित्यत्वप्रतीतिः। कथं वा लोकस्यानित्यैव सर्वापि दृष्टिरिति निश्चयश्चेत्याशङ्क्य आह्यानित्यदृष्टियतधर्मानित्यत्वादि सर्वं ग्राहिकायां नित्यदृष्टौ भासते। आह्याऽयःपिण्डगतवर्तुलत्वादिधर्माणां ग्राहकाग्न्यादौ भानुदर्शनादतो लोकस्य तथा प्रतीतिरुपपद्यत इत्याह। नित्येत्यादिना॥ तद्वदवभासत्वमिति आह्यवदवभासमानत्वमित्यर्थः। आह्यधर्मस्य

भ्रान्तिनिमित्तं लोकस्येति युक्तम्। यथा भ्रमणादिधर्मवद्लातादिवस्तुविषयदृष्टिरपि भ्रमतीव तद्वत्। तथा च श्रुतिः। ध्यायतीव लेलायतीव वेति। तस्मादात्मदृष्टेर्नित्यत्वान्न यौगपद्यमयौगपद्यं वास्ति। बाह्यानित्यदृष्ट्युपाधिवशात् लोकस्य। तार्किकाणाञ्चागमसम्प्रदायवर्ज्जितत्वादनित्यात्मनो दृष्टिरिति। भ्रान्तिरूपपन्नैव जीवेश्वरपरमात्मभेदक-

---

याह्वके भानं दृष्टान्तेन स्पष्टयति। तथा भ्रमणादीति॥ आदिशब्देन गमनादि गृह्यते। द्वितीयेन धावत् पच्यादि। ध्यायतीवेति बाह्यबुद्धिगतं ध्यानादिकं याह्वके साक्षिणि भासते इति श्रुत्यर्थः। एवञ्च यत्पूर्ववादिना युगपदनेकज्ञानोत्पत्तिः प्रत्यक्षविरुद्धा स्यादित्युक्तं तत् परिहृतमित्याह। तस्मादिति॥ तस्मादित्यस्यार्थमाह। आत्मदृष्टेरिति॥ अनेकनिरूपितत्वाद्यौगपद्यस्य तदभावरूपत्वाद्यौगपद्यस्यैकस्यां दृष्टौ तदुभयमपि नास्तीत्यर्थः। नन्वात्मदृष्टेर्नित्यत्वे कथं परीक्षाकुशलानां नैयायिकानां सर्व्वस्य च भ्रमः स्यादित्याशङ्क्य न नरेणावरेण प्रोक्त एष सुविज्ञेयो बहुधा चिन्त्यमानः नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रष्ठेत्यादिश्रुतेः स्वबुद्धा ज्ञातमशक्यत्वावगमात् सम्प्रदायपरम्परयैव ज्ञातव्यत्वावगमाच्च तेषां तद्रहितत्वाद्भ्रमो युक्त इत्याह। बाह्यानित्येति॥ न केवलं ज्ञानभेदकल्पनैव तेषां भ्रमः किन्त्वात्मभेदकल्पनाप्येतन्मूलो भ्रम एवेत्याह। जीवेश्वरेति॥ एतन्निमित्तेति ज्ञानानित्यत्वतद्भेदकल्पनानिमित्तैव नित्यानित्यज्ञानवतोर्जीवेश्वरयोर्विचित्रज्ञानवताञ्च जीवानां परमात्मनश्चैकत्वं न सम्भवतीति युक्त्याभासेन तेभेदकल्पनादित्यर्थः। किञ्चात्मनैवायं ज्योतिषाऽस्ते अयमात्मा ब्रह्म सर्व्वानुभूः प्रज्ञानघन एवेत्यादिश्रुतिभ्य आत्मन एव नित्यदृष्टिरूपत्वादात्मनश्च सर्व्वाः प्रजा यत्रैकं भवन्तीत्यादिना सर्व्वैक्यस्य तन्मात्रत्वेन तद्व्यतिरेकेणाभावोक्तेर्निर्विशेषत्वाच्चक्षुषा अपि दृष्टेर्निर्विशेषत्वात्तस्यासक्तीत्याद्याः सर्व्वाः कल्पना भ्रान्तिनिमित्ता एवेत्याह। तथाऽस्तीति॥

ल्पना चैतन्निमित्तैव। तथाऽस्ति नास्ति अस्ति नास्तीत्या-
द्याश्च यावन्तो वाङ्मनसयोर्भेदा यत्रैकं भवति तद्विषयाया
नित्याया दृष्टेर्निर्विशेषाया अस्ति नास्तीत्येकं नानागुण-

यावन्तो वाग्भेदानामविशेषा मनसो भेदा रूपविशेषा यत्रात्मन्येकं भवन्ति सर्वे वेदा यत्रैकं भवन्ति सर्वाः प्रजा यत्रैकं भवन्तीत्यादिश्रुतेस्तद्विषयायास्तत्स्वरूपायाः। अत एव नित्यायाः निर्विशेषाया दृष्टेरस्तीत्यादिकल्पना आस्तिकानाम्। नास्तीति कल्पना शून्यवादिनाम्। अस्ति नास्तीति कल्पना दिगम्बराणाम्। अन्येषाञ्च यथायथं सावयवत्वादिकल्पना सा सर्वापि तथा भ्रान्तिनिमित्तैवेति पूर्वेणान्वयः। ननु ते ते तार्किका आत्मनोऽस्तित्वादीन् तर्केण साधयन्ति। अतो न तेषां भ्रान्तिनिमित्तत्वमित्याशङ्क्य श्रुतिविरुद्धत्वादसङ्गे आत्मन्यनुपपत्तेस्तेषां कल्पनानां सत्त्वे मोक्षानुपपत्तेश्च। तेषां तार्किकाणां कल्पना न प्रमाणपथमारोहतीत्याह। अस्ति नास्तीति॥ सुषुप्तौ न जानात्यन्यत्र जानातीति कादाचित्कज्ञानवत्त्वकल्पना वैषयिकादीनामात्मा परलोकं प्रतिगच्छतीति केषाञ्चित् क्रियावत्त्वकल्पना इहैव स्थित्वा शरीरान्तरं गृह्णातीत्यन्येषां देहात्मवादे क्षणिकविज्ञानवादे वा फलं परलोकस्थायिनोऽभावात्। अन्येषां फलवद्देहात्मक्षणिकवादिपक्षे एव कर्म तद्वासनानामाश्रयाभावात् परलोके निर्बीजं नित्यात्मवादिनां सबीजं दुःखमसुखरूपं वैशेषिकादिवादे। दृष्ट्वा विज्ञानवादे सोपप्लवचित्तसन्तिरूपस्य संसारिणो हेयत्वाङ्गीकाराद् दुःखरूपत्वमात्मनः शरीरमध्य एव वर्त्तत इति दिगम्बराणां मते। अन्येषान्तु तद्बहिरप्यस्तीत्यमध्यं परोऽहमिति मतः परोऽयमहं ततोऽन्य इति प्रत्यक् परागभेदादिकल्पना अस्तीत्याद्यापरोऽयमहमन्य इत्यन्ताः कल्पना वाक्प्रत्ययागोचरे वाङ्मनसोर्गोचरे यो विकल्पविधुमिच्छतीत्यन्वयः। आरोढुमित्यत्र खमित्यनुषङ्गतो जले जोनानां खे वयसामित्यन्वयः॥ वाङ्मनसभेदा आत्मनि यसन्ति। तद्गोचरत्वादित्यत्र क्रमेण श्रुतिद्वयमाह। नेति नेतीति॥ वाङ्मनस-

वदगुणम्। जानाति न जानाति क्रियावदक्रियम्। फलवदफलम्। सबीजं निर्बीजम्। सुखं दुःखम्। मध्यममध्यमम्। शून्यमशून्यम्। परोऽहमन्य इति वा सर्ववाक् प्रत्ययागोचरे परे यो विकल्पयितुमिच्छति स नूनं खमपि चर्मवद्वेष्टयितुमिच्छति। सोपानमिव च खं पद्भ्यामारोढुमिच्छति। जले खे च मीनानां वयसाञ्च पदं दिदृक्षते। नेति नेति यतो वाचो निवर्त्तन्त इत्यादि श्रुतिभ्यः। कोऽद्धा वेदेत्यादि मन्त्रवर्णात्। कथं तर्हि तस्य सम आत्मेति वेदनं ब्रूहि केन प्रकारेण तमहं सम आत्मेति विद्याम्। अत्राख्यायिकामाचक्षते। कश्चित् किल मनुष्यो मुग्धः कैश्चिदुक्तः कस्मिंश्चिदपराधे सति धिक् त्वां नासि मनुष्य इति। स मुग्धतयाऽऽत्मनो मनुष्यत्वं प्रत्ययितुं कञ्चिदुपेत्याह। ब्रवीतु भवान् कोऽहमस्मीति। स तस्य मुग्धतां ज्ञात्वाऽऽह। क्रमेण

गोचरे श्रुत्यन्तरमाह। कोऽद्धेति॥ अद्धा साक्षादेवेति मनो गोचरत्वं क इह प्रागवोचदिति वागगोचरत्वञ्च निषेधतीत्यर्थः॥ वाङ्मनसागोचरत्वे श्रवणमननयोरसम्भवादात्मनो वेदनं न सम्भवतीति शङ्कते। कथमिति॥ तर्हि साक्षात्मवेदनमित्याशङ्क्य श्रुतेरनतिशङ्कत्वादात्मवेदननिषेधायोगात्तत्रोपायं पृच्छामीत्याह। ब्रूहीति॥ केन प्रकारेण सम आत्मेति विद्यां तं प्रकारं ब्रूहीत्यन्वयः। नेति नेतीत्यादिश्रुत्युदाहरणेनैवेतरनिषेधेनैव तस्य स्वप्रकाशस्य बोध इति वेदनप्रकारस्योक्तत्वात् प्रकारान्तरस्यात्राभावादनेनैव प्रकारेणाविषयतया वेदितव्य इति मत्वा सापह्नवमुत्तरमाह। अत्राख्यायिकामिति॥ मुग्ध इति मूढ इत्यर्थः। स्थावरादीति॥ न त्वं स्थावरादिरूप इत्युक्तेत्यर्थः। नन्वितरनिषेधेन सर्वेषां जातेऽपि त्वमेवम्भूत इत्यनभिधानेऽहमेवम्भूत इति ज्ञानाभावात्-

बोधयिष्यामीति स्थावराद्यात्मभावमपोह्य न त्वममनुष्य इति उक्ता उपरराम। मुग्धः स तं प्रत्याह। भवान् मां बोधयितुं प्रवृत्तस्तूष्णीं बभूव किं न बोधयतीति। ताह-गेव तद्भावतो वचनं नास्यमनुष्य इति उक्ते मनुष्यत्व-मात्मनो न प्रतिपद्यते यः स कथं मनुष्योऽसीत्युक्तोऽपि मनु-ष्यत्वमात्मनः प्रतिपद्येत। तस्माद्यथाशास्त्रोपदेश एवात्मावबोधविधिर्नान्यः। न ह्यग्नेर्दाह्यं तृणाद्यन्येन केन चिद्दग्धुं शक्यम्। अत एव शास्त्रं आत्मस्वरूपं बोधयितुं प्रवृत्तं सदमनुष्यत्वप्रतिषेधनेनैव नेति नेतीत्युक्तोपरराम। तथा

तदर्थं विधिमुखेन बोधनं कार्यमत आह। नासीति॥ अपरोक्षतया प्रतीयमानवस्तुनि विपर्ययेण गृहीते विपर्ययेऽ निरासमात्रे यत्नः कार्यो न तु स्वरूपबोधे तस्य स्वयमेव प्रतीतेः। तथापि चेन्न बोद्धुं न शक्नोति तर्हि मूढत्वादुपदेशानर्ह एव स इत्यर्थः। अतः प्रकृते आत्मनो नित्या-परोक्षस्याहं मनुष्य इत्यादिनारोपात्तद्भेदेन प्रतीतेस्तस्य नेति नेति। यतो वाचो निवर्त्तन्त इतीतरनिषेधे कृते स्वप्रकाशस्य नियमेन प्रतीति-सम्भावादयमेवोपदेशप्रकारो नान्य इत्युपसंहरति। तस्मादिति॥ ननु शास्त्रं विनाप्यन्यतो विधिमुखेनात्मावबोधोऽस्तीत्यत आह॥ न ह्यग्ने-रिति॥ शास्त्रैकसमधिगम्यत्वादात्मनो न हेत्वन्तरेण बोधः सम्भवती-त्यर्थः। शास्त्रीयोऽप्यवबोधप्रकारोऽयमेव नान्य इतीतरनिषेधमात्रेणो-परमान्निश्चीयत इत्याह। अत एवेति॥ इत्यनुशासनमिति पदेनार्था-दनुशासनान्तरनिषेधादध्यवसेयमेवेत्याह॥ तथानन्तरमिति॥ तत्त्वमसीत्य-त्रापि तत्पदार्थसामानाधिकरण्येन त्वं पदार्थे कर्तृत्वादिनिषेधेनैव तस्य ब्रह्मत्वबोध इत्याह। तत्त्वमसीति॥ तत् कोन कं पश्येदिति दर्शनक्रिया-कर्मत्वनिषेधादध्यवेद्यतयैवात्मनो ज्ञानमित्याह। यत्र त्वस्येति॥ एव-मात्मापीति वेद्यत्वं निषेधतीति शेषः। तस्मादात्मनः कर्तृत्वादिधर्मवत्तया

पुरुषे ह वा अयमादितो गर्भो भवति।

ऽनन्तरमवाह्यमयमात्मा ब्रह्म सर्व्वानुभूरित्यनुशासनं तत्त्वमसि। यत्र त्वस्य सर्व्वमात्मैवाभूत्तत् केन कं पश्येदित्येवमाद्यपि यावदयमेवं यथोक्तमिममात्मानं न वेत्ति तावदयं वाह्यानित्यदृष्टिलक्षणमुपाधिमात्मत्वेनोपेत्याविद्यया उपाधिधर्म्मानात्मनो मन्यमानो ब्रह्मादिस्तम्बपर्य्यन्तेषु देवतिर्य्यङ्निरयस्थानेषु पुनः पुनरावर्त्तमानोऽविद्याकामकर्म्मवशात् संसरति। स एवं संसरन्नुपात्तदेहेन्द्रियसङ्घातं त्यजति। त्यक्त्वाऽन्यमुपादत्ते। पुनः पुनरेवमेव नदीस्रोतोवज्जन्ममरणप्रवन्धाविच्छेदेन वर्त्तमानः काभिरवस्थाभिर्वर्त्तत इत्येतमर्थं दर्शयन्त्याह श्रुतिः। वैराग्यहेतोरयमेवाविद्या-

---

प्रमाणेन ज्ञातुमशक्यत्वात्तद्धर्म्मत्वप्रतीतेरज्ञानमूलत्वेन भ्रमत्वात् संसारित्वेन प्रतीतस्य वस्तुतो ब्रह्मभावत्वादनेनैव न्यायेनेश्वरस्यापि सर्वज्ञत्वादेरौपाधिकत्वेन भ्रमत्वाद्भेदे मानाभावात्तस्यापि वस्तुतो ब्रह्मभावत्वान्न त्वय आत्मानः किन्त्वात्मैक एवाखण्डैकरस इत्यभिप्रेत्यैवम्भूतस्य कथं संसारप्रतीतिरित्याशङ्ख्यात्मनः संसारस्याज्ञानत औपाधिकत्वमुत्तराध्यायसङ्गत्युपयोगित्याह। यावदयमिति॥ वाह्यानित्यदृष्टिलक्षणमिति प्रत्यगात्मनो वाह्यमन्तःकरणवृत्तिं वृत्तिमतोरभेदादन्तःकरणमित्यर्थः॥ एवमध्यारोपापवादाभ्यामात्मतत्त्वं निरूप्योक्तात्मतत्त्वज्ञाने वैराग्यं हेतुरिति तदर्थं जीवावस्थाः प्रपञ्चयन्नर्थात्तस्य त्वय आवस्था इत्युपक्षिप्तं शरीरत्वयञ्च प्रपञ्चयितुं पञ्चमाध्यायमवतारयन् भूमिकां करोति। स एवमिति॥ यावदयमित्यारभ्य वा उत्तराध्यायस्य भूमिका॥ इदानीमध्यायमवतारयति। स एवमिति॥ इत्येतमर्थमिति जिज्ञासायामवस्थारूपमित्यर्थः। वैराग्यहेतोरिति॥ वैराग्यार्थमित्यर्थः। जीवा-

यदेतद्रेतस्तदेतत् सर्वेभ्यो ऽङ्गेभ्यस्तेजः सम्भृत-

कामकर्म्मवान् यज्ञादिकर्म्म कृत्वा अस्माल्लोकाद्भूमादि-क्रमेण चन्द्रमसमाप्य क्षीणकर्म्मा दृष्ट्यादिक्रमेणेमं लोकं प्राप्यान्नभूतः पुरुषाग्नौ हुतः। तस्मिन् पुरुषे ह वै अयं संसारी रसादिक्रमेणादितः प्रथमं रेतोरूपेण गर्भो भवतीति तदाह। यदेतत् पुरुषे रेतस्तेन रूपेणेति। तच्चैतद्रेतोऽन्नमयस्य पिण्डस्य सर्वेभ्य अङ्गेभ्यो रसादिलक्षणेभ्यस्तेजः साररूपं शरीरस्य सम्भृतं परिनिष्पन्नं तत् पुरुषस्या-

---

वस्थारूपस्य जन्मत्वयस्यात्यन्त बीभत्सरूपत्वात् तद्विचारे वैराग्यं भवतीति भावः। पुरुषे ह वा अयमित्यतेदं शब्दार्थमाह। अयमित्यादिना॥ यो मूर्द्धानं विदार्य्य प्रविश्य स्थितः सोऽयमित्युच्यत इत्यर्थः। यज्ञादीति॥ अथ य इमे ग्राम इष्टापूर्त्तं दत्तमित्युपासते ते धूममभिसम्भवन्तीत्यादिना पञ्चाग्निविद्यायामयमर्थः प्रसिद्ध इत्यर्थः। अन्नभूत इति व्रीह्याद्यन्नसंश्लिष्टः पुरुषाग्नौ हुतः पुरुषेण भक्षित इत्यर्थः॥ तस्मिन्निति येन पुरुषेण भक्षित-स्तस्मिन्नित्यर्थः॥ पुरुषे ह वाऽयं संसारी आदितः प्रथमतः स्त्रीगर्भप्रवेशात् पूर्व्वं गर्भो भवतीति प्रथमसम्भवः। पुरुषे स्त्रियामिव गर्भो न दृश्यते इत्याशङ्क्य भक्षितस्यान्नस्य रसादिक्रमेण रेतोरूपेण परिणामे सति तत्संश्लिष्टस्यापि तथैव रेतः संश्लेषेण रेतोऽभावे सति तेन रूपेण पुरुषस्य शरीरे विद्यमानस्तस्य स गर्भ इत्याह। रसादीति॥ रसादीत्यादिशब्देन शोणितमांसादि गृह्यते। रसादिक्रमेण यदेतत् पुरुषे रेतस्तेन रेतोरूपेण गर्भो भवति। तदाहेति पश्चादन्वयः कार्य्यः॥ ननु तस्य गर्भत्वप्रसिद्धमित्याशङ्क्य स्त्रियैव तस्य पुरुषेण हृतत्वाद्गौण्या वृत्त्या गर्भत्वमिति वक्तुं तदेतदित्यादि विभक्तीत्यन्तं वाक्यम्। तद्व्याचष्टे। तच्चैतदिति॥ रसादिलक्षणेभ्य इति रसादिधातुसमुदायरूपत्वाच्छरीरस्य तेषां तदवयवत्वं चरमधातुत्वाच्च शरीरस्य साररूपत्वमित्यर्थः। आत्मभूतत्वादिति॥

त्मन्येवात्मानं बिभर्त्ति तद्यथा स्त्रियां सिञ्चत्यथै-
तज्जनयति तदस्य प्रथमं जन्म ॥ १ ॥
तत् स्त्रिया आत्मभूयं गच्छति यथा स्वमङ्गं

ऽऽत्मभूतत्वादात्मा। तमात्मानं रेतोरूपेण गर्भीभूत-
मात्मानमात्मन्येव स्वशरीरे एव बिभर्त्ति धारयति। तद्रेतो
यदा यस्मिन् काले भार्य्या ऋतुमती तस्यां योषाऽग्नौ स्त्रियां
सिञ्चति। उपगच्छन्नर्थ तदैतद्रेत आत्मनो गर्भभूतं जनयति
पिता। तस्य पुरुषस्य स्थानान्निर्गमनं रेतःसेककाले रेतोरू-
पेणास्य संसारिणः प्रथमं जन्म प्रथमावस्याभिव्यक्तिः ॥ १ ॥
तदेतदुक्तं पुरस्तादसावात्माऽमुमात्मानमित्यादिना ।
तद्रेतो यस्यां स्त्रियां सिक्तं सत् तस्या आत्मभूयमात्माव्यति-

---

आत्माभिमानविषयशरीरभूतत्वादात्मानं गर्भीभूतं बिभर्त्तीति वक्ष्य-
माणानुषङ्गेण वाक्यं पूरणीयम्॥ उक्तमर्थं श्रुत्यक्षरारूढं करोति।
आत्मनीति ॥ अत आत्मानमित्यस्य न पुनरुक्तिदोषः। एवं पितृशरीर-
रूपमावस्थम्। तत्र रेतोरूपेणावस्थानं चोक्त्वा मातृदेहरूपावस्थं तत्र
गर्भरूपेणावस्थानं च दर्शयितुं पितृशरीरान्निर्गमनरूपं जन्म दर्शयति।
तद्रेत इति ॥ यदेतदुक्तं कालं विशदयति। भार्य्येति ॥ पञ्चाग्निविद्यायां
योषा वाव गौतमाग्निरित्यादिनाऽयमर्थो दर्शित इति वक्तुं योषाग्ना-
वित्युक्तम्। उपगच्छन्निति भार्यां सङ्गच्छन्नित्यर्थः। अस्य रेतोरूपेण
स्थानान्निर्गमनमित्यन्वयः ॥ १ ॥
रेतो भार्य्यायां सिञ्चतीत्यत्र वाक्यान्तरं संवादयति। तदेतदिति ॥
असावात्मा पुरुषोऽमुमात्मानं स्त्रीयं रेतोरूपमात्मानमग्नौ आत्मजे
भार्यारूपाय सङ्गच्छतीत्यर्थः। ननु स्त्रीशरीरे प्रविष्टं पुरुषस्य रेतः स्त्रिया
उपद्रवकारि स्यात् शरीरलग्नबाणवदित्याशङ्क्योक्तं तत् स्त्रिया इत्यादि॥
तदेतदाचष्टे। तद्रेतो यस्यामिति ॥ पिटकाः ब्रणरूपग्रन्थिविशेषाः।

तथा। तस्मादेनां न हिनस्ति सास्यैतमात्मान-मत्र गतं भावयति ॥ २ ॥

सा भावयित्री भावयितव्या भवति तं स्त्रीगर्भं

रेकतां यथा पितुरेवं गच्छति प्राप्नोति यथा स्वमङ्गं स्वनादि तथा तद्वदेव। तस्माद्धेतोरेनां मातरं स गर्भो न हिनस्ति पिटकादिवत्। यस्मात् स्वनादि स्वाङ्गवदात्मभूयं गतं तस्मान्न हिनस्ति न बाधते इत्यर्थः। सा ऽन्तर्वत्नी एवमस्य भर्त्तुरात्मानमन्नात्मन उदरे प्रविष्टं गतं बुध्वा भावयति वर्द्धयति परिपालयति गर्भविरुद्धाशनादिपरिहारमनुकूलाशनाद्युपयोगञ्च कुर्वन्ती ॥ २ ॥

सा भावयित्री वर्द्धयित्री भर्त्तुरात्मनो गर्भभूतस्य भावयितव्या रक्षयितव्या च भर्त्ता भवति। न ह्युपकारप्रत्युपकारमन्तरेण लोके कस्यचित् केनचित् सम्बन्ध उपपद्यते।

तद्वन्न हिनस्तीति व्यतिरेकेण दृष्टान्तः॥ अक्षरार्थमुक्त्वा पिण्डितार्थमाह। यस्मादिति अत्र प्रसङ्गात् स्त्रियाः सावधानेन गर्भरक्षणं कर्त्तव्यमिति विधत्ते। सेति॥ भावयति भावयेदित्यर्थः॥ पालनोपायमाह। गर्भविरुद्धेति॥ २॥

तस्याप्यन्तर्वत्नी रक्षणं विधत्ते। सा भावयित्रीति॥ चशब्दस्य सेत्यत्र सम्बन्धः। सापीत्यर्थः॥ तस्या भावयितव्यत्वे हेतुमाह। न ह्रीति॥ स्त्रीपुरुषयोः परस्परोपकारकत्वमुक्त्वा तयोः पुत्रसाध्यवक्ष्यमाणपुण्यकर्म्मप्रतिनिधिरूपप्रत्युपकारसिद्ध्यर्थं पुत्रं प्रत्युपकारकत्वमाह। तमिति॥ अय इत्यत्रैवशब्दो जन्मनः पूर्वकालं वदति। द्वितीयो जननकालमधिशब्दोऽनन्तरकालं वदतीति व्याचष्टे। प्राग्जन्मन इत्यादिना॥ पूर्वमेवे-

बिभर्त्ति सोऽग्र एव कुमारं जन्मनोऽग्रेऽधिभावयति। स यत् कुमारं जन्मनोऽग्रेऽधिभावयति

तं गर्भं स्त्री ययोक्तेन गर्भधारणविधानेन बिभर्त्ति धारयति प्राग्जन्मनः। स पिता अग्र एव पूर्वमेव कुमारं जातमात्रं जन्मनोऽधूर्ध्वञ्जन्मनो जातं कुमारं जातकर्म्मादिना यङ्गावयति तदात्मानमेव भावयति पितुरात्मैव पुत्ररूपेण जायते। तथा ह्युक्तं पतिर्जायां प्रविशतीत्यादि। तत् किमर्थमात्मानं पुत्ररूपेण जनयित्वा भावयति। उच्यते। एषां लोकानां सन्तत्यै अविच्छेदायेत्यर्थः। विच्छिद्येरन् ह्यीमे लोकाः पुत्रोत्पादनादि यदि न कुर्य्युः। ते च पुत्रोत्पादनादिकर्म्माऽविच्छेदेनैव सन्तता हि प्रबन्धरूपेण वर्त्तन्ते यस्मादिमे लोकास्तस्मात्तदविच्छेदाय तत्कर्त्तव्यं न मोक्षायेत्यर्थः। तदस्य संसारिणः पुंसः

त्यस्य विवरणमाह। जातमात्रमिति॥ जायमानमित्यर्थः। जातकर्म्मादिनेति॥ जन्मनः प्राक् सीमन्तादिना जननकाले सुखनिष्क्रमणार्थं मन्त्रजलप्रोक्षणादिना ऽनन्तरं जातकर्म्मादिनेत्यर्थः। पिता जातकर्म्मादिकं कर्त्तव्यमित्यभिधाय तत् स्तौति। स पितेति॥ प्रविशतीत्यादीति॥ गर्भो भूत्वा स मातरं तस्यां पुनर्नवो भूत्वा दशमे मासि जायत इति मन्त्रशेषः मोक्षप्रकरणे पुत्रोत्पादनस्य विधानात् पुत्रोत्पादनं मोक्षसाधनमित्यभिप्रायेण पृच्छति तत् किमर्थमिति॥ न कर्म्मणा न प्रजयेत्यादिश्रुतेर्मोक्षप्रकरणे पुत्रोत्पादनोक्तिर्वैराग्यार्थेत्यभिप्रेत्य प्रकृतश्रुत्युत्तरमाह। उच्यत इति॥ अत्र लोकशब्देन लोकसाधनीभूताः पुत्रपौत्रादयो गृह्यन्ते। तेषां सन्तत्या इत्यर्थः। पुत्रोत्पादनेनैवोक्तानां लोकानां सन्ततत्वं प्रसिद्धमिति वक्तुमेवं सन्तता होति वाक्यं व्याचष्टे। ते चेति॥ स्वेन पुत्रोत्पादने विधितः कृते सति स्वपुत्रोऽपि तथा तत्पुत्रोऽपि तथे-

आत्मानमेव तद्भावयत्येषां लोकानां सन्तत्या एवं सन्तता ह्यमे लोकास्तदस्य द्वितीयं जन्म ॥ ३ ॥ सोऽस्याऽयमात्मा पुण्येभ्यः कर्म्मभ्यः प्रति-

---

कुमाररूपेण मातुरुदराद्यन्निर्गमनं तद्धेतोरूपापेक्षया द्वितीयं जन्म द्वितीयावस्थाभिव्यक्तिः अस्य पितुः ॥ ३ ॥

सोऽयं पुत्रात्मा पुण्येभ्यः शास्त्रोक्तेभ्यः कर्मभ्यः कर्मनिष्पादनार्थं प्रतिधीयते पितुः स्थाने पिता यत् कर्त्तव्यं तत्करणाय प्रतिनिधीयत इत्यर्थः । तथाच सम्मतिविद्यायां वाजसनेयके । पितानुशिष्टोऽहं ब्रह्माऽहं यज्ञ इत्यादि प्रतिपद्यत इति । अथानन्तरं पुत्रे निवेश्यात्मनो

त्येवं लोकसन्ततिर्भवतीत्यर्थः । पुत्रोत्पादनस्य लोकसन्ततिरेव प्रयोजनमिति वदन्त्या श्रुत्या तस्य मोक्षसाधनत्वं निरस्तमित्याह । न मोक्षायेत्यर्थ इति ॥ एवं प्रसङ्गाद्गर्भधारणादिविधिमुक्त्वा प्रकृतं वैराग्यार्थं द्वितीयं जन्म दर्शयति । तदस्येति ॥ एवं पितृशरीरेऽत्यन्ताशुचौ अत्यन्ताशुचिरेतोरूपेणावस्थानं ततोऽपि निर्गमनं ततो मातुरुदरे मलमूत्राक्रान्ते विष्ठाकृमिवदवस्थानं ततो योनिद्वारा निर्गमनञ्चेत्याद्यत्यन्तं कष्टमित्युक्त्वा जन्मानन्तरमपि न स्वातन्त्र्यम् किन्तु पितृनियोगात्तत्पारतन्त्र्ये सर्वदा कर्म्मानुष्ठातव्यमिति वदन् पुत्रेण कर्त्तव्यं पितुरुपकारान्तरं दर्शयति । सोऽस्येति वाक्यं व्याचष्टे । अस्येति ॥ पितुर्द्वावात्मानौ देहौ । स्वदेहः पुत्रदेहश्चेति ॥ ३ ॥

तत्र पुत्रस्योपयोगमाह । सोऽयमिति ॥ पुत्रस्य प्रतिनिधित्वमन्यत्रापुक्तमित्याह । तथेति ॥ सम्मतिः सम्मदानं स्वकर्त्तव्यस्य पुत्रस्थापनं यत्रोच्यते सा सम्मतिविद्येत्यर्थः । यदा तु प्रौढ्यन्मन्यतते स्वस्य परलोकगमनं निश्चिनोत्यथ पुत्रमाह । त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इति ॥ मया ध्येतव्यं

धीयते । अथास्याऽयमितर आत्मा कृतकृत्यो

भारमस्य पुत्रस्येतरो यः पित्रात्मा कृतकृत्यः कर्त्तव्या-दृणत्वाद्विमुक्तः कृतकर्त्तव्य इत्यर्थः । वयोगतो गतवया जीर्णः सन् प्रैति म्रियते । स इतोऽस्मात् प्रयन्नेव शरीरं परित्यजन्नेव तृणजलूकावदेहान्तरमुपाददानः कर्मचितं पुनर्जायते । तदस्य स्मृत्वा प्रतिपत्तव्यं यत्तृतीयं जन्म ॥ ननु संसरतः पितुः सकाशाद्रेतोरूपेण प्रथमं जन्म । तस्यैव कुमाररूपेण मातुर्द्वितीयं जन्मोक्तम् । तस्यैव तृतीये जन्मनि

ब्रह्म वेदस्त्वं त्वया ऽध्येतव्यम् । मया कर्त्तव्योऽयं यज्ञस्त्वं त्वया कर्त्तव्यः । मया सम्पाद्यो लोकस्त्वं त्वया सम्पाद्य इत्येवं पित्रानुशिष्टः सन् पुत्रोऽहं ब्रह्मोऽहं यज्ञोऽहं लोक इति प्रतिपद्यते । अहं ब्रह्माध्येष्ये यज्ञान् करिष्ये लोकं सम्पादयिष्यामीति स्वीकरोतीत्युक्तमित्यर्थः । अनेन स्वशरीरस्य तृतीयावस्थोक्ता ॥ ननु किमर्थं पुत्रं प्रतिनिदधाति स्वयमेव करोत्वित्याशङ्क्य स्वस्य मरणात् कर्त्तुमशक्तेरित्यभिप्रायेणोक्तं अथास्याऽयमिति । तद्व्याचष्टे । अथेति ॥ एवकारार्थं मध्ये विलम्बाभावं दर्शयति । तृणजलूकेति ॥ तृणजलूका तृणस्यान्तं गत्वा तृणान्तरमाक्रम्यात्मानं देहं पूर्वस्मात् तृणादुपसंहरति पूर्वतृणं मुञ्चति एवमेवायमात्मा देहान्तरं परिगृह्य पूर्वदेहं मुञ्चतीति मध्ये विलम्बाभावः श्रुत्यन्तरे उक्त इत्यर्थः । कर्मचितं देहान्तरमुपाददानः पुनर्जायत इत्यन्वयः । यद्यपि देवयानपित्र्याख्यमार्गाभ्यां गच्छतां लोकान्तर एव शरीरमपरिगृह्य गन्तव्यमुभयव्यामोहात् तत् सिद्धेरिति स्मृतेः । आकाशाच्चन्द्रमसमेव सभो राजेति श्रुतेः । ननु पूर्वदेहत्यागकाल एव तथापि स विद्वानो भवति स विद्वान्नमेवान्ववक्राम्यतीति श्रुतौ वासनामयं भावि शरीरमुत्क्रान्तिकाल एव गृह्णातीत्युक्तत्वात् तदभिप्रायं तृणजलूकानिदर्शनमिदं द्रष्टव्यम् । तदस्येति यन्मृत्वा प्रतिपत्तव्यं तदस्य तृतीयं जन्मेत्यन्वयः । यस्य जन्मद्वयमुक्तं तस्यैव तृतीयं जन्म वक्तव्यम् । औचित्यात् : अन्यथाऽस्य पितुः पूर्व-

वयोगतः प्रैति स इतः प्रयन्नेव पुनर्जायते

वक्तव्ये प्रेतस्य पितुर्यज्जन्म तत्तृतीयमिति कथमुच्यते। नैष दोषः। पितापुत्रयोरैकात्म्यस्य विवक्षितत्वात्। सोऽपि पुत्रः स्वपुत्रे भारं निधायेतः प्रयन्नेव पुनर्जायते यथा पिता। तदन्यत्रोक्तमितरत्रापुक्तमेव भवतीति मन्यते श्रुतिः। पितापुत्रयोरैकात्म्यत्वात्। एवं संसरन्नवस्थाद्वयेण जन्ममरणप्रबन्धारूढः सर्वो लोकः संसारसमुद्रे निपतितः कथ-

---

जन्मद्वयस्यानुक्तत्वेनेदमस्य पितुस्तृतीयं जन्मेत्यन्वयापत्तेरिति शङ्कते। नन्विति॥ प्रेतस्येति म्रियमाणस्येत्यर्थः। यत् कुमारं भावयति आत्मानमेव तद्भावयति सोऽस्यायमात्मेति च पितापुत्रयोरभेदस्योक्तत्वात् पुत्रस्योक्तं जन्मद्वयं पितुरेव। तस्यैव च तृतीयत्वविरोध इत्याह। नैष दोष इति॥ यद्वा पितुर्म्मरणानन्तरं पुनर्जन्मन्युक्ते पुत्रस्याप्येवमेव जन्म ज्ञातुं शक्यत इत्यभिप्रायेण पितुरित्युक्तमित्याह। सोऽपि पुत्र इति॥ यथा पितेत्यनन्तरं ततश्च पुत्रस्यैव तृतीयं जन्मोक्तमिति शेषः। एवञ्च तदस्य तृतीयं जन्मेति वाक्ये तच्छब्देन तत्प्रकारकत्वमुच्यते। अस्येति पुत्र उच्यते। अस्य पुत्रस्य तत्प्रकारकं तृतीयं जन्मेति वाक्यार्थ इति भावः। ननु पर्य्यायद्वयोक्तं जन्म यथा पुत्रगतमेवं तृतीयपर्य्यायोक्तमपि साक्षात् पुत्रगतमेवोच्यते किं तयोरैकात्म्यविवक्षयेत्याद्यपरिहारे दोषमाशङ्क्याह। तदन्यत्रोक्तमिति॥ अयं भावः॥ पुत्रस्य पितरं प्रत्युपकारप्रदर्शनार्थं तत्प्रतिनिधित्वे उक्ते पिता स्वयमेव कर्म्म करोतु किं प्रतिनिधिनेत्याशङ्क्य तत्परिहारार्थं पितुर्म्मरणाभिधानं प्रसक्तमिति मरणानन्तरं वक्तव्यमिति तृतीयं जन्म लाघवार्थं तस्मिन्नेवोक्तमिति॥ इदन्तु जन्मत्रयं सर्वेषां पूर्वेषामस्तीति प्रदर्शयितुञ्च पुत्रे वक्तव्यमपि तृतीयं जन्म पितुर्युक्तमिति पूर्वाध्याये अध्यारोपप्रक-

तदस्य तृतीयं जन्म। तदुक्तमृषिणा ॥ ४ ॥

गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वाः शतं मा पुर आयसीररक्षन्नधः

श्येनो यथा स्वयुक्तमात्मानं विजानाति यस्यां कस्यांश्चिदवस्थायां तदैवमुक्तसर्व्वसंसारबन्धनः कृतकृत्यो भवतीत्येतद्वस्तुतत्त्वमृषिणा मन्त्रेणाप्युक्तमित्याह ॥ ४ ॥

गर्भे मातुर्गर्भाशये एव सन्। त्विति वितर्के। अनेकजन्मान्तरभावनापरिपाकवशादेषां देवानां वागग्न्यादीनां जनिमानि जन्मानि विश्वा विश्वानि सर्व्वाण्यन्ववेदमहमहोऽनुबुद्धवानस्मीत्यर्थः। शतमनेकं वह्नयो मा मां पुर आयसीरायस्यः लोहमय्य इवाऽभेद्यानि शरीराणीत्यभिप्रायः। अरक्षन् रक्षितवत्यः। संसारपाशनिर्ग-

---

रणोक्तभावसंशयत्रयं वैराग्यार्थमिह प्रपञ्च्य तस्मिन्नेवाध्याये तस्य संसारस्य निवर्त्तकत्वेन तदपवादार्थं यत्तत्त्वज्ञानमुक्तं स एवमेवेत्यादिना तत्सफलं प्रपञ्चयितुं तदुक्तमृषिणेत्यादिग्रन्थः ॥ तत्र तच्छब्दार्थमाह। एवमित्यादिना ॥ एतद्विति संसारसमुद्रे पतनं ततस्तत्त्वज्ञानाच्च तन्निवृत्तिरित्येतद्विस्त्यर्थः। आहेति ब्राह्मणमिति शेषः ॥ ४ ॥

भावनेति ॥ आत्मानात्मविवेकभावनेत्यर्थः। वागग्न्यादीनामित्युक्तानि जन्मानि शरीरग्रहणरूपाणि तदुपलक्षितः सर्वोऽपि संसारो वागादिकरणतदधिष्ठातृदेवादिसङ्घातस्य लिङ्गशरीरस्यैव न त्वसङ्गतस्य पारिणो ममेत्यर्थः। अनेन पदार्थविवेकपूर्वकमात्मज्ञानमुक्तम्। यद्वा सर्वज्ञादात्मनः सकाशादेवैषां जन्मानीत्यन्ववेदम्। एतच्जन्महेतुभूतमूलकारणमात्मानं ज्ञातवानस्मीत्यर्थः। यद्यपि गर्भे श्रवणादिज्ञानसामग्री नास्ति तथापि पूर्वजन्मकृतश्रवणादिसामग्रीवशादेव प्रतिबन्धनिवृत्तौ सत्यामपि गर्भे ज्ञानोत्पत्तिः सम्भवतीति भावः ॥ इतः पूर्वका-

श्येनो जवसा निरदीयमिति गर्भ एवैतच्छयानो वामदेव एवमुवाच ॥ ५ ॥

स एवं विद्वानस्माच्छरीरभेदादूर्ध्व उत्क्रम्या-

मनादधोऽधः पश्यन् श्येन इव जालं भित्वा जवसा आत्मज्ञानकृतसामर्थ्येन निरदीयं निर्गतोऽस्मि अहो गर्भ एव शयानो वामदेव ऋषिरेवमुवाचैवैतत् ॥ ५ ॥

स वामदेव ऋषिर्यथोक्तमात्मानमेवं विद्वानस्माच्छरीरभेदाच्छरीरस्याऽविद्यापरिकल्पितस्याद्यस्यवदनिर्भेद्यस्य जननमरणाद्यनेकानर्थशताविष्टशरीरप्रबन्धस्य परमात्मज्ञानाद्यतोपयोगजनितवीर्यकृतभेदाच्छरीरोत्पत्तिबीजाविद्यादिनिमित्तोपमर्दहेतोः शरीरविनाशादित्यर्थः । ऊर्ध्वः

लोनं बन्धं दर्शयति । शतमिति ॥ अभेद्यानीति ॥ तत्त्वज्ञानमन्तरा तत्प्रवाहाविच्छेदादित्यर्थः । अधोऽध इति अधोलोकेष्वेव निकृष्टलोकेष्वेवारब्धन्नित्यर्थः । यद्वा अध इति स्वौतं पदं अधेत्यर्थे व्याचष्टे । अधोऽध इति ॥ अथानन्तरमिदानीमित्यर्थः ॥ मन्त्रदृष्टुरभिप्रायमाह । अहो इति ॥ इदमाश्चर्यं मम संवृत्तमित्यभिप्रायेण मन्त्रदृष्टुनामनिर्देशपूर्वकं तस्य तात्पर्यं वक्तुं गर्भे एवैतदित्यादि ब्राह्मणम् । तद्व्याचष्टे । गर्भ इत्यादिना ॥ एतत्सूत्रब्राह्मणोक्तमर्थजातमेवं मन्त्रोक्तप्रकारेणोवाचेत्यन्वयः ॥ ५ ॥

ज्ञानस्याव्यभिचारितया फलत्वज्ञापनाय वामदेवेन फलं प्राप्तमिति वक्तुं स एवं विद्वानिति वाक्यं व्याचष्टे । स वामदेव इति ॥ शरीरस्य पुनरुत्पत्तिशङ्कां वारयति । शरीरोत्पत्तीति ॥ तत्त्वज्ञानेनाविद्यादिनाशादित्यर्थः । परमार्थभूतः सच्चित्त्वमूर्ध्वशब्दस्योपरितनवाचित्वात् परमार्थवस्तुन एव कदाचिदप्यधोभावरूपनिष्कर्षाभावेन निरङ्कुशोपरितनभावादूर्ध्वशब्दार्थत्वमित्यर्थः । प्रसिद्धं स्वर्गलोकं वारयति ॥ अमुष्मिन्

सुष्मिन् स्वर्गे लोके सर्व्वान् कामानाप्त्वाऽस्रुतः समभवत् समभवत् ॥ ६ ॥ इति चतुर्थः खण्डः ॥ इत्यैतरेयारण्यके पञ्चमोऽध्यायः ॥ उपनिषत्सु द्वितीयोऽध्यायः ॥ ॐ तत्सत् ॥

परमार्थभूतः सन्नधोभावात् संसारादुत्क्रम्य ज्ञानविद्योतितामलसर्व्वात्मभावमापन्नः सन्नसुष्मिन् यथोक्तेऽजरेऽमरेऽस्रुतेऽभये सर्व्वज्ञेऽपूर्वेऽनपरेऽनन्तेऽबाह्ये प्रज्ञानाख्यैकरसे प्रदीपवन्निर्व्वाणमत्यगमत् स्वर्गे लोके स्वस्मिन्नात्मनि स्वे स्वरूपेऽस्रुतः समभवदात्मज्ञानेन पूर्वं प्राप्तकामतया जीवन्नेव सर्व्वान् कामानाप्त्वा इत्यर्थः। द्विर्वचनं सफलस्य सोदाहरणस्यात्मज्ञानस्य परिसमाप्तिप्रदर्शनार्थम् ॥ ६ ॥

इति श्रीशङ्करभगवतः कृतौ ऐतरेयोपनिषद्भाष्ये द्वितीयोऽध्यायः ॥ ॐ तत्सत् ॥

यथोक्त इति ॥ इन्द्रियागोचरत्वेनासुष्मिन्निति निर्देशः। स्वर्गशब्दस्य निरतिशयसुखसामान्यवाचित्वाद्ब्रह्मानन्दस्यैव तथाविधत्वात्तस्यैव सुखस्वर्गत्वम्। वैशेषिकस्य तु स्वर्गत्वमापेक्षिकमित्यर्थः। उक्तस्य स्वर्गस्य ब्रह्मरूपस्य स्वस्य द्वैदमाशङ्क्याह। स्वस्मिन्निति ॥ आत्मशब्दस्यान्तःकरणाद्यर्थत्वं वारयति। स्वे स्वरूप इति ॥ अस्मिन् स्वर्गे मर्त्यदेहादिभावं विहाय स्वात्मभावेनैव स्थित इत्याह। अस्रुत इति ॥ उक्तस्वर्गलोके स्वर्गकामावाप्तिरिति भ्रमं वारयति। पूर्वमिति ॥ जीवन्मुक्तिदशायामाप्तकामतया सर्व्वात्मत्वेनेत्यर्थः। सोदाहरणस्येत्युदाहरणं वामदेव इत्यर्थः ॥ ६ ॥ इति श्रीमदानन्दज्ञानविरचितायामैतरेयोपनिषद्भाष्यटीकायां द्वितीयोऽध्यायः ॥ ॐ तत्सत् ॥

हरिः ॐ ॥

कोऽयमात्मेति वयमुपास्महे

ॐ ॥ ब्रह्मविद्यासाधनकृतसर्वात्मभावफलावाप्तिं वामदेवाद्याचार्यपरम्परया श्रुत्याऽवद्योत्यमानां ब्रह्मवित्परिषद्यत्यन्तप्रसिद्धामुपलभमाना मुमुक्षवो ब्राह्मणा अधुनातना ब्रह्म जिज्ञासवो नित्यात् साधनलक्षणात् संसारादाजीवभावाद्याद्यत्नवो विचारयन्तोऽन्योन्यं पृच्छन्ति कथं यं न्वात्मानमयमात्मेति साक्षाद्वयमुपास्महे कः स आत्मेति। यद्वात्मानमयमात्मेति साक्षादुपासीनो वामदेवोऽवदत्

॥ ओं॥ पूर्वस्मिन्नध्याये जन्मत्रयनिरूपणेन वैराग्यं निरूपितं ज्ञानोत्पत्त्यर्थम्। न च पदार्थशोधनं विना वैराग्यमात्रेण ज्ञानोत्पत्तिरिति पदार्थशोधनपूर्वकं वाक्यार्थं कथयितुं तृतीयोऽध्याय इत्यभिप्रेत्य पदार्थशोधनेऽधिकारिणं दर्शयन् वाक्यमवतारयति। ब्रह्मविद्येति॥ वामदेवाद्याचार्येति आदिशब्देन तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवदित्यादिना उक्ता देवादयो गृह्यन्ते। अधुनातनेति पूर्वोक्तरीत्या वैराग्योत्पत्त्यर्थः। आजीवभावादिति संसारस्य हेतुभूताद्विद्यातत्कार्येष्वात्मभावसहिताद्यावर्त्तयितुं संसारं परित्यक्तुमिच्छन्त इत्यर्थः॥ विचारप्रकारमेव वाक्यान्वयेन स्पष्टीकर्तुं पृच्छन्ति। कथमिति॥ नन्वयमात्मेति विशेषतो निश्चये स क इति प्रश्नानुपपत्तिः। तद्विचारेण वा न किञ्चित् प्रयोजनमित्याशङ्क्याह आत्मानं विशिनष्टि। यश्चेति॥ उपास्महे उपासितुं प्रवृत्ता इत्यर्थः। वामदेवोऽयमात्मानमुपास्याऽतोऽभवद्वयमपि तमात्मानमुपासितुं प्रवृत्ताः॥ स क इति प्रश्नार्थ इत्यर्थः। उपासनं नामोपासीत्यैक्यं तेनैव निरूपचरितसामीप्यत्वादैक्येनापरोक्षीकृत्यासनं तद्रूपेणावस्थानं यत्तदुच्यते। यद्वाऽहं सुखीत्यादिव्यवहारेषु तमेव वयमुपास्महे तमेवात्मत्वेन स्वीकृत्य स्थिताः। अनात्मनोऽहमिति

कतरः स आत्मा ।

समभवत् तमेव वयमप्युपास्महे को नु खलु स आत्मेति । एवं जिज्ञासापूर्वमन्योन्यं पृच्छतामतिक्रान्तविशेषविषयस्मृतिसंस्कारजनिता स्मृतिरजायत । तं प्रपदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषं स एतमेव सीमानं विदार्य्य तया द्वारा प्रापद्यत एतमेव पुरुषम् । द्वे ब्रह्मणी इतरेतरप्रातिकूल्येन प्रतिपन्ने इति । ते चाऽस्य पिण्डस्यात्मभूते । तयोर-

---

प्रतीत्यनुपपत्तेः । स आत्मा क इति विचारार्थः । न चायमात्मेति निश्चये विचारायोगः । तस्यैव कार्यकरणसङ्घीर्णत्वेन विचारोपपत्तेरिति । ननु भूतानां व्याकरणार्थं यः प्रविष्टः स एवात्मेति निर्धारणसम्भवाद्विचारानुपपत्तिरित्याशङ्क्यैवमपि द्वयोः प्रविष्टत्वेन स्मर्यमाणत्वान्न निर्धारणमिति वक्तुं द्वयोः प्रविष्टत्वं स्मृतमित्याह । एवं जिज्ञासेति ॥ अतिक्रान्तेति अतिक्रान्तौ पूर्वसृष्टौ यौ विशेषौ देहे प्रविष्टौ प्राणात्मानौ तद्विषया स्मृतिजन्याऽनुभवजन्यसंस्कारजनिता स्मृतिरित्यर्थः ॥ तामेव स्मृतिं स्वरूपतो दर्शयति । तं प्रपदाभ्यामिति ॥ तमिमं पुरुषं पुरुषशरीरं प्रपदाभ्यां पादाग्राभ्यां ब्रह्मा परब्रह्मरूपः प्राणः प्रविष्ट इत्यर्थः ॥ अन्यस्य प्रवेशे श्रुतिमाह । स एतमिति ॥ श्रुतिभ्यां लब्धमर्थमाह । एतमेवेति ॥ अत्रेति श्रुतिभ्यामित्यध्याहृत्य इति श्रुतिभ्यामितरेतरप्रातिकूल्येनेतरेतराभिमुखतया एतमेव पुरुषशरीरं प्रतिपन्ने प्रविष्टे द्वे ब्रह्मणी वेदितव्य इति वाक्यमिति स्मृतिरजायतेत्यन्वयः । न त्वेतमेव पुरुषं ब्रह्म ततसमपश्यदिति वाक्यम् । द्वे ब्रह्मणी इत्यनेन द्वे ब्रह्मणी वेदितव्ये इति वाक्यञ्च द्वयोः प्रवेशे मानतयोपन्यस्तमिति श्रमितव्यम् । आद्यवाक्ये द्वयोः प्रवेशाप्रतीतेः । द्वितीये च शब्दब्रह्म परब्रह्मणोरभिधानेन तयोर्द्वयोः प्रवेशे मानत्वायोगादिति । तथापि तयोर्द्वयोः कथमात्मत्वमाशङ्क्येत आह । इतीति ॥ तयोरन्यतरेणापि विना शरीरस्थित्य-

येन वा रूपं पश्यति येन वा शब्दं शृणोति येन

न्यतर आत्मोपास्यो भवितुमर्हति । योऽत्रोपास्यः कतरो नु स आत्मेति विशेषनिर्धारणार्थं पुनरन्योन्यं पप्रच्छुर्विचारयन्तः। पुनस्तेषां विचारयतां विशेषविचारणासदविषया मतिरभूत् । कथं ह्येवस्तुन्यस्मिन् पिण्डे उपलभ्येते अनेकभेदभिन्नेन करणेन । येनोपलभ्यते यश्चैक उपलभ्यते करणान्तरोपलब्धविषयस्मृतिसन्धानात् । तत्र न तावद्येनोपलभ्यते स आत्मा भवितुमर्हति । केन पुनरुपलभ्यत इति । उच्यते । येन वा चक्षुषा रूपं पश्यति येन

भावात् तयोरात्मत्वशङ्केत्यर्थः ॥ एवं विचारापेक्षितामात्मद्वयस्मृतिसङ्गं विचारमाह । तयोरन्यतर इति ॥ आत्मा वा इदमेक एवेत्येकस्यैव ज्ञेयत्वोपक्रमाद्द्वयोरुपास्यत्वमित्यर्थः ॥ कः स आत्मेति य उपास्य आत्मा स क इत्यन्वयः । प्रपच्छुरिति कतरः स आत्मेति वाक्येनेति शेषः । एवं विचारे क्रियमाणेऽतिपरिशुद्धान्तःकरणत्वात् तेषां प्रपदाभ्यां प्रपन्ने करणत्वेनानात्मत्वनिश्चयो मूढां प्रविष्ट उपलब्धत्वेनात्मत्वनिश्चयश्चाभूदित्याह । पुनरित्यादिना ॥ विशेषेति विचारणासदप्राणात्मद्वयविषया एकस्मिन् करणत्वेनापरस्मिन्नुपलब्धृत्वेन प्रकारेण विशेषरूपा मतिरजायतेत्यर्थः ॥ ननु द्वयोः सत्त्वे इयं विशेषमतिः स्यात् तदेव नास्तीति शङ्कते । कथमिति ॥ चक्षुषा पश्यामीत्यादिप्रकारेण द्वयोः प्रतीतेर्नैवमित्याह । द्वे इति ॥ येनोपलभ्यते यश्चोपलभते ते द्वे उपलब्धिकर्तृकरणे वस्तुन्युपलभ्येते इत्यन्वयः ॥ तत्र किं करणमित्यत आह । अनेकेति ॥ चक्षुःश्रोत्राद्यनेकभेदभिन्नेनेत्यर्थः । अनेन यदनेकात्मकचक्षुरादिकरणसङ्घातात्मकं प्राणस्वरूपं तत्संहतत्वात् परार्थमिति परशेषत्वेन करणमित्युक्तम् । उपलब्धुरित्येकात्मकत्वाभावान्न परार्थत्वेन शेषत्वम् ।

वा गन्धानाजिघ्रति येन वाचं व्याकरोति येन वा स्वादु चास्वादु च विजानाति ॥ १ ॥

वा शृणोति श्रोत्रेण शब्दं येन वा घ्राणभूतेन गन्धानाजिघ्रति येन वाक्करणभूतेन वाचं नामाख्यिकां व्याकरोति गौरश्व इत्येवमाद्यां साध्वसाध्विति च। येन वा जिह्वाभूतेन स्वादु चास्वादु च विजानातीति । १ ॥

किन्तु शेषित्वमेवेति वक्तुमेक इत्युक्तम्। अनेन करणस्य परार्थत्वं परं शेषिणमन्तरानुपपन्नं सत् परं व्यतिरिक्तमुपलब्धारं गमयतीति तस्मिन्नपि तत्प्रमाणमित्युक्तम्। इदानीं करणानामेवोपलब्धृत्वं तद्व्यतिरिक्त- उपलब्धा नास्तीति वदन्तं नास्तिकं प्रति प्रमाणान्तरमाह। करणान्तरेति॥ पूर्वं चक्षुषा रूपं दृष्ट्वा पश्चादुद्भूतचक्षुः स्मृतिरूपमद्राक्षमिति। तथा योऽहमद्राक्षं स एवेदानीं स्पृशामीति प्रतिसन्दधाति। तदुभयव्यतिरिक्तोपलब्धुरभावेन स्यात् अन्यानुभूतेऽन्यस्य स्मृतिसन्धानयोरदर्शनादित्यर्थः एवमनेकात्मकस्य करणत्वसङ्गा तत एव तस्मात्मत्वं नास्तीत्याह। तत्र न तावदिति। तयोर्मध्य इत्यर्थः। अर्हतीत्यनन्तरं किन्तु परिशेषादुपलब्धाऽऽत्मा भवितुमर्हतीति वक्ष्यमाणान्वयेन वाक्यं पूरणीयम्॥ एवमुपपन्नार्थं तमर्थं स्वयमवरारूढं कर्तुं पृच्छति। केन पुनरिति॥ श्रुत्वारूढं करोति। उच्यत इति। येनेति तृतीयया करणत्वं चक्षुरादेरुक्तमित्यर्थः॥ वाक्करणेति वाग्रूपकरणेत्यर्थः। वाचमिति करणं नोच्यते। तस्य येनेत्यनेनोक्तत्वात्। किन्तु वक्तव्यमुच्यत इत्याह। नामाख्यिकामिति॥ साध्विति गौरितीदं नाम साधु गावीति नामाख्यासाध्विति व्याकरोति। व्याकरणेन व्यक्तीकरोतीत्यर्थः॥ ननु चक्षुरादीनां करणत्वेऽपि प्रपदाभ्यां प्रविष्टस्य प्राणस्य करणत्वे किमायातमित्याशङ्कते। किं पुनस्तदिति॥ तत्र प्राणस्यैव करणत्वं वक्तुं तावत् हृदयं मनःशब्दवाच्यस्य चक्षुरादिभेदभिन्नत्वमाह। उच्यत इति॥ यदेतद्धृदयमित्यत्र यच्छब्दार्थमाह।। यदुक्तमिति॥ रेत इति सारभूतं कार्यमित्यर्थः। प्रजानां

यदेतद्हृदयं मनश्चैतत्

किं पुनस्तदेकमनेकधा भिन्नं करणमित्युच्यते। यदुक्तं पुरस्तात् प्रजानां रेतो हृदयं हृदयस्थं रेतो मनो मनसा सृष्टा आपश्च वरुणश्च। हृदयान्मनो मनसश्चन्द्रमा तदेवैतद्हृदयं मनश्च एकमेतदनेकधा। एतेनान्तःकरणेनैकेन चक्षुर्भूतेन रूपं पश्यति श्रोत्रभूतेन शृणोति घ्राणभूतेन जिघ्रति वाग्भूतेन वदति जिह्वाभूतेन रसयति स्वेनैव विकल्पनारूपेण मनसा विकल्पयति हृदयरूपेणाध्यवस्यति। तस्मात् सर्वकरणविषयव्यापारकमेकमिदं करणं सर्वोपलब्ध्यर्थमुपलब्धुः। तथा च कौषीतकीनां प्रज्ञया वाचं समारुह्य वाचा सर्वाणि नामान्याप्नोति प्रज्ञया चक्षुः समा-

---

रेतो हृदयमित्यादिषु मनसश्चन्द्रमा इत्यन्तासु श्रुतिषु यदुक्तं हृदयं मनश्चेति तदेवैतत् त्वया दृष्टं करणमित्यर्थः। एतदेवैकमेव सच्चक्षुरादिभेदेनानेकधा भूतमिति आतपे न चक्षुरादिना दर्शनादिक्रियां करोति सङ्घातात्मकः पुरुषः। तच्चक्षुरादिकं प्रजानं रेतो हृदयमित्यादिषु मनसश्चन्द्रमा इत्यन्तासु श्रुतिषु यदुक्तं हृदयं मनश्चेति करणं तदेतदेवैकं सदनेकधा भिन्नञ्चेति श्रुतिगतयेनेवेति तृतीयान्तं यदिति प्रथमान्तं यच्छब्दस्य चान्वयो दर्शितः॥ एकस्येवानेकात्मत्व विषयति॥ एतेनेत्यादिना॥ सर्वकरणेति सर्वाणि करणानि विषयाश्च व्यापारो यस्येति विग्रहः॥ करणानां विषयाणाञ्च हृदयशब्दवाच्यबुद्धिव्यापारकत्वे श्रुतिमाह। तथा चेति॥ प्रज्ञया चिदात्मा सयुक्तया बुद्ध्या वाचं करणं समारुह्य बुद्धेर्वागात्मना परिणामे सति तद्बुद्धिद्वारा स्वयमध्यात्मा वागभिमानी भूत्वा अनन्तरं वाचोऽपि बुद्धिव्यापाररूपाया नामात्मना वक्तव्यं शब्दरूपेण परिणामे सति वाचा वाग्द्वार

रुच्य चक्षुषा सर्वाणि रूपाण्याप्नोतीत्यादि। वाजसने-यके च। मनसा ह्येव पश्यति मनसा शृणोति हृदयेन हि रूपाणि जानातीत्यादि। तस्माद्धृदयमनोवाच्यस्य सर्वोपल-ब्धिकरणत्वं प्रसिद्धम्। तदात्मकश्च प्राणो यो वै प्राणः सा प्रज्ञा या वै प्रज्ञा स प्राण इति ब्राह्मणम्। करणसंहतिरूपश्च प्राण इत्यवोचाम प्राणसंवादादौ। तस्मात् यत्प्रज्ञां प्रापद्यत ब्रह्मैतदुपलब्धिकरणत्वेन गुणभूतत्वान्नैतद्वस्तु ब्रह्मोपास्या-त्मा भवितुमर्हति। परिशेषाद्यस्योपलब्धुरुपलब्ध्यर्थमेतस्य

सर्वाणि नामान्याप्नोति। तत् स्मरणात्मना स्वयमपि वर्त्तत इति त्यर्थः। एवं प्रज्ञया चक्षुरित्यादिष्वप्यर्थो द्रष्टव्यः। अत्र वृद्धेर्वागाद्या-त्मना परिणामो वागादेश्च नामाद्यात्मना परिणाम उक्त इत्यर्थः। मनसा ह्येष पश्यतीत्यत्र मनसः साक्षाद्दर्शनादिकरणत्वायोगाच्चक्षुरादि-भावमापन्नस्य दर्शनादिकरणमिति भावः। एवं हृदयेन ह्येवेत्यत्रापि द्रष्टव्यम् आदिशब्देन हृदये ह्येव रूपाणि ग्रथितानि भवन्तीति रूपाणां हृदयग्रथितब्रह्मात्मकत्वसूक्तं सङ्ग्राह्यम्॥ एवं हृदयस्य सर्वकरणात्मत्व-सूक्त्वा इदानीं तस्य प्राणात्मकत्वमाह। तदात्मकश्चेति॥ एवं हृदयमनोद्वारा प्राणस्य सर्वकरणात्मकत्वसूक्त्वा साक्षादेव प्राणस्य तदाह। करणसंह तीति॥ तव वयं स्मः न शक्ष्यामस्त्वदृते जीवितुं इतरे चक्षुरादयः प्राणा इत्येवाख्यायन्त इत्यादि प्राणसंवादस्थवचनबलात् करण संहतिरूपत्वं करणसमूहरूपत्वं प्राणस्यावगम्यत इत्यर्थः। आदि-शब्देन संवर्गविद्यादिगतं प्राणमेव वागप्येति॥ प्राणं चक्षुरिति प्राणं श्रोत्रं प्राणं मनः स यदा प्रतिबुध्यते प्राणादधि पुनर्जायत इत्याद्यु-च्यते॥ करणस्यानात्मत्वसूक्तमुपसंहरति। तस्मादिति॥ ब्रह्मेति ब्रह्म-त्वेनोपास्यो ज्ञातव्य आत्मेत्यर्थः। तर्हि कस्तथा ज्ञातव्य इत्यत आह। परिशेषादिति॥ वक्ष्यमाणा इति सज्ज्ञानमित्यादिना वक्ष्यमाणा

सज्ज्ञानमाज्ञानं विज्ञानं प्रज्ञानं

हृदयमनोरूपस्य करणस्य वृत्तयो वक्ष्यमाणाः स उपलब्धोपास्य आत्मा नो भवितुमर्हतीति निश्चयं कृतवन्तः। तदन्तःकरणोपाधिस्थस्योपलब्धुः प्रज्ञानरूपस्य ब्रह्मण उपलब्धार्था या अन्तःकरणवृत्तयो बाह्यान्तर्वर्त्तिविषयविषयास्ता इमा उच्यन्ते। सज्ज्ञानं सज्ज्ञप्तिश्चेतनभावः। आज्ञानमाज्ञप्तिरीश्वरभावः। विज्ञानं कलादिपरिज्ञानम्।

दृत्यर्थः॥ येन वा पश्यतीत्यादिमनश्चैतदित्यन्तं प्राणस्य करणत्वेनानात्मत्वार्थमित्युक्त्वा सज्ज्ञानमित्यादि वश दृत्यन्तमन्तःकरणवृत्तिद्वारा तद्व्यतिरिक्तमुपलब्धारं दर्शयितुमित्याह। तदन्तःकरणेति॥ निर्विशेषस्य कथं वृत्तिविषयत्वं अन्यथा कथं तदुपलब्ध्यर्थता तासां स्यादत आह। बाह्यान्तर्वर्त्तिविषयेति॥ तर्हि तासामन्यविषयत्वे ततो बाह्यान्तर्विषयप्रतीतिरेव स्यान्नात्मन दृत्यत आह। उपलब्धुरुपलब्ध्यर्था दृति॥ निर्विशेषत्वेनाविषयत्वेन चैतस्य साक्षादि दन्तया ज्ञानासम्भवेऽपि सज्ज्ञानाद्यन्तःकरणवृत्तिसाक्षितया विषयत्वेनैव तस्योपलब्धिः सम्भवतीत्यर्थः। अविषयत्वार्थं प्रज्ञानरूपस्येति विशेषणम्। प्रकृष्टा ज्ञप्तिः प्रज्ञप्तिः स्वप्रकाशचैतन्यं तस्य विषयत्वे स्वप्रकाशत्वव्याहृतिरित्यर्थः। ब्रह्मण दृति विशेषणं निर्विशेषत्वार्थं। सविशेषत्वे हि तस्य परिच्छेदेन ब्रह्मत्वं न स्यादित्यर्थः॥ नन्वसङ्गस्य कथमन्तःकरणवृत्तिसम्बन्धः स्यादत आह। अन्तःकरणोपाधिस्थस्येति॥ असङ्गस्याप्यन्तःकरणप्रतिबिम्बद्वारा तद्वृत्तिसम्बन्ध इत्यर्थः। चेतनभाव इति यया वृत्त्याचेतन इत्युच्यते जन्तु सा वृत्तिः सर्वदा सर्वशरीरव्यापिनीसज्ज्ञानमित्यर्थः। कलादिपरिज्ञानं चतुःषष्टिकलादिजन्यं लौकिकं ज्ञानमित्यर्थः॥ प्रज्ञतेति तात्कालिकप्रतिभेत्यर्थः॥ यद्योत्तम्भनं भवति सा धृतिरित्यन्वयः॥ शरीरादुत्तम्भकस्य वृत्ति-

मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिः सङ्कल्पः क्रतुरसुः कामो वश इति । सर्वाण्येवै

प्रज्ञानं प्रज्ञप्तिः प्रज्ञता । मेधा ग्रन्थधारणे सामर्थ्यम् । दृष्टिरिन्द्रियद्वारा सर्वविषयोपलब्धिः । धृतिर्धारणं अवसन्नानां शरीरेन्द्रियाणां ययोत्तम्भनं भवति । धृत्या शरीरमुद्वहन्तीति हि वदन्ति । मतिर्मननम् । मनीषा तत्त्वस्वातन्त्र्यम् । जूतिश्चेतसो रुजादिदुःखित्वभावः । स्मृतिः स्मरणम् । सङ्कल्पः शुक्लकृष्णादिभावेन सङ्कल्पनं रूपादीनाम् । क्रतुरध्यवसायः । असुः प्राणनादिजीवनक्रियानिमित्ता वृत्तिः । कामोऽसंनिहितविषयाकाङ्क्षा तृष्णा । वशः

विशेषस्य धृतित्वे लौकिकं व्यवहारं मानमाह । धृत्येति ॥ तत्र स्वातन्त्र्यम् । मनस ईषा मनीषेति व्युत्पत्तेरित्यर्थः । रुजादिदुःखित्वभाव इति रोगादिजन्यदुःखित्वप्राप्तिरित्यर्थः । सङ्कल्पनमिति सामान्येन प्रतिपन्नानां रूपादीनां शुक्लादिरूपेण सम्यक् कल्पनमित्यर्थः । जीवनक्रियेति जीवनयोनिप्रयत्न इत्यर्थः । स्त्रीव्यतिकरेति स्त्रीसम्पर्केत्यर्थः ॥ इतिशब्दस्य प्रदर्शनार्थत्वमाह । इत्येवमाद्या इति ॥ एवमाद्या वृत्तयः प्रज्ञानस्य नामधेयानि भवन्तीत्युत्तरेणान्वयः । अत्र प्रज्ञानशब्देन पूर्ववत्प्रज्ञता वृत्तिरूपा नोच्यते तस्याः सञ्ज्ञानादिनामवत्त्वानुपपत्तेः किन्तु शुद्धचैतन्यमुच्यते इत्याह । प्रज्ञप्तिमात्रस्येति ॥ नन्वन्तःकरणवृत्तीनां शब्दरूपत्वाभावात् कथं प्रज्ञाननामधेयत्वमित्याशङ्क्य नामधेयस्य नाम्नि अर्थोपलब्धिहेतुत्वात् सञ्ज्ञानादिवृत्तीनामपि प्रज्ञानोपलब्धिहेतुत्वात्तेन गुणेन तन्नामधेयत्वमुपचारादुच्यते न मुख्यवृत्त्येत्याह उपलब्ध्युपलब्ध्यर्थत्वादिति ॥ उपलब्ध्युपलब्ध्यर्थत्वं वा कथमित्याशङ्क्य तदुपाधित्वादाह । श्रुतेति ॥ यत उपाधिभूता अत उपलब्ध्यर्था । अतो गौण्या वृत्त्या नामधेयानि सम्भवन्तीत्यर्थः । यद्वा श्रुतौ सञ्ज्ञानादिशब्दैर्न वृत्तय उच्यन्ते किन्तु सञ्-

तानि प्रज्ञानस्य नामधेयानि भवन्ति ॥ २ ॥

स्त्रीव्यतिकराद्यभिलाष इत्येवमाद्या अन्तःकरणवृत्तयः। प्रज्ञप्तिमात्रस्योपलब्ध्युपलब्ध्यर्थत्वात् शुद्धप्रज्ञानरूपस्य ब्रह्मणो नामरूपस्य ब्रह्मण उपाधिभूताः। तदुपाधिजनितगुणनामधेयानि सञ्ज्ञादीनि सर्व्याण्येवैतानि प्रज्ञप्तिमात्रस्य प्रज्ञानस्य नामधेयानि भवन्ति न स्वतः

ज्ञानादिशब्दा एव लक्षणयाऽभिधीयन्ते गास्तङ्कारयतीत्यत्रैव। तथा च सञ्ज्ञानादिशब्दाः सञ्ज्ञानादिवृत्तिविशिष्टप्रज्ञानस्य नामधेयानि भवन्ति तद्वारा शुद्धस्यैव प्रज्ञानस्य लक्षणया नामधेयानीत्याह। तदुपाधिजनितेति ॥ वृत्त्युपाधिजनितो गुणः प्रवृत्त्युपचितरूपं तन्नामधेयानि सन्ति सर्व्याण्येवैतानि सञ्ज्ञानादीनि सञ्ज्ञानादिशब्दाः प्रज्ञानस्यैव नामधेयानि भवन्तीत्यन्वयः। प्राणन्नेवेति प्राणनक्रियां कुर्वन् प्राणे वाम भवतीत्यनेन प्राणनवृत्त्युपाधिकमात्मनः प्राणनामत्वमुक्तम्। यद्यपि सञ्ज्ञानादि नाम्नां तत्र नोपाधिकत्वमुक्तं तथापि तुल्यन्यायतया एतेषामप्यौपाधिकत्वमुक्तप्रायमिति भावः। एतदुक्तं भवति सञ्ज्ञानादिशब्दाः प्रकाशात्मकवस्तुवाचिनः। न च साक्षादन्तःकरणवृत्तीनां जडानां प्रकाशात्मकत्वं सम्भवतीति प्रकाशात्मकवस्तुन्यध्यासादेवतासां प्रकाशात्मकत्वमिति कल्पयन्तोऽधिष्ठानभूतमतिरिक्तं प्रकाशं गमयन्तः पर्य्यवसानगत्या प्रकाशात्मनः प्रज्ञानस्यैव नामधेयानीत्यत्र सञ्ज्ञानादीनामनित्यत्वेन जडानां वृत्तीनां प्रकाशात्मकवस्तुवाचकसञ्ज्ञानादिनामकत्वानुपपत्तेः। तद्व्यतिरिक्तः कश्चित्प्रकाशरूपोऽस्तीत्युक्तम्। तथा सञ्ज्ञानादिशब्दवाच्यत्वोक्त्या। तत्प्रज्ञानं विज्ञानं प्रज्ञानमित्यत्रैव प्राज्ञतारूपवृत्तिर्न भवतीत्युक्तम्। तदनेकत्वेन तत्तद्वृत्तिगतानां तत्तत्तन्नामकत्वेन सर्वनामकत्वानुपपत्तेः। प्रज्ञानस्यैत्येकवचनानुपपत्तेश्च। अतो येन वा पश्यतीत्यादिना

एष ब्रह्मैष इन्द्र एष प्रजापतिरेते सर्वे देवा इमानि च पञ्च महाभूतानि पृथिवी वायुरा-

---

साक्षात् । तथा चोक्तं प्राणश्चेव प्राणो नाम भवतीत्यादि ॥ २ ॥

स एष प्रज्ञानरूप आत्मा ब्रह्म। अपरं सर्वशरीरस्थप्राणप्रज्ञात्मान्तःकरणोपाधिष्वनुप्रविष्टो जलभेदगतसूर्यप्रतिबिम्बवद्धिरण्यगर्भः प्राणः प्रज्ञात्मा । एष एवेन्द्र इन्द्रगुणाद् देवराजो वा । एषः प्रजापतिर्यः प्रथमजः शरीरी । यतो मुखादिनिर्भेदद्वारेणाग्न्यादयो लोकपाला जाताः । सप्रजो वा एषः प्रजापतिरेष एव येऽप्येते अग्न्यादयः

नामधेयानि भवतोत्यन्तेन सर्वकरणतद्वृत्तिव्यतिरिक्तः स्वप्रकाशात्मकः सर्वसाक्षी सर्वदृत्यनुगत एक आत्मा बोधितः ॥ २ ॥

एवं बोधितस्यात्मनः प्रति शरीरं नानात्वं वारयितुं स एष ब्रह्मेत्यादिवाक्यं तद्व्याचष्टे । स एष इत्यादिना ॥ एष इत्यस्यार्थमाह । प्रज्ञानरूप आत्मेति ॥ प्रज्ञानं ब्रह्मेति मुख्यब्रह्मतायां वक्ष्यमाणत्वादि । मूर्द्धद्वाराऽनुप्रविष्टः समष्टिलिङ्गशरीराभिमानी हिरण्यगर्भः प्राणः ॥ प्रज्ञानात्मादिशब्दैस्तत्र तत्रोक्तमपरं ब्रह्मोच्यत इत्याह । अपरमित्यादिना ॥ सर्वशरीरेत्यनेन समष्टिस्थूलशरीरमुच्यते अन्तःकरणोपाधिषु । अनेनापि समष्टिलिङ्गशरीरमुक्तम् । आद्याभ्यां प्रज्ञात्मशब्दाभ्यां क्रियाशक्तिज्ञानशक्तिमत्त्वमुक्तम् । द्वितीयाभ्यां तु तत्र तत्र तथा निर्दिष्ट इतुग्रहात इत्यपौनरुक्त्यम् । ननूक्तं प्रज्ञानात्मैवापरं ब्रह्मेत्यत्र किं प्रमाणमित्याशङ्क्य प्रवेशवाक्यं प्रमाणमिति वक्तुमेष इन्द्र इति वाक्यमिति व्याचष्टे । एष इति ॥ गुणादिति इदमदर्शमिति स्तुत्युक्तगुणयोगादित्यर्थः । प्रवेशवाक्ये प्रविष्टस्येन्द्रत्वाभिधानाद्धिरण्यगर्भस्यापीन्द्रत्वोक्तौ प्रविष्टत्वप्रत्यभिज्ञानात् प्रवेष्टुरेव प्रविष्टसर्वरूपत्वादभेदः सिद्ध्यतीति भावः । न तु परमैश्वर्यगुणयोगात् प्रज्ञानात्मा इन्द्रः परमेश्वर इत्यर्थो ग्राह्यः । प्रज्ञानात्मनः परमेश्वराभेदस्य प्रज्ञानं ब्रह्मेत्यनेन वक्ष्यमाणत्वात् परमेश्वरगुणवत्त्वप्रतिपादनस्य च प्रकरणविरोधात् । नच हिरण्यगर्भाद्यात्मत्ववन्मायाविशिष्टपरमेश्वर त्वमनेनोच्यत इति वाच्यम् । तथा सति भाष्योक्तगुणादिति हेतुवचनानन्वयादेष ब्रह्मैष इन्द्र एष

काश आपो ज्योतींषीत्येतानीमानि च क्षुद्रमि-
श्राणीव । बीजानीतराणि चेतराणि चाण्ड-

सर्वे देवा एष एव । इमानि च सर्वशरीरोपादान-
भूतानि पञ्च पृथिव्यादीनि महाभूतान्यन्नान्नादत्वलक्षणा-
न्येतानि । किञ्चेमानि च क्षुद्रैरल्पकैर्मिश्राणि सर्पादीनि ।
इवशब्दोऽनर्थकः । बीजानि कारणानि चेतराणि चेतराणि
च द्वैराश्यत्वेन निर्दिश्यमानानि । कानि तानीत्युच्यन्ते ।
अण्डजानि पक्ष्यादीनि । जारुजानि जरायुजानि मनुष्या-
दीनि । स्वेदजानि यूकादीनि । उद्भिज्जानि च वृक्षादीनि ।
अश्वाः गावः मनुष्याः हस्तिनः अन्यच्च यत्किञ्चिदं प्रा-

प्रजापतिरिति पूर्वोत्तरपर्यायेष्विव गुणयोगाभावेऽप्युपपत्तेश्चेत्यस्य
व्याख्यानस्य क्लिष्टत्वं मनसि निधायार्थान्तरमाह । देवराजो वेति ॥
प्रजापतेर्हिरण्यगर्भाङ्गेदमाह । यः प्रथमज इति ॥ स लिङ्गशरीराभि-
मानी अयन्त स्थूलशरीराभिमानीति भेद इत्यर्थः । तत्र अङ्ग्रा एव
पुरुषं ससृजुरित्यामूच्छयत् ॥ सुखं निरभिद्यतेत्यादि वाक्यं प्रमाणमाह ।
यत इति ॥ देवग्रहणं मनुष्यादीनामुपलक्षणम् । तथा च सर्वे जीवा-
त्मान एष एवेत्यर्थः ॥ एवमेष ब्रह्मेत्यादि वाक्ये सामानाधिकरण्यं गृ-
हीत्वा सर्वभूतस्थस्यात्मन एकत्वमुक्त्वा सजातीयभेदं निराकृत्य तदुपा-
धीनां भूतभौतिकानामपि बाधायां सामानाधिकरण्यमाश्रित्यात्मव्यति-
रेकेणाभावं तस्य विजातीयभेदनिराकरणार्थमिमानि चेत्यादिवाक्यं
तद्व्याचष्टे । इमानि चेति ॥ एतान्यन्नान्नादत्वेन पूर्वमुक्तानीति वक्तुं
विशिनष्टि । अन्नेति ॥ सर्पादीनां न केवलं क्षुद्रमिश्रत्वं किन्तु सर्पा-
न्तरादीन् प्रति जीवत्वञ्चेत्याह । कारणानि चेति ॥ द्वैराश्यत्वेनेति
स्थावरजङ्गमभेदेन निर्दिश्यमानानीत्यर्थः । स्वेदजातानि जङ्गमान्यु-
द्भिज्जानि स्थावराणीत्याह । उच्यन्त इति ॥ जङ्गममित्यस्य व्याख्या
यच्चलतीति । स्थावराणामपि वाय्वादिना चलनमस्तीत्याशङ्क्याह । पङ्क्त्या-
मिति ॥ स्थावरमचलमित्यनन्तरं सर्वन्तदेष एवेति शेषः ॥ तत् सर्वमेष
एवेत्यत्र हेतुं वक्तुं सर्वं तत् प्रज्ञानेत्रमित्यादि प्रतिष्ठेत्यन्तं वाक्यं तद्-
व्याचष्टे । सर्वमित्यादिना ॥ नीयतेऽनेनेत्यनेन प्रज्ञानेन सत्तां नीयते

जानि च जारुजानि च स्वेदजानि चोद्भिज्जानि चाश्वा गावः पुरुषा हस्तिनो यत् किञ्चेदं प्राणि

णिजातम्। किं तत्। जङ्गमं यच्चलति पद्भ्यां गच्छति। यच्च पतति आकाशेन पतनशीलम्। यच्च स्थावरमचलं सर्वं तद्-शेषतः प्रज्ञानेत्रम्। प्रज्ञायतेः प्रज्ञा तच्च ब्रह्मैव। नीयते सत्तां प्राप्यते अनेनेति नेत्रं प्रज्ञा नेत्रं यस्य तदिदं प्रज्ञानेत्रम्। प्रज्ञाने ब्रह्मण्युत्पत्तिस्थितिलयकालेषु प्रतिष्ठितं प्रज्ञाश्रय-मित्यर्थः। प्रज्ञानेत्रो लोकः पूर्ववत्। प्रज्ञा चक्षुर्वा सर्वं एव लोकः। प्रज्ञा प्रतिष्ठा सर्वस्य जगतः। तस्मात् प्रज्ञानं

सत्तां प्राप्यते सत्तावत् क्रियत इत्यर्थः। यद्वा स्वस्वव्यापारेषु प्रवर्त्तत इति वा। नन्वेवम्भूतं ब्रह्मैवेत्युपनिषत्सु प्रसिद्धं न तु प्रज्ञानमित्याशङ्क्य वस्तुतः प्रज्ञानस्यैव तन्न। तत्र ब्रह्मशब्देनाभिधानान्न दोष इत्युक्तं प्र-ज्ञानं ब्रह्मैवेति। यद्वा कोऽयमात्मेत्यारभ्यैते सर्वे देवा इत्यन्तं त्वं पदार्थ-शोधनार्थमिमानि चेत्यादि प्रतिष्ठेत्यन्तं तत्पदार्थशोधनार्थम्। तत्र पक्षे प्रकृष्टं ज्ञानं प्रज्ञानमिति तत्पदार्थो ब्रह्मैवोच्यते। पञ्चभूतादिस्थाव-रान्तं सर्वं तत् प्रज्ञानेत्रमित्यर्थः। प्रज्ञासत्तयैव सर्वस्यापि सत्तावत्त्वं साधयितुं प्रज्ञाने प्रतिष्ठितमित्युक्तम्। तद्व्याचष्टे। प्रज्ञाने ब्रह्मणीति॥ न केवलं प्रज्ञासत्तयैव सत्त्वं सर्वस्य किन्तु प्रवृत्तिरपि तदधीनेत्याह। प्रज्ञानेत्र इति॥ पूर्ववदिति॥ नीयते प्रवर्त्ततेऽनेनेति व्युत्पत्तेर्नेत्रं प्रवर्त्तकमित्यर्थः। लोक इति सर्वं जगदित्यर्थः। यद्वा पूर्वं नेत्रशब्देन सर्वस्य सत्ताव्यापारहेतुत्वमुक्तं इदानीं सर्वस्य स्फुरणहेतुरप्ययमेवोच्यत इत्याह। प्रज्ञा चक्षुर्वेति॥ चक्षुरिति स्फुरणमित्यर्थः। जगत इव प्रज्ञानस्यापि स्फुरणप्रतिष्ठयोरन्याधीनत्वमाशङ्क्य तस्य स्वप्रकाशत्वात् स्वमहिमप्रतिष्ठत्वेनाश्रयान्तराभावाच्च नैवमित्याह। प्रज्ञा प्रतिष्ठेति॥ यद्वा सर्वस्य जगतः सत्तास्फूर्त्योः प्रज्ञानाधीनत्वादुत्पत्त्यादिष्वप्यवस्थासु प्रज्ञाने प्रतिष्ठितत्वेन तदुपादानत्वाच्च वाचारम्भणन्यायेन प्रज्ञानव्यतिरेकेणाभावात् प्रज्ञानमेव सर्पादेः रज्ज्वादिरिव पर्यवसानभूमिरित्याह। प्रज्ञा प्रतिष्ठेति॥ ध्रुव पर्यवसानभूमिः परिशिष्टं वस्त्वित्यर्थः। एवञ्च प्रज्ञानस्य प्रत्यगात्मनो निर्विशेषत्वादिकं प्रसिद्धमित्याह। तस्मादिति॥ प्रज्ञानस्यैव परिशिष्टत्वेन परमार्थसत्यत्वादित्यर्थः॥ ब्रह्मशब्दार्थमाह। प्रत्यक्षमितेति॥ अस्मिन् पक्षे

जङ्गमं च पतचि च यच्च स्थावरम्। सर्वं तत् प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म ॥ ३ ॥

ब्रह्म। तदेतत् प्रत्यस्तमितसर्व्वोपाधिविशेषं सन्निरञ्जनं निमलं निष्क्रियं शान्तमेकमद्वयं नेति सर्वविशेषापोहसंवेद्यं सर्वशब्दप्रत्ययागोचरं तदत्यन्तविशुद्धप्रज्ञोपाधिसम्बन्धेन सर्वज्ञनीश्वरसञ्ज्ञं भवति। सर्वसाधारणाव्याकृतजगद्बीजप्रवर्त्तकं नियन्तृत्वादन्तर्यामिसञ्ज्ञं भवति। तदेव जगद्बीजभूतबुद्ध्यात्माभिमानलक्षणहिरण्यगर्भसञ्ज्ञं भवति। तदेवान्तरण्डोद्भूतप्रथमशरीरोपाधिमद्विराट् प्रजापतिसञ्ज्ञं भवति। तदुद्भूताण्ड्यादुपाधिमद्देवतादिसञ्ज्ञं भ-

---

ब्रह्मशब्देन प्रत्यगात्मनो निर्विशेषत्वादिकमेव सामानाधिकरण्येन समर्थ्यते। ब्रह्मशब्दस्यापि निर्विशेषत्वादिकमेवार्थः। ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य नित्यशुद्धत्वादयोऽर्थाः प्रतीयन्ते। बृहतेर्धातोरर्थानुगमादिति शारीरकभाष्ये उक्तत्वान्न प्रत्यग्ब्रह्मणोरैक्यमनेन वाक्येनोच्यते। आत्मा वा इदमेक एवाग्र आसीदित्यात्मशब्दितायत्वेनैवोपक्रमाद्ब्रह्मपदार्थानुपक्रमाच्च। एवङ्गात्मन स्वाविद्यया मुच्यत इत्ययं पक्षोऽवस्फुटीकृत इति द्रष्टव्यम्। यदा त्विमानि च पञ्चमहाभूतानीत्यारभ्य तत्पदार्थशोधनार्थत्वेन व्याख्यायते तदा पदार्थशोधनान्तर वाक्यार्थकथनार्थं प्रज्ञानं ब्रह्मेति वाक्यं व्याख्येयम्। अत्र च पक्षे अतत्यप्रज्ञानशब्देन प्रज्ञानस्य नामधेयानीत्यत्वेन च प्रत्यगात्मोच्यते। अत्र ब्रह्मशब्देन जगत्कारणत्वोपलक्षितचैतन्यमुक्तमिति द्रष्टव्यम्। तस्मादिति चोभयोर्निर्विशेषचिद्रूपत्वाविशेषादित्यर्थः। ननु प्रज्ञानस्य ब्रह्मत्वोपदेशः किं सिध्यतीत्याशङ्क्य तस्य निर्विशेषत्वादिकं सिध्यतीति फलितार्थकथनपरत्वेन व्याख्येयं प्रत्यस्तमिति। अन्यत् समानम्। उपाधिविशेषमिति उपाधिकृतकर्तृत्वभोक्तृत्वदुःखित्वादिविशेषमित्यर्थः॥ तस्य पुरुषार्थत्वमाह। शान्तमिति॥ परिशुद्धं परमानन्दरूपमित्यर्थः। निर्विशेषत्वे मानमाह। नेति सर्वेति॥ यतो वाचो निवर्त्तन्ते आनन्दं ब्रह्मणो विद्वानिति श्रुतिर्निर्विशेषानन्दत्वे मानमित्यर्थः। नन्वेवम्भूतस्य प्रज्ञानं कथं सर्वज्ञादिसम्बन्धानानाविधभेद इत्याशङ्क्य नानाविधोपाधिसम्बन्धादित्याह। तदत्यन्तेत्यादिना॥ विशुद्धोपाधिसम्बन्धावि-

स एतेन प्रज्ञेनात्मनाऽस्माल्लोकादुत्क्रम्यामुष्मिन् स्वर्गे लोके सर्व्वान् कामानाप्त्वाऽमृतः समभवत् समभवत् इत्योम् ॥ ४ ॥ इति ऐतरेयारण्यके

वति । तथा विश्वेषशरीरोपाधिष्वपि ब्रह्मादिस्तम्बपर्य्यन्तेषु तत्तन्नामरूपलाभो ब्रह्मणस्तदैक्यं सर्व्वोपाधिभेदभिन्नं सर्वैः प्राणिभिस्तार्किकैश्च सर्वप्रकारेण ज्ञायते विकल्प्यते चानेकधा । एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम् । इन्द्रमेकेऽपरे प्राणमपरे ब्रह्म शाश्वतमित्याद्या स्मृतिः ॥ ३ ॥

स वामदेवोऽन्यो वा एवं यथोक्तं ब्रह्म या वेद प्रज्ञेनात्मना येनैव प्रज्ञेनात्मना पूर्वे विद्वांसोऽमृता अभूवन् तथाऽय-

---

शेषेऽप्यन्तर्यामिहिरण्यगर्भप्रजापतीनां सर्वज्ञाङ्गेदमाह । सर्वसाधारणेति ॥ व्याकृतेति सर्वजगत्कारणे समष्टिबुद्ध्या बालत्वाभिमान एव लक्षणमुपाधिर्यस्य तदित्यर्थः । अन्तरण्डेति अण्डोपाधिकं विराट् तदन्तरङ्गभूतप्रथमशरीरोपाधिकं प्रजापतिरित्यर्थः । आदिशब्देन तदङ्गभूतेऽपि तस्मादण्डादङ्गुता इमे ऽग्न्यादीनामुपाधयः समष्टिवागाद्यस्तदुपाधिमत्प्रज्ञानमग्न्यादिदेवतासञ्ज्ञम्भवतीत्यर्थः ॥ आदिशब्देन व्यष्टिवागाद्यभिमानिनोगृह्यन्ते । असुरादयश्च व्यष्टिमनुष्यादिशरीरोपाधिषु मनुष्यादिसञ्ज्ञम्भवतीत्याह । तयेति ॥ अमीत्यनन्तरं तत्सञ्ज्ञं भवतीति शेषः । उपसंहरति । ब्रह्मादीति ॥ अत्रैवमिति शेषः । एवं ब्रह्मादिस्तम्बेति योज्यम् । ननु साङ्ख्यादिभिर्जीवानामेव नानात्वमुच्यते । अन्यैश्च जीवेश्वरनानात्वं जगत्कारणं चान्यथाम्नाऽस्तत्कथमेकस्यैव ब्रह्मणो नानारूपत्वमत आह । तदेव चैकमिति ॥ अस्मिन्नर्थे प्रमाणमाह । एतमेक इति । एवं तावत् कोऽयमात्मेत्यारभ्य प्रज्ञानं ब्रह्मेत्यन्तेन विचारपुरःसरमात्मतत्त्वं निर्धारितम् । आत्मा करणसङ्घातात्मकप्राणव्यतिरिक्तः सञ्ज्ञानादिसर्व्वान्तःकरणव्यतिरिक्तस्तदनुगतरूपकायः सर्वशरीरेष्वेकः सर्वप्रपञ्चाधिष्ठानभूतोऽद्वितीयः प्रज्ञानं ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभाव इति ॥ ३ ॥

इदानीमेवम्भूतब्रह्मात्मविदः फलं वक्तुं स एतेनेत्यादि श्रुतिवाक्यम् । तत्रैतच्छब्देनैकवचनान्तेन प्रकृतानामपि कोऽयमात्मेत्येवं विचारवतां बह्वनां परामर्शायोग्यत्वादिदानीन्तनस्य विदुषश्च स इति भूत-

षष्ठोऽध्यायः । उपनिषत्सु तृतीयोऽध्यायः ससाप्तः ॥ ३ ॥ ॐ तत्सत् हरिः ॐ ॥

मपि विद्वानेतेनैव प्रज्ञानेनाऽस्माल्लोकादुत्क्रम्यामुस्मिन्स्वर्गे लोके सर्व्वान् कामानाप्त्वाऽमृतः समभवदित्योमिति ॥ ४ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीगोविन्दभगवत्पूज्यपादशिष्यश्रीशङ्कराचार्य्यभगवत्कृतौ बह्वृचोपनिषद्भाष्ये तृतीयोऽध्यायः सम्पूर्णः ॥ ॐ तत्सत् ॥

वाचिनां परामर्शायोग्यत्वात् पूर्व्वाध्यायोक्तो वामदेवः परामृश्यत इत्याह । स वामदेव इति ॥ ब्रह्मविदः फलमित्यत्र वाक्यतात्पर्य्याद्वामदेवादिपुरुषविशेषे तात्पर्य्याभावात् यः कश्चन ब्रह्म वेद इत्याह । अन्यो वेति ॥ एवमिति कोऽयमाक्षेपोत्युक्तप्रकारेण एतं प्रज्ञानरूपं यथोक्तं ब्रह्म प्रज्ञानेनात्मना वेदेत्यर्थः । एतेनैवेत्येतच्छब्दोक्तप्रकृतत्वं व्यक्तीकरोति । येनैवेति ॥ येनैव प्रज्ञानात्मना ब्रह्म विद्वांसः पूर्वेऽमृता अभूवन् तेनैव प्रज्ञानात्मना यथोक्तं ब्रह्म वेद वामदेवोऽन्यो वा स अमृतोऽभवत् तथाऽयमधीतानीन्तनोऽपि विद्वानेतेनैव प्रज्ञानात्मना अस्माल्लोकादुत्क्रम्यामृतः ससमवदित्यन्वयः । अत्रोत्क्रमणं पक्षिणो नीडादिवोर्द्ध्वगमनं न भवति किन्तु देहात्मभावत्यागेन प्रज्ञानात्मभाव एवेत्यभिप्रेत्य प्रज्ञानात्मना उत्क्रम्येत्युक्तम् । प्रज्ञानात्मना विद्वानिति वान्वयः । उक्तमात्मतत्त्वमङ्गीकारवाचिना ओङ्कारेण स्वानुभवप्रकटनेन दृढीकुर्वन् ओङ्कारस्याथशब्दस्य द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभाविति स्मृतेरोङ्कारेण ब्रह्मात्मानुसन्धानलक्षणं मङ्गलं कर्त्तुमोमित्युक्तमिति ॥ ४ ॥ इति श्रीमदानन्दज्ञानविरचितायामैतरेयोपनिषद्भाष्यटीकायां तृतीयोऽध्यायः ससाप्तः ॥ ३ ॥ ॐ तत्सत् ॐ ॥

। ओं हरिः ओं ।

—○○○—

कृष्णयजुर्वेदीयश्वेताश्वतरोपनिषद्भाष्यम् ।

इदं विवरणमल्पग्रन्थं ब्रह्मजिज्ञासूनां सुखावबोधायारभ्यते । ननु चित्सदानन्दाद्वितीयब्रह्मस्वरूपश्चेदात्मा नानन्दाद्वितीयब्रह्मस्वरूपोऽप्यात्मा स्वाश्रयया स्वविषयया विद्यया स्वानुभवगम्यया साभासया स्वाभाविकपुरुषपुमर्थः प्राप्ताप्राप्तेषानर्थोऽविद्यापरिकल्पितैरेव साधनैरिष्टप्राप्तिमनिष्टप्राप्तिञ्चापुरुषार्थमोक्षार्थमलभमानो मकरादिभिरिव रागादिभिरितस्ततः समाक्रम्यमाणः सुरनरतिर्यग्गादिप्रभेदभेदितेनेश्वरार्थकर्मानुष्ठानेनापगतरागादिमलो नित्यादिदर्शनेनोत्पन्नेहामुत्रार्थभोगविरागो वेत्याचार्यद्वारेण वेदान्तश्रवणादिनाऽहं ब्रह्मास्मीति ब्रह्मात्मतत्त्वमवगम्य निवृत्ताज्ञानतत्कार्यो वीतशोको वृत्तिलक्षणस्य मोक्षस्य विद्याधीनत्वात् ज्यते च तदर्थोपनिषदारम्भः । तथा तद्विज्ञानादमृतत्वम् । तमेवं विद्वानमृत इह भवति नान्यः पन्थाऽयनाय विद्यते । न चेदिहावेदिम् महती विनष्टिः । य एतद्विदुरमृतास्ते भवन्ति । किमिच्छन् कस्य कामाय शरीरमनुसञ्ज्वरेत् । तं विदित्वा न लिप्यते कर्मणा पापकेन । तरति शोकमात्मवित् । निचाय्य तं मृत्युमुखात् प्रमुच्यते । एतद्यो वेद निहितं गुहायाम् । सोऽविद्याग्रन्थिं विकिर-

तीर्ह सोम्य। भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः।
क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे।
यथा नद्यः स्यन्दमानाः समुद्रे गच्छन्त्यस्तं नामरूपे विहाय
तथा विद्वान्नामरूपाद्विमुक्तः परात् परं पुरुषमुपैति दिव्यम्॥

यो ह वै तच्छायमशरीरमलोहितं शुभमक्षरं वेदयते
पुरुषं वेद यथा मा वो मृत्युः परिव्यथाः। तत्र को मोहः
कः शोक एकत्वमनुपश्यतः। विद्ययाऽमृतमश्नुते। सर्व्वाणि
रूपाणि विचित्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति।
अपहत्य पाप्मानमनन्ते स्वर्गे लोके तत्त्वं प्रसमीक्ष्य देही
एकः कृतार्थो भवति वीतशोकः। य एतद्विदुरमृतास्ते
भवन्ति तदीशं ज्ञात्वाऽमृता भवन्ति तदेवोपयन्ति। निचा-
य्येमां शान्तिमत्यन्तमेति। तमेवं ज्ञात्वा मृत्युपाशांश्छिनत्ति।
ये पूर्व्वं देवा ऋषयश्च तं विदुस्तेषां-
बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।

कर्म्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः॥
जन्मबन्धविनिर्म्मुक्ताः पदं गच्छन्त्यनामयम्।
सर्व्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि॥
ज्ञानाग्निः सर्व्वकर्म्माणि भस्मसात् कुरुते तथा।
एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत॥
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्।
सर्व्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम्॥
तद्ध्यग्रं सर्व्वविद्यानां प्राप्यते ह्यमृतं ततः।
प्राप्यैतत् कृतकृत्यो हि द्विजो भवति नान्यथा॥
एवं यः सर्व्वभूतेषु पश्यत्यात्मनमात्मना।

स सर्व्वं समतामेत्य ब्रह्माभ्येति सनातनम् ॥
सम्यग्दर्शनसम्पन्नः कर्म्मभिर्न स बध्यते।
दर्शनेन विहीनस्तु संसारं प्रतिपद्यते ॥
कर्म्मणा बध्यते जन्तुर्विद्यया च विमुच्यते।
तस्मात् कर्म्म न कुर्व्वन्ति यतयः पारदर्शिनः ॥
ज्ञानं निश्रेयसं प्राहुर्व्वृद्धा निश्चयदर्शिनः।
तस्माज्ज्ञानेन शुद्धेन मुच्यते सर्व्वपातकैः ॥

एवं मृत्युञ्जायमानं विदित्वा
ज्ञानेन विद्वांस्तेज अभ्येति नित्यम्।
न विद्यते ह्यन्यथा तस्य पन्था-
स्तस्मात्मा कविरास्ते प्रसन्नः ॥

चेतनस्येश्वरज्ञानादिशक्तिः परमा मता।
अयन्तु परमो धर्म्मो यद्योगेनात्मदर्शनम् ॥
आत्मज्ञः शोकसन्तीर्णो न बिभेति कुतश्चन।
मृत्योः सकाशान्मरणादथवान्यकृताद्भयात् ॥
न जायते न म्रियते न बध्यो न च घातकः।
न बध्यो बन्धकारी वा न मुक्तो न च मोचदः ॥

पुरुषः परमात्मा तु यदतोऽन्यदसच्च तत्। एवं श्रुति-स्मृतीतिहासादिषु ज्ञानस्यैव मोक्षसाधनत्वावगमाद्युज्यत एवोपनिषदारम्भः ॥ किञ्च उपनिषत्समाख्ययैव ज्ञानस्यैव परमपुरुषार्थसाधनत्वमवगम्यते। तथा हि। उपनिषदिति उपनिपूर्व्वस्य सदेर्विशरणगत्यवसादनार्थस्य रूपमाचक्षते। उपनिषच्छब्देन व्याचिख्यासितग्रन्थप्रतिपाद्यवस्तुविषया विद्योच्यते। तादर्थ्यात् ग्रन्थोऽपि उपनिषत्।

ये मुमुक्षवो दृष्टानुश्रविके विषयवितृष्णाः सन्त उपनिषच्छब्देन विद्यान्तन्निष्ठतया निश्चयेन शीलयन्ति तेषामविद्यादेः संसारबीजस्य विशरणाद्विनाशात् परब्रह्मगमयितृत्वाद्गर्भजन्मजरामरणाद्यप्रवृत्तस्यावसादयितृत्वादुपनिषत्समाख्ययाप्यन्वक्षतात् परं श्रेय इति ब्रह्मविद्योपनिषदुच्यते। भवेदेवमुपनिषदारभ्भो यदि विज्ञानस्यैव मोक्षसाधनत्वं भवेत्। न चैतदस्ति। कर्म्मणामपि मोक्षसाधनत्वावगमात्। अपाम सोममृता अभूम। अक्षय्यं ह वै चातुर्म्मास्ययाजिनः सुकृतं भवतीत्यादिना। न त्वेतदस्ति। श्रुतिविरोधान्न्यायविरोधाच्च। श्रुतिविरोधस्तावत्। तत् यथेह कर्म्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयते तमेवं विद्वानमृत इह भवति नान्यः पन्था विद्यते ऽयनाय। न कर्म्मणा न प्रजया धनेन त्यागेनैकेन अमृतत्वमानशुः। प्लवा ह्येते अदृढा यज्ञरूपाः। अष्टादशोक्तमवरं येष्टकर्म्म*। एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापियन्ति। नास्त्यकृतः कृतेन।

कर्म्मणा बध्यते जन्तुर्व्विद्यया च विमुच्यते।
तस्मात् कर्म्म न कुर्व्वन्ति यतयः पारदर्शिनः॥
अज्ञानमलपूर्णत्वात् पुराणो मनिलः स्मृतः।
तत् क्षयाद्वै भवेन्मुक्तिर्न्नान्यथा कर्म्मकोटिभिः॥
प्रजया कर्म्मणा मुक्तिर्द्धनेन च सता न हि।
त्यागेनैकेन मुक्तिः स्यात्तद्भावे भ्रमन्त्यहो॥

× आर्षमेतत्।

कर्मोदये कर्मफलानुरागास्तथानुयन्ति न तरन्ति मृत्युम् ।
ज्ञानेन विद्वांस्तेज अभ्येति नित्यं न विद्यते ह्यन्यथा तस्य पन्थाः ॥
एवं त्रयीधर्ममनुप्रपन्ना यथागतं कामकामा लभन्ते ।
अमार्थमाश्रमाश्चापि वर्णानां परमार्थतः ॥
आश्रमैर्न च वेदैश्च यज्ञैः साङ्गैर्व्रतैस्तथा ।
उग्रैस्तपोभिर्विविधैर्दानैर्नानाविधैरपि ।
न लभन्ते तमात्मानं लभन्ते ज्ञानिनः स्वयम् ॥
त्रयीधर्ममधर्मार्थं किंपाकफलसन्निभम् ।
नास्ति तात सुखं किञ्चिदत्र दुःखशताकुले ।
तस्मान्मोक्षाय यततां कथं सेव्या मया त्रयी ।
अज्ञानपाशबन्धत्वादमुक्तः पुरुषः स्मृतः ॥
ज्ञानात्तस्य निवृत्तिःस्यात् प्रकाशात्तमसो यथा ।
तस्माज्जज्ञानेन मुक्तिः स्याद्ज्ञानस्य परिच्छयात् ॥
व्रतानि दानानि तपांसि यज्ञाः सत्यञ्च तीर्थाश्रमकर्मयोगाः ।
स्वर्गार्थमेवाशुभमध्रुवञ्च ज्ञानं ध्रुवं शान्तिकरं महार्थम् ॥
यज्ञैर्देवत्वमाप्नोति तपोभिर्ब्रह्मणः पदम् ।
दानेन विविधान् भोगान् ज्ञानेन मोक्षमाप्नुयात् ॥
धर्मरज्ज्वा व्रजेदूर्ध्वं पापरज्ज्वा व्रजेदधः ।
हृयं ज्ञानासिना छित्वा विदेहः शान्तिमृच्छति ।
त्यज धर्ममधर्मञ्च उभे सत्यानृते त्यज ।
उभे सत्यानृते त्यक्त्वा येन त्यज्योऽसि तत् त्यज ॥
एवं श्रुतिस्मृतिविरोधान्न कर्मसाधनममृतत्वम् ।
न्यायविरोधात् । कर्मसाधनत्वे मोक्षस्य चतुर्विधक्रियान्तर्भावादनित्यत्वं स्यात् । यत् कृतकं तदनित्यमिति कर्म-

साध्यस्य नित्यत्वादर्शनात्। नित्यश्च मोक्षः सर्व्ववादिभिरभ्युपगम्यते। तथा च श्रुतिः। "चातुर्मास्यप्रकरणे प्रजामनु प्रजायसे तदु ते मर्त्या मृतमिति"। किञ्च। सुकृतमिति सुकृतस्याक्षयत्वमुच्यते। सुकृतशब्दश्च कर्म्मणि। नन्वेवं तर्हि कर्म्मणां देवादिप्राप्तिहेतुत्वेन बन्धहेतुत्वमेव। सत्यं स्वतो बन्धहेतुत्वमेव। तथा च श्रुतिः। "कर्म्मणा पितृलोकः, सर्व्व एते पुण्य लोका भवन्ति। इष्टापूर्त्तमित्यमाना वरिष्ठा नान्यच्छ्रेयो वेदयन्ते प्रमूढाः॥ नाकस्य पृष्ठे सुकृतेऽनुभूत्वेमं लोकं हीनतरं वा विशन्ति।

एवं कर्म्मसु निस्स्नेहा ये केचित् पारदर्शिनः।
विद्यामयोऽयं पुरुषो न तु कर्म्ममयः स्मृतः॥"

एवं क्षयोधर्म्ममनुप्रपन्ना गतागतं कामकामालभन्तइति।

यदा पुनः फलनिरपेक्षमीश्वरार्थं कर्म्मानुतिष्ठन्ति तदा मोक्षसाधनज्ञानसाधनान्तःकरणशुद्धिसाधनपारम्पर्य्येण मोक्षसाधनं भवति॥

तथाह भगवान्।

ब्रह्मण्याधाय कर्म्माणि सङ्गं त्यक्त्वा करोति यः।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा॥
कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि।
योगिनः कर्म्म कुर्व्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये॥
यत् करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम्॥
शुभाशुभफलैरेवं मोक्ष्यसे कर्म्मबन्धनैः।
सन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसीति॥

तथा च मोक्षक्रमः । शुद्धभावे मोक्षाभावं कर्म्मभिश्च तच्छुद्धिं दर्शयति श्रीविष्णुधर्म्मे ॥

अनूचानस्ततो यज्वा कर्म्मन्यासं ततः परम् ।
ततो ज्ञानित्वमभ्येति योगी मुक्तिं क्रमाल्लभेत् ॥
अनेकजन्मसंसारचिते पापसमुच्चये ।
नाच्छीणे जायते पुंसां गोविन्दाभिमुखी मतिः ॥
जन्मान्तरसहस्रेषु तपोज्ञानसमाधिभिः ।
नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते ॥
न त्वकर्म्माश्रयो ह्यत्र महामुक्तिविरोधकृत् ।
तस्यैव शमने यत्नः कार्य्यः संसारभीरुणा ॥
सुवर्णादिमहादानपुण्यतीर्थावगाहनैः ।
शरीरैश्च महाक्लेशैः शास्त्रोक्तैस्तच्छमो भवेत् ॥
देवतास्तुतिसच्छास्त्रश्रवणैः पुण्यदर्शनैः ।
गुरुशुश्रूषणैश्चैव पापबन्धः प्रशाम्यति ॥
याज्ञवल्क्योऽपि शुद्धापेक्षां तत्साधनञ्च दर्शयति ॥
कर्त्तव्याऽऽश्रयशुद्धिस्तु भिक्षुकेण विशेषतः ।
ज्ञानोत्पत्तिनिमित्तत्वात् स्वतन्त्रीकरणाय च ॥
मलिनो हि यथाऽऽदर्शो रूपालोकस्य न क्षमः ।
तथा विपक्षकरण आत्मज्ञानस्य न क्षमः ॥
आचार्य्योपासनं वेदशास्त्रार्थस्य विवेकिता ।
तत्कर्म्मणामनुष्ठानं सङ्गः सद्भिर्गिरः शुभाः ॥
स्वप्नालोकालभविगमः सर्व्वभूतात्मदर्शनम् ।
त्यागः परिग्रहाणाञ्च जीर्णकाषायधारणम् ।
विषयेन्द्रियसंरोधस्तन्द्रालस्यविवर्जनम् ।

शरीरपरिसङ्ख्यानं प्रवृत्तिष्वदर्शनम् ॥
नीरजस्तमसा सत्त्वशुद्धिर्निस्पृहता शमः ।
एतैरुपायैः संशुद्धः सत्वयोग्यमृतो भवेत् ॥
यतो वेदाः पुराणानि विद्योपनिषदस्तथा ।
श्लोकाः सूत्राणि भाष्याणि यच्चान्यद्वाङ्मयं क्वचित् ॥
वेदानुवचनं यज्ञे ब्रह्मचर्य्यं तपो दमः ।
श्रद्धोपवासः स्वातन्त्र्यमात्मनो ज्ञानहेतवः ।
तथाचाथर्वणे विशुद्धयपेक्षमात्मज्ञानं दर्शयति ।
जन्मान्तरसहस्रेषु यदा क्षीणासु किल्बिषाः ।
तदा पश्यति योगेन संसारच्छेदनं महत् ॥

यस्मिन् विशुद्धे विरजे च चित्तेय आत्मवत् पश्यन्ति यतयः क्षीणदोषाः । तमेवं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेनेति ॥

बृहदारण्यके विविदिषाहेतुत्वं यज्ञादीनां दर्शयति । ननु । विद्याञ्चाविद्याञ्च यस्तद्वेदोभयं सह । तपो विद्या च विप्रस्य नैश्रेयसकरं परमित्यादिना कर्म्मणामप्यमृतत्वप्राप्तिहेतुत्वमवगम्यते । सत्यमवगम्यत एव तदपेक्षितशुद्धिद्वारेण न च साक्षात् । तथाहि विद्याञ्चाविद्याञ्च । तपो विद्या च विप्रस्य नैश्रेयसकरं परमित्यादिना ज्ञानकर्म्मणोर्निश्रेयसहेतुत्वमभिप्रायकथनयोस्तद्धेतुत्वमित्याकाङ्क्षायां तपसा कल्मषं हन्ति विद्ययामृतमश्नुते । अविद्यया मृत्युन्तीर्त्वा विद्ययामृतमश्नुत इति वाक्यशेषेण कर्म्मणः कल्मषक्षयहेतुत्वं विद्ययाऽमृतत्वप्राप्तिहेतुत्वं प्रदर्शितम् । यत्र तु शुद्ध्याद्यवान्तरकार्य्यानुपदेश्यस्तत्रापि शाखान्तरोपसंहार-

न्यायेनोपसंहारः कर्त्तव्यः। ननु कुर्व्वन्नेवेह कर्म्माणि जिजी-विषेच्छतं समा इति यावज्जीवकर्म्मानुष्ठाननियमे सति कथं विद्याया मोक्षसाधनत्वमुच्यते। कर्म्मण्यधिकृतस्यायं नियमो नानधिकृत्यस्याऽनियोज्यस्य ब्रह्मवादिनः। तथाच विदुषः कर्म्मानधिकारं दर्शयति श्रुतिः। नैतद्विद्वान्ऋषिणा विधेयो न रुध्यते विधिना शब्दचारः। एतद्ध स्म वै तत्पूर्व्वे विद्वांसोऽग्निहोत्रं न जुहवाञ्चक्रिरे। एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थाय भिक्षाचर्य्यं चरन्ति। एतद्ध स्म वै तद्विद्वांस आहुः ऋषयः कावषेयाः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे स ब्राह्मणः केन स्याद्येन स्यात्तेनेदृश एवेति॥ यथाह भगवान्॥

यस्त्वात्मविधिरेव स्यादात्मतृप्तश्च मानवः।
आत्मन्येवात्मना तुष्टस्तस्य कार्य्यं न विद्यते॥
नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन।
नचास्य सर्व्वभूतेषु कश्चिदर्थव्यपाश्रयः॥

तथाचाह भगवान् परमेश्वरे लैङ्गे कालकूटाख्याने॥

तेन नैतेन विप्रस्य त्यक्तसङ्गस्य देहिनः।
कर्त्तव्यं नास्ति विप्रेन्द्रा अस्ति चेत्तत्त्वविन्न च॥
इह लोके परं चैव कर्त्तव्यं नास्ति तस्य वै।
जीवन्मुक्तो यतस्तुस्याद्ब्रह्मवित् परमार्थतः॥
ज्ञानाभ्यासरतो यस्तु सर्व्वतत्त्वार्थवित् स्वयम्।
कर्त्तव्याभावमुत्सृज्य ज्ञानमेवाधिगच्छति॥
वर्णाश्रमाभिमानी यस्त्यक्त्वा ज्ञानं द्विजोत्तमः।

अन्यच्च रमते मूढः सोऽज्ञानी नात्र संशयः ॥
क्रोधो भयं तथा लोभो मोहो भेदेक्षणं तमः ।
धर्माधर्मौ च तेषां हि तद्ग्राह्यत्वदनुग्रहः ॥
शरीरे सति वै क्लेशः सोऽविद्यां संत्यजेत् ततः ।
अविद्यां विद्यया हित्वा स्थितस्यैवेह योगिनः ॥
क्रोधाद्या नाशमायान्ति धर्माधर्मौ च देहजौ ।
तत्क्षयाच्च शरीरेण न पुनः संप्रयुज्यते ॥
स एव मुक्तः संसारादुःखत्रयविवर्जितः ।

तथा शिवधर्मोत्तरे ।

ज्ञानामृतस्य तृप्तस्य कृतकृत्यस्य योगिनः ।
नैवास्ति किञ्चित् कर्त्तव्यमस्ति चेन्न स तत्त्ववित् ॥
लोकद्वयेन कर्त्तव्यं किञ्चिदस्य न विद्यते ।
इहैव स विमुक्तः स्यात् सम्पूर्णः समदर्शनः ॥

तस्माद्विदुषः कर्त्तव्याभावाद्विद्यावद्विषय एवायं कुर्व्वन्नेवेत्यादिकर्म्मनियमः । कुर्व्वन्नेवेति च नायं कर्म्मनियमः किन्तु विद्यामाहात्म्यं दर्शयितुं यथा कामं कर्म्मानुष्ठानमेव द्रष्टव्यम् । एतदुक्तं भवति । यावज्जीवं यथा कामं पुण्यपापादिकं कुर्व्वत्यपि विदुषि न कर्म्मलेपो भवति विद्यासामर्थ्यादिति । तथा हि । ईशावास्यमिदं सर्व्वमित्यारभ्य तेन त्यक्तेन भुञ्जीथा इति विदुषः सर्व्वकर्म्मत्यागेनात्मपालनमुक्त्वा नियोज्ये ब्रह्मविदि त्यागकर्त्तव्यतोक्तिरप्युक्तैवोक्तेति मत्वा चकितः सन् वेदो विदुषस्त्यागकर्त्तव्यतामपि नोक्तवान् । कुर्व्वन्नेवेह लोके विद्यमानं पुण्यपापादिकं कर्म्म यावज्जीवं जिजीविषेत् न पुण्यादिवन्नभयात् पुण्य-

दिकं त्यक्त्वा तूष्णीमवतिष्ठेत् । एतावत् कर्म्माणि कुर्व्वत्यपि विदुषि त्वयि यतो यावज्जीवानुष्ठानादन्यथा भावः स्वरूपात् प्रच्युतिः पुण्यादिनिमित्तसंसारान्वयो नास्ति। अथवा इतः कर्म्मानुष्ठानोत्तरकालभाव्यन्यथाभावः संसारान्वयो नास्ति । यस्मात्त्वयि विन्यस्तं न कर्म्म लिप्यते ॥ तथाच श्रुत्यन्तरं ॥ न लिप्यते कर्म्मणा पापकेन। एवं विदि पापं कर्म्म न श्लिष्यते । नैनं कृताकृते तपतः । एवं ह्यस्य सर्व्वे पाप्मानः प्रदूयन्ते । ज्ञानाग्निः सर्व्वकर्म्माणि भस्मसात् कुरुते यथा ॥

लैङ्गे ॥ ज्ञानिनः सर्व्वकर्म्माणि जीर्य्यन्ते नात्र संशयः ।
क्रीडन्नपि न लिप्येत पापैर्नानाविधैरपि ॥

शिवधर्म्मोत्तरेऽपि ॥

तस्माज्ज्ञानासिना तूर्ण्मशेषं कर्म्मबन्धनम् ।
कामाकामकृतं छित्त्वा शुद्धश्चात्मनि तिष्ठति ॥
यथा वह्निर्म्महादीप्तः शुष्कमार्द्रञ्च निर्दहेत् ।
तथा शुभाशुभं कर्म्म ज्ञानाग्निर्दहते क्षणात् ॥
पद्मपत्रं यथा तोयैः स्वस्थैरपि न लिप्यते ।
शब्दादिविषयाम्भोभिस्तद्वज्ज्ञानी न लिप्यते ॥
यस्मान्मन्त्रबलोपेतः क्रीडन् सर्पैर्न दश्यते ।
क्रीडन्नपि न लिप्येत तद्वदिन्द्रियपन्नगैः ॥
मन्त्रौषधबलैर्यद्वज्जीर्य्यते भक्षितं विषम् ।
तद्वत् सर्व्वाणि पापानि जीर्य्यन्ते ज्ञानिनः क्षणात् ॥

तथा च सूत्रकारः ॥ पुरुषार्थोऽतःशब्दादिति बादरायण इति ज्ञानस्यैव परमपुरुषार्थहेतुत्वमभिधाय शेषत्वात् पुरुषार्थवाद इत्यादिना कर्म्मोपेक्षितकर्त्तृप्रतिपादकत्वेन विद्यायाः

कर्म्मशेषत्वमाशङ्क्याधिकोपदेशात्तु बादरायणस्येत्यादिना कर्तृत्वादिसंसारधर्म्मरहितापहतपाप्मादिरूपब्रह्मोपदेशात्तद्विज्ञानपूर्व्विकान्तु कर्म्माधिकारसिद्धिं त्वाशासानस्य कर्म्माधिकारहेतोः क्रियाकारकफललक्षणस्य समस्तस्य प्रपञ्चाविद्याकृतस्य विद्यासामर्थ्यात् स्वरूपोपदर्शनात् कर्म्माधिकारः। स्थितिप्रसङ्गाद् भिन्नप्रकरणत्वाच्चिन्नकार्य्यत्वाच्च परस्परसमुच्चयोऽङ्गाङ्गीभावो नास्तीति प्रतिपादयति एवाग्नीन्धनाद्यनपेक्षेति विद्याया एव परमपुरुषार्थहेतुत्वादग्नीन्धनाद्याश्रमकर्म्माणि विद्यायाः स्वार्थसिद्धौ नापेक्षितव्यानीति पूर्व्वोक्तस्याधिकरणस्य फलमुपसंहृत्याऽत्यन्तमेवानपेक्षायां प्राप्तायां सर्व्वापेक्षा च यज्ञादिश्रुतेरश्ववदिति नात्यन्तमनपेक्षा। उत्पन्नाहि विद्या फलसिद्धिं प्रति न किञ्चिदन्यदपेक्षते। उत्पत्तिं प्रत्यपेक्षत एव। विविदिषन्ति यज्ञेनेति श्रुतेरिति विविदिषा साधनत्वेन कर्म्मणामुपयोगं दर्शितवान्। तथा च न विधेः स्तुतयेऽनुमतिर्वेति सूत्रद्वयेन कुर्व्वन्नेवेति पदद्वयस्याविषयत्वेन विद्यास्तुतित्वेन वार्थद्वयं दर्शितवान्। अत उक्तेन प्रकारेण ज्ञानस्यैव मोक्षसाधनत्वादुक्तः परोपनिषदारम्भः। ननु बन्धस्य मिथ्यात्वे सति ज्ञानं निर्व्विषयत्वेन ज्ञानादमृतत्वं स्यात्। नत्वेतदस्ति। प्रतिपन्नत्वाद्बाधाभावात्। युष्मदादिस्वरूपत्वेनात्मनो विलक्षणत्वे सादृश्याद्यभावादध्यासासम्भवाच्च। उच्यते। न तावत् प्रतिपन्नत्वेन सत्यत्वं वक्तुं शक्यते। प्रतिपत्तेः सत्यत्वमिथ्यात्वयोस्समानत्वात्। नापि बाधाभावात्सत्यत्वम्। विधिमुखेन कारणमुखेन च बाधसम्भवात्। तथाहि श्रुतिः। प्रप-

स्य मिथ्यात्वं मायाकारणत्वञ्च दर्शयति। नतु द्वितीयमस्ति। एकत्वम्। नास्ति द्वैतम्। कुतो विदिते वेद्यं नास्ति। एकमेवाद्वितीयम्। वाचारम्भणं विकारो नामधेयम्। एकमेव सन्नेह नानास्ति किञ्च न। एकधैवानुद्रष्टव्यम्। मायान्तु प्रकृतिं विद्यात्। माया सृजते विश्वमेतत्। इन्द्रो मायाभिः पुरुरूप ईयत इत्यादिभिर्वाक्यैः। अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया॥

अविभक्तञ्च भूतेषु विभक्तमिव च स्थितम्।
तथा च ब्राह्मे पुराणे॥

धर्माधर्मौ जन्ममृत्यू सुखदुःखेषु कल्पना॥
वर्णाश्रमस्तथा वासः स्वर्गो नरक एव च।
पुरुषस्य न सन्त्येते परमार्थस्य कुत्रचित्॥
दृश्यते च जगद्रूपमसत्यं सत्यवन्मृषा।
तोयवन्मृगतृष्णा तु यथा मरुमरीचिका॥
रौप्यवल्लोकसम्भूतं लोकसं शुक्तिरेवच।
सर्पवद्रज्युखण्डश्च निशायां वेश्ममध्यगः॥
एक एवेन्दुवद्द्योन्नि तिमिराहतचक्षुषः।
आकाशस्य घटीभावो नीलत्वं स्निग्धता तथा॥
एकश्च सूर्यो बहुधा जलाधारेषु दृश्यते।
आभाति परमात्मापि सर्वोपाधिषु संस्थितः॥
द्वैतम्भान्तिरविद्याख्या विकल्पो न च तत्तथा।
परब्रह्मागारस्थां तेषामात्माभिमानिनाम्।
आत्मभावनया भ्रान्त्या देहं भावयतः सदा।

आप्रज्ञैरादिमध्यान्तैर्भ्रमभूतैस्त्रिभिः सदा ॥
जाग्रत्स्वप्नसुषुप्तैस्तु क्रादितं विश्वतैजसम् ।
स्वमायया स्वमात्मानमोहयेद्द्वैतरूपया ॥
गुहागतं स्वमात्मानं लभते च स्वयं हरिः ।
व्योम्नि वज्रानलज्वाला कलापो विविधाकृतिः ॥
आभाति विष्णोः सृष्टिश्च स्वभावो द्वैतविस्तरः ।
शान्ते मनसि शान्तश्च घोरे मूढ़े च तादृशः ॥
ईश्वरो दृश्यते नित्यं सर्व्वत्र न तु तत्त्वतः ।
देहसृत्पिण्डहैम्नाच्च गात्रभाजनभेदतः ॥
चराचराणां भूतानां द्वैतता न च सत्यतः ।
सर्व्वगे तु निराधारे द्वैतस्यात्मनि संस्थिता ॥
अविद्यादिगुणां सृष्टिं करोत्यस्पर्शयंश्च तम् ।
सर्पस्य रज्जुता नास्ति नास्ति रज्जौ भुजङ्गता ॥
उत्पत्तिनाशयोर्नास्ति कारणं जगतोऽपि च ।
लोकानां व्यवहारार्थमविद्येयं विनिर्म्मिता ॥
एषा विमोहिनीत्युक्ता द्वैताद्वैतस्वरूपिणी ।
अद्वैतं भावयेद्ब्रह्म सकलं निष्कलं सदा ॥
आत्मज्ञः शोकसन्तीर्णो न बिभेति कुतश्चन ।
मृत्योः सकाशान्मरणादथवान्यकृताद्भयात् ॥
न जायते न म्रियते न बध्यो न च घातकः ।
न बद्धो बन्धकारी वा न मुक्तो न च मोचकः ॥
पुरुषः परमात्मा तु यदतोऽन्यदसच्च तत् ।
एवं बुद्ध्वा जगद्रूपं विष्णोर्म्मायामयं मृषा ॥
भोगसङ्गो भवेन्मुक्तस्त्यक्त्वा सर्व्वविकल्पनाम् ।

त्यक्तसर्वविकल्पश्च स्वात्मस्थं निश्चलं मनः ॥
कृत्वा शान्तो भवेद्योगी दग्धेन्धन इवानलः ।
एषा चतुर्विंशतिभेदभिन्ना परा माया प्रकृतिस्तत्समुत्थौ ।
कामक्रोधौ लोभमहौ भयञ्च विषादशोकौ च विकल्पजालम् ॥
धर्माधर्मौ सुखदुःखे च सृष्टिविनाशपाको नरके गतिश्च ।
शमः स्वर्गे जातयश्चाश्रमाश्च रागद्वेषौ विविधा व्याधयश्च ॥
कौमारतारुण्यजरावियोगसंयोगभोगानशनं व्रतानि ।
इतीदमीदृग्विदयं निधाय तूष्णीमासीनः सुमतिश्च विद्वान् ॥
तथा च श्रीविष्णुधर्मे षडध्याय्याम् ॥
अनादिसम्बन्धवति चेतश्चेऽयमविद्यया ।
युक्तः पश्यति भेदेन ब्रह्म तत्त्वात्मनि स्थितम् ॥
पश्य त्वात्मानमन्यच्च यावद्वै परमात्मनः ।
तावत् सम्भ्राम्यते जन्तुर्मोहितो निजकर्मणा ॥
सङ्क्षीणाशेषकर्मा तु परं ब्रह्म प्रपश्यति ।
अभेदेनात्मनः शुद्धं शुद्धत्वादव्ययो भवेत् ॥
अविद्या च क्रियाः सर्वा विद्या ज्ञानं प्रचक्षते ।
कर्मणा जायते जन्तुर्विद्यया च विमुच्यते ॥
अद्वैतं परमार्थो हि द्वैतं तद्भिन्न उच्यते ।
पशुतिर्यङ्मनुष्याख्यस्तथैव नृप नारकः ॥
चतुर्विधोऽपि भेदोऽयं मिथ्याज्ञाननिबन्धनः ।
अहमन्योऽपरश्चाऽयममौ चात्र तथाऽपरे ॥
अज्ञानमेतद्द्वैताख्यमद्वैतं श्रूयतां परम् ।
मम त्वहमिति प्रज्ञा वियुक्तमपि कल्पवत् ॥
अविकार्यमनाः खेदमद्वैतमनुभूयते ।

मनोवृत्तिमयं द्वैतमद्वैतं परमार्थतः ॥
मनसो वृत्तयस्तस्माद्धर्माधर्मनिमित्तजाः ।
निरोद्धव्यास्तन्निरोधे अद्वैतं नोपपद्यते ॥
मनोदृष्टमिदं सर्वं यत् किञ्चित् सचराचरम् ।
मनसो ह्यमनीभावे द्वैतभावं तदाप्नुयात् ॥
कर्म्मणो भावना चेयं सा ब्रह्मपरिपन्थिनी ।
कर्म्मभावनया तुल्यं विज्ञानमुपजायते ॥
तादृग्भवति विज्ञप्तिर्यादृशी खलु भावना ।
क्षये तस्याः परब्रह्म स्वयमेव प्रकाशते ॥
परमात्मा मनुष्येन्द्र विभागो ज्ञानकल्पितः ।
क्षये तस्यात्मपरयोरविभागत एव हि ।
आत्मचैतन्यसञ्ज्ञो हि संयुक्तः प्राकृतैर्गुणैः ।
तैरेव विगतः शुद्धः परमात्मा निगद्यते ॥
तथा च श्रीविष्णुपुराणे ॥
परमात्मत्वमेवैको नान्योऽस्ति जगतः परः ।
तवैष महिमा येन व्याप्तमेतच्चराचरम् ॥
यदेतद्दृश्यते मूर्त्तमेतज्ज्ञानात्मनस्तव ।
भ्रान्तिज्ञानेन पश्यन्ति जगद्रूपमयोगिनः ॥
ज्ञानस्वरूपमखिलं जगदेतदबुद्धयः ।
अर्थस्वरूपं पश्यन्तो भ्राम्यते मोहसंप्लवे ॥
ये तु ज्ञानविदः शुद्धचेतसस्तेऽखिलं जगत् ।
ज्ञानात्मकं प्रपश्यन्ति त्वद्रूपं परमेश्वरम् ॥
अहं हरिः सर्वमिदं जनार्दनो नान्यत् ततः कारणकार्यजातम्
ईदृङ्मनो यस्य न तस्य भूयो भवोद्भवा इन्द्रगता भवन्ति ॥

ज्ञानस्वरूपमत्यन्तं निर्मलं परमार्थतः ।
तमेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम् ॥
ज्ञानस्वरूपो भगवान् यतोऽसावशेषमूर्त्तिं न तु वस्तुभूतः ।
ततो हि शैलाब्धिधरादिभेदाज्ज्ञानीहि विज्ञानविजृम्भितानि॥
वस्त्वस्ति किं कुत्रचिदादिमध्यपर्य्यन्तहीनं सततैकरूपम् ।
यज्ज्ञान्यथा त्वं द्विज याति भूयो न तत्तथा तत्र कुतोहि तत्त्वम् ॥
मही घटत्वं घटतः कपालिका कपालिका चूर्णरजस्ततोऽणुः ।
जनैः स्वकर्म्मस्थिमितात्मनिश्चयैरालक्ष्यते ब्रूहि किमत्र वस्तु ॥

तस्मिन् न विज्ञानकृतेऽस्ति किञ्चित्
क्वचित् कदाचित् द्विज वस्तुजातम् ।
विज्ञानमेकं निजकर्म्मभेद
विभिन्नचित्तैर्ब्बहुधाभ्युपेतम् ॥

ज्ञानं विशुद्धं विमलं विशोकमशेषलोभादिनिरस्तसङ्गम् ।
एकं सदैकं परमः परेशः स वासुदेवो न यतोऽन्यदस्ति॥
सद्भाव एवं भवतो मयोक्तो ज्ञानं यथा सत्यमसत्यमन्यत् ।
एतत् तु यत् संव्यवहारभूतं तत्रापि चोक्तं भवतापि यत्ते ॥

अविद्यासंज्ञितं कर्म्म तत्त्वाशेषेषु जन्तुषु ।
आत्मा शुद्धोऽक्षरः शान्तो निर्गुणः प्रकृतेः परः ॥
प्रवृत्तयश्च यो न स्तः एकस्याखिलजन्तुषु ।
यत् तु कालान्तरेणापि नान्यसञ्ज्ञामुपैति वै ॥
परिणामादिसम्भूतं तदत्र कृत्स्नं तच्च किम् ।
यदन्योऽस्ति परः कोऽपि मत्तः पार्थिवसत्तम ॥
तदेषोऽहमयं चान्यो वस्तुरेतदपीष्यते ।
यदा समस्तदेहेषु पुमानेको व्यवस्थितः ॥

तदा हि को भवान् सोऽहमित्येतद्विप्रलम्भनम् ।
त्वं राजा सविकारोऽयं वयं वाहाः परःसराः ॥
अयञ्च भवतो लोको नस्तदेतत् त्वयोच्यते ।
वस्तुराजेति यल्लोके यच्च राजभटात्मकम् ॥
तथाऽन्ये च नृपत्वञ्च तत्तत्सङ्कल्पनामयम् ।
अनाद्यो परमार्थश्च प्राज्ञैरभ्युपगम्यते ॥
परमार्थस्तु भूपाल सङ्क्षेपाच्छ्रूयतां मम ।
एको व्यापी समः शुद्धो निर्गुणः प्रकृतेः परः ॥
जन्मवृद्ध्यादिरहित आत्मा सर्व्वगतोऽव्ययः ।
परज्ञानमयः सद्भिर्नामजात्यादिभिः प्रभुः ॥
न योगवान् न युक्तोऽभूत्नैव पार्थिव योक्ष्यति ।
तस्यात्मपरदेहेषु स यो ह्येकमयं हि तत् ॥
विज्ञातपरमार्थोऽसौ द्वैतिनो तथ्यदर्शिनः ।
एवमेकमिदं विद्वन्नभेदि सकलं जगत् ॥
वासुदेवाभिधेयस्य स्वरूपं परमात्मनः ।
निदाघोऽप्युपदेशेन तेनाद्वैतपरोऽभवत् ॥
सर्वभेदान्यभेदेन स ददर्श तदात्मनः ।
तदा ब्रह्म ततो मुक्तिमवाप परमां द्विज ॥
सितनीलादिभेदेन यथैकं दृश्यते नभः ।
भ्रान्तदृष्टिभिरात्मापि तथैकः सन् पृथक् पृथक् ॥
एकः समस्तं यदिहास्तिकिञ्चित्तदच्युतोनास्तिपरंततोऽन्यत् ।
सोऽहं स च त्वं सच सर्वमेतदात्मस्वरूपं त्यज भेदमोहम् ॥
इतीरितस्तेन स राजवर्य्यस्तत्याज भेदं परमार्थदृष्टिः ।
स चापि जातिस्मरणार्थबोधस्तत्रैव जन्मन्यपवर्गमाप ॥

तथा लैङ्गे ॥

तस्मादज्ञानमूलो हि संसारः सर्वदेहिनां ।
परतन्त्रे स्वतन्त्रे च भिदाभावादिचारतः ॥
एकत्वमपि नास्त्येव द्वैततत्त्वं कुतोऽस्त्यहो ॥
एकं नास्त्यथ मर्त्यश्च कुतो मृतसमुद्भवः ।
नान्तःप्रज्ञो न वहिःप्रज्ञो न चोभयत एव च ॥
न प्रज्ञानघनस्त्वेवं न प्रज्ञोऽप्रज्ञ एव सः ।
विदिते नास्ति वेद्यञ्च निर्व्वाणं परमार्थतः ॥
अज्ञानतिमिरात् सर्व्वं नात्र कार्य्या विचारणा ।
ज्ञानञ्च बन्धनञ्चैव मोक्षो नाप्यात्मनो द्विजाः ॥
न ह्येषा प्रकृतिर्जीवो विकृतिश्च विकारतः ।
विकारो नैव मायैषा सदसद्व्यक्तिवर्जिता ॥
तथाह्ह भगवान् पराशरः ॥
अस्माद्वि जायते विश्वं मैत्रेय प्रविलीयते ।
स मायी मायया बद्धः करोति विविधास्तनूः ॥
न चाचैवं संसरति न च संसारयेत् परम् ।
न कर्त्ता नैव भोक्ता च न च प्रकृतिपूरुषौ ॥
न माया नैव च प्राणाश्चैतन्यं परमार्थतः ।
तस्मादज्ञानमूलो हि संसारः सर्व्वदेहिनाम् ॥
नित्यः सर्व्वगतो ह्यात्मा कूटस्थो दोषवर्जितः ।
एकः स भिद्यते शक्त्या मायया न स्वभावतः ॥
तस्मादद्वैतमेवाहुर्मुनयः परमार्थतः ।
ज्ञानस्वरूपमेवाहुर्जगदेतद्विचक्षणाः ॥
अर्थस्वरूपमज्ञानाः पश्यन्त्यन्ये कुदृष्टयः ।

कूटस्थो निर्गुणो व्यापी चैतन्यात्मा स्वभावतः ॥
दृश्यते ह्यर्थरूपेण पुरुषैर्भ्रान्तदृष्टिभिः ।
यदा पश्यन्ति चात्मानं केवलं परमार्थतः ॥
मायामात्रमिदं द्वैतं तदा भवति निर्वृतः ।
तस्माद्विज्ञानमेवास्ति न प्रपञ्चेन संसृतिः ॥

एवं स्मृत्यादिना नामादिकारणत्वोपन्यासमुखेन स्वरूपेण च बाधितत्वात् प्रपञ्चस्य मिथ्यात्वमवगम्यते । अस्थूलादिलक्षणस्य ब्रह्मणस्तद्विपरीतस्थूलाकारो मिथ्या भवितुमर्हति । यथैकस्य चन्द्रमसस्तद्विपरीतद्वितीयाकारस्तद्वत् । तथा च सूत्रकारेण । न स्थानतोऽपि परस्योभयलिङ्गस्सर्वोपेक्षात् स्वरूपत उपाधितश्च विरुद्धरूपद्वयासम्भवाद्विविशेषमेव ब्रह्मेत्युपपद्यते । नन्वभेदादिति श्रुतिबलात् किमिति सविशेषमपि ब्रह्म नाभ्युपगम्यत इत्याशङ्क्य न प्रत्येकमेतद्वचनादित्युपाधिभेदमेतद्वचनभेदस्य श्रुत्यैव बाधितत्वान्नेश्रुतिबलात् सविशेषस्य ब्रह्मणोयोगाद्विविशेषमेवेत्युपपद्यापि चैनमेक इति श्रुतिस्मृतिपूर्वकं अभेदमेवैतदेवमारुणयः समामनन्ति । मनसैवेदमाप्तव्यम् । नेह नानास्ति किञ्चन । मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति । एकधैवानुद्रष्टव्यमिति । भोक्ता भोग्यं प्रेरितारञ्च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्म मेतदिति सर्वं भोग्यभोक्तृनियन्तृलक्षणस्य प्रपञ्चस्य ब्रह्मैकसमाधतामभिधीयत इति ॥ पुनरपि निर्विशेषपक्षे दृष्टोक्षते किमित्येकस्वरूपस्योभयस्वरूपासम्भवेनाकारमेव ब्रह्माऽवधार्यते न पुनर्विपरीतमित्याशङ्क्याकारवदेव हि तत्प्रधानत्वादिति रूपाद्याकाररहितमेव ब्रह्मावधारयितव्यम् । कस्मात् । तत्प्रधान-

त्वात्। अस्थूलमनण्वह्रस्वमदीर्घमशब्दमस्पर्शमरूपमव्ययम्। आकाशो वै नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरित्येतदनुशासनमिति। एवमादीनि निष्प्रपञ्चब्रह्मात्मतत्त्वप्रधानानि इतराणि कारणब्रह्मविषयाणि न तत्प्रधानानि। तत्प्रधानान्यतत्प्रधानेभ्यो बलीयांसि भवन्ति। अतस्तत्परश्रुतिप्रतिपन्नत्वात् निर्विशेषमेव ब्रह्मावगन्तव्यं न पुनः सविशेषमिति निर्विशेषपक्षमुपपाद्य का तर्ह्याकारविषयाणां श्रुतीनां गतिरित्याकाङ्क्षायां प्रकाशवच्चावैयर्थ्यादिति। चन्द्रसूर्यादीनां जलाद्युपाधिषु च उपाधिकृतनानात्ववच्च ब्रह्मणोऽप्युपाधिकृतनानात्वरूपस्य विद्यमानत्वात्तदाकारवतो ब्रह्मण आकारविशेषोपदेश उपासनार्थो न विरुध्यते। एवमवैयर्थ्ये नानाकारब्रह्मविषयाणां वाक्यानामिति भेदश्रुतीनामौपाधिकब्रह्मविषयत्वेनावैयर्थ्यमुक्त्वा पुनरपि निर्विशेषमेव ब्रह्मेति दृढ़त्वमाह च तन्मात्रमिति। स यथा सैन्धवघनो न वाह्यः कृत्स्नो रसघन एव। एवं वा अरेऽयमात्माऽनन्तरोऽवाह्यः कृत्स्नः प्रज्ञानघन एवेति श्रुत्युपन्यासेन विज्ञानव्यतिरिक्तरूपान्तराभावमुपन्यस्य चाथोऽपि स्मर्यत इति। अथात आदेशो नेति नेति। अन्यदेव तद्विदितादथोऽविदितादधि। यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह। प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरम्। वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसञ्ज्ञितम्। विश्वरूपवैरूप्यं लक्षणं परमात्मन इत्यादिश्रुतिस्मृत्युपन्यासमुखेन प्रत्यस्तमितमेव ब्रह्मेत्युपपाद्या एव चोपमा सूर्यादिवदिति। य एव चेतनमाच-

रूपो नेति नेत्यात्मको विदिताविदिताभ्यामन्यो वाचामगोचरं प्रत्यस्तमितभेदो विश्वस्वरूपलक्षणरूपः परमात्मा अविद्योपाधिको भेदः। अतएव चास्योपाधिनिमित्तामपारमार्थिकीं विशेषवत्तामभिप्रेत्य जलसूर्य्यादिरिवेत्युपादीयते मोक्षशास्त्रेषु। आकाशमेकं हि यथा घटादिषु पृथक् पृथक् तथात्मैको ह्यनेकश्च जलधारेष्विवांशुमान्॥

एक एव तु भूतात्मा भूते भूते व्यवस्थितः।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत्॥

तथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन् उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा॥

इति दृष्टान्तबलेनापि निर्विशेषमेव ब्रह्मेत्युपपाद्याम्बुवदग्रहणादित्यात्मनो मूर्त्तत्वेन सर्व्वगतत्वे जलसूर्य्यादिवत् मूर्त्तसम्भिन्नापदेयस्थितत्वाभावाद्दृष्टान्तदार्ष्टान्तिकयोः साहश्यं नास्तीत्याशङ्क्य दृङ्निक्षासभाक्त्वमिति। न हि दृष्टान्तदार्ष्टान्तिकयोर्विवक्षितांशमुक्त्वा सर्व्वसारूप्यं केनाचिद्दर्शयितुं शक्यते। सर्व्वसारूप्ये दृष्टान्तदार्ष्टान्तिकभावोच्छेद एव स्यात्। दृङ्निक्षासभाक्त्वमत्र विवक्षितम्। जलगतसूर्य्यप्रतिबिम्बं जलवृद्धौ वर्द्धते जलक्षये च क्षयति जलचलने चलति जलभेदे भिद्यत इत्येवं जलधर्म्मानुविधायि भवति न तु परमार्थतः सूर्य्यस्य तत्त्वमस्ति। एवं परमार्थतो विकृतमेकरूपमपि सद्ब्रह्म देहाद्युपाध्यन्तरभावात् भजत एवोपाधिमान् दृङ्निक्षासादीनि। विवक्षितांशप्रतिपादनेन दृष्टान्तदार्ष्टान्तिकयोः सामञ्जस्यमुक्त्वा दर्शितान् प्रति पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः पुरः स पक्षी भूत्वा पुरः पुरुष

आविशत्। इन्द्रो मायाभिः पुरुरूप ईयते। मायिनं तु महेश्वरम्। मायी सृजते विश्वमेतत्। एकस्तथा सर्व्व-भूतान्तरात्मा। रूपं रूपं प्रतिरूपो बभूव। एको देवः सर्व्वभूतेषु गूढः। एतमेव सीमानं विदार्य्यैतया द्वारा प्रापद्यत। स एष इह प्रविष्ट आनखाग्रेभ्यः। तत् सृष्ट्वा तदेवानुप्राविशदित्यादिना परस्यैव ब्रह्मण उपाधियोगं दर्शयित्वा निर्विशेषमेव ब्रह्म। भेदस्तु जलसूर्य्यादिवदौपाधिको मायानिबन्धन इत्युपसंहृतवान्। किञ्च। ब्रह्मविदामनुभवोऽपि प्रपञ्चबाधकः। तेषां निष्प्रपञ्चात्मदर्शनस्य विद्यमानत्वात्। तथा तेषामनुभवं दर्शयति। यस्मिन् सर्व्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः। विदिते वेद्यं नास्तीति। एवं निर्व्वाणं मनुशासनम्। यत्र वा अन्यदिव स्यात् तत्रान्योन्यत् पश्येत्। यत्र त्वस्य सर्व्वमात्मैवाऽभूत्।

तत् केन कं पश्येत्।

यदेतदृष्टश्यते मूर्त्तमेतज्ज्ञानात्मनस्तव।
भ्रान्तिज्ञानेन पश्यन्ति जगद्रूपमयोगिनः।
ये तु ज्ञानविदः शुद्धचेतसस्तेऽखिलं जगत्।
ज्ञानात्मकं प्रपश्यन्ति तद्रूपं परमेश्वरम्॥
निदाघोऽप्युपदेशेन तेनाद्वैतपरोऽभवत्।
सर्व्वभूतान्यशेषेण ददर्श स तदात्मनः।
तथा ब्रह्म ततो मुक्तिमवाप परमां द्विज।
अहमात्मव्यतिरेकेण द्वितीयं यो न पश्यति।
ब्रह्मभूतः स एवेह वेदशास्त्र उदाहृतः॥

कृष्णयजुर्वेदीयश्वेताश्वतरोपनिषत् ॥

ओं ब्रह्मवादिनो वदन्ति। किं कारणं ब्रह्म कुतः स्म जाता जीवाम केन क्व च सम्प्रतिष्ठिताः। अधिष्ठिताः केन सुखेतरेषु वर्त्तामहे ब्रह्मविदो व्यवस्थाम ॥ १ ॥

इत्येव श्रुतिस्मृतियुक्तितोऽनुभवतश्च प्रपञ्चस्य बाधितत्वादत्यन्तविलक्षणानामसदृश्यरूपाणां मधुरतिक्तश्वेतपीतादीनामपि परस्पराध्यासदर्शनादमूर्त्तेऽप्याकाशे तलमलिनताद्यध्यासदर्शनादात्मानात्मनोरत्यन्तविलक्षणयोर्मूर्त्तामूर्त्तयोरपि तथा सम्भवात् स्थूलोऽहं कृशोहमिति देहात्मनोरध्यासानुभवात्।

हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम्।
उभौ तौ न विजानीतो नायं हन्ति न हन्यत।

इत्यादि श्रुतिस्मृतिदर्शनात्। य एनं वेत्ति हन्तारम्। प्रकृतेः क्रियमाणानीति स्मृतिदर्शनाच्चाध्यासस्य प्रहाणायात्मैकत्वविद्याप्रतिपत्तये उपनिषदारभ्यते ॥

ब्रह्मवादिनो वदन्तीत्यादि श्वेताश्वतराणाम् मन्त्रोपनिषत्। तस्या अल्पग्रन्था वृत्तिरारभ्यते। ब्रह्मवादिनः ब्रह्मवदनशीलाः सर्व्वे सम्भूय वदन्ति। किं कारणं ब्रह्म आहोस्वित् कालादि कालस्वभाव इति वक्ष्यमाणम्। अथवा किं कारणं ब्रह्म सिद्धिरूपमुपादानभूतं किमित्यर्थः। अथवा बृहयति बृंहयति तस्मादुच्यते परं ब्रह्मैव श्रुत्यैवं निर्व्वच-

कालस्वभावो नियतिर्यदृच्छा भूतानि योनिः

नान्निमित्तोपादानयोरुभयोर्वा प्रश्नः। किं कारणं ब्रह्मेति। किं ब्रह्म कारणं आहोस्वित् कालादि। अथवा अकारणमेव। कारणत्वेऽपि किं निमित्तमुतोपादानम्। अथवोभयम्। तद्वा किं लक्षणमिति। वक्ष्यमानपरिहारानुरूपेण तन्वेषणात्वा वा प्रश्नेऽपि सङ्ग्रहः कर्त्तव्यः। प्रश्नापेक्षत्वात् परिहारस्य। कुतः स्म जाताः कुतो वयं कार्य्यकारणवन्तो जाताः। न स्वरूपेण जीवानामुत्पत्तादयसम्भवात्। तथा च श्रुतिः। न जायते म्रियते वा विपश्चित् जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत इति। जरामृत्यू शरीरस्य अविनाशी वा आग्नेय आत्मानुच्छित्तिधर्म्मेति॥ तथा च स्मृतिः। अजः शरीरग्रहणात् स जात इति कौच्यत इति। किञ्च। जीवात्मकेन केन वा वयं सृष्टाः सन्तो जीवाम इति स्थितिविषयः प्रश्नः॥ क्व च सम्प्रतिष्ठाः प्रलयकाले स्थिताः। अधिष्ठिता नियमिताः केन सुखेतरेषु सुखदुःखेषु वर्त्तामहे। ब्रह्मविदो व्यवस्थां हे ब्रह्मविदः सुखदुःखेषु व्यवस्थां केनाधिष्ठिताः सन्तोऽनुवर्त्तामह इति सृष्टिस्थितिप्रलयनियमहेतुः किमिति प्रश्नसङ्ग्रहः॥ १॥

इदानीं कालादीनि ब्रह्मकारणत्वे प्रतिमत्तभूतानि विचारविषयत्वेन दर्शयति। कालस्वभाव इति॥ योनिशब्दः सम्बध्यते। कालो योनिः कारणं स्यात्। कालो नाम सर्व्वभूतानां विपरिणामहेतुः स्वभावः। स्वभावो नाम पदार्थानां प्रति नियता शक्तिः अग्नेरौष्ण्यमिव। नियतिरविषमपु-

पुरुष इति चिन्त्या। संयोग एषां न त्वात्मभावादात्माप्यनीशः सुखदुःखहेतोः ॥ २ ॥

क्षपापलक्षणं कर्म्म तद्वा कारणम्। यदृच्छा आकस्मिकी प्राप्तिः। भूतानि आकाशादीनि वा। योनिः पुरुषो वा विज्ञानात्मा योनिः। इति इत्थमुक्तप्रकारेण किं योनिरिति चिन्त्या चिन्त्यं निरूपणीयम्। केचिद् योनिशब्दं प्रकृतिं वर्णयन्ति। तस्मिन् पक्षे किं कारणं ब्रह्मेति पूर्वोक्तम्। किं कारणं ब्रह्मेति कारणपदमत्राप्यनुसन्धेयम् ॥ तत्र कालादीनामकारणत्वं दर्शयति। संयोग एषामित्यादिना। अयमर्थः। किं कालादीनि प्रत्येकं कारणं उत तेषां समूहः। न च प्रत्येकं कालादीनां कारणत्वं सम्भवति। दृष्टिविरुद्धत्वात्। देशकालनिमित्तानां संहतानामेव लोके कार्य्यकरत्वदर्शनात्। न चाप्येषां कालादीनां संयोगसमूहः कारणम्। समूहस्य संहतेः परार्थशेषत्वेन शेषिण आत्मनो विद्यमानत्वादस्वातन्त्र्यात् सृष्टिस्थितिप्रलयनियमलक्षणकार्य्यकरणत्वायोगात् आत्मा तर्हि कारणं स्यादेव। एतदत आह। आत्माप्यनीशः सुखदुःखहेतोः। आत्मा जीवोऽप्यनीशः स्वतन्त्रो न कारणम्। अस्वातन्त्र्यादेव चात्मनोऽपि सृष्ट्यादिहेतुत्वं न सम्भवतीत्यर्थः। कथमनीशत्वम्। सुखदुःखहेतोः सुखदुःखहेतुभूतस्य पुण्यापुण्यलक्षणस्य कर्म्मणो विद्यमानत्वात्। कर्म्मपरवशत्वेनास्वातन्त्र्याच्च। चैलोक्यसृष्टिस्थितिनियमे सामर्थ्यं न विद्यत एवेत्यर्थः। अथवा सुखदुःखादिहेतुभूतस्याध्यात्मिकादिभेदभिन्नस्य जगतोऽनीशो न कारणम् ॥ २ ॥

ते ध्यानयोगानुगता अपश्यन्

एवं पक्षान्तराणि निराकृत्य प्रमाणान्तरागोचरे वस्तुनि प्रकारान्तरमपश्यन्तो ध्यानयोगानुगमेन परममूलकारणं स्वयमेव प्रतिपेदिरे। ते ध्यानयोगेति॥ ध्यानं नाम चित्तैकाग्र्यं तदेव योगो युज्यतेऽनेनेति ध्यातव्यस्वीकारोपायस्तमनुगताः समाहिता अपश्यन्। दृष्टवन्तः॥ देवात्मशक्तिमिति। पूर्वोक्तमेव समुदायपरिहाराणां सूचं उत्तरच प्रत्येकं प्रपञ्चयिष्यते तत्रायं प्रश्नसङ्ग्रहः। किं ब्रह्म कारणं आहोस्वित् कालादितया। किं कारणं ब्रह्म आहोस्वित् कार्यकारणविलक्षणम्। अथवा कारणं वा अकारणञ्च। कारणत्वेऽपि किमुपादानमुत निमित्तम्। अथवोभयकारणं ब्रह्म किंलक्षणं अकारणं वा ब्रह्म किंलक्षणमिति। तत्रायं परिहारः। न कारणं नाप्यकारणं न चोभयं नाप्युभयं न च निमित्तं न चोपादानं न चोभयमेतदुक्तं भवति। अद्वितीयस्य परमात्मनो न स्वतः कारणत्वमपादानत्वं निमित्तत्वञ्च। यदुपाधिकमस्य कारणत्वादि तदेवं कारणनिमित्तमुपपाद्य तदेव प्रयोजकं निष्कृष्य दर्शयति। देवात्मशक्तिमिति॥ देवस्य द्योतनादियुक्तस्य मायिनो महेश्वरस्य परमात्मन आत्मभूतामस्वतन्त्रां न साङ्ख्यपरिकल्पितप्रधानादिव पृथगभूतां स्वतन्त्रां शक्तिं कारणमपश्यन्। दर्शयिष्यति च। मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरमिति॥ तथा ब्राह्मे।

एषा चतुर्विंशतिभेदभिन्ना माया पराप्रकृतिस्तत् समुत्था। तथा च। मयाध्यक्षेण प्रकृतिः सूयते सचराचरं। इति स्वगुणैः प्रकृतिकार्य्यभूतैः पृथिव्यादिभिश्च निगूढां संहताम्।

देवात्मशक्तिं स्वगुणैर्निगूढाम ।

कार्य्याकारेण कारणाकारस्याभिभूतत्वात् । कार्य्यापृथक्स्वरूपेणोपलब्धुमयोग्यामित्यर्थः । तथा च प्रकृतिकार्य्यत्वं गुणानां दर्शयति व्यासः ।

सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवा इति ॥ कोऽसौ देवो यस्येयं विश्वजननी शक्तिरभ्युपगम्यते इत्यत्राह । यः कारणानि निखिलानि तानि पूर्व्वोक्तानि कालात्मयुक्तानि कालात्मभ्यां युक्तानि कालपुरुषसंयुक्तानि स्वभावादीनि कालस्वभाव इति मन्त्रोक्तान्यधितिष्ठति नियमयति एकोऽद्वितीयः । योऽद्वितीयः परमात्मा तस्य शक्तिं कारणमपश्यन्निति वाक्यार्थः । अथवा देवात्मशक्तिं देवतात्मना ईश्वररूपेणावस्थितां शक्तिम् । तथा च ।

सर्व्वभूतेषु सर्व्वात्मन् या शक्तिरपराभवा ।
गुणाश्रया नमस्तस्यै शाश्वतायै परेश्वर ॥
याऽतीताऽगोचरा वाचां मनसां चाविशेषणा ।
ज्ञानध्यानपरिच्छेद्या तां वन्दे देवतां पराम्मिति ॥

प्रपञ्चयिष्यति स्वभावादिनामकारणत्वमज्ञानस्यैव कारणत्वं स्वभावमेके कवयो वदन्तीत्यादि । मायी सृजते विश्वमेतत् । एको रुद्रो न द्वितीयोऽवतस्थे । एको वशी बहुधा शक्तियोगादित्यादि । स्वगुणैरीश्वरगुणैः सर्व्वज्ञत्वादिभिर्वा सतत्त्वादिभिर्निगूढां कार्य्यकारणविनिर्म्मुक्तपूर्णानन्दाद्वितीयब्रह्मात्मनैवानुपलभ्यमानां ॥ कोऽसौ देवः । यः कारणानीत्यादि पूर्व्ववत् । अथवा देवस्य परमेश्वरस्यात्म-

यः कारणानि निखिलानि तानि

भूतां तु जगदुदयस्थितिलयहेतुभूतां ब्रह्मविष्णुशिवात्मिकां शक्तिमिति ॥ तथाचोक्तम् ।

शक्तयो यस्य देवस्य ब्रह्मविष्णुशिवात्मिका इति ।

ब्रह्मविष्णुशिवा ब्रह्मन् प्रधाना ब्रह्मशक्तय इति च ।

स्वगुणैः सत्त्वरजस्तमोभिः । सत्त्वेन विष्णू रजसा ब्रह्मा तमसा महेश्वरः सत्त्वाद्युपाधिसम्बन्धस्वरूपेण निरुपाधिकपूर्णानन्दाद्वितीयब्रह्मात्मैवानुपलभ्यमानाः परस्यैव ब्रह्मणः सृष्ट्यादिकार्यं कुर्वन्तोऽवस्थाभेदमाश्रित्य । शक्ति भेदव्यवहारा न पुनस्तत्त्वभेदमाश्रित्य तथा चोक्तम् ।

सर्गस्थित्यन्तकारिणीं ब्रह्मविष्णुशिवात्मिकाम् ।

स संज्ञां याति भगवानेक एव जनार्दनः ॥

इति प्रथममीश्वरात्मना मायिरूपेणावतिष्ठते ब्रह्म । स पुनर्मूर्त्तिरूपेण त्रिधा व्यवतिष्ठते । तेन च रूपेण सृष्टिस्थितिनियमादिकार्यं करोति । तथा च श्रुतिः परस्य शक्तिद्वारेण नियमनादिकार्यं दर्शयति। लोकानीशत ईशनीभिः प्रत्यङ्जनास्तिष्ठति सञ्चुकोच अन्तकाले संसृज्य विश्वा भूतानि गोपायति । ईशत ईशनीभिर्जननीभिः परमशक्तिभिरिति विशेषणात् ॥

ब्रह्मविष्णुशिवा ब्रह्मन् प्रधाना ब्रह्मशक्तयः ।

विष्णुशक्तिः स्मृता प्रोक्त्यै स्मृतेः परमशक्तिभिः ॥

इति परदेवतानां ग्रहणम् । अथवा देवात्मशक्तिमिति देवश्च आत्मा च शक्तिश्च यस्य परस्य ब्रह्मणोऽवस्थाभेदास्तां प्रकृतिपुरुषेश्वराणां स्वरूपभूतां ब्रह्मरूपेणावस्थितां परात्

कालात्मयुक्तान्यधितिष्ठत्येकः ॥ ३ ॥

परतरां शक्तिं कारणमपश्यन्निति । तथाच त्रयाणां स्वरूपभूतं प्रदर्शयिष्यति। भोक्ता भोग्यं प्रेरितारञ्च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत् । त्रयं यदा विन्दते ब्रह्ममेतदिति । स्वगुणैर्ब्रह्मपरतन्त्रैः प्रकृत्यादिविशेषणैरुपाधिभिर्निगूढाम् । तथा च दर्शयिष्यति । एको देवः सर्वभूतेषु गूढ इति। तं दुर्दर्शं गूढमनुप्रविष्टमिति श्रुतेः । यो वेद निहितं गुहायाम् । इहैव सन्तं न विजानन्ति देवा इति श्रुत्यन्तरम् । यः कारणानीति पूर्ववत् । अथ वा देवात्मनो द्योतनात्मनः प्रकाशस्वरूपस्य ज्योतीषां ज्योतिरूपस्य प्रज्ञानघनस्वरूपस्य परमात्मनो जगदुदयस्थितिलयनियमनविषयां शक्तिं सामर्थ्यमपश्यन्निति स्वगुणैः स्वव्यष्टिभूतैः सर्वज्ञत्वसर्वशक्तित्वादिभिर्निगूढां तत्तद्विशेषरूपेणावस्थितत्वात् स्वरूपेण शक्तिमात्रेणानुपलभ्यमानाम् । तथा च मानान्तरवेद्यां शक्तिं दर्शयिष्यति ।

न तस्य कार्यं करणञ्च विद्यते
न तत् समश्चाभ्यधिकश्च दृश्यते ।
परास्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रियापि चेति ॥

समानमन्यत् कारणं देवात्मशक्तिमिति प्रश्ने परिहारे च ये ये पक्षभेदाः प्रदर्शितास्ते सर्वे सङ्गृहीताः । उत्तरत्र सर्वेषां प्रपञ्चनादप्रस्तुतस्य प्रपञ्चनायोगात् प्रश्नोत्तरदर्शनाच्च । समासव्यासधारणस्य च षिदुषामिष्टत्वात् । तथाचोक्तम् ।

इष्टं हि विदुषां लोके समासव्यासधारणमिति। तथा च श्रुत्यन्तरे सङ्कच्छुतस्य गोपामिति पदस्य व्याख्याभेदः श्रुत्यैव प्रदर्शितः। अपश्यं गोपामित्याह। प्राणा वै गोपा इति। अपश्यन् गोपामित्याह असौ वा आदित्यो गोपा इति। अथ कस्मादुच्यते ब्रह्मेत्यारभ्य बृहयद्ब्रह्म यद्ब्रह्मेति तस्मादुच्यते परंब्रह्मेति। सङ्कच्छुतस्य ब्रह्मपदस्य निमित्तोपादानरूपेणार्थभेदः श्रुत्यैव दर्शितः। एवं तावत् देवात्मशक्तिं यः कारणानि निखिलानि कालात्मना युक्तान्यधितिष्ठत्येक इति। एकस्याद्वितीयस्य परमात्मनः स्वरूपेण शक्तिरूपेण च निमित्तकारणोपादानकारणत्वं मायित्वेनेश्वररूपत्वं देवतात्मत्वसर्व्वज्ञत्वादिरूपत्वं सत्यज्ञानानन्दाद्वितीयरूपत्वञ्च समासेन श्रुत्यर्थाभ्यामभिहितम्॥ इदानीं तमेव सर्व्वात्मानं दर्शयति कार्य्यकारणयोरनन्यत्वप्रतिपादनेन। वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति निदर्शनेनाद्वितीयापूर्व्वानपरेतिनेत्यात्मकवाग्गोचराशनाद्यसंस्पृष्टप्रत्यस्तमितभेदचित् सदानन्दब्रह्मात्मत्वं प्रदर्शयितुमना अप्रकृत्यैव प्रपञ्चं भ्रान्तामवस्थां प्राप्तस्य परब्रह्मण ईश्वरात्मनः सर्व्वज्ञत्वापहतपाप्मादिरूपेण देवतात्मना ब्रह्मादिरूपेण कार्य्यादिरूपेण वैश्वानरादिरूपेण च मोक्षापेक्षितशुद्ध्यर्थां स यदि पितृलोककाम इति विध्वैश्वर्य्यार्थां समां वा नित्यं शङ्करं वा प्रयाति। साधर्म्यानाविशिष्टत्वेन मामहं वैष्णवं तथा इत्यादि देवतासायुज्यप्राप्त्यर्थां वैश्वानरप्राप्त्यर्थांश्चोपासनार्थामशेषलौकिकवैदिककर्म्मप्रसिद्ध्यर्थाश्च यदि कार्य्यकारणरूपेण स्वरूपेण चित्सदानन्दाद्वितीयब्रह्मात्मना

तमेकनेमिं त्रिवृतं षोडशान्तं

च व्यवस्थितां स्यात् तदा भोग्यभोक्तृनियन्तृ भावे संसारमोक्षयोरभाव एव स्यात्। अधिकारिणोऽभावेन साधनभूतस्य प्रपञ्चस्याभावात्। तत् तदा दातुश्चेश्वरस्याभावात्। तथा संसारादिभूतमीश्वरं दर्शयति। संसारमोक्षस्थितिबन्धहेतुरिति॥ तथा च संसारमोक्षयोरभाव एव स्यात्। तत्सिद्ध्यर्थं प्रपञ्चाद्यवस्थानं दर्शयति।

एकं पादं नोत्क्षिपति सलिलाद्धं स उच्चटन्।
स चेदविन्दन्नानन्दं न सत्यं नानृतं भवेत्॥

सनत्सुजातेऽपि एकं पादं नोत्क्षिपति इत्यादि।

तथा च श्रुतिः। पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवीति तच्च प्रथमेन मन्त्रेण॥ २॥

सर्व्वात्मानं ब्रह्मचक्रं दर्शयति द्वितीयेन नदीरूपेण। तमिकेति। य एकः कारणानि निखिलानि अधितिष्ठति तमेकनेमिम्। योनिः कारणमारभ्य अव्याकृतमाकाशं परमव्योम माया प्रकृतिः शक्तिः तमोऽविद्या छाया अज्ञानं अनृतं अव्यक्तमित्येवमादिशब्दैरधिलप्यमाना एका कारणावस्था नेमिरिव नेमिः सर्व्वाधारो यस्याधिष्ठातुरद्वितीयस्य परमात्मनस्तमेकनेमिम्। त्रिवृतं त्रिभिः सत्त्वरजस्तमोभिः प्रकृतिगुणैर्वृतम्। षोडशको विकारः पञ्च भूतान्येकादशेन्द्रियाणि अन्तोऽवसानं विस्तारसमाप्तिर्यस्यात्मनस्तं षोडशान्तम्। अथवा प्रश्नोपनिषदि यस्मिन्नेताः षोडशकलाः प्रभवन्तीत्यारभ्य स प्राणमसृजत प्राणाच्छ्रद्धामित्यादिनामान्ताः षोडशकला अवसानं यस्येति। अथवा एकनेमि-

शतार्द्धारं विंशति प्रत्ययाभिः ।

मिति कारणभूताव्याकृतावस्थाऽभिहिता । तत्कार्य्यसमष्टिभूतविराट्सूत्रहृदयं तदृष्टिभूतभूरादिचतुर्दशभुवनानि अन्तोऽवसानं यस्य प्रपञ्चात्मना ऽवस्थितस्य तं षोडशान्तम् । शतार्द्धारं पञ्चाशत्प्रत्ययभेदविपर्य्यया शक्तिस्तुष्टिसिद्ध्याख्या अरा इव यस्य तं शतार्द्धारम् पञ्च विपर्य्ययभेदाः । तमो मोहो महामोहस्तामिस्रो ह्यन्धतामिस्र इति । शक्तिरष्टाविंशति । तुष्टिर्नवधा । अष्टधा सिद्धिः । एते पञ्चाशत् प्रत्ययभेदाः । तत्र तमसो भेदोऽष्टविधः । अष्टसु प्रकृतिषु स्वात्मना आत्मप्रतिपत्तिविषयभेदेनाष्टविधत्वम् । प्रतिपत्तेर्मोहस्य चाष्टविधो भेदः । अणिमादिशक्तिर्मोहः । दशविधो महामोहः । दृष्टानुश्रविकशब्दादिविषयेषु पञ्चसु पञ्चस्वभिनिवेशो महामोहः । दृष्टानुश्रविकभेदेन तेषां दशविधत्वम् । तामिस्रोऽष्टादशविधः । दृष्टानुश्रविकेषु दशसु विषयेष्वष्टविधैरैश्वर्यैः प्रयतमानस्य तदसिद्धौ यः क्रोधः स तामिस्रोऽभिधीयते । अन्धतामिस्रोऽप्यष्टादशविधः । अष्टविधैश्वर्ये दशसु विषयेषु भोग्यत्वेनोपस्थितेषु अर्द्धभुक्तेषु मृत्युना क्रियमाणस्य यः शोको जायते महता क्लेशेनैते प्राप्ता न चैते मयोपभुक्ताः । प्रत्यासन्नश्चायं मरणकाल इति सोऽन्धतामिस्र इत्युच्यते विपर्य्ययभेदा व्याख्याताः । शक्तिरष्टाविंशतिधोच्यते । एकादशेन्द्रियाणां शक्तयः मूकत्वबधिरत्वान्धत्वप्रभृतयो वाच्याः । अन्तः करणस्य पुरुषार्थयोग्यता तुष्टीनां विपर्य्ययेणाष्टधा शक्तिः । तुष्टिर्नवधा । प्रकृत्युपादानकालभाग्याख्याश्चतस्रः । विषयोपरमाः पञ्च ।

अष्टकैः षड्भिर्विश्वरूपैकपाठं

कश्चित् प्रकृतिपरिज्ञानात् कृतार्थोऽस्मीति मन्यते स पुनः पारिव्राज्यलिङ्गं गृहीत्वा कृतार्थोऽस्मीति मन्यते। अपरः पुनः प्रकृतिपरिज्ञानेन किं आश्रमाद्युपादानेन वा किं बहुना कालेनावश्यं मुक्तिर्भवति इति मत्वा परितुष्यति। कश्चित् पुनर्मन्यते विना भाग्येन न किञ्चिदपि प्राप्यते। यदि ममास्ति ततो भवत्येवाऽचैव मोक्ष इति परितुष्यति। विषयाणामार्जनमशक्यमिति उपारम्य तुष्यति। शक्यते द्रष्टुमार्जितुमर्जितस्य रक्षणमशक्यमिति उपारम्य परितुष्यति। सातिशयत्वादिदोषदर्शनेनोपारम्यापरस्तुष्यति। विषयाः सुतरामेवाभिलाषं जनयन्ति न च तद्भोगाभ्यासे क्वचिदुपजायते।

न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते इति॥

तस्मादलमनेन पुनःपुनरसन्तोषकारणेनोपभोगेनेति। एवं सङ्गदोषदर्शनादुपारम्य कश्चित् तुष्यति। नानुपहत्य भोग्यान्युपभोगाः सम्भवन्ति। भूतोपघातभोगाच्चाधर्मः। अधर्मान्नरकादिप्राप्तिरिति हिंसादोषदर्शनात् कश्चिदुपारम्य तुष्यति। प्रकृत्युपादानकालभाग्याश्चतस्रः। विषयार्जनरक्षणविषयसङ्गहिंसादोषात् पञ्च तुष्टय इति नव तुष्टयो व्याख्याताः। सिद्धयो ऽभिधीयन्ते। ऊहश्शब्दोऽध्ययनमिति। तिस्रः सिद्धयः। दुःखविघातास्तिस्रः। सुहृत्प्राप्तिर्दानमिति सिद्धित्रयम्। ऊहस्तत्त्वं जिज्ञासमानस्य। उपदेशमन्तरेण जन्मान्तरसंस्कारवशात् प्रकृत्यादिविषयं ज्ञानमुत्प-

त्रिमार्गभेदं द्विनिमित्तैकमोहम् ॥ ४ ॥

यते सेयमूहो नाम प्रथमा सिद्धिः। शब्दानामभ्यासमन्तरेण श्रवणमात्राद् यज्ज्ञानमुपपद्यते सा द्वितीया सिद्धिः। अध्ययनं नाम शास्त्राभ्यासाद् यज्ज्ञानमुपपद्यते सा तृतीया सिद्धिः। आध्यात्मिकस्याऽधिभौतिकस्याऽधिदैविकस्य त्रिविधदुःखस्य व्युदासात् शीतोष्णादिजन्यदुःखसहिष्णोस्तितीर्षयज्ज्ञानमुत्पद्यते तस्याऽऽध्यात्मिकादिभेदात् सिद्धेस्त्रैविध्यम्। सुहृदं प्राप्य या सिद्धिर्ज्ञानस्य सा सुहृत्प्राप्तिर्नाम सिद्धिः। आचार्यहितवस्तुप्रदाने या सिद्धिर्विद्यायाः सा दानं नाम सिद्धिः। एवमष्टविधा सिद्धिर्विख्याता। एवं विपर्ययया शक्तिः। तुष्टिसिद्ध्याख्याः पञ्चाशत्प्रत्ययभेदा व्याख्याताः। एवं ब्रह्मपुराणे कल्पोपनिषद्व्याख्यानप्रदेशे षष्टितन्त्राध्याये पञ्चाशत् प्रत्ययभेदाः प्रतिपादिताः। अथवा पञ्चाशच्छक्तिरूपिण इति परस्य या शक्तयः पुराणे स्वरूपतेनाभिमताः पञ्चाशच्छक्तय अरा इव यस्य तं शताराम्। विंशतिप्रत्यरा दशेन्द्रियाणि तेषाञ्च विषया शब्दस्पर्शरूपरसगन्धवचनादानविहरणोत्सर्गानन्दाः। पूर्वोक्तानामराणां प्रत्यरा ये प्रतिविधियन्ते कीलका अराणां दार्ढ्याय ते प्रत्यरा उच्यन्ते तैः प्रत्यरैर्युक्तं अष्टकैः षड्भिर्युक्तमिति योजनीयम्॥

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा॥

इति प्रकृत्यष्टकम्॥ त्वक्चर्ममांसरुधिरमेदोऽस्थिमज्जाशुक्राणि धात्वष्टकम्। अणिमाद्यैश्वर्याष्टकम्। धर्मज्ञानवैराग्यैश्वर्याधर्माज्ञानवैराग्यानैश्वर्याख्या भावाष्टकम्। ब्रह्म-

पञ्चस्रोतोम्बुं पञ्चयोन्युग्रवक्त्रां
पञ्चप्राणोर्मिं पञ्चबुद्ध्यादिमूलाम्।

प्रजापतिदेवगन्धर्वयक्षराक्षसपितृपिशाचा देवाष्टकम्। अष्टावात्मगुणा ज्ञेयाः। दया सर्व्वभूतेषु क्षान्तिरनसूयाशौचमनायासो मङ्गलमकार्प्पण्यमस्पृहेति गुणाष्टकं षष्ठम्। एतैः षड्भिर्युक्तं विश्वरूपैकपाशं स्वर्गपुत्राद्याद्यादिविषयभेदात्। विश्वरूपं विश्वरूपो नानारूपः॥ एकः काम्याख्यः पाशोऽस्येति विश्वरूपैकपाशः। धर्म्माधर्म्मज्ञानमार्गभेदा अस्येति त्रिमार्गभेदम्। द्वयोः पुण्यपापयोर्निमित्तैकमोहो देहेन्द्रियमनोबुद्ध्यादिष्वनात्मस्वात्माभिमानोऽस्येति द्विनिमित्तैकमोहम्। अपश्यन्निति क्रियापदमनुवर्त्तते। अधीम इत्युत्तरमन्वसिङ्गं वा क्रियापदम्॥ ४॥

पूर्व्वं चक्ररूपेण दर्शितमिदानीं नदीरूपेण दर्शयति। पञ्चस्रोत इति। पञ्चस्रोतांसि चक्षुरादीनि ज्ञानेन्द्रियाणि अम्बुस्थानानि यस्यास्तां नदीं पञ्चस्रोतोऽम्बुं अधीम इति सर्व्वत्र सम्बध्यते। पञ्चयोनिभिः कारणभूतैः पञ्चभूताग्रां वक्त्राच्च पञ्चयोन्युग्रवक्त्रां। कर्म्मेन्द्रियाणि पाण्यादयो वा जन्मयो यस्यास्तां। पञ्चबुद्धीनां चक्षुरादिजन्यानामज्ञानादिकारणं मनः। मनोवृत्तिरूपत्वात् सर्व्वज्ञानानां मनो मूलं कारणं यस्याः संसारसरितस्ताम्॥ तथाच मनसः सर्व्वहेतुत्वं दर्शयति।

मनोविजृम्भितं सर्व्वं यत्किञ्चित् सचराचरम्।
मनसो ह्यमनोभावे हैतं भित्वोपलभ्यत इति॥

पञ्चशब्दादयो विषया आवर्त्तस्थानीयास्तेषु विषयेषु

पञ्चवर्त्तां पञ्चदुःखौघवेगाम्
पञ्चग्रन्थिं पञ्चपर्व्वामधीमः ॥ ५ ॥
सर्व्वाजीवे सर्व्वसंस्थे बृहन्ते
अस्मिन् हंसो भ्राम्यते ब्रह्मचक्रे ।

प्राणिनो निमज्जन्तीति यस्यास्तां पञ्चावर्त्ताम् । गर्भदुःखजन्मदुःखजरादुःखव्याधिदुःखमरणदुःखानि यस्यास्तां पञ्चदुःखौघवेगाम् । अविद्याऽस्मितारागद्वेषाभिनिवेशाः पञ्चक्लेशभेदाः पञ्चपर्व्वाण्यस्यास्तां इति । एवं तावन्नदीरूपेण ब्रह्मचक्ररूपेण च कार्य्यकारणात्मकं ब्रह्म सप्रपञ्चमिहाभिहितम् ॥ ५ ॥

इदानीमस्मिन् कार्य्यकारणात्मकब्रह्मचक्रे केन वा संसरति केन वा मुच्यत इति संसारमोक्षहेतुप्रदर्शनायाह । सर्व्वाजीवेति । सर्वेषामाजीवनमस्मिन्निति सर्व्वाजीवे । सर्वेषां संस्था समाप्तिः प्रलयो यस्मिन्निति सर्व्वसंस्थे । बृहन्तेऽस्मिन् हंसो जीवः । हन्ति गच्छत्यध्वानमिति हंसः । भ्राम्यते अनात्मभूतदेहादिमात्मानं मन्यमानः सुरनरतिर्य्यगादिभेदभिन्ननानायोनिषु । एवं भ्राम्यमाणः परिवर्त्तत इत्यर्थः । केन हेतुना नानायोनिषु प्रवर्त्तत इति तत्राह । पृथगात्मनं प्रेरितारञ्च मत्वेति । आत्मानं जीवात्मानं प्रेरितारञ्चेश्वरं पृथग्भेदेन मत्वा ज्ञात्वा अन्योऽसावन्योऽहमस्मीति जीवेश्वरभेददर्शनेन संसारे परिवर्त्तत इत्यर्थः । केन मुच्यत इत्याह । जुष्टः सेवितस्तेन ईश्वरेण चिदानन्दा-

पृथगात्मानं प्रेरितारञ्च मत्वा
जुष्टस्ततस्तेनामृतत्वमेति ॥ ६ ॥
उद्गीतमेतत् परमन्तु ब्रह्म

द्वितीयब्रह्मात्मनाहं ब्रह्मास्मीति समाधानं कृत्वेत्यर्थः। तेनेश्वरसेवनादमृतत्वमेति। यस्तु पूर्णानन्दब्रह्मरूपेणात्मानमवगच्छति स मुच्यते। यस्तु परमात्मनो ऽन्यमात्मानं जानाति स सम्बध्यत इति। तथा च बृहदारण्यके भेददर्शनस्य संसारहेतुत्वं प्रदर्शितम्। य एवं वेदाहं ब्रह्मास्मीति स इदं सर्व्वं भवतीति। तस्य ह न देवाश्च नाभूत्या ईशते। आत्मा ह्येषां स भवति। अथ योऽन्यां देवतामुपास्तेऽन्योसावन्योऽहमस्मीति न स वेद यथा पशुरेवं स देवानामिति ॥

तथा च श्रीविष्णुधर्म्मे।

पश्यत्यात्मानमन्यन्तु यावद्वै परमात्मनः।
तावत् स भ्राम्यते जन्तुर्मोहितो निजकर्म्मणा ॥
सङ्क्षीणाशेषकर्म्मा तु परं ब्रह्म प्रपश्यति।
अभेदेनात्मनः शुद्धं शुद्धत्वादक्षयो भवेत् ॥ ६ ॥

ननु तमेकयोनिमित्यादिना सप्रपञ्चं ब्रह्म प्रतिपादितम्। तथा च सत्यहं ब्रह्मास्मीति ब्रह्मात्मप्रतिपत्तावपि सप्रपञ्चस्यैव ब्रह्मण आत्मत्वेनावगमात्तं यथा यथोपासते तदेव भवतीति सप्रपञ्चब्रह्मप्राप्तिरेव स्यात्। ततश्च प्रपञ्चस्यापरित्यागान्न मोक्षसिद्धिः। ततश्च जुष्टस्ततस्तेनामृतत्वमेतीति

तस्मिंस्त्रयं सुप्रतिष्ठाऽक्षरञ्च ।

मोक्षोपदेशोऽनुपपन्न एवेत्याशङ्क्याह । उद्गीतमिति । सप्रपञ्चं ब्रह्म यदि स्यात्ततो भवत्येव मोक्षाभावः । न चैतदस्ति । कस्मात् । यत उद्गीतं गीतमुपदिष्टं कार्य्यकारणलक्षणात् प्रपञ्चादेदान्तैः । अन्यदेव तद्विदितादथो अविदितादधि । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते । अस्थूलमनण्वदमस्वर्ग्यं स एष नेति नेतीति । ततो यदुत्तरम् । अन्यत्र धर्म्मात् । न सत्र चासच्छिव एव केवलः । तमसः परः । यतो वाचो निवर्त्तन्ते । यत्र नान्यत् पश्यति नान्यद्विजानाति । स भूमा । योऽशनायापिपासे शोकं मोहं जरामत्येति । अप्राणो ह्यमनाः परतः परः । एकमेवाऽद्वितीयम् । वाचारम्भणं विकारो नामधेयम् । नेह नानास्ति किञ्चन । एकधैवानुद्रष्टव्यम् । इत्येवमादिषु प्रपञ्चासृष्टमेव ब्रह्मावगम्यत इत्यर्थः । यत एवं प्रपञ्चधर्म्मरहितं ब्रह्म अतएव परमन्तु ब्रह्म । तु शब्दोऽवधारणे । परममेव उत्कृष्टमेव । संसारधर्म्मानास्कन्दितत्वात् । उद्गीतत्वेन ब्रह्मण उत्कृष्टत्वात् । तं यथा यथोपासत इति न्यायेन उत्कृष्टब्रह्मोपासनात् उत्कृष्टमेव फलं मोक्षाख्यं भवत्येवेत्यभिप्रायः । नन्वेवं तर्हि ब्रह्मणः प्रपञ्चसंसृष्टत्वे प्रपञ्चस्यापि ब्रह्मासंसर्गात् साङ्ख्यवाद इव प्रपञ्चस्यापि पृथक् सिद्धत्वेन स्वतन्त्रत्वाद्वाचारम्भणं विकारो नामधेयमिति पारतन्त्र्याभ्युपगमेन मिथ्यात्मोपदेशपूर्व्वकमद्वितीयब्रह्मात्मत्वे नोपदेशोऽनुपपन्नश्चेत्याशङ्क्याह । तस्मिंस्त्रयमिति । यद्यपि ब्रह्म प्रपञ्चासं-

अवान्तरं ब्रह्मविदो विदित्वा
लीना ब्रह्मणि तत्परा योनिमुक्ताः ॥ ७ ॥

सृष्टं स्वतन्त्रञ्च तथापि प्रपञ्चो न स्वतन्त्रः। अपि तु तस्मिन्नेव ब्रह्मणि चयं प्रतिष्ठितं भोक्ता भोग्यं प्रेरितारमिति। वक्ष्यमाणं भोक्तृनियन्तृलक्षणम्। अजा ह्येका भोक्तृभोग्यार्थप्रयुक्तेति। वक्ष्यमाणं भोक्तृभोग्यरूपं चान्यद्दृश्रुतिसिद्धं विराट्सूत्राभ्यां कृतनामरूपकर्म्मविश्वतैजसप्राज्ञजाग्रत्स्वप्नसुषुप्तिरूपस्वरूपं प्रतिष्ठितं रज्ज्वामिव सर्पः। य एतस्मिन् सर्व्वं भोक्तादिलक्षणं प्रपञ्चरूपं प्रतिष्ठितम्। अत एवास्य भोक्तादित्रयात्मकस्य प्रपञ्चस्य ब्रह्म सुप्रतिष्ठा शोभनप्रतिष्ठा। ब्रह्मणोऽन्यस्य चलनात्मकत्वात्। चलप्रतिष्ठाऽन्यच्च। ब्रह्मणोऽचलत्वादचाचलप्रतिष्ठा। नन्वेवं तर्हि विकारभूतप्रपञ्चाश्रयत्वेन परिणामित्वाद्घ्यादिवदनित्यं स्यादित्याशङ्क्याह। अक्षरञ्चेति॥ यद्यपि विकारः प्रपञ्चाश्रयस्तथापि अक्षरं न क्षरतीत्यक्षरम्। क्षयश्चेऽवधारणे। अविनाशीव ब्रह्म। मायात्मकत्वाद्विकारस्य। विकाराश्रयत्वेऽप्यविनाशीव कूटस्थं ब्रह्मावतिष्ठत इत्यभिप्रायः। मायात्मकत्वञ्च प्रपञ्चस्य पूर्व्वमेव प्रपञ्चितम्। तस्मात् सर्वात्मकत्वेऽपि ब्रह्मणः प्रपञ्चस्य मिथ्यात्मकत्वेन ब्रह्मणः प्रपञ्चासंसर्गात् पूर्णानन्दब्रह्मात्मानं पश्यतो मोक्षाख्यः परमपुरुषार्थो भवतीत्यर्थः। कथं तर्ह्यात्मानं पश्यतो मोक्षसिद्धिरित्यत आह। अत्राप्यन्नमयाद्यानन्दमयान्ते देहविराडाद्यव्याकृतान्ते वा प्रपञ्चे पर्व्व पूर्व्वोपाधिप्रविलयेनोत्तरोत्तरमप्यग्रनायाद्यसंसृ-

संयुक्तमेतत् क्षरमक्षरञ्च

ष्टं वाचामगोचरं ब्रह्मविदो विदित्वा लीना ब्रह्मणि विश्वा-द्युपसंहारमुखेन लयं गता अहं ब्रह्मास्मीति ब्रह्मरूपेणैव स्थिता इत्यर्थः। तत्पराः समाधिपराः। किं कुर्व्वन्ति योनिमुक्ता भवन्ति। गर्भजन्मजरामरणसंसारभयान्मुक्ता भवन्तीत्यर्थः॥ तथा च योगियाज्ञवल्क्यो ब्रह्मात्मनैवावस्थितं समाधिं दर्शयति।

यदर्थमिदमद्वैतमरूपं सर्व्वकारणम्।
आनन्दममृतं नित्यं सर्व्वभूतेष्ववस्थितम्॥
तदेव नान्यधीः प्राप्य परमात्मानमात्मना।
तस्मिन् प्रलीयते त्वात्मा समाधिः स उदाहृतः॥
इन्द्रियाणि वशीकृत्य यमादिगुणसंयुतः।
आत्ममध्ये मनः कुर्य्यादात्मानं परमात्मनि॥
परमात्मा स्वयं भूत्वा न किञ्चिच्चिन्तयेत्ततः।
तदा तु लीयते तस्मिन् प्रत्यगात्मन्यखण्डिते॥
प्रत्यगात्मा स एव स्यादित्युक्तं ब्रह्मवादिभिरिति॥७॥

नन्वद्वितीये परमात्मन्यभ्युपगम्यमाने जीवेश्वरयोरपि विभागाभावात् लीना ब्रह्मणि जीवानां ब्रह्मैकत्वपरलयश्रुतिरनुपपन्नैवेत्याशङ्क्य व्यवहारव्यवस्थायां जीवेश्वरयोरुपाधितो विभागं दर्शयित्वा तद्विज्ञानादमृतत्वं दर्शयति। संयुक्तमेतदिति॥ व्यक्तं विकारजातं अव्यक्तं कारणं तदुभयं क्षरमक्षरञ्च। व्यक्तं क्षरं विनाशि अव्यक्तमक्षरमविनाशि तदुभयं परस्परसंयुक्तं कार्य्यकारणात्मकं विश्वं भरते बिभर्त्ति ईशः ईश्वरः॥ तथाचाह भगवान्।

व्यक्ताव्यक्तं भरते विश्वमीशः।

क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते।
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः॥
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वर इति।

न केवलमीश्वरो व्यक्ताव्यक्तं भरते अनीशश्चानीशश्च। स आत्मा अविद्यातत्कार्यभूतदेहेन्द्रियादिभिर्विश्यते भोक्तृभावात्। एतदुक्तं भवति। परस्परसंसक्तव्यष्टिसमष्टिरूपईश्वरः। तद्व्यष्टिभूतदेहेन्द्रियात्मकोऽनीशो जीवः। एवं समष्टिव्यष्ट्यात्मकत्वेन जीवपरयोरौपाधिकस्य भेदस्य विद्यमानत्वात्तदुपाध्युपासनद्वारेण निरुपाधिकमीश्वरं ज्ञात्वा मुच्यत इति भोक्तृतत्त्वैक्यवादेनानुपपन्नं किञ्चिदिष्यत इति॥ तथाचौपाधिकमेव भेदं दर्शयति भगवान् याज्ञवल्क्यः।

आकाशमेकं हि यथा घटादिषु पृथग् भवेत्।
तथात्मैको ह्यनेकश्च जलधारेष्विवांशुमान्॥

तथा च श्रीविष्णुधर्मे॥

परात्मनो मनुष्येन्द्र विभागो हि न कल्पितः।
क्षये तस्यात्मपरयोर्विभागाभाव एव हि॥
आत्मा क्षेत्रज्ञसंज्ञोऽयं संयुक्तः प्राकृतैर्गुणैः।
तैरेव विगतः शुद्धः परमात्मा निगद्यते॥
अनादिसम्बन्धवत्या क्षेत्रज्ञोऽयमविद्यया।
युक्तः पश्यति भेदेन ब्रह्म त्वात्मनि संस्थितम्॥

तथा च श्रीविष्णुपुराणे॥

विभेदजनके ज्ञाने नाशमात्यन्तिकं गते।

अनीशश्चात्मा बुध्यते भोक्तृभावात्

आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥

तथा च वासिष्ठे योगशास्त्रे प्रश्नपूर्व्वकं दर्शितम् ॥

यद्यात्मा निर्गुणः शुद्धः सदानन्दोऽजरोऽमरः ।
संसृतिः कस्य तात स्यान् मोक्षो वाऽविद्यया विभो ॥
क्षेत्रज्ञाये कथं तस्य ज्ञायते भगवान् यतः ।
यथावत् सर्व्वमेतं मे वक्तुमर्हसि साम्प्रतम् ॥

वसिष्ठः ॥

तस्यैव नित्यशुद्धस्य सदानन्दमयात्मनः ।
अवच्छिन्नस्य जीवस्य संसृतिः कीर्त्यते बुधैः ॥
एक एव हि भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥
भ्रान्त्या रूढः स एवात्मा जीवसञ्ज्ञः सदा भवेत् ॥

तथा च ब्राह्मे पुराणे परस्यैवौपाधिकं जीवादिभेदं दर्शयति ॥

कथं तर्ह्यौपाधिकभेदेन बन्धमुक्तादिव्यवस्थेत्याशङ्क्य दृष्टान्तपूर्व्वकं व्यवस्थां दर्शयति ।

एकस्तु सूर्य्यो बहुधा जलाधारेषु दृश्यते ।
आभाति परमात्मा च सर्व्वोपाधिषु संस्थितः ॥
ब्रह्म सर्व्वशरीरेषु बाह्यं चाभ्यन्तरे स्थितम् ।
आकाशमिव भूतेषु बुद्धावात्मा न चान्यथा ॥
एवं सति यया बुद्ध्या देहोऽहमिति मन्यते ।
अनात्मन्यात्मता भ्रान्त्या सा स्यात् संसारबन्धिनी ॥

ज्ञात्वा देवं मुच्यते सर्व्वपाशैः ॥ ८ ॥

सर्व्वैर्व्विकल्पै र्हीनस्तु शुद्धो बुद्धो ऽजरोऽमरः ।
प्रशान्तो व्योमवद्व्यापी चैतन्यात्मा सकृत्प्रभः ॥
धूमाभ्रधूलिभिर्व्योम यथा न मलिनीयते ।
प्राकृतैरपरामृष्टो विकारैः पुरुषस्तथा ॥
यथैकस्मिन् घटाकाशे जलैर्धूमादिभिर्य्युते ।
नान्ये मलिनतां यान्ति दूरस्थाः कुत्रचित् क्वचित् ॥
यथा द्वन्द्वैरनेकैस्तु जीवे च मलिनीकृते ।
एतस्मिन्नापरे जीवा मलिनाः सन्ति कुत्रचित् ॥

तथा च शुकग्रिथो गौडपादाचार्य्यः ॥

यथैकस्मिन् घटाकाशे रजोधूमादिभिर्य्युते ।
न सर्व्वे सम्प्रयुज्यन्ते तद्वज्जीवाः सुखादिभिरिति ॥

तस्मादद्वितीये परमात्मन्युपाधितो जीवेश्वरयोर्जीवानाञ्च भेदव्यवस्थायाः सिद्धत्वान्न विशुद्धसत्वोपाधेरीश्वरस्य विशुद्धोपाधिजीवगता सुखदुःखमोहाज्ञानादयः ॥

तथा च भगवान् पराशरः ।

ज्ञानात्मकस्याऽमलसत्त्वराशेरपेतदोषस्य सदा स्फुटस्य ।
किं वा जगत्यस्ति समस्तपुंसामज्ञातमस्यास्ति हृदि स्थितस्येति ॥

नापि जीवान्तरगतसुखदुःखमोहादिना जीवान्तरस्य बद्धस्य मुक्तस्य वा सम्बन्धः । उपाधितो व्यवस्थायाः सम्भवात् । अत एकमुक्तौ सर्व्वमुक्तिरिति भवदुक्तस्य चोद्यस्यानवकाशः ॥ ८ ॥

ज्ञाज्ञौ द्वावजावीशनीशा-
वजा ह्येका भोक्तृभोग्यार्थयुक्ता ।

किञ्चेदमपरं वैलक्षण्यमित्याह । ज्ञाज्ञौ द्वाविति ॥ न केवलं व्यक्ताव्यक्तं भरते ईशो नाप्यनीशः सन् बध्यते जीवोऽपि तु । ज्ञाज्ञौ ज्ञ ईश्वरः । अज्ञो जीवः । तौ । अजौ जातादिरहितौ । ब्रह्मण एवाविकृतस्य जीवेश्वरात्मनाऽवस्थानात् । तथा च श्रुतिः ।

पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः ।
पुरः स पक्षी भूत्वा पुरः पुरुष आविशदिति ॥

एकस्तथा सर्व्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्चेति च ॥ ईशनीशौ छान्दसं ह्रस्वत्वम् ॥ नन्वद्वैतवादिनो यदि भोक्तृभोग्यलक्षणप्रपञ्चसिद्धिः स्यात् तदा सर्व्वेशः परमेश्वरः । अनीशो जीवः । सर्व्वज्ञः परमेश्वरः । असर्व्वशक्तिर्जीवः । सर्व्वकृत् परमेश्वरः । देहादिविभ्रज्जीवः । सर्व्वात्मा परमेश्वरः । असर्व्वात्मा जीवः । विश्वैश्वर्य्य आप्तकामः परमेश्वरः । अल्पैश्वर्य्योऽनाप्तकामो जीवः । सर्व्वतः पाणिः सहस्रशीर्षा नित्योऽनित्यानामित्यादिना जीवेश्वरयोर्विलक्षणव्यवहारसिद्धिःस्यात् । न तल्लोकादिप्रपञ्चसिद्धिरस्ति । स्वतः कूटस्थापरिणाम्यद्वितीयस्य वस्तुनो भोक्तादिरूपत्वाभावात् । नापि परतो ब्रह्मव्यतिरिक्तस्य भोक्तादिप्रपञ्चहेतूभूतस्य वस्वन्तरस्याभात् । वस्वन्तरसद्भावे द्वैतहानिरित्याशङ्क्याह । अजा ह्येका भोक्तृ भोग्यार्थयुक्तेति ॥ भवेदयमीश्वराद्यविभागः । यदि प्रपञ्चासिद्धिरेव स्यात् सिद्धत्वेवं प्रपञ्चः । हि यस्मा-

अनन्तश्चात्मा विश्वरूपो ह्यकर्त्ता
त्रयं यदा विन्दते ब्रह्ममेतत ॥ ६ ॥

दर्थे। यस्माद्दजा प्रकृतिर्न जायत इत्यादिना सिद्धा प्रसवधर्म्मिणि। अजामेकाम्। मायान्तु प्रकृतिं विद्यात्। इन्द्रो मायाभिः पुरुरूप ईयते। माया परा प्रकृतिः। सम्भवाम्यात्ममायया। इत्यादिश्रुतिस्मृतिसिद्धा विश्वजननी देवात्मशक्तिरूपैका स्वविकारभूतभोक्तृभोगभोग्यार्थप्रयुक्ता ईश्वरनिकटवर्त्तिनी किंकुर्व्वाणाऽवतिष्ठते। तस्मात् सोऽपि मायी परमेश्वरो मायोपाधिसन्निवेशस्थानिव कार्य्यभूतैर्देहादिभिस्तदेव विभक्तएवाऽविभक्त ईश्वरादिरूपेणावतिष्ठते। तस्मादेकस्मिन्नेकरसे परमेऽभ्युपगम्यमानेऽपि जीवेश्वरादिसर्व्वलौकिकवैदिकसर्व्वभेदव्यवहारसिद्धिः। ततस्तयोर्वस्वन्तरस्य सद्भावाद् द्वैतवादिप्रसक्तिः। मायाया अनिर्वाच्यत्वेन वस्तुत्वायोगात्। तथाह।

एषा हि भगवन्माया सदसद्भ्यामनिर्व्वचनीयेति॥ यस्मादजैव भोक्तादिरूपा तस्मात् तत्स्वीकृतस्य मिथ्यासिद्धवस्तुत्वम्। सम्भवात्। अनन्तश्चात्मा। चशब्दोऽवधारणे। अनन्त एवात्मा। अस्यान्तःपरिच्छेदो देशतःकालतो वस्तुतोऽपि न विद्यत इति। विश्वरूपो विश्वमस्यैव रूपमिति। परस्याविश्वरूपत्वात्। वाचारम्भणं विकारो नामधेयमिति। रूपस्य रूपव्यतिरेकेणाभावात् विश्वरूपत्वादप्यानन्त्यं सिद्धमित्यर्थः। हि शब्दो यस्मादर्थे। यस्माद्विश्वरूपवैरूप्यलक्षणः परमात्मा इत्येवमादिभिरात्मनो विश्व-

क्षरं प्रधानममृताक्षरं हरः
क्षरात्मानावीशते देव एकः।

रूपत्वमित्यर्थः। यत एवानन्तो विश्वरूप आत्मा अतएव अकर्त्ता कर्त्तृत्वादिसंसारधर्म्मरहित इत्यर्थः॥ कदैवमनन्तो विश्वरूपः कर्त्तृत्वादिसकलसंसारधर्म्मवर्जितो मुक्तः पूर्णानन्दाद्वितीयब्रह्मरूपेणैवावतिष्ठत इत्यत्राह। त्रयं यदा विन्दते ब्रह्ममेतदिति। त्रयं भोक्तृभोगभोग्यरूपम्। मायात्मकत्वादधिष्ठानभूतव्यतिरेकेण निवृत्तनिखिलविकल्पपूर्णानन्दाद्वितीयब्रह्मभाक् कर्त्तृत्वादिसकलसंसारधर्म्मवर्जितो वीतशोकः कृतकृत्योऽवतिष्ठत इत्यर्थः। अथवा क्षराक्षराजात्मकजीवेश्वरप्रकृतिरूपत्रयं ब्रह्म यदा विन्दते लभते तदा मुच्यत इति। ब्रह्मेति मकारान्तम्। ब्रह्ममेतु मां मधुमेतु माम्॥ मामिति छान्दसम्॥ जीवेश्वरयोर्विभागं दर्शयित्वा तद्विज्ञानादमृतत्वं दर्शितं भवति॥८॥

इदानीं प्रधानेश्वरयोर्वैलक्षण्यं दर्शयित्वा तद्विज्ञानादमृतत्वं दर्शयति। क्षरं प्रधानममृताक्षरं हर इति॥ अविद्यादेर्हरणात् परमेश्वरो हरः। अमृतञ्च तदक्षरं चाऽमृताक्षरममृतं ब्रह्मैव ईश्वर इत्यर्थः। स ईश्वर क्षरात्मानौ प्रधानपुरुषौ ईशते ईष्टे देव एकश्चित्सदानन्दाऽद्वितीयः परमात्मा। तस्य परमात्मनोऽभिध्यानात्। कथं। योजनात्। विश्वानां परमात्मासंयोजनात्। तत्त्वभावादहं ब्रह्मास्मीति भूयश्चासकृत्। यद्वा स्वात्मार्थज्ञाननिष्पत्तिरन्तस्तस्मिन् वाऽर्थज्ञानोदयवेलायां वा विश्वमा-

**तस्याभिधानाद्योजनात् तत्त्वभावाद्
भूयश्चान्ते विश्वमायानिवृत्तिः ॥१०॥**

यानिवृत्तिः। सुखदुःखमोहात्मकाशेषप्रपञ्चरूपमायानिवृत्तिः ॥१०॥

इदानीं तद्विदस्तदिति ध्यानात् स्वाज्ञानध्यानकृतं फलभेदं दर्शयति ज्ञात्वा देवमयमहमस्मीति। सर्वपाशापहानिः। पाशरूपाणां सर्वेषामविद्यादीनामपहानिः। क्षीणैरविद्यादिभिः क्लेशैस्तत्कार्यभूतजन्ममृत्युप्रहाणिः। जननमरणादिदुःखहेतुविनाशफलं प्रदर्शितम्। ध्याने किञ्चित् क्रममुक्तिरूपंविशेषमाह। तस्य परमेश्वरस्याभिध्यानाद् देहभेदे शरीरभेदोपायोत्तरकालमर्चिरादिना देवयानपथा गत्वा परमेश्वरसायुज्यंगतस्य तृतीयं विराड्रूपापेक्षया व्याकृतपरमव्योमकारणेश्वरावस्थं विश्वैश्वर्यलक्षणं भवति। स तत्रैव निर्विशेषमात्मानं ज्ञात्वा केवलो निरस्तसमस्तैश्वर्यं तदुपाधिसिद्धिरव्याकृतपरमव्योमकारणेश्वरात्मकतृतीयावस्थं विश्वैश्वर्यं हित्वा आप्तकाम आत्तकामः पूर्णानन्दाद्वितीयब्रह्मरूपे ऽवतिष्ठते॥ एतदुक्तभवति। सम्यग्दर्शनस्य तथाभूतवस्तुविषयत्वेन निर्विषयपूर्णानन्दाद्वितीयब्रह्मविषयत्वाद्विज्ञानानन्तरमविद्यातत्कार्यप्रहाणेन पूर्णानन्दाद्वितीयब्रह्मस्वरूपो ऽवतिष्ठते। ध्यानस्य पुनः सहसा न निराकारे बुद्धिः प्रवर्त्तत इति। सविशेषब्रह्मविषयत्वात् तं यथा यथोपासत इति न्यायेन सविशेषविश्वैश्वर्यलक्षणब्रह्मप्राप्या विश्वैश्वर्यमनुभूय निर्विशेषपूर्णानन्दब्रह्मात्मानं

ज्ञात्वा देवं सर्वपाशापहानिः
क्षीणैः क्लेशैर्जन्ममृत्यु प्रहाणिः।

ज्ञात्वा केवलात्मकामो वाऽऽप्ताशेषपुमर्थो मुक्तो भवति॥ तथा शिवधर्मोत्तरे ज्ञानध्यानयोर्विश्वैश्वर्यलक्षणं केवलात्माप्तकामलक्षणञ्च फलं दर्शयति।

ध्यानादैश्वर्यमतुलमैश्वर्यात् सुखमुत्तमम्।
ज्ञानेन तत् परित्यज्य विदेहो मुक्तिमाप्नुयादिति॥

तथा च दहरादिसविशेषसगुणोपासकानां स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः सन्तिष्ठन्तीत्यादिना विश्वैश्वर्यलक्षणं फलं दर्शयति। तथा च प्रश्नोपनिषदि। यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परमपुरुषमभिध्यायीत स तेजसि सूर्ये सम्पन्न इत्यादिना परमपुरुषमभिध्यायतोऽर्चिरादिमार्गोपदेशपूर्वकम्। स एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमीक्षत इति ब्रह्मलोकं गतस्य तत्रैव सम्यग्दर्शनलाभं दर्शयित्वा तमोङ्कारेणैवायतनेनान्वेति विद्वान् यत्तच्छान्तमजरममृतमभयं परं वेत्तीति सम्यग्दर्शनेन मोक्ष उपदिष्टः तमेवं विद्वानमृत इह भवतीति विदुषोऽर्चिरादिगमनं विना इहैवाऽमृतत्वप्राप्तिं दर्शयति॥ अथाकामयमान इत्यारभ्य न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येतीत्यादिना विनैवोत्क्रान्तिं विदुषो मोक्ष उपदिष्टः। उदस्मात् प्राणाः क्रामन्त्यहो नेति नेति होवाच याज्ञवल्क्य इति प्रश्नपूर्वकमुत्क्रान्त्यभावो दर्शितः। तथा च ब्राह्मे पुराणे जीवन्मुक्तिं गत्यभावं दर्शयति॥

तस्याऽभिध्यानात्तृतीयं
देहभेदे विश्वैश्वर्यं केवल आप्तकामः ।११।

यस्मिन् काले स्वमात्मानं योगी जानाति केवलम् ।
तस्मात् कालात् समारभ्य जीवन्मुक्तो भवेदसौ ॥
मोक्षस्य नैव किञ्चित् स्यादन्यच्च गमनं क्वचित् ।
स्थानं पराद्वयमपरं यच्च गच्छन्ति योगिनः ॥
अज्ञानबन्धभेदस्तु मोक्षो ब्रह्मलयस्त्विति ॥
तथा लैङ्गे विदुषो जीवन्मुक्तिं दर्शयति ॥
इह लोके परे चैव कर्त्तव्यं नास्ति तस्य वै ।
जीवन्मुक्तो यतस्तस्मात् ब्रह्मवित् परमार्थतः ॥

शिवधर्म्मोत्तरे ॥

वाच्यात्ययेऽपि कर्त्तव्यं किञ्चिदस्य न विद्यते ।
इहैव स विमुक्तः स्यात् सम्पूर्णः समदर्शनः ॥

तस्मादुपासको देहादुत्क्रम्याऽर्चिरादिना देवयानेन विश्वैश्वर्यं ब्रह्म प्राप्य विश्वैश्वर्यमनुभूय तत्रैव केवलं प्रत्यस्तमितभेदपूर्णानन्दाद्वितीयब्रह्मात्मानं ज्ञात्वा केवलमात्मकामो मुक्तो भवति विद्वान् । निर्विशेषपूर्णानन्दाद्वितीयब्रह्मविज्ञानादशेषगन्तृगन्तव्यगमनादिभेदप्रत्यस्तमयादिनैवोत्क्रान्तिं देवयान ब्रह्मज्ञानसमनन्तरं जीवन्मुक्तो ब्रह्मज्ञानसमनन्तरं ब्रह्मानन्दमनुभूयात्मरतिरात्मक्रीड आत्मनैवान्तःसुखोऽन्तरारामोऽन्तर्ज्योतिरात्मक्रीड आत्मरतिरात्ममिथुन आत्मानन्द इहैव स्वाराज्ये भूम्नि स्वे महिम्नामृतोऽवतिष्ठते। तद्वै तुल्वाद्याह्यविषयपरित्यागेन ब्रह्मणाधाय

एतज्ज्ञेयं नित्यमेवात्मसंस्थं
नातः परं वेदितव्यं हि किञ्चित् ।

वाङ्मनःकामनिष्पाद्यं श्रौतस्मार्त्तलक्षणं कर्म कृत्वा विशुद्ध-सत्त्वो योगारूढो भूत्वा शमादिसाधनसम्पन्नः ॥

योगी युञ्जीत सततमात्मानं रहसि स्थितः ।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः ॥
एवं युञ्जन् सदात्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥
सर्व्वभूतस्थमात्मानं सर्व्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्व्वत्र समदर्शनः ॥
समं पश्यन् हि सर्व्वत्र समवस्थितमीश्वरम् ।
न हिनस्त्यात्मनात्मानं ततो याति परां गतिम् ॥११॥

यस्माज् ज्ञानान्तरं परमपुरुषार्थसिद्धिस्तस्मात् एतज्-ज्ञेयमिति ॥ एतत् प्रकृतं केवलात्माकाशब्रह्मरूपं नित्यं नियमेन ज्ञेयं किमन्यत्संस्थं न स्वात्मस्थं ज्ञेयं नानात्मनि ॥ ब्राह्मे श्रूयते ।

तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषामिति ॥

तथा च शिवधर्म्मोत्तरे योगिनामात्मनि स्थितिः ॥

शिवमात्मनि पश्यन्ति प्रतिमासु न योगिनः ।
आत्मस्थं यः परित्यज्य बहिस्थं यजते शिवम् ॥
हस्तस्थं पिण्डमुत्सृज्य लिह्यात् कूर्परमात्मनः ।
सर्व्वत्रावस्थितं शान्तं न पश्यन्तीह शङ्करम् ॥

भोक्ता भोग्यं प्रेरितारञ्च मत्वा
सर्व्वं प्रोक्तं त्रिविधं ब्रह्ममेतत ॥ १२ ॥

ज्ञानचक्षुर्व्विहीनत्वादन्धः सूर्य्यं यथोदितम्।
यः पश्येत् सर्व्वगं शान्तं तस्याध्यात्मस्थितः शिवः॥
आत्मस्थं ये न पश्यन्ति तीर्थे मार्गन्ति ते शिवम्।
आत्मस्थं तीर्थमुत्सृज्य बहिस्तीर्थादि यो व्रजेत्॥
करस्थं स महारत्नं त्यक्त्वा काचं विमार्गति।

अथवा एतद्यदपरोक्षं प्रत्यगात्मरूपं तन्नित्यमविनाशि स्वे महिम्नि स्थितं ब्रह्मैव ज्ञेयम्। कस्मात्। हिशब्दो यस्मादर्थे। तस्मान्नातः परं वेदितव्यमस्ति किञ्चिदपि। श्रूयते च बृहदारण्यके। तदेतत् पदनीयमस्य सर्व्वस्य यदयमात्मेति॥ कथमेतज् ज्ञेयमित्याह। भोक्ता जीवो भोग्यमितरत्। सर्व्वप्रेरिताऽन्तर्य्यामी परमेश्वरः। तदेतत्त्रिविधं प्रोक्तं ब्रह्मैवेति। भोक्राद्यशेषभेदप्रपञ्चविलापनेनैव निर्व्विशेषं ब्रह्मात्मानं जानीयादित्यर्थः॥ तथाचोक्तं कावषेयगीतायाम्॥

त्यक्त्वा सर्व्वविकल्पांश्च स्वात्मस्थं निश्चलं मनः।
कृत्वा शान्तो भवेद्योगी दग्धेन्धन इवानलः॥

तथा च श्रीविष्णुपुराणे॥

तस्यैव कल्पनाहीनस्वरूपग्रहणं हि यत्
मनसा ध्याननिष्पाद्यः समाधिः सोऽभिधीयत इति॥

तदानीमोमित्येतेनाक्षरेण परम्पुरुषमभिध्यायीत। ओमित्यात्मानं युञ्जीत। ओमित्यात्मानं ध्यायीतेतिश्रुतेः॥१२॥

वक्ष्ये यथा योनिगतस्य मूर्त्ति-
र्न दृश्यते नैव च लिङ्गनाशः।
स भूय एवेन्धनयोनिगृह्य-
स्तद्वोभयं वै प्रणवेन देहे ॥ १३ ॥
स्वदेहमरणिं कृत्वा प्रणवञ्चोत्तरारणिं।
ध्याननिर्म्मथनाभ्यासाद् देवं पश्येन्निगूढ़वत्
तिलेषु तैलं दधिनीव सर्पि- ॥ १४ ॥

आत्मानमन्विष्य पराभिध्याने प्रणवस्य नियमाभिध्यानाङ्गत्वेन प्रणवं दर्शयति। वक्ष्ये यथेति ॥ वक्ष्ये यथा योनिगतस्य अरणिगतस्य मूर्त्तिः स्वरूपं न दृश्यते मथनात् प्राङ् नैव च लिङ्गस्य सूक्ष्मदेहस्य विनाशः स एवाऽरणिगतोऽग्निर्भूयः पुनः पुनरिन्धनयोनिना मथनेन गृह्यः। योनिशब्दोऽत्र कारणवचनः। इन्धनेन कारणेन पुनः पुनर्म्मथनाद्गृह्यः। तद्वोभयं। इवार्थो वाशब्दः। तच्चोभयं तदुभयमिव मथनात् प्राङ् न गृह्यते मथनेन च गृह्यते। तद्वदात्मा वह्निस्थानीयः प्रणवेनोत्तरारणिस्थानीयेन मथनाद्गृह्यते देहे अधरारणिस्थानीये ॥ १३ ॥

तदेव प्रपञ्चयति। स्वदेहेति ॥ स्वदेहमरणिं कृत्वा अधरारणिं ध्यानेन निर्म्मथनं तस्य निर्म्मथनस्याऽभ्यासाद् देवं ज्योतीरूपं प्रपश्येन्निगुढ़ाग्निवत् ॥१४॥

उक्तस्यार्थस्य दृढ़िम्ने दृष्टान्तान् बहून् दर्शयति। तिलेष्विति ॥ तिलेषु यन्त्रपीडनेन तैलं गृह्यते दधिमथनेन

आपः स्रोतःस्वरणीषु चाग्निः ।
एवमात्मनि गृह्यतेऽसौ
सत्येनैनं तपसा योऽनुपश्यति ॥ १५ ॥
सर्व्वव्यापिनमात्मानं क्षीरे सर्पिरिवार्पितं ।
आत्मविद्यातपोमूलं तद्ब्रह्मोपनिषत्परं ।

सर्पिरिव । आपः स्रोतःसु नदीषु भूखननेन । अरणीषु चाग्निर्मन्थनेन । एवमात्मात्मनि स्वात्मनि गृह्यते । असौ मननात्मभूतदेहादिषु अन्नमयाद्यशेषोपाधिप्रविलापनेन निर्व्विशेषे पूर्णानन्दे स्वात्मन्येवावगम्यत इत्यर्थः । केन तर्हि पुरुषेणात्मा आत्मन्येव गृह्यत इत्याह । सत्येन यथा भूतहितार्थवचनेन भूतहितेन । सत्यं भूतहितं प्रोक्तमिति स्मरणात् । तपसा इन्द्रियमनसामैकाग्र्यलक्षणेन । मनसश्चेन्द्रियाणाञ्चैकाग्र्यं परमन्तप इति स्मरणात् । एनमात्मानं योऽनुपश्यति ॥१५॥

कथमेनमनुपश्यतीत्यत आह ॥ सर्व्वव्यापीति ॥ सर्व्वं प्रकृत्यादिविशेषान्तं व्याप्यावस्थितं न देहेन्द्रियाद्यध्यात्ममात्रावस्थितमात्मानम् । क्षीरे सर्पिरिव सारत्वेन निरन्तरतया आत्मत्वेन सर्व्वेष्वर्पितमात्मविद्यातपसोर्मूलम् कारणम् । श्रूयते च । एष ह्येव साधुकर्म्म कारयति । ददामि बुद्धियोगं तं येन मामुपयान्ति त इति । अथवा आत्मविद्या च तपश्च यस्यात्मलाभे मूलहेतुरिति ॥ तथा च श्रुतिः । विद्ययाऽमृतमश्नुते विद्ययाऽमृतम् । तपसा ब्रह्मविजिज्ञासस्वेति च ब्रह्म उपनिषत्परं उपनिषत्सर्मस्मिन्

तद्ब्रह्मोपनिषत्परमिति ॥१६॥इतिश्वेताश्वतरोपनिषत्सु प्रथमोऽध्यायः ॥ ओं तत्सत् ओं हरिः ओं ॥

परं श्रेय इति। यः सत्यादिसाधनसंयुक्त एनं सर्व्वव्यापिनमात्मानं क्षीरे सर्पिरिवार्पितं आत्मविद्यातपोमूलं तद्ब्रह्मोपनिषत्परं अनुपश्यति चैनं सर्व्वगतब्रह्मात्मदर्शिनामात्मन्येव गृह्यते नासत्यादियुक्तेनापरिच्छिन्नब्रह्मान्नमयाद्यात्मना। श्रूयते च। सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्य्येण नित्यम्। न येषु जिह्ममनृतं न माया चेति॥ हिर्व्वचनमध्यायपरिसमाप्त्यर्थम् ॥१६॥ इति श्रीमद्गोविन्दभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्य्यश्रीमच्छङ्करभगवत्प्रणीते श्वेताश्वतरोपनिषद्भाष्ये प्रथमोऽध्यायः ॥१॥ हरिः ओं ॥

युञ्जानः प्रथमं मनस्तत्त्वाय सविता धियः।
अग्निंज्योतिर्निचाय्य पृथिव्या अध्याभरत्।१
युक्तेन मनसा वयं देवस्य सवितुः सवे।
सुवर्गेयाय शक्त्यै ॥ २ ॥

ध्यानमुक्तं ध्याननिर्मथनाभ्यासाद् देवं पश्येन्निगूढवदिति परमात्मदर्शनोपायत्वेन इदानीं तदपेक्षितसाधनविधानार्थं द्वितीयोऽध्याय आरभ्यते। तत्र प्रथमं तत्सिध्यर्थं सवितारमाशास्ते। युञ्जान इति॥ युञ्जानः प्रथमं मनः। प्रथमं ध्यानारम्भे मनः परमात्मनि संयोजनया धिय इतरानपि प्राणान्। प्राणा वै धिय इति श्रुतेः। अथवा धियः बाह्यविषयज्ञानानि। किमर्थम्। तत्त्वाय तत्त्वमर्हणाय सविता धियो बाह्यविषयज्ञानाद् अग्निं तस्य ज्योतिःप्रकाशं निचाय्य दृष्ट्वा पृथिव्या अधि अस्मिन् शरीरे आभरत् आहरत्। एतदुक्तं भवति ज्ञाने प्रवृत्तस्य मम बाह्यविषयज्ञानादुपसंहृत्य परमात्मन्येव संयोजयितुमनुग्राहकदेवतात्मनामग्न्यादीनां यत् सर्ववस्तुप्रकाशसामर्थ्यं तत्सर्वमस्मद्रागादिषु सम्यादधेत् सविता यत्प्रसादादवाप्यते योग इत्यर्थः। अग्निशब्द इतरासामप्यनुग्राहकदेवतानामुपलक्षणार्थः॥ १ ॥

युक्तेनेति॥ यदा तत्त्वाय मनो योजयन्ननुग्राहकशक्त्याधानेन देहेन्द्रियदार्ढ्यं करोति तदा युक्तेन सवित्रा पर-

युञ्जाय मनसा देवान् सुवयर्तो धिया दिवम ।
बृहज्ज्योतिः करिष्यतः सविताप्रसुवाति तान्
[॥ ३ ॥

युञ्जते मन उत युञ्जते धियो
विप्रा विप्रस्य बृहतो विपश्चितः ।

मात्मनि संयोजितेन मनसा वयं तस्य देवस्य सवितुः सवेऽनुज्ञायां सत्यां स्वर्गायाय स्वर्गप्राप्तिहेतुभूताय ध्यानकर्मणि यथासामर्थ्यं प्रयतामहे परमात्मवचनोऽत्र स्वर्गशब्दः तत्प्रकरणात् तस्यैव सुखरूपत्वात् तदंशत्वाच्चेतरस्य सुखस्य । तथा च श्रुतिः । एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति ॥ २ ॥

युञ्जायेति ॥ पुनरपि सोऽप्येवं करोत्विति प्रार्थना । युञ्जाय योजयित्वा देवान् मनआदीनि करणानि तेषां विशेषणम् । स्वः स्वर्गं सुखं पूर्णानन्दब्रह्म यत इति द्वितीयाबहुवचनम् । नः पूर्णानन्दब्रह्म गच्छतो न शब्दादिविषयान् । पुनरपि विशेषणान्तरं धिया सम्यग्दर्शनेन दिवं द्योतनस्वभावचैतन्यैकरसं बृहन् महद् ब्रह्मज्योतिःप्रकाशं करिष्यतः पूर्णानन्दब्रह्माविष्करिष्यतः । अत्र द्वितीयाबहुवचनम् । सविता प्रसुवाति तान् तानि करणानि । यथा करणानि विषयेभ्यो निवृत्तानि आत्माभिमुखानि आत्मप्रकाशमेव तथानुजानातु सवितेत्यर्थः ॥ ३ ॥

तस्यैवमनुजानतो महता परितुष्टिः कर्त्तव्येत्याह ।

वि होत्रा दधे वयुना विदेक इन्
महो देवस्य सवितुः परिष्टुतिः ॥ ४ ॥
युजे वां ब्रह्म पूर्व्यं नमोभि
र्विश्लोका यन्ति पथ्येव सूराः ।

युञ्जत इति ॥ युञ्जते योजयन्ति ये विप्रा मन उत युञ्जते धिय इतराण्यपि करणानि । धीहेतुत्वात् करणेषु धीशब्द-प्रयोगः । तथा च श्रुत्यन्तरम् । यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सहेति । विप्रस्य विशेषणव्याप्तस्य बृहतो महतो विपश्चितः सर्व्वज्ञस्य देवस्य सवितुर्महो महती परिष्टुतिः कर्त्तव्या । कैर्विप्रैः । पुनरपि विशिनष्टि । वि होत्रा दधे । होत्राः क्रिया यो विदधे वयुनावित् प्रज्ञावित् सर्व्वज्ञानात् साक्षिभूत एषोऽद्वितीयः । ये विप्रा मनआदिकरणानि विषयेभ्य उपसंहृत्यात्मन्येव योजयन्ति तैर्विप्रस्य बृहतो विपश्चितो महती परिष्टुतिः कर्त्तव्या । होत्रा दधे वयुना-विदेकः सविता ॥ ४ ॥

किञ्च ॥ युजे वामिति ॥ युजे वां समादधे वां युवयोः करणानुग्राहकयोः सम्बन्धि प्रकाशत्वेन तत् प्रकाशितं ब्रह्मेत्यर्थः । अथवा वामिति बहुवचनार्थे युष्माकं कारणभूतं ब्रह्म पूर्व्यं पूर्व्वं चिरन्तनं युजे समादधे । नमोभिर्न्नम-स्कारैश्चित्तप्रणिधानादिभिः । एष एवं समादधानस्य मम श्लोका यन्ति कीर्त्तितव्या यन्ति विविधमेत्य पथ्येव सूराः । पथि सन्मार्गे । अथवा पथ्या कीर्त्तिरित्येतद्वाक्यं प्रार्थना-

शृण्वन्ति विश्वे अमृतस्य पुत्रा
आ ये धामानि दिव्यानि तस्थुः ॥ ५ ॥
अग्निर्यत्राभि मथ्यते वायुर्यत्राभि युज्यते ।
सोमो यत्रातिरिच्यते तत्र सञ्जायते मनः
[॥ ६ ॥
सविता प्रसवेन जुषेत ब्रह्म पूर्व्यम् ।

रूपं शृण्वन्तु विश्व अमृतस्य ब्रह्मणः पुत्राः सूरात्मनो हिरण्यगर्भस्य । के ते । ये धामानि दिव्यानि दिविभवान्यातस्थुरधितिष्ठन्ति ॥ ५ ॥

युञ्जानः प्रथमं मन इत्यादिना सवित्रादिप्रार्थना प्रतिपादिता । यस्तु पुनः प्रार्थनां कृत्वा तैरनुज्ञातः सन् योगे प्रवर्त्तते स भोगहेतोः कर्म्मण्येव प्रवर्त्तत इत्याह । अग्निर्यत्रेति ॥ अग्निर्यत्राभिमथ्यते भरणमथनतत्साधनादौ । वायुर्यत्र प्रवर्य्यादौ । पवित्रप्रेरितः शब्दमभिव्यक्तं करोति । सोमो यत्र दशापवित्रात् पूर्य्यमानोऽतिरिच्यते तत्र क्रतौ सञ्जायते मनः । यस्मादननुज्ञातस्य तस्य भोगहेतोः कर्म्मण्येव प्रवृत्तिः तस्मात् ॥ ६ ॥

सवित्रेति ॥ सविता प्रसवेन सवितृप्रसवेनेति यावत् । जुषेत सेवेत ब्रह्म पूर्व्यं चिरन्तनम् । तस्मिन् ब्रह्मणि यो निष्ठां समाधिलक्षणां कृण्वसे कुरुष्व । एवं कुर्व्वतो मम किं ततो भवतीत्याह । न हि ते पूर्व्वं स्मार्त्तं कर्म्म दृष्टं श्रौतञ्च कर्म्माक्षिपन् न पुनर्भोगहेतोर्बध्नाति । ज्ञानाग्निना

तव योनिं कृणवसे न हि ते पूर्व्वमक्षिपत्

॥ ७ ॥

सवीजस्य दग्धत्वात्। उक्तञ्च। यथैषिका तूलमग्नौ प्रोतं प्रदूयेत एवं हास्य सर्व्वे पाप्मानः प्रदूयन्त इति। ज्ञानाग्निः सर्व्वकर्म्माणि भस्मसात् कुरुते तथेति चेति। अग्निर्यत्राभिमथ्यत इत्यत्राऽपरा व्याख्या। अग्निः परमात्मा। अविद्यातत्कार्य्यस्य दाहकत्वात्। उक्तञ्च। अहमज्ञानजं तमः। नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वतेति। यत्र यस्मिन् पुरुषे मथ्यते स्वदेहमरणिं कृत्वेत्यादिना पूर्व्वोक्तध्याननिर्म्मथनेन वायुर्यत्राऽभियुज्यते शब्दमव्यक्तं करोति रेचकादिकरणात्। सोमो यत्रातिरिच्यतेऽनेकजन्मसेवया तत्र तस्मिन् यज्ञदानतपःप्राणायामसमाधिविशुद्धान्तःकरणे सञ्जाते परिपूर्णानन्दाद्वितीयब्रह्माकारं समुत्पद्यते नान्यत्राऽशुद्धान्तःकरणे। उक्तञ्च।

प्राणायामविशुद्धात्मा यस्मात् पश्यति तत् परम्।
तस्मान्नातःपरं किञ्चित् प्राणायामादिति श्रुतिः॥
अनेकजन्मसंसारचिते पापसमुच्चये।
तत् क्षीणे जायते पुंसां गोविन्दाभिमुखी मतिः॥
जन्मान्तरसहस्रेषु तपोज्ञानशमादिभिः।
नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते॥
तस्मात् प्रथमं यज्ञाद्यनुष्ठानं ततः प्राणायामादि ततः समाधिः ततो वाक्यार्थज्ञाननिष्पत्तिः ततः कृतकृत्यतेति॥ ७॥

त्रिरुन्नतं स्थाप्य समं शरीरं

तत्र योनिं क्षुखस इत्युक्तं कथं योनिकारणमित्याशङ्क्य तत्प्रकारं दर्शयति। त्रिरुन्नतमिति॥ त्रीण्युन्नतानि उरोग्रीवशिरांसि उन्नतानि यस्मिन् शरीरे त्रिरुन्नतं संस्थाप्य समं शरीरं हृदीन्द्रियाणि मनश्चुरादीनि मनसा सन्निवेश्य सन्नियम्य ब्रह्मैवोडुपस्तरणसाधनं तेन ब्रह्मोडुपेन ब्रह्मशब्दं प्रणवं वर्णयन्ति। तेनोडुपस्थानीयेन प्रणवेन काकाक्षिवदुभयत्र सम्बध्यते। तेनोपसंहृत्य तेन प्रतरेत अतिक्रमेद्विद्वान् ब्रह्मस्रोतांसि संसारसरितः। स्वाभाविक्यविद्याकामकर्म्मप्रवृत्तिं तानि भयावहानि प्रेततिर्य्यगूर्ध्वं प्राप्तिकराणि पुनरावृत्तिभाञ्जि प्राणायामक्षयितमनोमलस्य चित्तं ब्रह्मणि स्थितभवतीति प्राणायामो निर्दिश्यते। प्रथमं नाडिशोधनं कर्त्तव्यम्। ततः प्राणायामेऽधिकारः दक्षिणनासिकापुटमङ्गुल्याऽवष्टभ्य वामेन वायुं पूरयेद् यथाशक्ति। ततोऽनन्तरमुत्सृज्यैव दक्षिणेन पुटेन समुत्सृजेत्। सव्यमपि धारयेत्। पुनर्दक्षिणेन पूरयित्वा सव्येन समुत्सृजेद् यथाशक्ति। त्रिपञ्चःकृत्वो वैवमभ्यस्यतः सवनचतुष्टयमपरराचे मध्याह्ने पूर्व्वराचे ऽर्द्धरात्रे च पञ्चान् मासाद्विशुद्धिर्भवति। त्रिविधः प्राणायामो रेचकः पूरकः कुम्भक इति। तदेवाह।

ईप्सितानि समभ्यस्य वाञ्छितानि यथाविधि।
प्राणायामं ततो गार्गि! जितासनगतोऽभ्यसेत्॥
सुहासने कुशान् सम्यगास्तीर्य्यामृतमेव च।
लम्बोदरश्च सम्पूज्य फलमोदकभक्षणैः।

हृदीन्द्रियाणि मनसा सन्निवेश्य ।

तदासने सुखासीनः सव्ये नस्यैतरं करम् ।
समग्रीवशिराः सम्यक् संवृतास्यः सुनिश्चलः ॥
प्राङ्मुखोदङ्मुखो वापि नासाग्रस्तन्यलोचनः ।
अतिभुक्तमभुक्तञ्च वर्जयित्वा प्रयत्नतः ॥
नाडीसंशोधनं कुर्यादुक्तमार्गेण यत्नतः ।
वृथा क्लेशो भवेत् तस्य तच्छोधनमकुर्वतः ॥
नासाग्रे शशभृद्बीजं चन्द्रातपवितानितम् ।
सप्तमस्य तु वर्गस्य चतुर्थं विन्दुसंयुतम् ॥
विश्वमध्यस्थमालोक्य नासाग्रे चक्षुषी उभे ।
इडया पूरयेद्वायुं वाह्यं द्वादशमात्रकैः ॥
ततोऽग्निं पूर्ववद् ध्यायेत् स्फुरज्ज्वालावलीयुतम् ।
रुषष्ठं विन्दुसंयुक्तं शिखिमण्डलसंस्थितम् ॥
ध्यायेद्विरेचयेद्वायुं मन्दं पिङ्गलया पुनः ।
पुनः पिङ्गलया पूर्य्य घ्राणं दक्षिणतः सुधीः ॥
तद्वद्विरेचयेद्वायुमिडया तु शनैः शनैः ।
त्रिचतुर्वत्सरञ्चापि त्रिचतुर्मासमेव वा ॥
गुरूणोक्तप्रकारेण रहस्येवं समभ्यसेत् ।
प्रातर्मध्यन्दिने सायं स्नात्वा षट्कृत्व आचरेत् ॥
सन्ध्यादिकर्म्म कृत्वैवं मध्यरात्रेऽपि नित्यशः ।
नाडीशुद्धिमवाप्नोति तच्चिह्नं दृश्यते पृथक् ॥
शरीरलघुता दीप्तिर्जठराग्निविवर्द्धनम् ।
नादाभिव्यक्तिरित्येतल्लिङ्गं तच्छुद्धिसूचनम् ॥

ब्रह्मोडुपेन प्रतरेत विद्वान्
स्रोतांसि सर्व्वाणि भयावहानि ॥ ८ ॥

शुद्धयन्ति न जपैस्तेन स्नानैशुद्धिरहेतवः ।
प्राणायामं ततः कुर्य्याद्रेचपूरककुम्भकैः ॥
प्राणापानसमायोगः प्राणायामः प्रकीर्त्तितः ।
प्रणवव्याहृतिं मार्गि ! रेचपूरककुम्भकम् ॥
तदेतत् प्रणवं विद्धि तत्स्वरूपं ब्रवीम्यहम् ।
यद्वेदादौ स्वरः प्रोक्तो वेदान्तेषु प्रतिष्ठितः ॥
तयोरन्तं तु यद्गार्गि ! वर्गपञ्चकपञ्चमम् ।
रेचकं प्रथमं विद्धि द्वितीयं पूरकं विदुः ॥
तृतीयं कुम्भकं प्रोक्तं प्राणायामस्त्रिरात्मकः ।
त्रयाणां कारणं ब्रह्म भारूपं सर्व्वकारणम् ॥
रेचकः कुम्भको गार्गि ! सृष्टिस्थित्यात्मकावुभौ ।
कुम्भकस्त्वथ संहारः कारणं योगिनामिह ॥
पूरयेत् षोडशैर्म्मात्रैरापादतलमस्तकम् ।
मात्रैर्द्वात्रिंशकैः पश्चाद्रेचयेत् सुसमाहितः ।
सम्पूर्णकुम्भवद्वायुमों यथा मद्विदेशतः ॥
कुम्भकं धारणं गार्गि ! चतुःषष्ट्या तु मात्रया ।
ऋषयस्तु वदन्त्यन्ये प्राणायामपरायणाः ॥
पवित्रभूताः पूतात्मा प्रभञ्जनजये रताः ।
तत्रादौ कुम्भकं कृत्वा चतुःषष्ट्या तु मात्रया ॥
रेचयेत् षोडशैर्म्मात्रैर्व्वासेनैकेन सुन्दरि ! ।
तयोश्च पूरयेद्वायुं शनैः षोडशमात्रया ॥

प्राणान प्रपीड्येह संयुक्तचेष्टः।
क्षीणे प्राणे नासिकयोच्छ्वसीतः।
दुष्टाश्वयुक्तमिव वाहमेनं
विद्वान मनो धारयेताप्रमत्तः॥ ९॥

प्राणस्यायमनन्त्वेवं वशं कुर्य्याज्जयी वशः।
पञ्च प्राणाः समाख्याता वायवः प्राणमाश्रिताः॥
प्राणो मुख्यतमस्तेषु सर्व्वप्राणभृतां सदा।
ओष्ठनासिकयोर्म्मध्ये हृदये नाभिमण्डले॥
पादाङ्गुष्ठाश्रितं चैव सर्व्वाङ्गेषु च तिष्ठति।
नित्यं षोड़शसङ्ख्याभिः प्राणायामं समभ्यसेत्॥
मनसा प्रार्थितं याति सर्व्वं प्राणजयी भवेत्।
प्राणायामैर्हरेद् दोषान् धारणाभिश्च किल्बिषान्॥
प्रत्याहाराच्च संसर्गं ध्यानेनानीश्वरान् गुणान्।
प्राणायामशतं स्नात्वा यः करोति दिने दिने॥
मातापितृगुरुघ्नोऽपि चिभिर्वर्षैर्व्यपोहति॥ ८॥

तदेतदाह॥ प्राणानित्यदिना॥ प्राणान् प्रपीड्य देहयुक्तो नात्यश्नुत इति श्लोकोक्ताश्चेष्टा यस्य स संयुक्तचेष्टः। क्षीणे शक्तिहान्या तनुत्वं गते मनसि नासिकायाः पुटाभ्यां शनैः शनैरुत्सृजेन् नमुखेन। मुखेन मुक्ताभ्यां वायुं प्रतिष्ठाप्य शनैर्न्नासिकयोत्सृजेदिति। उदाक्ताश्वाः सूतं रथान्तरमिव मनने मनो धारयेता ऽप्रमत्तः प्रणिहितात्मा च॥ ९॥

समे शुचौ शर्करावह्निवालुका-
विवर्जिते शब्दजलाश्रयादिभिः।
मनोऽनुकूले न तु चक्षुपीड़ने
गुहानिवाताश्रयणे प्रयोजयेत् ॥ १० ॥
नीहारधूमार्कानिलानलानां
खद्योतविद्युत्स्फटिकशशिनाम।
एतानि रूपाणि पुरःसराणि
ब्रह्मण्यभिव्यक्तिकराणि योगे ॥११॥

समेति ॥ समे निम्नोन्नतरहिते देशे। शुचौ शुद्धे। शर्करावह्निवालुकाविवर्जिते। शर्कराः क्षुद्रोपलाः। वालुकास्तच्चूर्णम्। तथा शब्दजलाश्रयादिभिः। शब्दः कलहादिध्वनिः। जलं सर्व्वप्राण्युपभोग्यम्। मण्डप आश्रयः। मनोऽनुकूले मनोरमे चक्षुःपीडने प्रतिपाद्याभिमुखे। छान्दसो विसर्गलोपः। गुहानिवाताश्रयणे गुहायामेकान्ते निवाते समाश्रित्य प्रयोजयेत् प्रयुञ्जीत चित्तं परमात्मनि ॥ १० ॥

इदानीं योगमभ्यस्यतोऽभिव्यक्तिचिह्नानि वक्ष्यन्ते नीहार इत्यादिना ॥ नीहारस्तुषारः। तद्वत् प्राणैः समा चित्तवृत्तिः प्रवर्त्तते ततो धूम इवाभाति। ततोऽर्क इवाभाति। ततो वह्निरिवाऽत्युष्णो वायुः प्रकाशदहनः प्रवर्त्तते। वाह्यवायुरिव सङ्क्षुभितो बलवान् विजृम्भते। कदाचित्। खद्योतखचितमिवान्तरिक्षमालक्ष्यते। विद्युदिव रोचिष्णु प्रवर्त्तते। शुद्धस्फटिकाकृतिः कदाचित् पूर्णशशिवत्। एतानि रूपाणि

पृथ्व्यप्तेजोऽनिलखे समुत्थिते
पञ्चात्मके योगगुणे प्रवृत्ते ।
न तस्य रोगो न जरा न दुःखं
प्राप्तस्य योगाग्निमयं शरीरम् ॥ १२ ॥
लघुत्वमारोग्यमलोलुपत्वं
वर्णप्रसादः स्वरसौष्ठवञ्च ।
गन्धः शुभो मूत्रपुरीषमल्पं
योगप्रवृत्तिं प्रथमां वदन्ति ॥ १३ ॥

योगे क्रियमाणे ब्रह्मण्याविष्क्रियमाणे निमित्ते पुरःसराण्यग्रगामीनि । तथा परमयोगसिद्धिः ॥ ११ ॥

पृथ्वीति । पृथ्व्यप्तेजोऽनिलखे पृथिव्यादीनि भूतानि द्वन्द्वैकवद्भावेन निर्दिश्यन्ते । तेषु पञ्चसु भूतेषु समुत्थितेषु पञ्चात्मके योगगुणे प्रवृत्त इत्यस्य व्याख्यानम् । कः पुनर्योगगुणः प्रवर्त्तते । पृथिव्या गन्धः । तथाऽग्नेो रसः । एवमन्यच्च ॥ उक्तं ।

ज्योतिष्मती स्वर्गवती तथा रसवती पुरा ।
गन्धवत्यपरा प्रोक्ता चतस्रस्तु प्रवृत्तयः ॥
आसां योगप्रवृत्तीनां यद्येकापि प्रवर्त्तते ।
प्रवृत्तयोगं तं प्राहुर्योगिनो योगचिन्तकाः ॥ १२ ॥

लघुत्वमिति ॥ न तस्य योगिनो रोगाज् ज्वरादृ दुःखममानसं वा भवति । कस्य । प्राप्तस्य योगाग्निमयं शरीरम् । योगाग्निसंशुष्टदोषकलापं शरीरं प्राप्तस्य । स्पष्टमन्यत् ॥ १३ ॥

यथैव बिम्बं मृदयोपलिप्तं
तेजोमयं भ्राजते तत् सुधातम्।
तद्वात्मतत्त्वं प्रसमीक्ष्य देही
एकः कृतार्थो भवते वीतशोकः॥ १४॥
यदात्मतत्त्वेन तु ब्रह्मतत्त्वं
दीपोपमेनेह युक्तः प्रपश्येत्।
अजं ध्रुवं सर्वतत्त्वैर्विशुद्धं
ज्ञात्वा देवं मुच्यते सर्वपाशैः॥ १५॥

किञ्च। यथैवेति॥ यथैव बिम्बं सौवर्णं राजतं वा मृदयोपलिप्तं मृदादिना मलिनीकृतं पूर्वं पश्चात् सुधातं सुधौतमित्यस्मिन्नर्थे सुधातमिति छान्दसम्। अग्न्यादिना विमलीकृतं तेजोमयं भ्राजते। तद्वा तदेव आत्मतत्त्वं प्रसमीक्ष्य दृष्ट्वा एको न द्वितीयः कृतार्थो भवते वीतशोकः। परेषां पाठे तद्वत्सतत्त्वं प्रसमीक्ष्य देहीति। तत्रापयमेवार्थः॥ १४॥

कथं ज्ञात्वा वीतशोको भवतीत्याह। यदेति॥ यदा यस्यामवस्थायामात्मतत्त्वेन स्वेनात्मना। किंविशिष्टेन दीपोपमेन दीपस्थानीयेन प्रकाशस्वरूपेण ब्रह्मतत्त्वं प्रपश्येत्। तुशब्दोऽवधारणे। परमात्मानमात्मनैव जानीयादित्यर्थः। उक्तञ्च। तदात्मानमेवावेदहं ब्रह्मास्मीति। कौटश्यम्। अन्यस्मादजायमानम्। ध्रुवं अप्रच्युतस्वरूपं सर्वं तत्त्वैरविद्यातत्कार्यैर्विशुद्धं असंसृष्टं ज्ञात्वा देवं मुच्यते सर्वपाशैरविद्यादिभिः॥ १५॥

एष हि देवः प्रदिशोऽनुसर्व्वाः
पूर्व्वो हि जातः स उ गर्भे अन्तः।
स विजातः स जनिष्यमाणः।
प्रत्यङ्जनांस्तिष्ठति सर्व्वतोमुखः॥ १६॥
योदेवोऽग्नौ योऽप्सु यो विश्वं भुवनमाविवेश
य ओषधीषु यो वनस्पतिषु तस्मै देवाय
नमो नमः॥ १७॥ श्वेताश्वतरोपनिषत्सु
द्वितीयोऽध्यायः॥ २॥

परमात्मानमात्मतत्त्वेन विजानीयादित्युक्तं तदेव भावयन्नाह। एष होति॥ एष एव देवः प्रदिशः प्राच्याद्या दिश उपदिशश्च सर्व्वाः पूर्व्वो हिजातः सर्व्वस्माद्धिरण्यगर्भात्मना स उ गर्भे अन्तर्व्वर्त्तमानः स एव जातः शिशुःस जनिष्यमाणोऽपि स एव सर्व्वांश्च जनान् प्रत्यङ् तिष्ठति सर्व्वप्राणिगतानि मुखानि अस्येति सर्व्वतोमुखः॥ १६॥

इदानीं योगवत् साधनान्तराणि नमस्कारादीनि कर्त्तव्यत्वेन दर्शयितुमाह। यो देव इति॥ यो विश्वं भुवनं भुवनविरचितं संसारमण्डलमाविवेश। य ओषधीषु शाल्यादिषु वनस्पतिषु अश्वत्थादिषु तस्मै विश्वात्मने भुवनमूलाय परमेश्वराय नमो नमः। द्विर्व्वचनमादरार्थं अध्यायपरिसमाप्त्यर्थञ्च॥ १७॥ इति श्वेताश्वतरोपनिषद्भाष्ये द्वितीयोऽध्यायः॥ २॥

यएको जालवान् ईशित ईशिनीभिः
सर्व्वाल्लोकानीशित ईशिनीभिः ।
य एवैक उद्भवे सम्भवे च
य एतद्विदुरमृतास्ते भवन्ति ॥ १ ॥
एको हि रुद्रो न द्वितीयाय तस्थु र्य
इमाल्लोकान् ईशत ईशिनीभिः ।
प्रत्यङ्जनांस्तिष्ठति सञ्चुकोपान्तकाले
संसृजय विश्वा भुवनानि गोपाः ॥ २ ॥

कथमद्वितीयस्य परमात्मन ईशित्रिशितव्यादिभाव इत्याशङ्क्याह । य एक इति ॥ य एकः परमात्मा सजालवान् जालं माया दुरत्ययत्वात् । तथा चाह भगवान् । मम मायादुरत्ययेति । तद्वान् तदस्याऽस्तीति जालवान् मायावीत्यर्थः । ईशते ईष्टे मायोपाधिः सन् । कैरीशिनीभिः स्वशक्तिभिः ॥ तथाचोक्तम् । ईशित ईशिनीभिः परमशक्तिभिरिति । कान् सर्व्वाल्लोकानीशित ईशिनीभिः । कदा उद्भवे विभूतियोगसम्भवे प्रादुर्भावे च एतद्विदुरमृता अमरणधर्म्मा भवन्ति ॥ १ ॥

कस्मात् पुनर्जालवानित्याशङ्क्याह । एको हीति । हिशब्दो यस्मादर्थे । यस्मादेक एव रुद्रः स्वतो न द्वितीयाय

विश्वतश्चक्षुरुत विश्वतो मुखो
विश्वतो बाहुरुत विश्वतस्पात्।
सं बाहुभ्यां धमति सम्पतत्रै-
र्द्यावाभूमी जनयन् देव एकः ॥ ३ ॥
यो देवानां प्रभवश्चोद्भवश्च

वस्त्वन्तराय तस्थुर्ब्रह्मविदः परमार्थदर्शिनः॥ उक्तञ्च। एको रुद्रो न द्वितीयाय तस्थुरिति। य इमाँल्लोकानीशते नियमयति इह ईशिनीभिः। सर्व्वांश्च जनान् प्रति अन्तरः प्रतिपुरुषमवस्थितः। रूपं रूपं प्रतिरूपो बभूवेत्यर्थः। किञ्च। सञ्चुकोपान्तकाले प्रलयकाले। किं कृत्वा संसृज्य विश्वा भुवनानि गोपा गोप्ता भूत्वा। एतदुक्तं भवति। अद्वितीयः परमात्मा। न चाऽसौ कुम्भकारवदात्मानं केवलं मृत्पिण्डस्थानीयमुपादानकारणमुपादत्ते किं तर्हि स्वशक्तिविक्षेपं कुर्व्वन् स्रष्टा नियन्ता चाभिधीयत इति उत्तरो मन्त्रः॥ २॥

तस्यैव विराडात्मनावस्थानं तत्स्रष्टृत्वं प्रतिपादयति। विश्वतश्चक्षुरिति। सर्व्वप्राणिगतानि चक्षुंष्यस्येति विश्वतश्चक्षुः। अतः स्वेच्छयैव सर्व्वं च चक्षुरुपादौ सामर्थ्यं विद्यत इति विश्वतश्चक्षुः। एवमुत्तरत्र योजनीयम्। बाहुभ्यां धमति संयोजयतीत्यर्थः। अनेकार्थत्वाद्धातूनाम्। पक्षिणं धमति द्विपदो मनुष्यादींश्च पतत्रैः। किं कुर्व्वन् द्यावापृथिवी जनयन् देव एको विराजं सृष्टवानित्यर्थः॥ ३॥

इदानीं तस्यैव सूत्रसृष्टिं प्रतिपादयन् मन्त्रद्वयमभिप्रेतं

विश्वाधिपो रुद्रो महर्षिः।
हिरण्यगर्भं जनयामास पूर्वं
स नो बुद्ध्या शुभया संयुनक्तु ॥ ४ ॥
या ते रुद्र शिवा तनूरघोराऽपापकाशिनी।
तया नस्तनुवा शन्तमया गिरिशन्ताभि-
चाकशीहि ॥ ५ ॥

प्रार्थयते। यो देवानामिति ॥ यो देवानामिन्द्रादीनां प्रभवहेतुरुद्भवहेतुश्च। उद्भवे विभूतियोगः। विश्वस्याधिपो विश्वाधिपः पालयिता। महर्षिः। महांश्चासावृषिश्चेति महर्षिः सर्वज्ञ इत्यर्थः। हितं रमणीयमत्युज्ज्वलं ज्ञानं गर्भेऽन्तः सारो यस्य तं जनयामास पूर्वं सर्गादौ। स नोऽस्मान् बुद्ध्या शुभया संयुनक्तु परमपदं प्रापयामिति ॥ ४ ॥

पुनरपि तस्य स्वरूपं दर्शयन्नभिप्रेतमर्थं प्रार्थयते मन्त्रद्वयेन। या ते रुद्र इत्यादि ॥ हे रुद्र तव या शिवा तनूरघोरा। उक्तं तथा च तस्यैते तनुवौ घोराऽन्या शिवाऽन्येति। अथवा शिवा शुद्धा अविद्यातत्कार्य्यविनिमुक्ता सच्चिदानन्दाद्वयब्रह्मरूपा न तु घोरा शशिविम्बमिवाह्लादिनी। अपापकाशिनी स्मृतिमात्राघनाशिनी पुण्याभिव्यक्तिकरी। तया आत्मना नोऽस्मान् शन्तमया सुखतमया पूर्णानन्दरूपया हे गिरिशन्त गिरौ स्थित्वा शं सुखं तनोतीति। अभिचाकशीहि अभिपश्य निरीक्षस्व श्रेयसा नियोजयस्वेत्यर्थः ॥ ५ ॥

यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे ।
शिवां गिरित्रतांकुरु मा हिꣳसीःपुरुषंजगत

॥ ६ ॥

ततः परं ब्रह्म परं बृहन्तं
यथा निकायं सर्व्वभूतेषु गूढम् ।
विश्वस्यैकं परिवेष्टितारं
ईशं तं ज्ञात्वाऽमृता भवन्ति ॥ ७ ॥
वेदाहमेतं पुरुषं महान्तं

किञ्च । यामिषुमिति । यामिषुं गिरिशन्त हस्ते बिभर्षि धारयसि अस्तवे जने क्षेप्तुं शिवां गिरित्र गिरिं त्रायत इति तां कुरु मा हिंसीः पुरुष मत्सम्बन्धीयं जगदपि कृत्स्नं पुरुषं साकारं ब्रह्म प्रदर्शयेत्यभिप्रेतमर्थं प्रार्थितवान् ॥ ६ ॥

इदानीं तस्यैव कारणात्मनावस्थानं दर्शयन् ज्ञानादमृतत्वमाह । ततः परमिति । ततः पुरुषयुक्ताज्जगतः परं कारणत्वात् कार्य्यभूतस्य प्रपञ्चस्य व्यापकमित्यर्थः । अथवा ततो जगदात्मनो विराजः परम् । किं तद्ब्रह्म परं बृहन्तं ब्रह्मणो हिरण्यगर्भात् परं बृहन्तं महद्व्यापित्वात् यथानिकायं यथाशरीरम् । सर्व्वभूतेषु गूढं अन्तरवस्थितम् । विश्वस्यैकं परिवेष्टितारं सर्व्वमन्तः कृत्वा स्वात्मना सर्व्वं व्याप्याऽवस्थितमीशं परमेश्वरं ज्ञात्वा ऽमृता भवन्ति ॥ ७ ॥

इदानीमुक्तमर्थं द्रढयितुं मन्त्रदृगनुभवं दर्शयित्वा

आदित्यवर्णं तमसः परस्तात ।
तमेव विदित्वातिमत्यु मेति
नान्यः पन्था विद्यतेऽयनाय ॥ ८ ॥
यस्मात परं नापरमस्ति किञ्चित्
यस्मान्नाणीयो न ज्यायोऽस्ति किञ्चित ।
वृक्ष इव स्तब्धो दिवि तिष्ठत्येक-
स्तेनेदं पूर्णं पुरुषेण सर्व्वम ॥ ९ ॥

पूर्णानन्दाद्वितीय ब्रह्मात्मपरिज्ञानादेव परमपुरुषार्थप्राप्ति-र्नान्येनेति दर्शयति । वेदाहमेतमिति । वेद जाने तमेतं परमात्मानम् । अथैतं प्रत्यगात्मानं साक्षिणम् । किं । पुरुषं पूर्णं महान्तं सर्व्वात्मत्वात् । आदित्यवर्णं प्रकाश-रूपं तमसोऽज्ञानात् परस्ताद्व तमेव विदित्वा ऽतिमृत्यु-मेति मृत्युमत्येति । कस्मादस्मान्नान्यः पन्था विद्यतेऽयनाय परमपदप्राप्तये ॥ ८ ॥

कस्मात पुनस्तमेव विदित्वाऽतिमृत्युमेतीत्युच्यते । यस्मा-दिति ॥ यस्मात् परं पुरुषात् परमुत्कृष्टमपरमन्यन्नास्ति यस्मान्नाणीयोऽणुतरन्न ज्यायो महत्तरं वास्ति वृक्ष इव स्तब्धो निश्चलो दिवि द्योतनात्मनि स्वे महिम्नि तिष्ठत्ये-कोऽद्वितीयः परमात्मा तेनाऽद्वितीयेन परमात्मना इदं सर्व्वं पूर्णं नैरन्तर्येण व्याप्तं पुरुषेण पूर्णेन सर्व्वमिदं सर्व्वम् ॥ ९ ॥

ततो यदुत्तरतरं तदरूपमनामयम्।
य एतद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवापियन्ति ॥ १० ॥
सर्व्याननशिरोग्रीवः सर्व्वभूतगुहाशयः।
सर्व्वव्यापी स भगवान् तस्मात् सर्व्वगतः शिवः ॥ ११ ॥
महान् प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्त्तकः।

इदानीं ब्रह्मणः पूर्व्वोक्तकार्य्यकारणतां दर्शयन् ज्ञानिनाममृतत्वमितरेषाञ्च संसारित्वं दर्शयति। तत इति॥ तत इदं शब्दवाच्याज्जगत उत्तरतरं कारणं ततोऽप्युत्तरं कार्य्यकारणविनिर्म्मुक्तं ब्रह्मैवेत्यर्थः। तदरूपं रूपादिरहितं अनामयं आध्यात्मिकादितापत्रयरहितत्वात्। य एतद्विदुरमृतत्वेनाऽहमस्मीति अमृता अमरणत्वधर्म्मास्ते भवन्ति। अथेतरे ये न विदुर्दुःखमेवापियन्ति ॥१०॥
इदानीं तस्यैव सर्व्वात्मत्वं दर्शयति॥ सर्व्याननेति॥ सर्व्वाण्याननानि शिरांसि ग्रीवाश्चास्येति सर्व्याननशिरोग्रीवः। सर्व्वेषां भूतानां गुहायां बुद्धौ शेत इति सर्व्वभूतगुहाशयः। सर्व्वव्यापी स भगवान् ऐश्वर्य्यादिसमष्टिः। उक्तञ्च।

ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा॥
भगवति यस्मादेवं तस्मात् सर्व्वगतः शिवः ॥ ११ ॥

किञ्च। महानिति॥ महान् प्रभुः समर्थो वै निश्चयेन

सुनिर्म्मलामिमां प्राप्तिमीशानो ज्योतिरव्ययः
॥ १२ ॥

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा
सदा जनानां हृदये सन्निविष्टः ।
हृदा मन्वीशो मनसाभिक्लृप्तो
य एतद्विदुरमृतास्ते भवन्ति ॥ १३ ॥

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात ।
स भूमिं विश्वतो वृत्वा अत्यतिष्ठद् दशाङ्गुलम्
॥ १४ ॥

जगदुदयस्थितिसंहारे सत्त्वस्यान्तःकरणस्यैष प्रवर्त्तकः प्रेरयिता । किमर्थमुद्दिश्य सुनिर्म्मलामिमां स्वरूपावस्थालक्षणां प्राप्तिं परमपदप्राप्तिं ईशान ईशिता । ज्योतिःपरिशुद्धो विज्ञानप्रकाशः । अव्ययोऽविनाशी ॥ १२ ॥

अङ्गुष्ठमात्रेति ॥ अङ्गुष्ठमात्रोऽभिव्यक्तिस्थानहृदयसुषिरपरिमाणापेक्षया । पुरुषः पूर्णत्वात् पुरिशयनाद्वा । अन्तरात्मा सर्व्वस्याऽन्तरात्मभूतः स्थितः । सदा जनानां हृदये सन्निविष्टः हृदयस्थेन मनसाऽभिगुप्तः । मन्वीशो ज्ञानेशः । य एतद्विदुरमृतास्ते भवन्ति । पुरुषोऽन्तरात्मेत्युक्तम् ॥ १३ ॥

पुनरपि सर्व्वात्मानं दर्शयति । सहस्रशीर्षेति ॥ सर्व्वस्य तावन्मात्रत्वप्रदर्शनार्थम् । उक्तञ्च । अध्यारोपापवादाभ्यां

पुरुष एवेदꣳ सर्व्वं यद्भूतं यच्च भव्यम ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥१५॥
सर्व्वतः पाणिपादन्तत् सर्व्वतोऽक्षिशिरोमुखम
सर्व्वतः श्रुतिमल्लोके सर्व्वमाव्रत्य तिष्ठति ॥१६॥

निष्प्रपञ्चं प्रपञ्चयत इति । सहस्राण्यनन्तानि शीर्षाण्यस्येति सहस्रशीर्षा । पुरुषः पूर्णः । एवमुत्तरत्र योजनीयं । स भूमिं भुवनं सर्व्वतोऽन्तर्व्वहिश्च वृत्त्वा व्याप्यात्यतिष्ठद् अतीत्य भुवनं समधितिष्ठति । दशाङ्गुलं अनन्तमपरिमित्यर्थः । अथवा नाभेरुपरि दशाङ्गुलं हृदयं तत्राधितिष्ठति ॥ १४ ॥

ननु सर्व्वात्मत्वे सप्रपञ्चं ब्रह्म स्यात् तद्व्यतिरेकेणाभावादित्याह । पुरुष एवेदमिति ॥ पुरुषएवेदं सर्व्वम् । यद्भूतं यच्च भव्यं । यदन्नेनातिरोहति यदिदं दृश्यते वर्त्तमानं यद्भूतं यच्च भव्यं भविष्यत् । किञ्च । उतामृतत्वस्येशानो अमरणधर्म्मत्वस्य कैवल्यस्य ईशानः । यच्चान्नेनारोहति यद्वर्त्तते तस्य ईशानः ॥ १५ ॥

पुनरपि निर्व्विशेषं प्रतिपादयितुं दर्शयति सर्वत इति॥ सर्व्वतः पाण्यः पादाश्चेति सर्व्वतः पाणिपादं तत् । सर्व्वतोऽक्षीणि शिरांसि च मुखानि च यस्य तत् सर्व्वतोऽक्षिशिरोमुखम् श्रुतिः श्रवणमस्येति श्रुतिमत् । लोके निकाये सर्व्वमाव्रत्य संव्याप्य तिष्ठति । उपाधिभूतपाणिपादादीन्द्रियाध्यारोपणाज्ज्ञेयस्य तद्वत्ताशङ्का माभूदित्येवमर्थमुत्तरतो मन्त्रः ॥ १६ ॥

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।
सर्वस्य प्रभुमीशानं सर्वस्य शरणं बृहत् ॥१७॥
नवद्वारे पुरे देही हंसो लेलायते बहिः ।
वशी सर्वस्य लोकस्य स्थावरस्य चरस्य च ॥१८॥
अपाणिपादो जवनो ग्रहीता
पश्यत्यचक्षुः स शृणोत्यकर्णः ।

सर्वेन्द्रियेति ॥ सर्वाणि च तानीन्द्रियाणि श्रोत्रादीनीन्द्रियाणि अन्तःकरणपर्यन्तानि सर्वेन्द्रियग्रहणेन गृह्यन्ते । अन्तःकरणबहिःकरणोपाधिभूतः सर्वेन्द्रियगुणैरध्यवसायसङ्कल्पश्रवणवदाभासत इति सर्वेन्द्रियगुणाभासम् । सर्वेन्द्रियैर्वा वृतमिव तज्ज्ञेयमित्यर्थः । ध्यायतीव लेलायतीवेति श्रुतेः । कस्मात् पुनः कारणात्तद्व्याप्तमिवेति गृह्यत इत्याह । सर्वेन्द्रियविवर्जितं सर्वकारणरहितमित्यर्थः । अतो न च करणव्यापारैर्व्याप्तत्वं तज्ज्ञेयं । सर्वस्य जगतः प्रभुमीशानम् । सर्वस्य शरणं परायणं बृहत् कारणञ्च ॥ १७ ॥

किञ्च । नवद्वारेति । नवद्वारे शिरसि सप्तद्वाराणि द्वे अवाचीपुरे देही विज्ञानात्मा भूत्वा कार्यकारणोपाधिः सन् हंसः परमात्मा हन्तविद्यात्मकं कार्यमिव लेलायते चलति बहिर्विषयग्रहणाय । वशी सर्वस्य लोकस्य स्थावरस्य चरस्य च । एवं तावत् सर्वात्मकं ब्रह्म प्रतिपादितम् ॥१८॥

अथेदानीं निर्विकारानन्दस्वरूपेणानुदितानस्तमितं ज्ञानात्मनावस्थितं परमात्मानं दर्शयितुमाह । अपाणिपाद

स वेत्ति वेद्यं न च तस्याऽस्ति वेत्ता
तमाहुरग्र्यं पुरुषं महान्तम् ॥ १९ ॥
अणोरणीयान् महतो महीयाना
ऽऽत्मा गुहायां निहितोऽस्य जन्तोः ।
तमक्रतुं पश्यति वीतशोको
धातुः प्रसादान्महिमानमीशम् ॥ २० ॥

इति ॥ नास्य पाणिपादावित्यपाणिपादः । अथ जवनो दूरगामी । ग्रहीता पाण्याद्यभावेऽपि सर्व्वग्राही । पश्यति सर्व्वमचक्षुरपि सन् । शृणोत्यकर्णोऽपि । स वेत्ति वेद्यं सर्व्वज्ञत्वाद् अमनस्कोऽपि । न च तस्यास्ति वेत्ता नान्योऽतोऽस्ति द्रष्टेति श्रुतेः । तमाहुरग्र्यं प्रथमं सर्व्वकारणत्वात् पुरुषं पूर्ण्णं महान्तम् ॥ १९ ॥

किञ्च । अणोरणीयानिति । अणोः सूक्ष्मादप्यणीयानणुतरः । महतो महत्त्वपरिमाणान् महीयान् महत्तरः । स चात्माऽस्य जन्तोर्ब्रह्मादिस्तम्बपर्य्यन्तस्य प्राणिजातस्य । गुहायां हृदये निहित आत्मभूतः स्थित इत्यर्थः । तमात्मानं अक्रतुं विषयभोगसङ्कल्परहितमात्मनो महिमानं कर्म्मनिमित्तद्वित्त्वयरहितमीशं पश्यत्ययमहमस्मीति साक्षाज्जानाति यः स वीतशोको भवति । केन तर्ह्यसौ पश्यति । धातुरीश्वरस्य प्रसादात् । प्रसन्ने हि परमेश्वरे तद्याथात्म्यज्ञानमुत्पद्यते । अथवेन्द्रियाणि धातवः शरीरस्य धारणात् तेषां प्रसादादविषयदोष बलाद्यपनयनात् । अन्यथा दुर्व्विज्ञेय आत्मा कामिभिः प्राकृतपुरुषैः ॥२० ॥

वेदाहमेतमजरं पुराणं
सर्वात्मानं सर्वगतं विभुत्वात ।
जन्मनिरोधं प्रवदन्ति यस्य
ब्रह्मवादिनोऽभिवदन्ति नित्यम ॥ २१ ॥
इति श्वेताश्वतरोपनिषत्सु तृतीयोऽध्यायः ॥३॥
॥ ओं तत सत ओं ॥

उक्तमर्थं दृढयितुं मन्यष्टगनुभवं दर्शयति ॥ वेदाहमेतमिति वेद जानेऽहमेतमजरं विपरिणामधर्मवर्जितं पुराणं पुरातनम् । सर्वात्मानं सर्वेषामात्मभूतम् । सर्वगतं विभुत्वाद् आकाशवद्व्यापकत्वात् । यस्य च जन्मनिरोधं उत्पत्तिप्रभावं प्रवदन्ति ब्रह्मवादिनो हि नित्यम् । स्पष्टोऽर्थः ॥२१॥ इति श्वेताश्वतरोपनिषद्भाष्ये श्रीशङ्करभगवतः कृतौ तृतीयोऽध्यायः ॥३॥ ओं तत् सत् ओं ॥

य एकोऽवर्णो बहुधा शक्तियोगाद्
वर्णाननेकान् निहितार्थो दधाति ।
विचैति चान्ते विश्वमादौ स देवः
स नो बुद्ध्या शुभया संयुनक्तु ॥ १ ॥
तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः ।
तदेव शुक्रं तद्ब्रह्म तदापस्तत प्रजापतिः ॥२॥

गहनत्वादस्यार्थस्य भूयो भूयो वक्तव्य इति चतुर्थोऽध्याय आरभ्यते । य एक इति ॥ य एकोऽद्वितीयः परमात्मा । अवर्णो जात्यादिरहितो निर्विशेष इत्यर्थः । बहुधा नानाशक्तियोगाद्वर्णाननेकान् निहितार्थो गृहीतप्रयोजनः स्वार्थनिरपेक्ष इत्यर्थः । दधाति विदधाति ददः । विचैति व्येति च अन्ते लयकाले च । चशब्दादिति मध्ये एति यस्मिन् विश्वं स देवो द्योतनस्वभावो विज्ञानैकरस इत्यर्थः । सनोऽस्मान् शुभया बुद्ध्या संयुनक्तु संयोजयतु । यस्मात् स एव सर्वम् ॥१ ॥

न ततो विभक्तमस्तीत्याह मन्त्रत्रयेण । तदेवेति ॥ तदेवात्मतत्त्वमग्निः । तदादित्यः । एवशब्दः सर्वत्र सम्बध्यते तदेवशुक्रमिति दर्शनात् । शेषमृजु । तदेव शुक्रं शुद्धं अन्यदपि दीप्तिमन्नक्षत्रादि तद्धिरण्यगर्भ आत्मा तदापः स प्रजापतिर्विराडात्मा ॥२॥

त्वं स्त्री त्वं पुमानसि त्वं
कुमार उत वा कुमारी ।
त्वं जीर्णो दण्डेन वञ्चयसि
त्वं जातो भवसि विश्वतो मुखः ॥ ३ ॥
नीलः पतङ्गो हरितो लोहिताक्षस
तडिद्गर्भ ऋतवः समुद्राः ।
अनादिमत्त्वं विभुत्वेन वर्त्तसे
यतो जातानि भुवनानि विश्वा ॥ ४ ॥
अजामेकां लोहित कृष्णवर्णां
बह्वीः प्रजाः सृजमानां सरूपां ।

त्वमेवेति सर्व्वत्र सम्बध्यते स्रष्टो मन्त्रार्थः ॥३॥

नीलेति ॥ त्वमेव नीलः पतङ्गो भ्रमरः । पतनाद्गच्छतीति पतङ्गः । हरितो लोहिताक्षः शुकादिनिकृष्टाः प्राणिनस्त्वमेवेत्यर्थः । तडिद्गर्भो मेघः । ऋतवः समुद्राः । यस्मात्त्वमेव सर्व्वस्यात्मभूतस्तस्मादनादिस्त्वमेव । त्वमेवाद्यन्तशून्यः । विभुत्वेन व्यापकत्वेन यतो जातानि भुवनानि विश्वानि ॥ ४ ॥

इदानीं तेजोऽबन्नलक्षणां प्रकृतिं छान्दग्योपनिषत्प्रसिद्धामजरूपकल्पनया दर्शयति । अजामेकामिति ॥ अजां प्रकृतिं लोहितशुक्लकृष्णां तेजोऽबन्नलक्षणां बह्वीः प्रजाः सृजमानामुत्पादयन्तीं ध्यानयोगानुगतदृष्टां देवात्मशक्तिं

अजो ह्येको जुषमाणोऽनुशेते
जहात्येनां भुक्तभोगामजोऽन्यः ॥ ५ ॥
द्वा सुपर्णा सयुजा सखाया
समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्य-
नश्नन्नन्योऽभिचाकशीति ॥ ६ ॥
समाने वृक्षे पुरुषो निमग्नो

सरूपां समानाकाराम् । अजो ह्येको विज्ञानात्मा । अनादिकामकर्म्मविनाशितः स्वयमात्मानं मन्यमानो जुषमाणः सेवमानोऽनुशेते भजते । अन्य आचार्य्योपदेशप्रकाशावसादितावियान्धकारो जहाति त्यजति ॥ ५ ॥

इदानीं सूत्रभूतौ परमार्थवस्त्ववधारणार्थमुपन्यस्येते द्वा इति ॥ द्वा द्वौ विज्ञानपरमात्मानौ । सुपर्णा सुपर्णौ शोभनपतनौ शोभनगमनौ सुपर्णौ पक्षिसामान्याद्वा । तौ पर्णौ सयुजा सयुजौ सर्व्वदा संयुक्तौ । सखाया सखायौ समानाख्यानौ समानाभिव्यक्तिकारणौ। एवम्भूतौ सन्तौ समानमेकं वृक्षं वृक्षमिवोच्छेदसामान्याद्वृक्षं शरीरं परिषस्वजाते परिष्वक्तवन्तौ समाश्रितवन्तौ एतौ । तयोरन्योऽविद्याकामवासनाश्रयलिङ्गोपाधिर्व्विज्ञानात्मा पिप्पलं कर्म्मफलं सुखदुःखलक्षणं स्वादु अनेकविचित्रवेदनास्वादरूपमत्ति उपभुङ्क्ते विवेकतोऽनश्नन्नन्यो नित्यशुद्धबुद्धमुक्तस्वभावः परमेश्वरोऽभिचाकशीति सर्व्वमपि पश्यन्नास्ते ॥ ६ ॥

तत्रैवं सति समाने वृक्षे शरीरे पुरुषो भोक्ता अवि-

अनीशया शोचति मुह्यमानः।
जुष्टं यदा पश्यत्यन्यमीशम्।
महिमानमिति वीतशोकः॥ ७॥

दाकामकर्म्मफलरागादिगुरुभाराक्रान्तोऽलाबुरिव सर्व्वो जलनिमग्नो निश्चयेन देहात्मभावमापन्नोऽयमेवाहं अमुष्य पुत्रोऽस्य नप्ता क्षयः स्थूलो गुणवान् निर्गुणः सुखी दुःखीत्येवं प्रत्ययो नान्योऽस्मादिति जायते म्रियते संयुज्यते च सम्बन्धिबान्धवैः। अतोऽनीशया न कस्यचित् समर्थोऽहम्। पुत्रो मम नष्टो मृता मे भार्य्या किं मे जीवितेन इत्येवं दीनभावोऽनीशया शोचति सन्तप्यते मुह्यमानो ऽनेकैरनर्थप्रकारैरविवेकतया विचित्रतामापद्यमानः स एव प्रेतितिर्य्यङ्मनुष्यादियोनिष्वापतन् दुःखमापन्नः कदाचिदनेकजन्माशुद्धधर्म्मसञ्चयननिमित्तं केनचित् परमकारुणिकेन दर्शितयोगमार्गोऽहिंसासत्यब्रह्मचर्य्यसर्व्वत्यागसमाहितात्मा सन् शमादिसम्पन्नो जुष्टं सेवितमनेकयोगमार्गैर्य्यदा यस्मिन् काले पश्यति ध्यायमानोऽन्यं वृत्तोपाधिलक्षणाद्विलक्षणमसंसारिणं अघनायाद्यसंस्पृष्टं सर्व्वान्तरं परमात्मानमीशं अयमहमस्मि आत्मा सर्व्वस्य समः सर्व्वभूतान्तरस्थो नेतरो ऽविद्याजनितोपाधिपरिच्छिन्नो मायाक्लेति विभूतिं महिमानं चेति जगद्रूपमस्यैव महिमा परमेश्वरस्येति यदैवं पश्यति तदा वीतशोको भवति सर्व्वस्माच्छोकसागरादिमुच्यते कृतकृत्यो भवतीत्यर्थः। अथवा जुष्टं यदा पश्यत्यन्यमीशं अस्यैव प्रत्यगात्मनो महिमानमिति तदा वीतशोको भवति॥ ७॥

ऋचो अक्षरे परमे व्योमन्
यस्मिन् देवा अधि विश्वे निषेदुः।
यस्तन्न वेद किमृचा करिष्यति
य इत्तद्विदुस्त इमे समासते ॥ ८ ॥
छन्दांसि यज्ञाः क्रतवो व्रतानि

इदानीं तद्विदः कृतार्थतां दर्शयति। ऋच इति ॥ वेदत्रयनिधौ वेदत्रयवेद्ये अक्षरे परमे व्योमन् व्योम्नाकाशकल्पे यस्मिन् देवा अधि विश्वे निषेदुः आश्रितास्तिष्ठन्ति। यस्तं परमात्मानं न वेद किमृचा करिष्यति। य इत्तद्विदुस्त इमे समासते कृतार्थास्तिष्ठन्ति ॥ ८ ॥

इदानीं तस्यैवाक्षरस्य मायोपाधिकजगत्सृष्टृत्वं तन्निमित्तत्वं भेदेन दर्शयति। छन्दांसीति ॥ छन्दांसि ऋग्यजुःसामाथर्वाङ्गिरसाख्या वेदा वेदयज्ञादयो यूप-सम्बन्धरहितविहितक्रियाश्च। यज्ञा ज्योतिष्टोमादयः क्रतवः। व्रतानि चान्द्रायणादीनि। भूतं अतीतं। भव्यं भविष्यत्। यदि तयोमध्यवर्त्तिं वर्त्तमानं सूचयति चशब्दसमुच्चयार्थः। यज्ञादिसाध्ये कर्म्मणि प्रपञ्चे भूतादौ च वेदा एव मानमित्येतद् वदन्ति। यच्छब्दः सर्व्वत्र सम्बध्यते। अस्मात् प्रकृताच्चराद् ब्रह्मणः पूर्व्वोक्तं सर्व्वमुत्पद्यत इति सम्बन्धः। अविकारिब्रह्मणः कथं प्रपञ्चोपादानत्वमित्यत आह। मायीति ॥ कूटस्थव्यापिस्वशक्तिवशात् सर्व्वस्रष्टृत्वमुपपन्नमित्येतत्। विश्वं पूर्व्वोक्तप्रपञ्चं सृजते उत्पादयति। स्वमायया कल्पिते तस्मिन् भूतादिप्रपञ्चे माययैवाऽन्यो वसन्

भूतं भव्यं यच्च वेदा वदन्ति ।
यस्मान् मायी सृजते विश्वमेतत्
तस्मिंश्चान्यो मायया सन्निरुद्धः ॥ ९ ॥
मायान्तु प्रकृतिं विद्यान् मायिनन्तु महेश्वरं ।
तस्यावयवभूतैस्तु व्याप्तं सर्व्वमिदं जगत ॥१०॥
यो योनिं योनिमधितिष्ठत्येको

सन्निरुद्धः सम्बद्धः सन् अविद्यावशगो भूत्वा संसारसमुद्रे भ्रमतीत्यर्थः । पूर्व्वोक्तायाःप्रकृतेर्म्मायात्वं तदधिष्ठातृसच्चिदानन्दरूपब्रह्मणस्तदुपाधिवशान्मायित्वञ्च ॥ ९ ॥

चिद्रूपस्य मायावशात् कल्पितावयवभूतैः कार्य्यकारणसङ्घातैः सर्व्वं भूरादीदं परिदृश्यमानं जगद्व्याप्तमित्याह । मायान्त्विति ॥ जगत्प्रकृतित्वे नाधस्तात् सर्व्वं च प्रतिपादिता प्रकृतिर्म्मायैवेति विद्याद्विजानीयात् । तुशब्दोऽवधारणार्थः । महांश्चासावीश्वरश्चेति महेश्वरस्तं मायिनं मायायाः सत्तास्फूर्त्त्यादिप्रदतया अधिष्ठानत्वेन प्रेरयितारमेव विद्यादिति पूर्व्वेण सम्बन्धः । तस्य प्रकृतस्य परमेश्वरस्य रज्वाद्यधिष्ठानेषु कल्पितसर्पादिस्थानीयैर्म्मायिकैः स्वावयवैरध्यासद्वारा इदं भूरादि सर्व्वं व्याप्तमेव पूर्णमित्येतत् । तुशब्दस्त्ववधारणार्थः ॥ १० ॥

मायातत्कार्य्यादियोनेः कूटस्थस्य स्वशक्तितोऽधिष्ठातृत्वं वियदादिकार्य्याणामुत्पत्तिहेतुत्वं तेनैव सर्व्वाधिष्ठातृत्वोपलक्षितसच्चिदानन्दवपुषा ब्रह्मास्मीत्यैकात्म्यज्ञानान्मुक्तिञ्च दर्शयति । यो योनिमिति यो मायाविनिर्म्मुक्तानन्दैकघनः

यस्मिन्निदं स च विचैति सर्व्वं ।
तमीशानं वरदं देवमीड्यं
निचायेमां शान्तिमत्यन्तमेति ॥ ११ ॥

यो देवानां प्रभवश्चोद्भवश्च
विश्वाधिपो रुद्रो महर्षिः ।

परमेश्वरः । योनिं योनिमिति वीप्सया मूलप्रकृतिर्म्मायाऽवान्तरप्रकृतयश्च सूचिताः । ताः प्रकृतीः सत्तास्फूर्त्तिप्रदत्वेनाधिष्ठाय तिष्ठति अन्तर्य्यामिरूपेण । य आकाशे तिष्ठन्नित्यादिश्रुतेः । एको ऽद्वितीयः । यस्मिन्मायाद्यधिष्ठातरीश्वरे इदं सर्व्वं जगदुदयसंहारकाले समेति सङ्गच्छते लयं प्राप्नोति । पुनः सृष्टिकाले विविधमेति आकाशादिरूपेण नाना भवति । तं प्रकृतमधिष्ठातारमीशानं नियन्तारम् । वरदं मोक्षप्रदम् । देवं द्योतनात्मकम् । ईड्यं वेदादिस्तुत्यं निचाय्य निश्चयेन ब्रह्माहमस्मीत्यपरोक्षीकृत्य । सुषुप्तादौ प्रत्यक्षीकृता या सर्व्वोपरमलक्षणा सार्व्वजनी शान्तिरियमार्षिता तां प्रसिद्धामिमां शान्तिं सर्व्वदुःखविनिर्म्मुक्तः सुखैकतानस्वरूपां मुक्तिमिति यावत् । गुरूपदिष्टतत्त्वमादिवाक्यजन्यसुखत्वज्ञानेनाविद्यातत्कार्य्यादिविश्व मायानिवृत्त्याऽत्यन्तं पुनरावृत्तिरहितं यथा भवति तथा एति एकरसो भवतीत्येतत् ॥ ११ ॥

सूत्रात्मानं प्रत्यविरतमभिसुखतया वीक्षन्तं परमेश्वरं

हिरण्यगर्भं पश्यत जायमानं
स नो बुद्ध्या शुभया संयुनक्तु ॥ १२ ॥
यो देवानामधिपो यस्मिँल्लोका अधिश्रिताः ।
य ईशेऽस्य द्विपदश्चतुष्पदः कस्मै
देवाय हविषा विधेम ॥ १३ ॥
सूक्ष्मातिसूक्ष्मं कलिलस्य मध्ये

प्रति अखण्डिततत्त्वज्ञानसिद्धये प्रार्थनामाह । यो देवानामिति ॥ पूर्वमेवास्य प्रतिपादितोऽर्थः ॥ १२ ॥

ब्रह्मप्रमुखानां देवानां स्वामितामाकाशादिलोकाश्रयत्वं प्रमात्रादीनां नियन्तृत्वं बुद्धिशुद्धिद्वारा सम्यक्ज्ञानसिद्ध्यर्थं मुमुक्षुभिः प्रार्थमानत्वञ्च परमेश्वरस्याह । यो देवानामधिप इति ॥ प्रकृतः परमेश्वरो देवानां ब्रह्मादीनामधिपः स्वामी । यस्मिन् परमेश्वरे सर्व्वकारणे भूरादयो लोका अधिश्रिता अधि उपरि श्रिता अध्यस्ता इति यावत् । प्रकृतः परमेश्वरः । अस्य द्विपदो मनुष्यादेश्चतुष्पदः पश्वादेश्चेशे ईष्टे । तकारलोपश्छान्दसः । कस्मै कायान्दरूपाय । स्मै भावोऽपि छान्दसः । देवाय द्योतनात्मने तस्मै हविषा चरुपुरोडाशादिद्रव्येण विधेम परिचरेम । विधेः परिचरणकर्म्मण एतद्रूपम् ॥ १३ ॥

परस्यातिसूक्ष्मत्वं जगच्चक्रे साक्षित्वेनावस्थितत्वं निखिलंजगत्स्रष्टृत्वं सर्व्वात्मकत्वं तत्तादर्थ्यजनानां मुक्तिश्चेत्येतद्दहुशोऽधस्तात् प्रतिपादितं यद्यपि तथापि बुद्धि-

विश्वस्य स्रष्टारमनेकरूपं।
विश्वस्यैकं परिवेष्टितारं
ज्ञात्वा शिवं शान्तिमत्यन्तमेति ॥ १४ ॥
स एव काले भुवनस्यास्य गोप्ता
विश्वाधिपः सर्व्वभूतेषु गूढः।
यस्मिन् युक्ता ब्रह्मर्षयो देवताश्च
तमेवं ज्ञात्वा मृत्युपाशांश्छिनन्ति ॥ १५ ॥

सौकर्य्यार्थं पुनरप्याह। सूक्ष्मेति ॥ पृथिव्याद्यव्याकृतान्तमुत्तरोत्तरं सूक्ष्मसूक्ष्मतरत्वमपेक्ष्येश्वरस्य तदपेक्षया सूक्ष्मतमत्वमाह। सूक्ष्मातीति ॥ कलिलस्याऽविद्यातत्कार्य्यात्मकदुर्गस्य गहनस्य मध्ये अन्तःसाक्षिरूपेणावस्थितत्वं सनकादिभिर्ब्रह्मादिदेवैश्चाधिकारिपुरुषैरप्यात्मतया प्राप्यत्वं साधनचतुष्टयादियुतास्मदादिना ॥ १४ ॥

मोक्षसिद्धिमाह सएवेति ॥ स एव प्रकृतकाले अतीतकल्पेषु जीवसञ्चितकर्म्मपरिपाकसमये भुवनस्य गोप्ता तत्तत्कर्म्मानुगुणतया रक्षिता। विश्वाधिपः विश्वस्वामी। सर्व्वभूतेषु गूढो ब्रह्मादिस्तम्बपर्य्यन्तेषु साक्षिमात्रतयाऽवस्थितः। यस्मिन् चिद्घनानन्दवपुषि परे युक्ता ऐक्यं प्राप्ताः।

ते के। ब्रह्मर्षयः सनकादयः। तमेवेश्वरं ज्ञात्वा ब्रह्माहमस्मीत्यपरोक्षीकृत्य मृत्युपाशान्। मृत्युरविद्या तमोरूपादयश्च पाशाः पश्यन्त इति पाशास्तान्। मृत्युर्वै मर इति श्रुतेः। तत्कार्य्यकामकर्म्म छिनत्ति नाशयति ऐक्यरूपस्वप्रकाशाग्निना दहतीत्यर्थः ॥ १५ ॥

घृतात् परं मण्डमिवातिसूक्ष्मं
ज्ञात्वा शिवं सर्व्वभूतेषु गूढं।
विश्वस्यैकं परिवेष्टितारं
ज्ञात्वा देवं मुच्यते सर्व्वपाशैः ॥ १६ ॥
एष वेदो विश्वकर्म्मा महात्मा
सदा जनानां हृदये सन्निविष्टः।

परस्यात्यन्तातिसूक्ष्मतमत्वमानन्दातिशयवत्वं निर्दोषवत्त्वं जीवेष्विति सूक्ष्मतया स्वरूपेणावस्थानत्वं सर्व्वस्यापि सत्तादिप्रदतया व्यापित्वं तदेकत्वज्ञानात् पाशहानिञ्च दर्शयति। घृतादिति ॥ घृतोपरि विद्यमानं मण्डं सारस्नेहतामतिप्रीतिविषयो यथा तथा सुसुचूणामतिसाररूपानन्दप्रदत्वेन निरतिशयप्रीतिविषयः परमात्मा तद्वद्घृतसारवदानन्दरूपेणात्यन्तसूक्ष्मं ज्ञात्वा शिवमित्येतद्व्याख्यातम्। सर्व्वभूतेषु गूढं ब्रह्मादिस्तम्बपर्य्यन्तेषु जन्तुषु कर्म्मफलभोगसाक्षित्वेन प्रत्यक्षतया वर्त्तमानेऽपि तैस्तिरस्कृतेश्वरभावम्। उत्तरार्द्धं व्याख्यातम् ॥ १६ ॥

निर्भेदसुखैकतानात्मनो विश्वकर्त्तृत्वं तद्व्यापित्वं सन्यासिभिराप्तव्यमोक्षरूपञ्चाह। एष इति ॥ एषः प्रकृतो देवो द्योतनात्मकः। विश्वकर्म्मा महदादिविश्वं कर्म्म क्रियत इति कर्म्म मायावेशाद् विश्वरूपकार्य्यमस्येति विश्वकर्म्मा। महांश्चासावात्मेति महात्मा सर्व्वव्यापीत्यर्थः। सदा सर्व्वदा जनानां हृदये परमे व्योम्नि हृदाकाशे जलाद्युपाधिषु सूर्य्य-

हृदा मनीषा मनसाऽभिक्लृप्तो
य एतद्विदुरमृतास्ते भवन्ति ॥ १७ ॥
यदाऽतमस्तन्न दिवा न रात्रि-
र्न सन्नचासच्छिव एव केवलः ।

प्रतिबिम्बवन्निविष्टः सम्यक्स्थित इत्येतत् । स एव साक्षिरूपेण हृदा हृज्हरण इति स्मरणाद्धरतीति हृत् तेन हृदा नेति नेतीति निषेधोपदेशेन । मनीषा अयं पुरुषार्थोऽयमात्मा पुरुषार्थोऽयमात्मेत्यनात्मेत्येतया विवेकबुद्ध्या । मनसापि विचारसाङ्गैकाग्र्यज्ञानेन च । अभिक्लृप्तः प्रकाशितोऽखण्डैकरसत्वेनाभिव्यक्त इत्येतत् । ये जना साधनचतुष्टयसम्पन्नाः सन्न्यासिन एतत्तत्त्वमस्यादिवाक्यप्रतिपाद्यैकत्वरूपमखण्डैकरसमिति यावत् । विदुः ब्रह्माहमस्मीत्यपरोक्षीकुर्य्युस्ते यथोक्तज्ञानिनोऽमृता भवन्ति अमरणधर्म्माणः पुनरावृत्तिरहिता भवन्तीत्यर्थः ॥ १७ ॥

कालत्रयेऽपि मुक्तौ ध्रियादौ च परमात्मा कूटस्थ इति निश्चयाज्जाग्रत्स्वप्नयोरपि भ्रान्त्या सद्द्वितीयत्वावभासः । वस्तुतस्तु सदा निर्भेद एवेत्याह । यदेति ॥ यदा यस्यामवस्थायामतमो न तमोऽस्येत्यतमः तत्त्वमादिवाक्यजन्यज्ञानेन दीपस्थानीयेन दुग्धाविद्यातत्कार्य्यरूपतमस्कत्वात् तदा तत्काले न दिवा दिवारोपोऽपि नास्ति न रात्रिस्तत्तारोपोऽपि नास्तीति सर्व्वत्रानुषङ्गः । न सन् सत्तारोपोऽपि । नासन् अभावारोपोऽपि । तर्हि तत्त्वं सर्व्वत्र शून्यमेव जातमिति बौद्धमतविशेषमाशङ्क्याह । शिव एवेति ॥ शिव एव शुद्ध-

तदक्षरं तत सवितुर्वरेण्यं
ब्रह्मा च तस्मात् प्रसृता पुराणी ॥ १८ ॥
नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् ।
न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः ॥ १९ ॥
न सन्दृशे तिष्ठति रूपमस्य

स्वभावो निर्विकल्पः शून्यमेवेति निपातार्थः । केवलोऽविद्यादिविकल्पशून्यः । तदक्षरं तदुक्तस्वरूपं न क्षरतीत्यक्षरं नित्यं तत् तत्पदलक्ष्यम् । सवितुरादित्यादिमण्डलाभिमानिनो वरेण्यं सम्भजनीयं प्रज्ञागुरूपदेशात् तत्त्वमादिवाक्यजा बुद्धिः । चकार एवकारार्थः । तस्माच्छुद्धत्वहेतोः प्रसृता नित्या विवेकादिमत्सु सन्न्यासिषु व्याप्ता पूर्णत्वाकारेण । पुराणी ब्रह्माणमनारभ्य परम्परया प्राप्ता अनादिसिद्धा ॥ १८ ॥

कूटस्थस्य ब्रह्मण ऊर्ध्वादिषु दिक्षु केनाप्यपरिग्राह्यत्वमद्वितीयत्वात् केनाप्यतुलितत्वं कालदिगाद्यनवच्छिन्नयशोरूपत्वञ्चाह । नैनमिति ॥ एनं प्रकृतं अपरिच्छिन्नरूपत्वान्निरंशत्वान्निरवयवत्वाच्च ऊर्ध्वादिषु दिक्षु कश्चिदपि न परिजग्रभत् परिग्रहीतुं न शक्नुयात् । तस्य तस्यैवेश्वरस्याखण्डसुखानुभवत्वादेताद्दृग्द्वितीयाभावात् प्रतिमा उपमा नास्ति । यस्य नाम महद्यशो यस्येश्वरस्य नाम अभिधानं महद्दिगाद्यवच्छिन्नं सर्वत्र परिपूर्णं यशः कीर्त्तिः ॥ १९ ॥

ईदृग्यस्येन्द्रियाद्यविषयतां प्रत्यग्रूपतां तदैक्यज्ञानां मोक्षतामाह । न सन्दृश इति ॥ अस्य प्रकृतेश्वरस्य रूपं स्वरूपं

न चक्षुषा पश्यति कश्चनैनं ।
हृदा हृदिस्थं मनसा य एन-
मेवं विदुरमृतास्ते भवन्ति ॥ २० ॥
अजात इत्येवं कश्चिद्भीरुः प्रतिपद्यते ।

रूपादिरहितं निर्विशेषं स्वप्रकाशाखण्डसुखानुभवं सन्दृशे चक्षुरादिग्रहणयोग्यप्रदेशे न तिष्ठति तद्विषयो न भवतीत्येतत् । इन्द्रियागोचरत्वादेवैनं प्रकृतं चक्षुरित्युपलक्षणम् । सर्वेन्द्रियैरपि कश्चन कोऽपि न पश्यति तद्विषयतया ग्रहीतुं न शक्नुयात् । यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यतीत्यादिश्रुतेः । हृदा शुद्धबुद्ध्या । एतद्व्याख्यातं मनसेति । हृदिस्थं हृदाकाशगुहास्थं प्रत्यक्तया तत्रावस्थितम् । ये साधनचतुष्टयादियुक्ताः सन्न्यासिनो योग्याधिकारिण एवं प्रकृतं ब्रह्मात्मनामैवमित्थं ब्रह्माहमस्मीत्यपरोक्षेण विदुर्जानन्ति तेनापरोक्षीकरणमहिम्नाऽमृता भवन्ति अमरणधर्माणो भवन्ति । मरणहेत्वविद्यादेस्तत्त्वज्ञानाग्निना दग्धत्वात् पुनर्देहान्तरं न भजन्तीत्यर्थः ॥ २० ॥

इदानीं तत्प्रसादादेव इष्टानिष्टप्राप्तिपरिहारावितिमत्वा तमेव परमेश्वरं प्रार्थयते मन्त्रद्वयेन । अजात इति । इतिशब्दो हेत्वर्थः । यस्मात्त्वमेवाजातो जन्मजराद्यनायापिपासाधर्मैवर्जितः । इतरत् सर्वं विनाशि दुःखान्वितम् । तस्माज्जन्मजरामरणाद्यनायापिपासाद्योकमोहान्वितात् संसाराद्भीरुर्भीतः सन् कश्चिदेक एव परतन्त्रस्त्वामेव शरणं प्रपद्ये मादृशो वा कश्चित् प्रपद्यत इति प्रथमपुरुषमन्त्रधीयते ।

रुद्र यत्ते दक्षिणं मुखं तेन मां पाहि नित्यं ॥२१॥

मा नस्तोके तनये मा न आयुषि
मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान् मा नो रुद्रभावितोऽवधी-
र्हविष्मन्तः सदसि त्वा हवामहे ॥ २२ ॥

इति श्वेताश्वरोपनिषत्सु चतुर्थोऽध्यायः ॥४॥

हे रुद्र! यत्ते दक्षिणं मुखं उत्साहजननं ध्यातमाह्लादकरमित्यध्याहार्यं । अथवा दक्षिणास्यां दिशि भवं दक्षिणं मुखं तेन मां पाहि नित्यं सर्व्वदा ॥ २१ ॥

किञ्च ॥ मा न इति ॥ मा रीरिष इति सर्व्वैः सम्बध्यते । मा रीरिषः । रोषणं मरणं विनाशं माकार्षीः । नोऽस्माकं तोके पुत्रे तनये पौत्रे न आयुषि । मा नो गोषु मा नो अश्वेषु शरीरिषु । ये चास्माकं वीरा विक्रमन्तो भृत्यास्तान् हे रुद्र! भावितः क्रोधितः सन्नवधीः । कस्मात् यस्माद्वविष्मन्तो हविषा युक्ताः सदसि त्वा हवामहे अस्मिन् सदसि त्वामाह्वयाम इत्यर्थः ॥ २२ ॥

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्य्यस्य श्रीशङ्करभगवतः कृतौ श्वेताश्वतरोपनिषद्भाष्ये चतुर्थोऽध्यायः ॥ ४ ॥ ॐ तत्सत् ॐ ॥

द्वे अक्षरे ब्रह्मपरे त्वनन्ते
विद्याऽविद्ये निहिते यत्र गूढ़े ।
क्षरन्त्वविद्या ह्यमृतं तु विद्या
विद्याविद्ये ईशते यस्तु सोऽन्यः ॥ १ ॥
यो योनिं योनिमधितिष्ठत्येको

चतुर्थाध्यायशेषमपूर्व्वार्थं प्रतिपादयितुं पञ्चमोऽध्याय आरभ्यते । द्वे अक्षर इत्यादिना ॥ द्वे विद्याऽविद्ये यस्मिन्नक्षरे ब्रह्मणो हिरण्यगर्भात् परे ब्रह्मपरे परस्मिन् वा ब्रह्मणि अनन्ते देशतः कालतो वस्तुतो वा अपरिच्छिन्ने । यत्र यस्मिन् द्वे विद्याऽविद्ये निहिते स्थापिते गूढेऽनभिव्यक्ते । विद्याऽविद्ये विविच्य दर्शयति । क्षरत्वविद्या क्षरणहेतुः संसृतिकारणम् । अमृतन्तु विद्या मोक्षहेतुः । यस्तु पुनर्विद्याऽविद्ये ईशते नियमयति स ताभ्यामन्यस्तत्साक्षित्वात् ॥ १ ॥

कोऽसावित्याह । यो योनिमिति ॥ यो योनिं योनिं स्थानं स्थानं यः पृथिव्यां तिष्ठन्नित्यादिनोक्तानि पृथिव्यादीनि अधितिष्ठति नियमयति । एकोऽद्वितीयः परमात्मा । विश्वानि रोहितादीनि रूपाणि योनीश्च प्रभवस्थानानि अधितिष्ठति । ऋषिं सर्व्वज्ञमित्यर्थः । कपिलं कनकं कपिलवर्णं प्रसूतं स्वेनैवोत्पादितम् । हिरण्यगर्भं जनयामास पूर्व्वमित्यस्यैव जन्मश्रवणात् । अन्यस्य वा श्रवणात् । उत्तरत्र । यो ब्रह्माणं विदधाति पूर्व्वम् ।

विश्वानि रूपाणि योनीश्च सर्व्वाः ।
ऋषिं प्रसूतं कपिलं यस्तमग्रे
ज्ञानैर्बिभर्त्ति जायमानञ्च पश्येत ॥ २ ॥

एकैकं जलं बहुधा विकुर्व्व-

यो वै देवांश्च प्रहिणोति तस्मा इति वक्ष्यमाणत्वात् । कपिलोऽग्रज इति पुराणवचनात् । कपिलो हिरण्यगर्भो वा निर्द्दिश्यते ।

कपिलर्षिर्भगवतः सर्व्वभूतस्य वै किल ।
विष्णोरंशो जगन्मोहनाशाय समुपागतः ॥
कृते युगे परं ज्ञानं कपिलादिस्वरूपधृक् ।
ददाति सर्व्वभूतात्मा सर्व्वस्य जगतो हितम् ॥
त्वं शक्रः सर्व्वदेवानां ब्रह्मा ब्रह्मविदामसि ।
वपुर्बलवतां देवो योगिनां त्वं कुमारकः ॥
ऋषीणाञ्च वसिष्ठस्त्वं व्यासो वेदविदामसि ।
साङ्ख्यानां कपिलो देवो रुद्राणामसि शङ्करः ॥

इति परमर्षिः प्रसिद्धः । ततस्तदानीन्तु भुवनमस्मिन् प्रवर्त्तते कपिलं कवीनाम् । स षोडशास्त्रो पुरुषश्च विष्णोर्विराजमानं तमसः परस्तादिति । श्रूयते मुण्डकोपनिषदि स एव वा कपिलः प्रसिद्धः । अग्रे सृष्टिकाले यो ज्ञानैर्धर्म्मज्ञानवैराग्यैश्वर्य्यैर्बिभर्त्ति बभार जायमानञ्च पश्येदपश्यदित्यर्थः ॥ २ ॥

किञ्च । एकैकमिति ॥ सुरनरतिर्य्यगादीनां सृजति जालमेकैकं प्रत्येकं बहुधा नानाप्रकारं विकुर्व्वन् सृष्टि-

न्यस्मिन् चेत्रे संहरत्येष देवः ।
भूयः सृष्ट्वा पतयस्तथेशः
सर्व्वाधिपत्यं कुरुते महात्मा ॥ ३ ॥
सर्व्वा दिश ऊर्द्ध मधश्च तिर्य्यक्
प्रकाशयन् भ्राजते यद्वनड्वान्
एवं स देवो भगवान् वरेण्यो
योनिस्वभावानधितिष्ठतेकः ॥ ४ ॥

कालेऽस्मिन् मायात्मके चेत्रे । संहरत्येष देवः । भूयः पुनर्य्यो लोकानां तयोर्मरीच्यादयस्तान् सृष्ट्वा तथा । यथा पूर्व्वस्मिन् कल्पे सृष्टवानीशः सर्व्वाधिपत्यं कुरुते महात्मा ॥ ३ ॥

किञ्च ॥ सर्व्वा दिश इति ॥ सर्व्वा दिशः प्राच्याद्या ऊर्द्धमुपरिष्टादधश्चाधस्तात् तिर्य्यक् पार्श्वदिशश्च प्रकाशयन् स्वात्मचैतन्यज्योतिषा प्रकाशते भ्राजते दीप्यते ज्योतिषा यत् उ अनड्वान् यद्वदित्यर्थः । यथाऽनड्वानादित्यो जगच्चक्रानुभावने युक्तः । एवं स देवो द्योतनस्वभावो भगवानैश्वर्य्यादिसमन्वितः । वरेण्यो वरणीयः सम्भजनीयः । निष्कारणं कृत्स्नजगतःस्वभावान् स्वात्म भूतान् पृथ्व्यादीन् भावान् अथवा कारणस्वभावान् पृथिव्यादीनधितिष्ठति नियमयति । एकोऽद्वियीयः परमात्मा ॥ ४ ॥

यच्च स्वभावं पचति विश्वयोनिः
पाच्यांश्च सर्व्वान् परिणामयेद्यः।
सर्व्वमेतद्विश्वमधितिष्ठत्येको
गुणांश्च सर्व्वान् विनियोजयेद्यः॥ ५॥
तद्वेदगुह्योपनिषत्सु गूढं
तद्ब्रह्मा वेदते ब्रह्मयोनिम।
ये पूर्व्वं देवा ऋषयश्च तद्विदुस
ते तन्मया अमृता वै बभूवुः॥ ६॥

यच्च स्वभावमिति॥ यच्च यश्चेति लिङ्गव्यत्ययः। स्वभावं यद्यग्नेरौष्ण्यं पचति निष्पादयति विश्वस्य जगतो योनिः। पाच्यांश्च पाकयोग्यान् पृथिव्यादीन् परिणामयेद्यः। सर्व्वमेतद्विश्वमधितिष्ठति नियमयत्येकः। गुणांश्च सत्त्वरजस्तमोरूपान् विनियोजयेद्यः। एवं लक्षणः॥ ५॥

किञ्च॥ वेदगुह्य इति॥ तत् प्रकृतमात्मस्वरूपं वेदानां गुह्योपनिषदो वेदगुह्योपनिषदस्तासु वेदगुह्योपनिषत्सु गूढं संवृतं ब्रह्मा हिरण्यगर्भो वेदते जानाति ब्रह्मयोनिं वेदप्रमाणकमित्यर्थः। अथवा ब्रह्मणो हिरण्यगर्भस्य योनिं वेदस्य वा ये पूर्व्वदेवा रुद्रादय ऋषयश्च वामदेवादयस्ते तद्विदुस्ते तन्मयास्तदात्मभूताः सन्त अमृता अमरणधर्म्माणो बभूवुः। तथेदानीन्तनोऽपि तमेव विदित्वाऽमृतो भवतीति वाक्यशेषः। एतावत्पदार्थ उपवर्णितः॥ ६॥

गुणान्वयो यः फलकर्म्मकर्त्ता
कृतस्य तस्यैव स चोपभोक्ता।
स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा
प्राणाधिपः सञ्चरति स्वकर्म्मभिः॥ ७॥
अङ्गुष्ठमात्रो रवितुल्यरूपः
सङ्कल्पाहङ्कारसमन्वितो यः।
बुद्धेर्गुणेनात्मगुणेन चैव
आराग्रमात्रोऽप्यपरोऽपि दृष्टः॥ ८॥

अथेदानीं त्वंपदार्थमुपवर्ण्यितुमुत्तरे मन्त्राः प्रस्तूयन्ते। गुणान्वय इति॥ गुणैः कर्म्मज्ञानकृतवासनामयैरन्वयो यस्य सोऽयं गुणान्वयः। फलार्थस्य कर्म्मफलस्य स एवोपभोक्ता। स विश्वरूपो नानारूपः कार्य्यकारणोपचितत्वात्। त्रयः सत्त्वाद्यो गुणा अस्येति त्रिगुणः। त्रयो देवयानाद्यो मार्गभेदा अस्येति त्रिवर्त्मा। धर्म्माधर्म्मज्ञानमार्गभेदा अस्येति प्राणस्य पञ्चवृत्तेरधिपः सञ्चरति। कैः। स्वकर्म्मभिः॥ ७॥

अङ्गुष्ठमात्रोऽङ्गुष्ठपरिमितहृदयसुषिरापेक्षया। रवितुल्यरूपो ज्योतिःस्वरूप इत्यर्थः। सङ्कल्पाहङ्कारादिना समन्वितः। बुद्धेर्गुणेनात्मगुणेन च जरादिना। उक्तं जरामृत्यू शरीरस्येति। आराग्रमात्रः प्रतोदाग्रप्रोतलोहकण्टकाग्रमात्रोऽपरोऽपि ज्ञानात्मा दृष्टोऽवगतः। अपिशब्द

वालाग्रशतभागस्य शतधा कल्पितस्य च ।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते ॥९॥
नैव स्त्री न पुमानेष न चैवायं नपुंसकः ।
यद्यच्छरीरमादत्ते तेन तेन स रक्ष्यते ॥१०॥
संकल्पनस्पर्शनदृष्टिमोहै-
र्ग्रासाम्बुवृष्ट्यात्मविवृद्धजन्म ।

एकः सम्भावनायां अपरोऽप्यौपाधिको जलसूर्य इव जीवात्मा सम्भावित इत्यर्थः ॥ ८ ॥

पुनरपि दृष्टान्तान्तरेण दर्शयति ॥ वालाग्रेति ॥ वालाग्रस्य शतकल्पो भेदमापादितस्य यो भागस्तस्यापि शतधा कल्पितस्य भागो जीवः स विज्ञेयः । लिङ्ग-स्यातिसूक्ष्मत्वात् । तत्परिमाणेनाऽयं व्यपदिश्यते । स च जीवस्वरूपेणानन्त्याय कल्पते स्वतः ॥ ९ ॥

किञ्च । नैव स्त्रीति ॥ स्वतोऽद्वितीयापरोक्षब्रह्मा-त्मस्वभाववत्त्वान्नैव स्त्री न पुमानेष नैव चाऽयं नपुंसकः । यद्यत् स्त्रीशरीरं पुरुषशरीरं वाऽऽदत्ते तेन तेन स च विज्ञानात्मा रक्ष्यते संरक्ष्यते । तत्तद्धर्मा नात्मन्यध्यस्या-भिमन्यते । मुक्तोऽहं क्षमोऽहमहं पुमानहं स्त्री अहं नपुंसक इति ॥ १० ॥

केन तर्ह्यसौ शरीराण्यादत्त इत्याह ॥ सङ्कल्पनेति ॥ प्रथमं सङ्कल्पनम् । ततः स्पर्शनं त्वगिन्द्रियव्यापारः । ततो दृष्टिविधानम् । ततो मोहः । तैः सङ्कल्पनस्पर्शन-

कर्म्मानुगान्यनुक्रमेण देही
स्थानेषु रूपाण्यभिसम्प्रपद्यते ॥ ११ ॥
स्थूलानि सूक्ष्माणि बहूनि चैव
रूपाणि देही स्वगुणैर्वृणोति ।
क्रियागुणैरात्मगुणैश्च तेषां
संयोगहेतुरपरोऽपि दृष्टः ॥ १२ ॥
अनाद्यनन्तं कलिलस्य मध्ये
विश्वस्य स्रष्टारमनेकरूपम ।

दृष्टिमोहैः शुभाशुभानि कर्म्माणि निष्पद्यन्ते । ततः कर्म्मानुगानि कर्म्मानुसारीणि स्त्रीपुंनपुंसकलक्षणानि अनुक्रमेण परिपाकापेक्षया । देही मर्त्यः । स्थानेषु देवतिर्य्यङ्मनुष्यादिष्वभिसम्प्रपद्यते । तत्र दृष्टान्तमाह । ग्रासाम्बुनीरन्नपानयोरनियतयोर्दृष्टिरासेचनं निदानमात्मनः शरीरस्य हृद्विर्जायते यथा तद्वदित्यर्थः ॥ ११ ॥

स्थूलानीति ॥ स्थूलान्यश्मादीनि । तानि च सूक्ष्माणि तैजसधातुप्रभृतीनि । बहूनि देवादिशरीराणि । देही विज्ञानात्मा स्वगुणैर्विहितप्रतिषिद्धविषयानुभवसंस्कारैर्वृणोति आदत्ते । ततस्तत्तत्क्रियागुणैरात्मगुणैश्च स देही अपरोऽपि देहान्तरसंयुक्तो भवतीत्यर्थः ॥ १२ ॥

स एवमविद्याकामकर्म्मफलरागादिगुरुभाराक्रान्तोऽलाबुरिव सान्द्रजलनिमग्नो निश्चयेन देहाहंभावमापन्नः प्रेततिर्य्यङ्मनुष्यादिज्योतिष्यावजवी जवीभावमापन्नः

विश्वस्यैकं परिवेष्टितारं
ज्ञात्वा देवं मुच्यते सर्व्वपाशैः ॥ १३ ॥
भावग्राह्यमनीड्याख्यं भावाभावकरं शिवम ।
कलासर्गकरं देवं ये विदुस्ते जहुस्तनुम्॥१४॥
इति श्वेताश्वतरोपनिषत्सु पञ्चमोऽध्यायः ॥५॥
॥ ओं तत् सत् ओं ॥

कथञ्चित् पुण्यवशादीश्वरार्थकर्म्मानुष्ठानेनापगतरागादिमलो नित्यादिदर्शनेनोत्पन्नेहामुत्रार्थफलभोगविरागः शमदमादिसाधनसम्पन्नस्तमात्मानं ज्ञात्वा मुच्यत इत्याह ॥ अनाद्यनन्तमिति ॥ अनाद्यनन्तं आद्यन्तरहितं कलिलस्य मध्ये गहनगभीरसंसारस्य मध्ये विश्वस्य स्रष्टारमुत्पादयितारं अनेकरूपम्। विश्वस्यैकं परिवेष्टितारं स्वात्मना संव्याप्याऽवस्थितम्। ज्ञात्वा देवं ज्योतीरूपं परमात्मानं मुच्यते सर्व्वपाशैरविद्याकामकर्म्मभिः ॥ १३ ॥

केन पुनरसौ गृह्यत इत्याह ॥ भावग्राह्यमिति ॥ भावेन विशुद्धान्तःकरणेन गृह्यत इति भावग्राह्यम्। अनीड्याख्यं नीडं शरीरं अशरीराख्यम्। भावाभावकरं शिवं शुद्धं अविद्यातत्कार्य्यविनिर्म्मुक्तमित्यर्थः। कलानां षोडशानां प्राणादिनामान्तानां स प्राणमसृजतेत्यादीनामाथर्वणोक्तानां सर्गकरं देवं ये विदुरहमस्मीति ते जहुः परित्यजेयुस्तनुं शरीरम्॥ इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्य्यस्य श्रीशङ्करभगवतः कृतौ श्वेताश्वतरोपनिषद्भाष्ये पञ्चमोऽध्यायः॥५॥ ओं तत्सत्

॥ ओं तत् सत् हरिः ओं ॥

स्वभावमेके कवयो वदन्ति
कालं तथान्ये परिमुह्यमानाः ।
देवस्यैष महिमा तु लोके
येनेदं भ्राम्यते ब्रह्मचक्रम् ॥ १ ॥
येनावृतं नित्यमिदं हि सर्व्वं
ज्ञः कालकारो गुणी सर्व्ववित्यः ।
तेनेशितं कर्म्म विवर्त्तते ह
पृथ्व्याप्यतेजोऽनिलखानि चिन्त्यम् ॥२॥

नन्वन्ये कालादयः कारणमिति मन्यन्ते तत् कथं पुनरीश्वरस्य कलासर्गकरत्वमित्याशङ्क्याह । स्वभावमिति ॥ स्वभावमेके कवयो मेधाविनो वदन्ति । कालं तथान्ये । कालस्वभावयोर्ग्रहणं प्रथमाध्याये निर्दिष्टानामन्येषामप्युपलक्षणार्थं । परिमुह्यमाना अविवेकिनो विषयात्मानं न सम्यग् जानन्ति । तु शब्दोऽवधारणे । देवस्यैष महिमा माहात्म्यम् । येनेदं भ्राम्यते परिवर्त्तते ब्रह्मचक्रम् ॥ १ ॥

महिमानं प्रपञ्चयति । येनेति ॥ येनेश्वरेणावृतं व्याप्तमिदं जगन् नित्यं नियमेन । ज्ञः कालकारः कालस्यापि कर्त्ता । गुणी अपहतपाप्मादिमान् । सर्व्वं वेत्तीति सर्व्ववित्यः । तेनेश्वरेणेशितं प्रेरितं कर्म्म क्रियत इति स्वजीव

तत कर्म्म कृत्वा विनिवर्त्त्य भूय-
स्तत्त्वस्य तत्त्वेन समेत्य योगं।
एकेन द्वाभ्यां त्रिभिरष्टभिर्वा
कालेन चैवात्मगुणैश्च सूक्ष्मैः ॥ ३ ॥
आरभ्य कर्म्माणि गुणान्वितानि
भावांश्च सर्व्वान् विनियोजयेद्यः।

फणी। हशब्दः प्रसिद्ध्योतकः। प्रसिद्धं यदेतदीश्वरप्रेरकं कर्म्म विवर्त्तत इति। जगदात्मना यत् पुनस्तत् कर्म्म पृथ्व्यापतेजोऽनिलखानि पृथिव्यादिभूतपञ्चकं यत् प्रथमाध्याये चिन्त्यमित्युक्तम् ॥ २ ॥

एतदेव प्रपञ्चयति। तदिति ॥ तत् कर्म्म पृथिव्यादि सृष्ट्वा विनिवर्त्त्य प्रत्यवेक्षणं कृत्वा भूयः पुनस्तस्यात्मनस्तत्त्वेन भूम्यादिना योगं समेत्य सङ्गमय्य। णिलोपो द्रष्टव्यः। कतिविधैः प्रकारैः। एकेन द्वाभ्यां त्रिभिरष्टभिर्वा प्रकृतिभूतैस्तत्त्वैः। तदुक्तम्।

भूमिरापोऽनिलो वायुः खं मनो बुद्धिरेव च।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥

इति कालेन चैवात्मगुणैश्चान्तःकरणगुणैः कामादिभिः सूक्ष्मैः ॥ ३ ॥

इदानीं कर्म्मणां मुख्यविनियोगं दर्शयति। आरभ्येति ॥ आरभ्य कृत्वा कर्म्माणि गुणैः सत्त्वादिभिरन्वितानि

तेषामभावे कृतकर्म्मनाशः
कर्म्मक्षये याति स तत्त्वतोऽन्यः ॥ ४ ॥
आदिः स संयोगनिमित्तहेतुः
परस्त्रिकालादकालोऽपि दृष्टः ।

योजयेदीश्वरे समर्पयेद् यस्तेषामीश्वरे समर्पितत्वादात्मसम्बन्धाभावस्तदभावे पूर्व्वकृतकर्म्मणां नाशः । उक्तञ्च ॥

यत् करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत् तपस्यसि कौन्तेय ! तत् कुरुष्व मदर्पणम् ॥
शुभाशुभफलैरेवं मोक्ष्यसे कर्म्मबन्धनैः ।
ब्रह्मण्याधाय कर्म्माणि सङ्गं त्यक्त्वा करोति यः ॥
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ।
कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि ॥
योगिनः कर्म्म कुर्व्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ॥

इति च कर्म्मक्षये विशुद्धसत्त्वो याति ततोऽन्यस्तत्त्वेभ्यः प्रकृतिभूतेभ्योऽन्यश्चाविद्यातत्कार्य्यविनिर्म्मुक्तश्चित्सदानन्दाऽद्वितीयब्रह्मात्मत्वेनावगच्छन्नित्यर्थः । अन्यदिति पाठे तत्त्वेभ्यो यदन्यद् ब्रह्म तद्यातीति ॥ ४ ॥

उक्तस्यार्थस्य दृढिम्न उत्तरे मन्त्राः प्रस्तूयन्ते कथं नाम विषयविषान्धाः कथं नाम ब्रह्म जानीयुरित्यत आह । आदिरिति ॥ आदिः कारणं सर्व्वस्य शरीरसंयोगनिमित्तानामविद्यानां हेतुः । उक्तञ्च । एष एव साधु कर्म्म कारयति च । परस्त्रिकालादतीतानागतवर्त्तमानात् । उक्तञ्च ।

तं विश्वरूपं भवभूतमीड्यं
देवं स्वचित्तस्थमुपास्य पूर्वम् ॥ ५ ॥
स वृत्तकालाकृतिभिः परोऽन्यो
यस्मात प्रपञ्चः परिवर्त्ततेऽयम् ।
धर्म्मावहं पापनुदं भगेशं

यस्मादर्व्वाक् संवत्सरोऽहोभिः परिवर्त्तते। तद्देवाः ज्योतिषां ज्योतिः। आयुर्हीपासते। मृतं कस्मात्। यस्मादकालोऽसौ न विद्यन्ते कालाः प्राणादि नामान्ता अस्येत्यकालः। कालवद्धि कालत्रयपरिच्छिन्नमुत्पद्यते विनश्यति च। अयं पुनरकालो निष्प्रपञ्चः। तस्मान् न कालत्रयपरिच्छिन्नमुत्पद्यते विनश्यति च। तं विश्वानि रूपाण्यस्येति विश्वरूपं। भवत्यस्मादिति भवः। भूतमवितथम्स्वरूपं। ईड्यं देवं स्वचित्तस्थं उपास्यायमहमस्मीति समाधानं कृत्वेत्यर्थः ॥ ५ ॥

पूर्व्ववाक्यार्थज्ञानोदयात् पुनरपि तमेव दर्शयति। स वृत्तेति ॥ स वृत्ताकारेभ्यः कालाकारेभ्यः परो वृत्तकालाकृतिभिः परो वृत्तः संसारवृत्तः। उक्तञ्च।

ऊर्द्धमूलो ह्यवाक्शाख एषोऽश्वत्थः सनातन इति। अन्यः प्रपञ्चासंसृष्ट इत्यर्थः। यस्मादीश्वरात् प्रपञ्चः परिवर्त्तते। धर्म्मावहं पापनुदं। भगस्यैश्वर्य्यादेरीशं स्वामिनं ज्ञात्वा। आत्मस्थं आत्मनि बुद्धेः स्थितं। अमृतममरणधर्म्माणं।

ज्ञात्वात्मस्थममृतं विश्वधाम ॥ ६ ॥
तमीश्वराणां परमं महेश्वरं
तं देवतानां परमञ्च दैवतम् ।
पतिं पतीनां परमं परस्ताद्
विदाम देवं भुवनेशमीड्यम् ॥ ७ ॥
न तस्य कार्यं करणञ्च विद्यते
न तत् समश्चाभ्यधिकश्च दृश्यते ।
परास्य शक्तिर्विविधैव श्रूयते

विश्वधाम विश्वस्याधारभूतं यांति ततोऽन्य इति सर्व्वं च सम्बध्यते ॥ ६ ॥

इदानीं विद्वदनुभवं दर्शयन्नुक्तमर्थं दृढ़ीकरोति । तमीश्वराणामिति ॥ तमीश्वराणां वैवस्वतादीनां परमं महेश्वरं । तं देवतानामिन्द्रादीनां परमञ्च दैवतं । पतिं पतीनां प्रजापतीनां परमं । परस्तात् परतोऽचरात् । विदाम देवं द्योतनस्वभावं । भुवनानामीशं भुवनेशं । ईड्यं स्तुत्यम् ॥ ७ ॥

कथं महेश्वरमित्याह । न तस्येति ॥ न तस्य कार्य्यं शरीरं करणं चक्षुरादि विद्यते । न तत् समश्चाभ्यधिकश्च दृश्यते श्रूयते वा । परास्य शक्तिर्विविधैव श्रूयते सा च स्वाभाविकी ज्ञानबलक्रिया च । ज्ञान क्रिया च बलक्रिया

स्वाभाविकी ज्ञानबलक्रियाच ॥ ८ ॥

न तस्य कश्चित् पतिरस्ति लोके
न चेशिता नैव च तस्य लिङ्गं ।
स कारणं करणाधिपाधिपो
न चाऽस्य कश्चिज्जनिता न चाधिपः ॥ ९॥

य स्तूर्णनाभ इव तन्तुभिः प्रधानजैः ।
स्वभावतो देव एकः स्वमावृणोत् ।
स नो दधाद्ब्रह्माप्ययम ॥ १० ॥

च ज्ञानक्रिया सर्व्वविषयज्ञानप्रवृत्तिः बलक्रिया स्वसन्निधिमात्रेण सर्व्वं वशीकृत्य नियमनं । यस्मादेवं तस्मात् ॥८॥

न तस्येति ॥ न तस्य कश्चित् पतिरस्ति लोके । अत एव न तस्येशिता नियन्ता। नैव च तस्य लिङ्गं चिह्नं धूमस्थानीयं येनानुमीयेत । तं सकारणं सर्व्वस्य कारणम् । करणाधिपाधिपः परमेश्वरः । यस्मादेवं तस्मात् न तस्य कश्चिज्जनिता जनयिता न चाधिपः ॥ ९ ॥

इदानीं मन्त्रदृगभिप्रेतमर्थं प्रार्थयते ॥ यस्तूर्णनाभ इति ॥ यथोर्णनाभिरात्मप्रभवैस्तन्तुभिरात्मानमेव समावृणोत्। तथा प्रधानजैरव्यक्तप्रभवैर्नामरूपकर्म्मभिः स्वस्थानीयैः स्वमात्मानमावृणोत् आवृणोति सञ्छादितवान् सः नो मह्यं ब्रह्मणेऽप्ययं ब्रह्माप्ययं एकीभावं दधाद् ददात्वित्यर्थः ॥१०॥

एको देवः सर्व्वभूतेषु गूढः
सर्व्वव्यापी सर्व्वभूतान्तरात्मा ।
कर्म्माध्यक्षः सर्व्वभूताधिवासः
साक्षी चेता केवली निर्गुणश्च॥ ११ ॥
एको वशी निष्क्रियाणां बहूना-
मेकं बीजं बहुधा यः करोति ।

पुनरपि तमेव करतलन्यस्तामलकवत् साक्षाद्दर्शयन् तद्विज्ञानादेव परमपुरुषार्थप्राप्तिर्नान्येनेति दर्शयति मन्त्रद्वयेन। एको देव इति॥ एकोऽद्वितीयो देवः द्योतनस्वभावः। सर्व्वभूतेषु गूढः सर्व्वप्राणिषु संवृतः। सर्व्वव्यापी सर्व्वभूतान्तरात्मा स्वरूपभूत इत्यर्थः। कर्म्माध्यक्षः सर्व्वप्राणिकृतविचित्रकर्म्माधिष्ठाता। सर्व्वभूताधिवासः सर्व्वप्राणिषु वसतीत्यर्थः। सर्व्वेषां भूतानां साक्षी सर्व्वद्रष्टा। साक्षाद्द्रष्टरि सञ्ज्ञायामिति स्मरणात्। चेता चेतयिता। केवलो निरुपाधिकः। निर्गुणः सत्त्वादिगुणरहितः॥ ११ ॥

एको वशीति॥ एको वशी स्वतन्त्रः। निष्क्रियाणां बहूनां। जीवानां सर्व्वा हि क्रिया नात्मनि समवेताः किन्तु देहेन्द्रियेषु। आत्मा तु निष्क्रियो निर्गुणः सत्त्वादिगुणरहितः कूटस्थः सन्नानात्मधर्म्मा नात्मन्यध्यस्ता ऽभिमन्यते कर्त्ता भोक्ता सुखी दुःखी क्षयः स्थूलो मनुष्योऽमुष्य पुत्रोऽस्य नप्तेति॥ उक्तञ्च॥

तमात्मस्थं येऽनुपश्यन्ति धीरा-
स्तेषां सुखं शाश्वतं नेतरेषाम् ॥ १२ ॥
नित्यो नित्यानां चेतनश्चेतनाना-
मेको बहूनां यो विदधाति कामान् ।
तत् कारणं साङ्ख्ययोगाधिगम्यं
ज्ञात्वा देवं मुच्यते सर्व्वपाशैः ॥ १३ ॥

प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्व्वशः ।
अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते ॥
तत्त्ववित्तु महाबाहो गुणकर्म्मविभागयोः ।
गुणा गुणेषु वर्त्तन्त इति मत्वा न सज्जते ॥
प्रकृतेर्गुणसंमूढाः सज्जन्ते गुणकर्म्मसु । इति ॥

एकं बीजं बीजस्थानीयं सूक्ष्मभूतम् । बहुधा यः करोति तमात्मस्थं बुद्धौ स्थितं येऽनुपश्यन्ति साक्षाज्जानन्ति ते धीराः बुद्धिमन्तस्तेषामात्मविदां सुखं शाश्वतं नेतरेषामनात्मविदाम् ॥ १२ ॥

किञ्च । नित्य इति ॥ नित्यो नित्यानां जीवानां मध्ये तन्नित्यत्वेन तेषामपि नित्यत्वमित्यभिप्रायः । अथवा पृथिव्यादीनां मध्ये । तथा चेतनश्चेतनानां प्रमातृणां मध्ये । एको बहूनां जीवानां यो विदधाति प्रयच्छति कामान् कामनिमित्तान् भोगान् । सर्व्वस्य सांख्ययोगाधिगम्यं ज्ञात्वा देवं ज्योतिर्म्मयं मुच्यते सर्व्वपाशैरविद्यादिभिः ॥ १३ ॥

न तत्र सूर्य्यो भाति न चन्द्रतारकम्।
नेमा विद्युतो भान्ति कुतोऽयमग्निः।
तमेव भान्तमनुभाति सर्व्वम्।
तस्य भासा सर्व्वमिदं विभाति॥ १४॥
एको हꣳसो भुवनस्यास्य मध्ये
स एवाग्निः सलिले सन्निविष्टः।

कथं चेतनश्चेतनामित्युच्यते। न तत्रेति। तत्र तस्मिन् परमात्मनि सर्व्वावभासकोऽपि सूर्य्यो न भाति ब्रह्म न प्रकाशयतीत्यर्थः। न हि तस्यैव भासा सर्व्वात्मनो रूपजातं प्रकाशयति। न तु तस्य स्वतः प्रकाशनसामर्थ्यम्। तथा न चन्द्रतारकं। नेमा विद्युतो भान्ति। कुतोऽयमग्निरस्मद्गोचरः। किं बहुना। यदिदं जगद्भाति तमेव स्वतो भारूपत्वाद् भान्तं दीप्यमानमनुभात्यनुदीप्यते। यथा लोहादिवदग्निं दहन्तमनुदहति न स्वतः। तस्यैव भासा दीप्ता सर्व्वमिदं सूर्य्यादि भाति। उक्तञ्च। येन सूर्य्यस्तपति तेजसेद्धः। न तद्भासयते सूर्य्यो न शशाङ्को न पावक इति। ज्ञात्वा देवं मुच्यत इत्युक्तम्॥ १४॥

कस्मात् पुनस्तमेव विदित्वा मुच्यते नान्येनेत्यत्राह। एक इति॥ एकः परमात्मा हन्त्यविद्यादिबन्धकारणमिति हंसः। भुवनस्याऽस्य त्रैलोक्यस्य मध्ये नान्यः कश्चित्। कस्मात्। यस्मात् स एवाग्निः। अग्निरिवाऽग्निरविद्यातत्कार्य्यस्य दाहकत्वात्। उक्तञ्च। व्योमा-

तमेव विदित्वाऽतिमृत्युमेति
नान्यः पन्था विद्यतेऽयनाय ॥ १५ ॥

स विश्वकृद्विश्वविदात्मयोनिः
कालकारो गुणी सर्व्वविद् यः ।
प्रधानक्षेत्रज्ञपतिर्गुणेशः
संसारमोक्षस्थितिबन्धहेतुः ॥ १६ ॥

तीतोऽग्निरीश्वर इति । सलिले देहात्मना परिणते । उक्तञ्चेति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति । सन्निविष्टः सम्यगात्मत्वेन । यथा सलिले सलिल इव स्वच्छे । यज्ञदानादिना विमलीकृतेऽन्तःकरणे सन्निविष्टो वेदान्तवाक्यार्थः सम्यग् ज्ञानफलकारूढोऽविद्यातत्कार्य्यस्य दाहक इत्यर्थः । तस्मात् तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय परमपदप्राप्तये ॥ १५ ॥

पुनरपि विशेषतो दर्शयति ॥ स विश्वकृदिति ॥ स विश्वकृद्विश्वस्य कर्त्ता । विश्वं वेत्तीति विश्ववित् । आत्मा चासौ योनिश्चेत्यात्मयोनिः । सर्व्वस्यात्मा सर्व्वस्य च योनिश्चैतन्यं ज्योतिरित्यर्थः । कालकारः कालस्य कर्त्ता । गुणी अपहतपाप्मादिमान् विश्वविदित्यस्य प्रपञ्चः । प्रधानमव्यक्तम् । क्षेत्रज्ञो विज्ञानात्मा । तयोः पतिः पालयिता । गुणानां सत्त्वरजस्तमसामीशः । संसारमोक्षस्थितिबन्धानां हेतुः कारणम् ॥ १६ ॥

स तन्मयो ह्यमृत ईशसंस्थो
ज्ञः सर्वगो भुवनस्यास्य गोप्ता।
य ईशेऽस्य जगतो नित्यमेव
नान्यो हेतुर्विद्यत ईशनाय ॥ १७ ॥
यो ब्रह्माणं विदधाति पूर्वं
यो वै वेदांश्च प्रहिणोति तस्मै।

स तन्मय इति ॥ स तन्मयो विश्वात्मा। अथवा तन्मयो ज्योतिर्मय इति। तस्य भासा सर्वमिदं विभातीत्येतदपेक्षयोच्यते। अमृतोऽमरणधर्मा। ईशे स्वामिनि सम्यक् स्थितिर्यस्यासावीशसंस्थः। जानातीति ज्ञः। सर्वत्र गच्छतीति सर्वगः। भुवनस्याऽस्य गोप्ता पालयिता। य ईशे ईष्टे। अस्य जगतो नित्यमेव नियमेन नान्यो हेतुः समर्थो विद्यते ईशनाय जगदीशनाय ॥ १७ ॥

यस्मात् स एव संसारमोक्षस्थितिबन्धहेतुस्तस्मात् तमेव मुमुक्षुः सर्वात्मना शरणं प्रपद्येत गच्छेदिति प्रतिपादयितुमाह। यो ब्रह्माणमिति ॥ यो ब्रह्माणं हिरण्यगर्भं विदधाति सृष्टवान् पूर्वं सर्गादौ। यो वै वेदांश्च प्रहिणोति तस्मै। तं ह शब्दोऽवधारणे। तमेव परमात्मानं। उक्तञ्च।

तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः।
नानुध्यायाद् बहूञ्छब्दान् वाचो विग्लापनं हि तत् ॥

तꣳह देवमात्मबुद्धिप्रकाशं
मुमुक्षुर्वै शरणमहं प्रपद्ये ॥ १८ ॥
निष्कलं निष्क्रियꣳ शान्तं निरवद्यं निरञ्जनम् ।
अमृतस्य परꣳ सेतुं दग्धेन्धनमिवानलम् ॥१९॥
यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः ।

तमेवैकं जानथ आत्मानमिव देवं ज्योतिर्मयं । आत्मनि या बुद्धिस्तस्याः प्रसादकरी । प्रसन्ने हि परमेश्वरे बुद्धिरपि तद्विषया प्रमा निष्प्रपञ्चाकारब्रह्मात्मनाऽवतिष्ठते वर्त्तते । आत्मबुद्धिप्रकाशमित्यन्वेऽधीयते । 'आत्मबुद्धिप्रकाशिनीत्या-त्मबुद्धिप्रकाशं । अथवा आत्मैव बुद्धिरात्मबुद्धिः सैव प्रकाशः । सैव प्रकाशोऽस्येति आत्मबुद्धिप्रकाशं मुमुक्षुर्वै वैशब्दोऽवधारणे मुमुक्षुरेव सन् न फलान्तरमिच्छन् शरणमहं प्रपद्ये । एवं तावत् सृष्ट्यादिना यल्लक्ष्यस्वरूपमुपदर्शितम् ॥ १८ ॥

अथेदानीं स्वस्वरूपेण दर्शयति । निष्कलमिति । कला अवयवा निर्गता यस्मात् तन्निष्कलं निरवयवमित्यर्थः । निष्क्रियं स्वमहिमप्रतिष्ठितं कूटस्थमित्यर्थः । शान्तमुपसंहृत-सर्व्वविकारम् । निरवद्यं अगर्हणीयम् । निरञ्जनं निर्लेपम् । अमृतस्य अमृतत्वस्य मोक्षस्य प्राप्तये सेतुरिव सेतुः संसार-महोदधेरुत्तारणोपायत्वात् तं । अमृतस्य पारं सेतुं दग्धेन्ध-नानलमिव देदीप्यमानं झटझटायमानम् ॥ १९ ॥

किमिति तमेव विदित्वा मुच्यते नान्येनेति तत्राह । यदेति ॥ यदा चर्म सङ्कोचयिष्यति तद्वदाकाशं मूर्त्तं व्यापिनं

तदा देवमविज्ञाय दुःखस्यान्तंभविष्यति ॥२०॥

तपः प्रभावाद्देवप्रसादाच्च

यदि वेष्टयन्ति संवेष्टयिष्यन्ति मानवास्तदा देवं ज्योतिर्मय-मनुदितानस्तमितज्ञानात्मनाऽवस्थितमग्रनायाद्यसंस्पृष्टं पर-मात्मानमविज्ञाय दुःखस्याध्यात्मिकस्याधिभौतिकस्याधिदै-विकस्यान्तो विनाशो न भविष्यति। आत्मज्ञाननिमित्तत्वात् संसारस्य। यावत् परमात्मानमात्मत्वेन न जानाति तावत् तापत्रयाभिभूतो मकरादिभिरिव रागादिभिरितस्ततः क्रुष्य माणः प्रेतितिर्यङ्मनुष्यादियोनिष्वज एवं जीवीभावमापन्नो मुह्यमानः संसरति। तदा पुनरपूर्व्वमनपरं नेति नेतीत्यादि-लक्षणमग्रनायाद्यसंस्पृष्टमनुदितानस्तमितज्ञानात्मनावस्थितं पूर्णानन्दं परमात्मानमात्मत्वेन साक्षाज्जानाति तदा निर-स्ताज्ञानतत्कार्य्यः पूर्णानन्दो भवतीत्यर्थः। उक्तञ्च।

अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः।
ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः॥
तेषामादित्यवज् ज्ञानं प्रकाशयति तत् परं।
तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः॥
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्द्धूतकल्मषाः॥ २०॥

सम्प्रदायपरम्परया ब्रह्मविद्याया मोक्षप्रदत्वं प्रदर्शयितुं सम्प्रदायं विद्याधिकारिणश्च दर्शयति। तपःप्रभावादिति॥ तपसः क्रुच्छ्रचान्द्रायणादिलक्षणस्य। तच्च तपःशब्दस्य रूढि-त्वान्नित्यादीनां विधिवदनुष्ठितानां कर्म्मणां मनसश्चेन्द्रि-याणाञ्चैकाग्र्यं परमन्तप इति स्मरणात्। तस्य च सर्व्वस्य

ब्रह्म ह श्वेताश्वतरोऽथ विद्वान्।
अत्याश्रमिभ्यः परमं पवित्रं

तपसस्तस्मिन् श्वेताश्वतरे नियमेन सत्वात् तत्प्रभावात् तत्सामर्थ्याद् वेदप्रसादाच्च कैवल्यमुद्दिश्य तदधिकारसिद्धये बहुजन्मसु सम्यगाराधितपरमेश्वरस्य प्रसादाच्च ब्रह्मापरिच्छिन्नं महत्त्वं। ह इति प्रसिद्धिद्योतनार्थः। श्वेताश्वतरो नाम ऋषिर्विद्वान् यथोक्तं ब्रह्म परम्पराप्राप्तं गुरुमुखाच्छ्रुत्वा मननानिदिध्यासनादरनैरन्तर्यसत्कारादिभिर्ब्रह्माहमस्मीत्यपरोक्षीकृताखण्डसाक्षात्कारवान्। अथ स्वानुभवदार्ढ्यानन्तरं अत्याश्रमिभ्यः। अति पूजायामिति स्मरणात्। अत्यन्तं पूज्यतमाश्रमिभ्यः साधनचतुष्टयसम्पत्तिमहिम्ना स्वेषु देहादिष्वपि जीवनभोगादिष्वनास्थावज्ञाः। अत एव वैराग्यपुष्कलवज्ञाः। तदुक्तम्।

वैराग्यं पुष्कलं न स्याच्चिष्कलं ब्रह्मदर्शनम्।
तस्माद्रक्षेत विरतिं बुधो यत्नेन सर्व्वदेति।

स्मृत्यन्तरे च॥

यदा मनसि वैराग्यं जायते सर्व्ववस्तुषु।
तदैव सन्यसेद् विद्वानन्यथा पतितो भवेत्॥

इति परमहंससन्यासिनस्त एवात्याश्रमिणः। तथा च श्रूयते। न्यास इति ब्रह्म। ब्रह्मा हि परःपरो हि। तानि वा एतान्यवराणि तपाꣳसि। न्यास एवात्यरेचयदिति॥

चतुर्व्विधा भिक्षवश्च बह्वदककुटीचकौ।
हंसः परमहंसश्च यो यः पश्चात् स उत्तमः॥

प्रोवाच सम्य गृषिसङ्घजुष्टम् ॥ २१ ॥
वेदान्ते परमं गुह्यं पुराकल्पे प्रचोदितम् ।

इति स्मरणाच्च । तेभ्योऽत्याश्रमिभ्यः परमं प्रकृतं ब्रह्म तदेव परममुत्कृष्टतमं निरस्तसमस्ताविद्यातत्कार्य्यनिरतिशयसुखैकरसं पवित्रं शुद्धं प्रकृतिप्राकृतादिमलविनिर्मुक्तम् । ऋषिसङ्घजुष्टं वामदेवसनकादीनां सङ्घैः समूहैर्जुष्टं सेवितमात्मत्वेन सम्यक् परिभावितं प्रियतमानन्दत्वेनाश्रितम् । आत्मनस्तु कामाय सर्व्वं प्रियम्भवतीति श्रुतेः । सम्यगात्मतयाऽपरोक्षीकृतं यथा भवति तथा । सम्यगिति काकाक्षिन्यायेन उभयत्रानुसङ्गः कर्त्तव्यः । प्रोवाच उक्तवान् । तथोक्तशिष्यपरीक्षणपूर्व्वकं विद्या वक्तव्या तद्विहायोक्तो दोषः ॥ २१ ॥

विद्याया वैदिकत्वं गुप्तत्वं सम्प्रदायपरम्परया प्रतिपादितत्वञ्चाह । वेदान्त इति ॥ वेदान्त इति जात्यैकवचनम् । सकलासूपनिषत्सु परं परमपुरुषार्थस्वरूपं गुह्यं गोप्यानामपि गोप्यतमं पुराकल्पे प्रचोदितं पूर्व्वकल्पे चोदितमुद्दिष्टमिति सम्प्रदायप्रदर्शनं कृतमिति । एतत् प्रशान्ताय पुत्राय प्रकर्षेण शान्तं सकलरागादिमलरहितचित्तं यस्य तस्मै तादृशपुत्राय तादृशशिष्याय वा दातव्यं वक्तव्यमिति यावत् । तद्विपरीतायाशिष्याय वा स्नेहादिना ब्रह्मविद्या न वक्तव्या । अन्यथा प्रत्यवायापत्तेरिति पुनःशब्दार्थः । अत एव ब्रह्मविद्याविवक्षुणा गुरुणा चिरंकालं

नाप्रशान्ताय दातव्यं नापुत्रायाशिष्याय वा पुनः ॥ २२ ॥

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः
प्रकाशन्ते महात्मनः ॥ २३ ॥ इति श्वेता-

परीक्ष्य शिष्यगुणान् ज्ञात्वा ब्रह्मविद्या वक्तव्येति भावः ॥ तथा च श्रुतिः । भूय एव तपसा ब्रह्मचर्य्येण श्रद्धया संवत्सरं परीक्षेत । श्रुत्यन्तरे च । शतं वर्षं प्रजापतौ मघवान् ब्रह्मचर्य्यमुवासेति च । एतच्च बहुधा प्रपञ्चितमुपदेशसहस्रिकायामित्यत्र सङ्कोचः कृतः ॥ २२ ॥

अत्रापि देवतागुरुभक्तिमतामेव गुरुणा प्रकाशिता विद्याऽनुभवाय भवतीति प्रदर्शयति । यस्येति ॥ यस्य पुरुषस्याधिकारिणो देवे श्रुयता प्रबन्धेन दर्शिताऽखण्डैकरसे सच्चिदानन्दपरज्योतिस्वरूपिणि परमेश्वरे परा उत्कृष्टा निरुपचरिता भक्तिः । एतदुपलक्षणं । अचाञ्चल्यं च यथा चोभे यथा तथा ब्रह्मविद्योपदेष्टृगुरावपि तदुभयं यस्य वर्त्तते तस्य तमशिरसो जलराश्यन्वेषणम् विहाय यथा साधनान्तरं नास्ति । यथा च बुभुक्षितस्य भोजनादन्यत्र साधनानन्तरं न । एवं गुरुकृपां विहाय ब्रह्मविद्या दुर्लभेति त्वरान्वितस्य मुख्याधिकारिणो महात्मन उत्तमस्य एते कथिता अर्थाः श्वेताश्वतरोपनिषदि श्वेताश्वतरेण महात्मना कविना उपदिष्टाः प्रकाशन्ते स्वानुभवाय भवन्ति । द्विर्वचनं मुख्यशिष्यतत्साधनादिदुर्लभप्रदर्शनार्थमध्यायपरिसमाप्त्यर्थमादरार्थञ्च ॥ २३ ॥

श्वेताश्वतरोपनिषत्सु षष्ठोऽध्यायः ।

ओं तत् सत ओं ।

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्य्यस्य श्रीशङ्करभगवतः कृतौ श्वेताश्वतरोपनिषद्भाष्ये षष्ठोऽध्यायः ॥ ओं तत्सत् हरिः ओं ॥

इति श्वेताश्वतरोपनिषत् समाप्ता ॥

वि, ए, उपाधिधारिणा

श्री जीवानन्द विद्यासागर भट्टाचार्येण

संस्कृता ।

